१. इह हि पुरा स्वकीयनिरवद्यविद्यासंयमसम्पदा गणधरप्रत्येकबुद्धश्रुतकेवलिसूत्रकृन्महर्षीणां महिमानमात्मसात्कुर्वन्तोऽमन्दतो निरवद्यस्याद्वादविद्यानर्त्तकीनाट्याचार्यैकप्रवीणाः सकलतार्किकचक्रचूडामणिमरीचिमेचकितचरणनखकिरणाः, कवि-गमक-वादि-वाग्मित्वलक्षणचतुर्विधपाण्डित्यजिज्ञासापिपासाजिहासया, विनयविनतविनेयजनसहितनिजानुभवाः श्रीमदकलङ्कदेवाः प्रादुरासन् । तैश्च सप्तप्रकरणानि विरचितानि । कानि तानीति चेदुच्यते—वृत्तत्रय, लघुत्रय चूलिकाप्रकरणं चेति । तेषामतिविषमत्वान्मन्दधियामवगन्तुमशक्यत्वात् तद्व्युत्पादनार्थं तदर्थमुद्धृत्य धारानगरीवासनिवासवासिनः श्रीमन्माणिक्यनन्दिभट्टारकदेवाः परीक्षामुखाख्यं प्रकरणमारचयाम्बभूवुः । तद्विवरीतुमिच्छवः श्रीमल्लघ्वनन्तवीर्य-

कलाकी कुशलता) रूप चार प्रकारके पाण्डित्यको प्राप्त करनेके इच्छुक विनयावनत शिष्योंकी जिज्ञासारूप पिपासाके शान्त करनेवाले थे। उन्होंने न्यायशास्त्रके परम गम्भीर बृहत्त्रय, लघुत्रय और चूलिका नामक सात प्रकरण रचे। वे अति विषम एवं गहन थे, सर्वसाधारण एवं मन्द-बुद्धि जनोंके लिए उनमें प्रवेश पाना कठिन था, अतएव उनके गम्भीर अर्थका उद्धार करके न्यायशास्त्रमें सर्वसाधारणके व्युत्पादनार्थ धारानगरी-निवासी श्रीमाणिक्य-नन्दिदेवने "परीक्षामुख" नामका एक सूत्रग्रन्थ रचा। उसे सुगम शब्दोंमें विवरण करनेके इच्छुक श्रीमान् लघुअनन्तवीर्यदेवने नास्तिकता-परिहार, शिष्टाचार-परिपालन, पुण्य-सम्प्राप्ति और निर्विघ्न शास्त्र-व्युत्पत्ति, परिसमाप्ति आदिरूप चतुर्विध फलकी अभिलाषासे मङ्गलाचरण करते हुए 'नतामर'-इत्यादि श्लोककी रचना की।

देवाः तदादौ नास्तिकतापरिहार-शिष्टाचारपरिपालन-पुण्यावाप्ति-निष्प्रत्यूहशास्त्रव्युत्पत्त्यादि-लक्षणं चतुर्विधफलमभिलषन्तो नतामरेत्यादिश्लोकमेकं रचयन्ति स्म। तत्रैव प्रत्यवयवार्थप्रतिपत्तिपूर्विका समुदायार्थप्रतिपत्तिरिति मनसि कृत्वा तदवयवार्थघटना प्रथमं प्रतिपत्तव्या। अनन्तरं समुदायार्थप्रवृत्तिर्विधातव्या। ततश्च तात्पर्यार्थः परामर्शनीयः। तत्कथमिति चेदुच्यते—नमस्कारानमस्काराभ्यां विप्रतिपन्नो जिनो धर्मी, स एव नमस्कारार्हो भवति-इति साध्यो धर्मः, दुर्वारमारवीरमदच्छित्त्वे सति नतामरशिरोरत्नप्रभाप्रोतनखत्विट्त्वात्। यो नमस्कारार्हो न भवति स दुर्वारमारवीरमदच्छित्त्वे सति नतामरशिरोरत्नप्रभाप्रोतनखत्विडपि न भवति, यथा रथ्यापुरुषः। दुर्वारमारवीरमदच्छित्त्वे सति नतामरशिरोरत्नप्रभाप्रोतनखत्विट् चायम्, तस्मात् स एवायं नमस्कारार्हो भवतीति निश्चितं नश्चेतः।

मङ्गलं द्विविधं मुख्यममुख्यं चेति। मुख्यमङ्गलं जिनेन्द्रगुणस्तोत्रम्, अमुख्यमङ्गलं दध्यक्षतादि। तत्र मुख्यमङ्गलं द्वेधा—निबद्धमनिबद्धं चेति, तत्र निबद्धं स्वेन कृतं, परकृतं त्वनिबद्धम्। तदपि द्विविधं—परापरभेदात्। आप्तनमस्कारः परमङ्गलम्, गुरुपरम्परानमस्कारोऽपरमङ्गलम्।

२. प्रणतचतुर्णिकायदेवमानवपरिवृढचटुलमुकुटघटितमणिगणकिर्मीरितपदनखमरीचये। ३. जिनाय समस्तभगवदर्हत्परमेश्वरनिकुरम्बाय नमो भूयात्। बहुविधविषमभवगहनभ्रमण-कारणं दुष्कृतगणं जयतीति जिनः, त्रिकालगोचरपरमजिन इत्यर्थस्तस्मै। ४. दुर्वारमारवीर-मदच्छिदे—मां लक्ष्मीं रातीति मारः—लक्ष्मी-दायकः, मोक्षमार्गस्य नेतेति यावत्। विशेषेण ईर्ते सकलपदार्थजातं प्रत्यक्षीकरोतीति वीरः, विश्वतत्त्वानां ज्ञातेति यावत्। मारश्चासौ वीरश्च मारवीरः। मदं मानकषायं छिनत्ति विदारयति-इति मदच्छित्। उपलक्षणमिदं कर्मभूभृतां भेत्तेति यावत्। मारवीरश्चासौ मदच्छिच्च, मारवीरमदच्छित्। दुर्वारो वादिभिर-

[1]अकलङ्कवचोऽम्भोधेरुद्दध्रे[2] येन[3] धीमता[4] ।

विशेषार्थ—इस मङ्गलश्लोकमें पठित 'नतामरशिरोरत्न'-इत्यादि प्रथम पदके द्वारा भवनवासी, व्यन्तर, ज्योतिषी और कल्पवासी इन चार प्रकारके देवोंसे सतत वन्दित त्रिकालवर्ती अरिहन्तोंकी सूचना की गई है। 'जिन' इस द्वितीय पदसे तीनो कालोंमें होनेवाले जिन-समुदायका अभिप्राय है। 'दुर्निवार' इत्यादि अन्तिम पदके द्वारा वीतराग, सर्वज्ञ और हितोपदेशी या मोक्षमार्गके नेतारूप आप्तके तीन विशेषणोंको सूचित किया गया है। जिसका खुलासा इस प्रकार है—'मां लक्ष्मी राति ददातीति मारः' इस प्रकारकी निरुक्तिके अनुसार मारपदसे मुक्तिरूप लक्ष्मीके प्रदाता या मोक्षमार्गके प्रणेता नामक प्रथम आप्तगुणको प्रकट किया गया है। 'विशेषेण ईर्ते सकलपदार्थजातं प्रत्यक्षीकरोतीति वीरः' इस प्रकारकी निरुक्तिके द्वारा सर्वपदार्थोंके प्रत्यक्ष करने या साक्षात् जाननेरूप सर्वज्ञताको वीर पदसे ध्वनित किया गया है। 'मद' यह पद मानकषायके अविनाभावी सभी कषायों और विकार भावोंका सूचक है। उसके छेत्ता या भेत्ता होनेसे कर्मभूभृत्-भेतृत्वरूप वीतरागताकी सूचना की गई है। इस प्रकारसे पूरे श्लोकका समुदायार्थ यह हुआ कि जो सर्व सुर-असुर देवोंसे वन्दित है, अविनाशी मोक्षलक्ष्मीके प्रदर्शक या प्रणेता हैं; अप्रतिहत ज्ञानके धारक अर्थात् सर्वज्ञ हैं, और सर्व प्रकारके राग, द्वेष, मदादि विकारी भावोंके भेत्ता होनेसे वीतराग हैं, ऐसे उन समस्त भूत-भविष्यत् और वर्तमानकालवर्ती जिनेन्द्रोंको हमारा नमस्कार हो।

अब टीकाकार मूलग्रन्थके कर्त्ताको नमस्कार करते हैं—

जिस बुद्धिमान्‌ने अकलङ्कदेवके वचनरूप समुद्रसे न्यायविद्यारूप

जय्योऽप्रतिहतशक्तिरिति यावत्। दुर्वारश्चासौ मारवीरमदच्छिच्च दुर्वारमारवीरमदच्छित्तस्मै। अथवा—मा प्रमेयपरिच्छेदक केवलज्ञानमेव रविः, अशेषप्रकाशकत्वात्। इरा मृदु-मधुरगम्भीरनिरुपमहितदिव्यध्वनिः, मारविश्च इरा च मारवीरे, दुर्वारे, कुहेतुदृष्टान्तैर्निवारयितुमशक्ये मारवीरे यस्य स तथोक्तः। मदेनोपलक्षिता रागादयः, तेन मदच्छिद् रागाद्यशेषदोषच्छिदिति निश्चीयते। उक्तार्थस्यैव विवरणम्—मदच्छिदे कर्मभूभृतां भेत्रे दुर्वारमारवये विश्वतत्त्वानां ज्ञात्रे दुर्वारेराय मोक्षमार्गस्य प्रणेत्रे जिनाय नमः।

१. अकलङ्को महाकलङ्कस्वामी। अथवा न विद्यते अज्ञानादि-कलङ्को यस्यासौ अकलङ्को जिनदेवः। अथवा अकलङ्कश्च तद्वचश्च इति अकलङ्कवचो-दिव्यध्वनिरित्यर्थः। २. प्रकटीकृतम्। ३. माणिक्यनन्दिना कर्त्रा ४. प्रगल्भविशालातिशयिज्ञानवता।

न्याय[1]विद्यामृतं तस्मै नमो माणिक्यनन्दिने ॥२॥
प्रभेन्दुवचनोदारचन्द्रिकाप्रसरे सति ।
मादृशाः[2] क्व नु गण्यन्ते ज्योतिरिङ्गणसन्निभाः[3] ॥३॥
तथापि तद्वचोऽपूर्वरचनारुचिरं सताम् ।
चेतोहरं भृतं यद्वन्नद्या नवघटे जलम् ॥४॥

अमृतका उद्धार किया, उस माणिक्यनन्दी नामक आचार्यके लिए हम नमस्कार हो ॥ २ ॥

विशेषार्थ—लोकमें ऐसी प्रसिद्धि है कि विष्णुने क्षीरसागरको मथ अमृतको निकाला था। इसी लोकोक्तिको दृष्टिमें रखकर टीकाकार अलङ्का रूपसे वर्णन करते हैं कि माणिक्यनन्दी आचार्यने भी अकलङ्क अर्थात् क मल रूप कलङ्कसे रहित ऐसे वीतराग सर्वज्ञके दिव्यध्वनिरूप वचन-समुद्र मथकर न्यायविद्यारूप अमृतको निकाला। अथवा प्रसिद्ध तार्किक अकलङ्कदे नामके आचार्यके विशाल एवं गहन तर्कशास्त्रके ग्रन्थोंका अवगाहन कर परीक्षामुख नामक न्यायशास्त्रके ग्रन्थरूप अमृतका जिसने उद्धार किया, उ माणिक्यनन्दीको हमारा नमस्कार हो।

अब टीकाकार मूलग्रन्थकी प्रमेयकमलमार्तण्ड नामक बड़ी टीका रचयिता आचार्य प्रभाचन्द्रकी महिमा और अपनी लघुताका वर्णन कर हुए अपनी नवीन रचनाकी सार्थकता दो श्लोकों-द्वारा दिखलाते हैं—

प्रभाचन्द्र नामक आचार्यके वचनरूप उदार चन्द्रिकाके प्रसार होते हुए खद्योत-सदृश हम सरीखे मन्द बुद्धिरूप ज्योतिके धारक लोगोंकी क्या गणना संभव है? अर्थात् नहीं। तथापि जिस प्रकार नदीका नवीन घटमें भरा हुआ मधुर जल सज्जनोंके चित्तका हरण करनेवाला होता है, उसी प्रकार प्रभाचन्द्रके वचन ही इस मेरी कृतिरूप नवीन रचनामें भरे जानेपर सज्जनों-के मनको हरण करेंगे ॥ ३-४ ॥

अब टीकाकार अपनी टीका बननेके निमित्तरूप व्यक्तिका उल्लेख करते हैं—

---

१. प्रत्यक्षादिप्रमाणं न्यायः। अथवा नय-प्रमाणात्मिका युक्तिर्न्यायः। निपूर्वादिण् गतावित्यस्माद्धातोः करणे घञ्प्रत्ययः, तेन न्यायशब्दसिद्धिः। नितराम् ईयते ज्ञायतेऽर्थोऽनेनेति न्यायः। २. अहमिव दृश्यन्ते-इति मादृशाः। ३. खद्योतसदृशाः।

वैजेयप्रियपुत्रस्य हीरपस्योपरोधतः ।
[1]शान्तिषेणार्थमारब्धा [2]परीक्षामुखपञ्जिका[3] ॥५॥

[4]श्रीमन्न्या[5]यावारपारस्यामेयप्रमेयरत्नसारस्या[6]वगाहनमव्युत्पन्नैः[7] कर्तुं न पार्यत

वैजेयके प्रिय पुत्र हीरपके अनुरोधसे शान्तिषेण नामक शिष्यके लिए यह परीक्षामुख-पञ्जिका प्रारम्भ की गई है ॥ ५ ॥

विशेषार्थ—मूल सूत्रात्मक ग्रन्थका नाम परीक्षामुख है। परीक्षा नाम वस्तु-स्वरूपके विचार करनेका है। विवक्षित वस्तुका स्वरूप इस प्रकार है कि नहीं, अथवा अन्य प्रकार है; इस प्रकारसे निर्णय करनेको परीक्षा कहते हैं। इस प्रस्तुत ग्रन्थमें प्रमाणके स्वरूप आदिकी परीक्षा की गई है; और इसके द्वारा ही समस्त वस्तुओंकी परीक्षा की जाती है, इसलिए इस ग्रन्थका नाम 'परीक्षामुख' रखा गया है। श्रीलघु अनन्तवीर्य आचार्यने अपनी इस टीकाका नाम 'परीक्षामुख-पञ्जिका' रखा है; क्योंकि इसमें सूत्रके भिन्न-भिन्न पदोंका पृथक्-पृथक् अर्थ किया गया है। इसीका दूसरा नाम प्रमेयरत्नमाला है। प्रमाणके विषयभूत पदार्थको प्रमेय कहते हैं। इसमें विभिन्न प्रमेयरूप रत्न एक सूत्र (सूत-धागा)में पिरोये गये हैं, अर्थात् ग्रथित या निबद्ध किये गये है, इसलिए इसका प्रमेयरत्नमाला नाम भी सार्थक है।

अब आगे पञ्जिकाकार मूलग्रन्थके आदि सूत्रकी उत्थानिका कहते है—

पूर्वापर विरोधसे रहित अतएव अबाधित और श्रद्धानादि गुणोंको

१. शान्तिषेणपठनार्थम्। २. लक्षितस्य लक्षणमुपपद्यते न वेति विचारः परीक्षा। अथवा स्वरूप तदाभासः, संख्या तदाभासः, विषयस्तदाभासः, फलं तदाभासः; एतेषां विचारः परीक्षा। अथवा विरुद्धनानायुक्तिप्राबल्यदौर्बल्यावधारणाय प्रवर्तमानो विचारः परीक्षा। ३. कारिका स्वल्पवृत्तिस्तु सूत्रं सूचनकं स्मृतम्। टीका निरन्तरं व्याख्या पञ्जिका पदभञ्जिका ॥ १ ॥ अल्पाक्षरमसन्दिग्धं सारवद् गूढनिर्णयम्। निर्दोषं हेतुमत्तथ्यं सूत्रं सूत्रविदो विदुः ॥ २ ॥ सूत्रं द्विविधम्—आगमप्रमाणं, अनुमानप्रमाणञ्च। तदुक्तं श्लोकवार्तिकालङ्कारे—प्रमाणमागमः सूत्रमाप्तमूलत्वसिद्धितः। लौकिकं चाविनाभाविलिङ्गात्साध्यस्य निर्णयात् ॥ १ ॥ ४. निर्बाधकत्वलक्षणा श्रद्धानादिगुणोत्पन्नलक्षणा वा श्रीः। पूर्वापरविरोधरहितत्वलक्षणा श्रीः ५. प्रमाणनयात्मिका युक्तिर्न्यायः। प्रमाणशास्त्रक्षीरसमुद्रस्य सीमदित्यादिनियमेन कथञ्चित्सावधारणत्वेन प्रमेयस्वरूपमीयते गम्यते येन स न्यायः। नयप्रमाणरूपा युक्तिः तत्प्रतिपादकत्वात् युक्तिशास्त्रमपि न्यायः। श्रीमाश्चासौ न्यायश्चेति श्रीमन्न्यायः। ६. प्रमाणगोचराः जीवादिपदार्थाः प्रमेयानि, प्रमेयान्येव रत्नानि प्रमेयरत्नानि। प्रमेयरत्नैः सार उत्कृष्ट इति तत्पुरुषो वा ७. युक्तिशास्त्रसंस्काररहितैः पुरुषैः।

इति तदवगाहनाय पोतप्राय[1]मिदं प्रकरणमाचार्यः[2] प्राह । तत्प्रकरणस्य[3] च [4]सम्बन्धादित्रयापरिज्ञाने सति प्रेक्षावतां[5] प्रवृत्तिर्न स्यादिति तत्त्रयानुवादपुरस्सरं[6] वस्तुनिर्देशपरं[7] प्रतिज्ञाश्लोकमाह[8]—

[9]प्रमाणादर्थ[10]संसिद्धिस्तदाभासा[11]द्विपर्ययः ।
इति वक्ष्ये तयोर्लक्ष्म [12]सिद्धमल्पं[13] लघीयसः[14] ॥१॥

उत्पन्न करना ही है लक्षण जिसका ऐसी श्री (लक्ष्मी) से युक्त ऐसा जो प्रमाण-नयात्मक न्यायशास्त्ररूप अपार पारावार (समुद्र) है, और जिसमें अप्रमेय (अगणित) रत्नोंका सार या समुदाय भरा हुआ है, उसके अवगाहन करनेके लिए न्यायशास्त्रके अभ्यासके रहित जो अव्युत्पन्न पुरुष हैं, वे असमर्थ हैं, ऐसा विचार करके श्रीमाणिक्यनन्दी आचार्यने इस न्यायरूप समुद्रमें अवगाहन करनेके लिए पोत (जहाज) के तुल्य इस परीक्षामुख नामके प्रकरणग्रन्थकी रचना की है। इस परीक्षामुखप्रकरणके सम्बन्ध, अभिधेय और शक्यानुष्ठान-इष्ट प्रयोजन इन तीनके जाने विना विचारशील पुरुषोंकी प्रवृत्ति नहीं हो सकती, अतएव आचार्य उन तीनोंके अनुवाद-पूर्वक प्रमाण और प्रमाणाभासरूप वस्तुका निर्देश करनेवाले प्रतिज्ञाश्लोकको कहते हैं—

श्लोकार्थ—प्रमाणसे अर्थात् सम्यक् ज्ञानसे अभीष्ट अर्थकी सम्यक् प्रकार सिद्धि होती है और प्रमाणाभास अर्थात् मिथ्याज्ञानसे इष्ट वस्तुकी संसिद्धि नहीं होती है; इसलिए मैं प्रमाण और प्रमाणाभासका पूर्वाचार्य-प्रसिद्ध एवं पूर्वापर-दोषसे रहित संक्षिप्त लक्षण लघुजनों (मन्द-बुद्धियों) के हितार्थ कहूँगा ॥ १ ॥

१. प्रायो भूमोपमातर्क्यप्रभृत्यन्ननिवृत्तिषु । २. माणिक्यनन्दिदेवः ३. परीक्षामुखस्य । ४. आदिशब्देनाभिधेय शक्यानुष्ठानमिष्टप्रयोजन च । ५. विचारचतुरचेतसाम । ६. उक्तस्यार्थस्य पुनर्वचनमनुवादः । ७. प्रमाणतदाभासलक्षणाभिधेयकथनपरम् । ८. वर्तमानस्याङ्गीकारः प्रतिज्ञा । ९. सम्यग्ज्ञानात्, अत्र प्रमाणशब्दः कर्तृ-करण भावसाधनः । तत्र प्रतिबन्धविगमविशेषवशात् स्वपरप्रमेयस्वरूपं प्रमीयते यथावज्जानातीति प्रमाणमात्मा । साधकतमत्वादिति विवक्षायां तु प्रमीयते येन तत्प्रमाणं प्रमितिमात्रं वा प्रमाणम् । प्रतिबन्धापाये प्रादुर्भूतज्ञानपर्यायस्य प्राधान्येनाश्रयणात्प्रदीपादेः प्रभाभारात्मकप्रकाशवत् । १०. अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु ॥ १ ॥ अर्यते गम्यते ज्ञायतेयः सोऽर्थः । ११. तन्न भवति-इति तथापि तदिवाभासते प्रतिभातीति तदाभासः । १२. स्वरुचि-विरचितत्वदूषणपरिहारार्थं सिद्धमित्युच्यते । १३. पिष्टपेषणपरिहारार्थमल्पमित्युच्यते । १४. कनिष्ठान्मन्दमतीनिति यावत् ।

अस्यार्थः—अहं वक्ष्ये प्रतिपादयिष्ये। किं तत्? लक्ष्म लक्षणम्[1]। किंविशिष्टं लक्ष्म? सिद्धम्, पूर्वाचार्यप्रसिद्धत्वात्। पुनरपि कथम्भूतम्? अल्पम्, अल्पग्रन्थवाच्यत्वात्। ग्रन्थतोऽल्पमर्थतस्तु महदित्यर्थः। कान्? लघीयसो विनेयानुद्दिश्य[2][3]। लाघवं[4] मतिकृतमिह गृह्यते, न परिमाणकृतं नापि कालकृतम्, तस्य प्रतिपाद्यत्वव्यभिचारात्[5][6]। कयोस्तल्लक्ष्म? तयोः प्रमाण-तदाभासयोः। कुतः? यतोऽर्थस्य परिच्छेद्यस्य संसिद्धिः सम्प्राप्तिर्ज्ञप्तिर्वा भवति। कस्मात्? प्रमाणात्। न केवलं प्रमाणादर्थसंसिद्धिर्भवति, विपर्ययो भवति—अर्थसंसिद्ध्यभावो भवति। कस्मात्। तदाभासात् प्रमाणाभासात्। [7]इतिशब्दो

मैं ग्रन्थकार माणिक्यनन्दी प्रमाण और प्रमाणाभासके लक्षणको कहूँगा। वह लक्षण कैसा है? सिद्ध है अर्थात् पूर्वाचार्योंसे प्रसिद्ध है, स्वरुचि-विरचित नहीं है। पुनः कैसा है वह लक्षण? अल्प है, अर्थात् संक्षिप्त शब्दोंसे रचे गये ग्रन्थके द्वारा कहा गया है। यद्यपि वह लक्षण ग्रन्थकी अपेक्षा अल्प (संक्षिप्त) है, तथापि वह अर्थकी दृष्टिसे महान् है। यह लक्षण किसके उद्देश्य से कहा जा रहा है? लघीयस शिष्योंके उद्देश्यसे कहा जा रहा है। लाघव तीन प्रकारका होता है—बुद्धिकृत, कालकृत और शरीर-परिमाणकृत। इनमें-से यहाँपर बुद्धिकृत लाघव ग्रहण करना चाहिए, शरीर-परिमाणकृत और कालकृत लाघव नहीं; क्योंकि उन दोनोंका प्रतिपाद्य जो शिष्य उनके साथ व्यभिचार देखा जाता है। अर्थात् कितने ही अल्प वयके धारक बालक भी विशाल ज्ञानके धारक दृष्टिगोचर होते हैं, अतः यहाँपर कालकृत लाघव अभीष्ट नहीं। तथा कितने ही बौने व्यक्ति भी महान् ज्ञानी दिखाई देते है, अतः शरीरकृत लाघव भी अभीष्ट नहीं है। किन्तु जो बुद्धिसे लघु हैं—मन्दबुद्धि हैं, वे ही प्रकृतमें विवक्षित है, भले ही वे वयमें वृद्ध हों और शरीरमें लम्बे-चौड़े हों।

यहाँपर प्रमाण और प्रमाणाभासका लक्षण कहा जायगा; क्योंकि प्रमाण-से जानने योग्य पदार्थकी संसिद्धि अर्थात् संप्राप्ति या ज्ञप्ति होती है और प्रमाणाभाससे पदार्थकी संसिद्धि नहीं होती है। श्लोक-पठित इति शब्द हेतुके

---

१. व्यतिकीर्णवस्तुव्यावृत्तिहेतुर्लक्षणम्। २. शिष्यान्। ३. अनुलक्ष्यीकृत्य। ४. लाघवं त्रिविधम्—मतिकृतं कालकृतं कायपरिमाणकृतं चेति। तत्रान्त्यद्वयमत्र न ग्राह्यं व्यभिचारात्। तथाहि—चीतः व्युत्पाद्य, कालकृतलाघवात्, इत्यत्र गर्भाष्टमवर्षजात-ज्ञानसम्पन्नेन संयतेन व्यभिचारात्। विमतः प्रतिपाद्यः, कायकृतलाघवात् इत्युक्ते विदितशास्त्रेण कुब्जादिनाऽनेकान्तात्, तयोः व्युत्पादकत्वाभावात्। ५. शिष्यत्व। ६. साध्याभावे प्रवर्तमानो हेतुर्व्यभिचारी भवति। ७. इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु।

हेत्वर्थे, इति हेतोः। अयमत्र समुदायार्थः[1]—यतः कारणात्प्रमाणादर्थसंसिद्धिर्भवति, यस्माच्च तदाभासाद्विपर्ययो भवति; इति हेतोस्तयोः प्रमाण-तदाभासयोर्लक्ष्म लक्षणमहं वक्ष्ये इति।

ननु [2]सम्बन्धाभिधेयशक्यानुष्ठानेष्टप्रयोजनवन्ति हि शास्त्राणि भवन्ति। [3]तत्रास्य प्रकरणस्य यावदभिधेयं सम्बन्धो वा नाभिधीयते, न तावदस्योपादेयत्वं भवितुमर्हति; [4]एष वन्ध्यासुतो यातीत्यादिवाक्यवत्, [5]दश दाडिमादिवाक्यवच्च। तथा शक्यानुष्ठानेष्टप्रयो-

---

अर्थमें है। इस प्रकार श्लोकका यह समुदायार्थ है—यतः प्रमाणसे अर्थकी संसिद्धि होती है और प्रमाणाभाससे नहीं, अतः उन दोनोंका मैं आचार्य-परम्परागत संक्षिप्त लक्षण कहूँगा।

शङ्का—सम्बन्ध, अभिधेय और शक्यानुष्ठान-इष्टप्रयोजनवाले शास्त्र होते हैं। जब तक इस प्रकरणका पूर्वापर सम्बन्ध और अभिधेय (वाच्य अर्थ) नहीं कहा जायगा, तब तक यह बुद्धिमानोंके लिए उपादेय (ग्राह्य) नहीं होगा। जैसे—"यह आकाश-कुसुमोंकी मालाको धारण किये हुए तथा मृग-मरीचिकारूप जलमें स्नान करके शश-शृङ्गके धनुषको लिए हुए वन्ध्या स्त्रीका पुत्र जा रहा है" यह वाक्य उपादेय नहीं है। इस वाक्यमें पूर्वापरसम्बन्ध तो है, परन्तु अभिधेय (वाच्य) रूप पदार्थ कुछ भी नहीं है। इसी प्रकार यदि कोई कहे "दश दाडिम (अनार) हैं, छः पूवा हैं, यह बकरेका चमड़ा है" इन वाक्योंमें अभिधेयपना होते हुए भी पूर्वापर-सम्बन्ध कुछ भी नहीं है, प्रत्युत उन्मत्तके प्रलाप जैसे वचन हैं, अतः वे भी उपादेय नहीं हैं। इसी प्रकार शास्त्रके आदिमें शक्यानुष्ठान-इष्ट प्रयोजन भी अवश्य ही कहना चाहिए।

---

१. अवयवार्थमुक्त्वा समुदायार्थः प्रतिपाद्यते; अवयवार्थप्रतिपत्तिपूर्विका समुदायार्थप्रतिपत्तिरिति न्यायात्। २. सम्बन्धशब्दस्याल्पाच्त्वात्पूर्वनिपातोऽन्यथाऽभिधेयपूर्वकत्वात्सम्बन्धशब्दस्य पूर्वनिपातत्वं नोपपद्यते। प्रकृतस्यार्थस्यानुरोधेनोत्तरोत्तरस्य विधानं सम्बन्धः। सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ १ ॥ व्याख्याशुद्धिस्त्रिधा शास्त्रे स्थानमार्गप्रमेयतः। स्थानं त्रिधा द्विधा मार्गः प्रमेयं च त्रिधा विदुः ॥ २ ॥ श्लोकस्यास्य व्याख्यानं—तत्र पातनिकस्थानं समर्थनस्थानं विवरणस्थानं चेति त्रिधा स्थानम्। पातनिकस्थानं द्विविधं—सूत्रपातनिका ग्रन्थपातनिकेति। अन्वयमार्गो व्यतिरेकमार्ग इति मार्गो द्विधा। प्रकृतप्रमेयं प्रासङ्गिकप्रमेयं आनुषङ्गिकप्रमेयमिति त्रिधा प्रमेयम्। ३. एवं सति त्रिषु। ४. एष वन्ध्यासुतो याति खपुष्पकृतशेखरः। मृगतृष्णाम्भसि स्नात्वा शशशृङ्गधनुर्धरः ॥ १ ॥ अत्र सम्बन्धो वर्तते परन्त्वभिधेयत्वं नास्ति। ५. दश दाडिमानि, षड्-अपूपाः कुण्डकमजाजिनम्, पलितपिण्डः। अथ

जनमपि शास्त्रादावश्यं वक्तव्यमेव, [1]अशक्यानुष्ठानेष्टप्रयोजनस्य सर्वज्वरहरतक्षक[2]चूडारत्नालङ्कारोपदेशस्येव प्रेक्षावद्भिरनादरणीयत्वात् । तथा शक्यानुष्ठानस्याप्यनिष्टप्रयोजनस्य विद्वद्भिरवधीरणा[3]न्मातृविवाहादिप्रदर्शक[4]वाक्यवदिति । सत्यम्[5], प्रमाण-तदाभासपदोपादानादभिधेयमभिहित[6]मेव, प्रमाण-तदाभासयोरनेन प्रकरणेनाभिधानात् । सम्बन्धश्चार्थायातः प्रकरण-तदभिधेययोर्वाच्य[7]-वाचक[8]भावलक्षणः प्रतीयत एव । तथा प्रयोजनं चोक्तलक्षणमादिश्लोकेनैव संलक्ष्यते । प्रयोजनं हि द्विधा भिद्यते—साक्षात्परम्परयेति । तत्र

क्योंकि जो बात इष्ट प्रयोजनवाली होते हुए भी अशक्यानुष्ठान हो अर्थात् जिसका करना शक्य या सम्भव न हो, वह भी बुद्धिमानोंके द्वारा आदरणीय नहीं होती है । जैसे किसी जीर्णज्वरवाले पुरुषके लिए कहना कि—'मणिहारे सर्पके मस्तकके मणिसे सर्व प्रकारका ज्वर दूर हो जाता है ।' उसका यह उपदेश इष्ट प्रयोजनवाला होते हुए भी शक्यानुष्ठान नहीं है अर्थात् सर्पके मस्तकपरसे मणिका लाना शक्य (सम्भव) नहीं, किन्तु अशक्य है । इसी प्रकार जो बात शक्यानुष्ठान होते हुए भी अनिष्ट प्रयोजनवाली होती है, वह भी विद्वज्जनोंके द्वारा अनादरणीय होती है । जैसे किसी पुत्राभिलाषी पुरुषको अपनी माताके साथ विवाह करनेका उपदेश देना । माताके साथ विवाह करना शक्य कार्य तो है, किन्तु वह किसी भी बुद्धिमान्के लिए अभीष्ट नहीं है । अतः वही उपदेश ग्राह्य होता है, जो शक्यानुष्ठान-इष्टप्रयोजन हो ।

समाधान—आपका कथन सत्य है, श्लोक-पठित 'प्रमाण-तदाभास' इन दो पदोंके देनेसे अभिधेयका कथन किया हो गया है, क्योंकि इस प्रकरण-ग्रन्थके द्वारा प्रमाण और प्रमाणाभासका स्वरूप कहा गया है । सम्बन्ध स्वयं ही अर्थ-प्राप्त है, क्योंकि इस प्रकरण-ग्रन्थमें और उसके द्वारा प्रतिपादन किये जानेवाले प्रमाण-प्रमाणाभासमें वाच्य-वाचक भावस्वरूप लक्षणवाला सम्बन्ध स्पष्टतः प्रतीत हो ही रहा है । इसी प्रकार शक्यानुष्ठान लक्षणवाला इष्ट प्रयोजन भी इसी आदिम श्लोकसे संलक्षित हो रहा है । प्रयोजन दो प्रकारका होता है—

गैरुकमेतदहो स्कायीकृतस्यापि ता प्रति शोकः । इत्यमुना सूचितोऽसम्बन्धः । १. शास्त्रादौ शक्यानुष्ठानं मास्तु, इष्टप्रयोजनमस्त्विति शङ्कानिवारणार्थम् । २. तक्षको नागभेदे स्याद्वर्धकि-द्रुमभेदयोरित्यनेकार्थः । तत्र पन्नगार्थोऽत्र ग्राह्यः । ३. अनादरणीयत्वात् ।

४. यजुर्वेदप्रवृत्तिलक्षणे मातरमपि विवृणीयात् पुत्रकाम इति श्रुतिः । ५. अर्धाङ्गीकारे । ६. कथितमेव । ७. वाच्यमभिधेयम् । ८. वाचकं प्रकरणम् ।

'साक्षात्प्रयोजनं 'वक्ष्ये' इत्यनेनाभिधीयते, प्रथमं शास्त्र[2]व्युत्पत्तेरेव विनेयैरन्वेषणात्[1]। पारम्पर्येण तु प्रयोजनमर्थसंसिद्धिरित्यनेनोच्यते, शास्त्रव्युत्पत्त्यनन्तरभावित्वादर्थसंसिद्धेरिति। ननु निःशेषविघ्नोपशमनायेष्टदेवतानमस्कारः शास्त्रकृता[4] कथं न कृत इति न वाच्यम्; तस्य[5] मनःकायाभ्यामपि सम्भवात्। अथवा वाचनिकोऽपि नमस्कारोऽनेनैवादि[6] वाक्येनाभिहितो वेदितव्यः; केषाञ्चिद्वाक्यानामुभयार्थप्रतिपादनपरत्वेनापि दृश्यमानत्वात्। यथा श्वेतो धावतीत्युक्ते 'श्वा इतो धावति, श्वेतगुणयुक्तो धावति' इत्यर्थद्वयप्रतीतिः। तत्रादिवाक्यस्य नमस्कारपरताऽभिधीयते—अर्थस्य हेयोपादेयलक्षणस्य संसिद्धिर्ज्ञप्तिर्भवति। कस्मात्? प्रमाणात्। अनन्तचतुष्टयस्वरूपान्तरङ्गलक्षणा, समवसरणादिस्वभावा बहिरङ्गलक्षणा लक्ष्मीर्मा इत्युच्यते। अणनमाणः[7] शब्दः, मा च आणश्च माणौ। प्रकृष्टौ माणौ

साक्षात् प्रयोजन और परम्परा प्रयोजन। श्लोक पठित 'वक्ष्ये' इस पदके द्वारा साक्षात् प्रयोजन कहा गया है, क्योंकि जिज्ञासु शिष्यजन सर्व-प्रथम शास्त्रकी व्युत्पत्तिका अन्वेषण करते हैं। अतः शास्त्रमें व्युत्पन्न होना साक्षात् प्रयोजन है। तथा श्लोकमें दिये गये 'अर्थ-संसिद्धि' पदसे परम्परा प्रयोजन भी कह दिया गया है; क्योंकि शास्त्रकी व्युत्पत्ति हो जानेके पश्चात् ही पदार्थकी सम्यक् प्रकारसे सिद्धि होती है।

शङ्का—शास्त्रकारने सर्व प्रकारके विघ्नोंको दूर करनेके लिए इष्टदेवताको नमस्कार क्यों नहीं किया?

समाधान—ऐसी शङ्का नहीं करनी चाहिए; क्योंकि इष्ट देवताको नमस्कार मनसे और कायसे भी किया जाना सम्भव है। कहनेका अभिप्राय यह है कि ग्रन्थकारने सम्भव है कि इष्टदेवताको नमस्कार वचन-निबद्ध न करके मनसे ही कर लिया हो। अथवा कायसे साष्टाङ्ग नमस्कार कर लिया हो। अथवा वाचनिक अर्थात् वचन-द्वारा नमस्कार इसी आदि वाक्यसे किया हुआ जानना चाहिए; क्योंकि कितने ही वाक्य उभयार्थक अर्थात् दो-दो अर्थके प्रतिपादन करनेवाले देखे जाते हैं। जैसे 'श्वेतो धावति' ऐसा कहनेपर 'श्वा (कुत्ता) इधर दौड़ता है' और 'श्वेत गुण-युक्त व्यक्ति दौड़ता है,' इन दो अर्थोंकी प्रतीति होती है। सो इस आदि वाक्यमें इष्ट देवताको नमस्काररूप अर्थ भी निहित है, वही कहते है—हेय (त्याज्य) और उपादेय (ग्राह्य) रूप पदार्थकी संसिद्धि कहिए ज्ञान प्रमाणसे होता है। 'प्रमाण' इस पदमें तीन

---

१. शास्त्रव्युत्पत्तिः साक्षात्प्रयोजनम्। २. मतेर्विशेषेण संशयादिव्यवच्छेदेनोत्पत्तिः व्युत्पत्तिरिति व्युत्पत्तेर्लक्षणम्। ३. शोधनात्। ४. माणिक्यनन्दिविभुना। ५. नमस्कारस्य। ६. प्रमाणादर्थसंसिद्धिरित्यनेनैव। ७. अण्यते शब्द्यते येनासावाणः,

यस्यासौ प्रमाणः। हरि-हराद्यसम्भवविभूतियुक्तो दृष्टेष्टाविरुद्धवाक्[1] च भगवान्नर्हन्नेवाभिधीयत इत्यसाधारणगुणोपदर्शनमेव भगवतः संस्तवनमभिधीयते। तस्मात्[2] प्रमाणादवधिभूता[3]दर्थसंसिद्धिर्भवति, तदाभासाच्च हरि-हरादेरर्थसंसिद्धिर्न भवति; इति हेतोः सर्वज्ञ-तदाभासयोर्लक्ष्म लक्षणमहं वक्ष्ये—'सामग्रीविशेषेत्यादिना'।

अथेदानीमुपक्षिप्तप्रमाणतत्त्वे स्वरूप-सङ्ख्या-विषय-फललक्षणासु[4] चतसृषु विप्रतिपत्तिषु मध्ये स्वरूपविप्रतिपत्तिनिराकरणार्थमाह—

शब्द है—प्र + मा + आण = प्रमाण। मा नाम लक्ष्मीका है। वह दो प्रकार की होती है—अन्तरङ्गलक्ष्मी और बहिरङ्गलक्ष्मी। इष्टदेव जो अरिहन्त परमेष्ठी हैं, उनके अनन्त ज्ञान, अनन्त दर्शन, अनन्त सुख, अनन्त वीर्य, यह अनन्त चतुष्टयस्वरूप अन्तरङ्गलक्ष्मी पाई जाती है और समवशरण, अष्ट प्रातिहार्य आदि स्वभाववाली बहिरङ्गलक्ष्मी देखी जाती है। 'अणनं आणः' इस निरुक्ति और 'अण्यते शब्द्यते येनासौ आणो दिव्यध्वनिः' इस व्युत्पत्तिके अनुसार आण शब्दका अर्थ दिव्यध्वनि अर्थात् दिव्यवचन होता है। मा और आणका द्वन्द्वसमास करनेपर माण शब्द बनता है और 'प्र' कहिए प्रकृष्ट अर्थात् सर्वोत्तम, 'माण' कहिए अन्तरङ्ग-बहिरङ्गलक्ष्मी और दिव्यध्वनि जिसके पायी जावे, ऐसा बहुव्रीहि समास करनेपर 'प्रमाण' इस पदका अर्थ अरिहन्त परमेष्ठी होता है इस प्रकार 'प्रमाण' 'पदसे' हरि (विष्णु) हर (महेश) आदिमें असम्भव ऐसी विभूतिसे युक्त, तथा प्रत्यक्ष और अनुमानसे अविरुद्ध वचनवाले भगवान् अरहन्त देव ही कहे गये समझना चाहिए। और भगवान्के असाधारण गुणोंको प्रकट करना ही भगवान्का संस्तवन कहलाता है। इस प्रकार इस आदि श्लोकसे इष्ट देवताको नमस्कार किया गया है ऐसा समझना चाहिए।

अर्थ-संसिद्धिके प्रधान कारणभूत प्रमाणसे अर्थात् भगवान् अरहन्तदेवसे वस्तुस्वरूपका यथार्थ ज्ञान होता है और प्रमाणाभाससे अर्थात् हरि-हरादिसे वस्तुका यथार्थ ज्ञान नही होता, इसलिए सर्वज्ञ और सर्वज्ञाभासका लक्षण मैं 'सामग्रीविशेषविश्लेषिताखिलावरण' इत्यादि वक्ष्यमाण सूत्रके द्वारा कहूँगा। इस प्रकार यह आदिका श्लोक द्व्यर्थक जानना चाहिए।

अब आगे जिसका कथन प्रारम्भ किया है, उस प्रमाणतत्त्वके विषयमें

दिव्यध्वनिरित्यर्थः। १. प्रत्यक्षे परोक्षे च अविरुद्धवाक् यस्य सः। २. अर्थद्वारेण साधित-भगवतोऽर्हत्स्वामिनात् सर्वज्ञात्। ३. अर्थसंसिद्धेः प्रथमकारणभूतात्।

४. स्वरूपसंख्याविषयफललक्षणाश्चतस्रो विप्रतिपत्तयः। सम्प्रति तासां मध्ये

विभिन्न वादियोंको चार प्रकारकी विप्रतिपत्तियाँ है—स्वरूपविप्रतिपत्ति, संख्याविप्रतिपत्ति, विषयविप्रतिपत्ति और फलविप्रतिपत्ति। इन चारोंमें-से पहले ग्रन्थकार स्वरूपविप्रतिपत्तिके निराकरण करनेके लिए सूत्र कहते हैं।

विशेषार्थ—विप्रतिपत्ति नाम विवादका अर्थात् अन्यथा जाननेका है। प्राय: सभी मतावलम्वी लोग प्रमाणका स्वरूप, उसकी संख्या, प्रमाणका विषय और उसका फल भिन्न-भिन्न प्रकारसे मानते है। न्यायशास्त्रके अभ्यासियोंको उनका जानना आवश्यक है, अतः यहाँपर उनका कुछ दिग्दर्शन कराया जाता है—अर्हन्मतानुयायी जैन लोग स्व और अपूर्व अर्थके निश्चय करनेवाले ज्ञानको प्रमाण मानते हैं। कपिलमतानुसारी सांख्य लोग इन्द्रियवृत्तिको प्रमाण मानते हैं। प्राभाकर प्रमाताके व्यापारको प्रमाण मानते हैं। भाट्ट नहीं जाने हुए पदार्थके जाननेको प्रमाण कहते हैं। बौद्ध अविसंवादी ज्ञानको प्रमाण कहते हैं। यौग प्रमा (प्रमिति)के करणको प्रमाण कहते है। वृद्ध नैयायिक कारकसाकल्यको प्रमाण कहते हैं और नवीन या लघु नैयायिक सन्निकर्षको प्रमाण मानते है। इस प्रकार प्रमाणके स्वरूपके विषयमें विवाद है, इसीका नाम स्वरूपविप्रतिपत्ति है। इसी प्रकार प्रमाणकी संख्याके विषयमें भी विवाद है—चार्वाक एक प्रत्यक्षको ही प्रमाण मानता है। बौद्ध लोग प्रत्यक्ष और अनुमानको प्रमाण मानते है। सांख्य तीन प्रमाण मानते हैं—प्रत्यक्ष, अनुमान और शब्द (आगम)। नैयायिक उक्त तीनके साथ उपमानको मिलाकर चार प्रमाण मानते हैं। प्राभाकर उक्त चारके साथ अर्थापत्तिको मिलाकर पाँच प्रमाण मानते हैं। भाट्ट लोग प्रत्यक्ष, अनुमान, उपमान, आगम, अर्थापत्ति और अभाव ये छह प्रमाण मानते है। पौराणिक लोग इनके अतिरिक्त सम्भव ऐतिह्य आदिको भी प्रमाण मानते है। जैन लोग प्रत्यक्ष और परोक्ष ये दो ही

स्वरूपविप्रतिपत्तिर्यथा—स्वापूर्वार्थव्यवसायात्मक ज्ञानं प्रमाणमित्यार्हताः। इन्द्रियवृत्तिः प्रमाणमिति कापिलाः। प्रमातृव्यापारः प्रमाणमिति प्राभाकराः। अनधिगतार्थाधिगन्तृ प्रमाणमिति भाट्टाः। अविसंवादिविज्ञान प्रमाणमिति सौगताः। प्रमाकरण प्रमाणमिति यौगाः। कारकसाकल्यं प्रमाणमिति जयन्ताः। इन्द्रियार्थयोः सम्बन्धः सन्निकर्षः, कारकाणां समूहः कारकसाकल्यम्। लघुनैयायिकाना सन्निकर्षः प्रमाणम्। जरन्नैयायिकाना कारकसाकल्य प्रमाणमिति। संख्याविप्रतिपत्तिर्यथा—प्रत्यक्षमेकं चार्वाकाः कारणात्सौगताः पुनः। अनुमान च तच्चैव साख्याः शब्दं च ते अपि ॥ १ ॥ न्यायैकदेशिनोऽप्येवमुपमान च तेन च। अर्थापत्त्या सहैतानि चत्वार्याहुः प्रभाकराः ॥ २ ॥ अभावषष्ठान्येतानि भाट्टाः वेदान्तिनस्तथा। सम्भवैतिह्ययुक्तानि तानि पौराणिकाः जगुः ॥ ३ ॥ एतत्सर्वं युक्तं

[1]स्वापूर्वार्थ[2]व्यवसायात्मकं ज्ञानं[3] प्रमाणम्[4] ॥ १ ॥

प्रमाणके भेद मानते हैं। इस प्रकारसे प्रमाणकी संख्याके विषयमें सभीका विवाद है, इसीका नाम संख्याविप्रतिपत्ति है। प्रमाणके विषयमें भी इसी प्रकारका विवाद है—कापिल और पुरुषाद्वैतवादी सामान्यतत्त्वको ही प्रमाण-का विषय मानते है। बौद्ध विशेषतत्त्वको ही प्रमाणका विषय मानते हैं। यौग स्वतन्त्र सामान्य और स्वतन्त्र विशेष दोनोंको प्रमाणका विषय मानते हैं। मीमांसक अभेदरूपसे सामान्य और विशेषको प्रमाणका विषय मानते है। जैन लोग कथञ्चित् सामान्य-विशेषात्मक पदार्थको प्रमाणका विषय मानते हैं। यह प्रमाणकी विषय-विप्रतिपत्ति है। इसी प्रकार प्रमाणके फलके विषयमें भी विवाद है—कापिल और यौग प्रमाणसे प्रमाणका फल सर्वथा भिन्न ही मानते हैं। बौद्ध प्रमाणसे फलको अभिन्न ही मानते हैं। जैन लोग प्रमाणसे फलको कथञ्चित् भिन्न और अभिन्न मानते हैं। यह प्रमाणकी फल-विप्रति-पत्ति हैं। इनमेंसे ग्रन्थकार सबसे पहले प्रमाणकी स्वरूप-विप्रतिपत्तिका निरा-करण करते हैं। शेष तीनों विप्रतिपत्तियोंका आगे यथास्थान निराकरण किया जायगा।

सूत्रार्थ—स्व अर्थात् अपने आपके और अपूर्वार्थ अर्थात् जिसे किसी अन्य प्रमाणसे जाना नहीं है, ऐसे पदार्थके निश्चय करनेवाले ज्ञानको प्रमाण कहते हैं॥ १ ॥

न सम्भवति। प्रत्यक्षपरोक्षभेदाद् द्विविधं प्रमाणमिति जैनाः वदन्ति। विषयविप्रति-पत्तिर्यथा—प्रमाणतत्त्वस्य सामान्यमेव विषयो न पुनः विशेष इति कापिलाः, पुरुषा-द्वैतवादिनश्च। विशेषमेव विषयो न पुनः सामान्यमिति बौद्धाः। सामान्यं विशेषश्च द्वयमपि स्वतन्त्रभावेन विषय इति यौगाः। सामान्यं विशेषश्च भेदेन विषय इति मीमां-सकाः। उभाविति कथञ्चिद्भेदाभेदाभ्यां विषय इति जैनाः। फलविप्रतिपत्तिर्यथा—फलं प्रमाणाद्भिन्नमिति कापिलाः यौगाश्च। प्रमाणादभिन्नमिति सौगताः। प्रमाणात्फलं कथञ्चि-द्भिन्नमभिन्नं चेति जैनाः।

१. सूत्रं द्विविधम्। तद्यथा—आगमप्रमाणमनुमानप्रमाणञ्च। तदुक्तं श्लोकवा-र्तिकालङ्कारे—प्रमाणमागमः सूत्रमाप्तमूलत्वसिद्धितः। लैङ्गिकं चाविनाभाविलिङ्गात्साध्यस्य निर्णयात्॥ तथेदं सूत्रमनुमानप्रमाणं भवति, अल्पाक्षरत्वे सति बह्वर्थसूचकत्वात्सूत्रत्वम्। अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥१॥

२. स्वस्यात्मनोऽपूर्वार्थस्यानिश्चितस्य बाह्यस्य पदार्थस्येति स्वापूर्वार्थयोर्निश्चयस्वरूपकम्।

(३ ४ नं० की टिप्पणी पृ० १४ में देखें)

प्रकर्षेण [१]संशयादिव्यवच्छेदेन मीयते परिच्छिद्यते वस्तुतत्त्वं येन तत्प्रमाणम्। तस्य च ज्ञानमिति विशेषणमज्ञानरूपस्य [२]सन्निकर्षादेर्नैयायिकादिपरिकल्पितस्य प्रमाणत्वव्यवच्छेदार्थमुक्तम्। तथा ज्ञानस्यापि [३]स्वसंवेदनेन्द्रियमनोयोगिप्रत्यक्षस्य निर्विकल्पकस्य प्रत्यक्षत्वस्य प्रामाण्यं सौगतैः परिकल्पितम्, तन्निरासार्थं [४]व्यवसायात्मकग्रहणम्। तथा बहिरर्थापह्नोतॄणां[५] विज्ञानाद्वैतवादिनां पुरुषाद्वैतवादिनां पश्यतोहराणां[६] शून्यैकान्तवादिनाञ्च [७]विपर्यासव्युदासार्थमर्थग्रहणम्। अस्य चापूर्वविशेषणं गृहीतग्राहिधारावाहिज्ञानस्य

जिसके द्वारा प्रकर्षसे अर्थात् संशय, विपर्यय और अनध्यवसायके व्यवच्छेद (निराकरण) से वस्तु-तत्त्व जाना जाय, वह प्रमाण कहलाता है। सूत्रमें ऐसे प्रमाणके लिए जो ज्ञान विशेषण दिया गया है, वह नैयायिकादि मतावलम्बियोंके द्वारा परिकल्पित अज्ञानरूप सन्निकर्षादिकी प्रमाणताके निराकरणके लिए दिया गया है। बौद्ध लोग यद्यपि ज्ञानको प्रमाण मानते है, तथापि वे प्रत्यक्ष प्रमाणके स्वसंवेदन प्रत्यक्ष, इन्द्रियप्रत्यक्ष, मानसप्रत्यक्ष और योगिप्रत्यक्ष ऐसे चार भेद मान करके भी निर्विकल्पक प्रत्यक्षको ही प्रमाण मानते हैं अर्थात् उनके मतानुसार प्रत्यक्षप्रमाण वस्तुका निश्चायक नहीं है। उनके इस सिद्धान्तके निरासके लिए सूत्रमें 'व्यवसायात्मक' पदका ग्रहण किया गया है। तथा बाह्य पदार्थका अपलाप (लोप) करनेवाले विज्ञानाद्वैतवादी, पुरुषाद्वैतवादी लोगोंके और प्रत्यक्ष दिखनेवाले पदार्थोंका भी लोप करनेवाले शून्यै-

३. मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानमिति सम्यग्ज्ञानानां सामान्यज्ञानपदेन संग्रहात् हेतुहेतुमद्भावज्ञापनार्थं ज्ञानमिति पृथक् पदम्। ज्ञानं प्रमाण भवितुमर्हति; स्वापूर्वार्थव्यवसायात्मकत्वात्। अत्र ज्ञानमिति विशेषणेनाव्याप्तिपरिहारः। व्यवसायात्मकमिति विशेषणेनातिव्याप्तिपरिहारः। स्वपदेनासम्भवदोषनिराकरणम्।
४. प्रमेयप्रमितेराभिमुख्येन चेतनात्मकः। यः प्रमातुः प्रयत्नः स्यात्तत्प्रमाणं जिनैर्मतम्॥

१. सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः। आदिशब्देन विपर्ययानध्यवसायौ ग्राह्यौ। २. इन्द्रियार्थयोः सम्बन्धः सन्निकर्षः। कारकाणां समूहः कारकसाकल्यम्। लघुनैयायिकाना सन्निकर्षो जरन्नैयायिकानां कारकसाकल्यम्, कापिलानामिन्द्रियवृत्तिः प्राभाकराणां ज्ञातृव्यापारोऽज्ञानरूपोऽपि। ३. सर्वचित्तचैत्तानामात्मसंवेदनं स्वसंवेदनप्रत्यक्षम्। इन्द्रियार्थसमनन्तरभवमिन्द्रियप्रत्यक्षम्। स्वविषयानन्तरविषयसहकारिकारणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं मनःप्रत्यक्षम्। क्षणिकभावनापरमप्रकर्षपर्यन्तजं योगिप्रत्यक्षं योगाचारवेदान्तिकमाध्यमिकानाम्। सर्वं माध्यमिके शून्यं योगाचारेऽन्तर्बहिर्गतम्। सौत्रान्तिकेऽनुमेयं स्यात्सर्वं वैभाषिके स्फुटम्॥ ४. निश्चयात्मकम्। ५. अपलापिनाम्। ६. पश्यन्तमनादृत्य हर्तॄणाम्। ७. विपर्ययनिराकरणार्थम्।

प्रमाणतापरिहारार्थमुक्तम्। तथा 'परोक्षज्ञानवादिनां[1] मीमांसकानामस्वसंवेदनज्ञानवादिनां[2] सांख्यानां ज्ञानान्तरप्रत्यक्षज्ञानवादिनां[3] यौगानाञ्च[4] मतमपाकर्तुं स्वपदोपादानम्। इत्यव्या[5]प्त्यतिव्याप्त्य[6]सम्भव[7]दोषपरिहारात् सुव्यवस्थितमेव प्रमाणलक्षणम्। अस्य च प्रमाणस्य यथोक्तलक्षणत्वे साध्ये प्रमाणत्वादिति हेतुरत्रैव द्रष्टव्यः, [8]प्रथमान्तस्यापि हेतुपरत्वेन निर्देशोपपत्तेः; प्रत्यक्षं विशदं ज्ञानं' इत्यादिवत्।

कान्त वादियोंके विपरीत मतोंके निराकरण करनेके लिए सूत्रमें 'अर्थ' पदका ग्रहण किया गया है। अर्थपदके साथ जो 'अपूर्व' विशेषण दिया गया है वह गृहीतग्राही धारावाहिक ज्ञानकी प्रमाणताके परिहार करनेके लिए दिया है। तथा परोक्षज्ञानवादी मीमांसकों, अस्वसंवेदनज्ञानवादी सांख्यों और ज्ञानान्तर-प्रत्यक्षज्ञानवादी यौगोंके मतोंका निराकरण करनेके लिए सूत्रमें 'स्व' पदका उपादान (ग्रहण) किया गया है। इस प्रकार अव्याप्ति, अतिव्याप्ति और असम्भव नामक लक्षणके जो तीन दोष न्यायशास्त्रमें माने गये हैं, उनके परिहार हो जानेसे प्रमाणका सूत्रोक्त लक्षण सुव्यवस्थित सिद्ध होता है।

इस प्रमाणके यथोक्त लक्षणत्वको साध्य माननेपर प्रमाणत्व हेतु भी यहीं कहा गया जानना चाहिए।

भावार्थ—इस वाक्यमें अनुमान-प्रयोगके द्वारा प्रमाणकी प्रमाणताका निरूपण किया गया है। यथा—स्वापूर्वार्थव्यवसायात्मक ज्ञान प्रमाण है, प्रमाणता होनेसे। इस वाक्य-प्रयोगमें प्रमाण पद धर्मी (पक्ष) है, स्वापूर्वार्थ-व्यवसायात्मक ज्ञान साध्य है और प्रमाणत्व हेतु है।

शङ्का—हेतुमें पञ्चमी विभक्तिका प्रयोग किया जाता है, किन्तु सूत्रमें प्रमाण पदके तो प्रथमा विभक्तिका ही प्रयोग किया गया है, अतः वह प्रमाण पद हेतुरूपसे कैसे समझा जाय?

समाधान—यह कोई दोष नहीं, क्योंकि कितने ही स्थलोंपर प्रथमा-विभक्त्यन्त पदका भी हेतुरूपसे निर्देश किया गया है। जैसे 'विशद ज्ञान प्रत्यक्ष है' यहांपर प्रत्यक्ष धर्मी है, विशद ज्ञान साध्य है और प्रत्यक्षत्व हेतु है। इसी प्रकार अन्यत्र भी जानना।

---

१. परोक्षं जैमिनेर्ज्ञानं ज्ञानमात्मा प्रभाकृतः। ज्ञानं फलं च भट्टस्य शेषं प्रत्यक्ष-मिष्यते॥ २. ज्ञानमस्वसंविदितमचेतनत्वात्, ज्ञानमचेतनं प्रधानपरिणामित्वादिति वादिनाम्। ३. एकात्मसमवेतानन्तरज्ञानवेद्यमर्थज्ञानं न स्वसंवेदितमित्यर्थः। ४. नैयायिकवैशेषिकाणाम्। ५. लक्ष्यत्वेनाभिमतेषु वस्तुषु क्वचित्प्रवर्तनं क्वचिच्चाप्रवर्तनमव्याप्तिः ६. लक्ष्येऽलक्ष्ये च वर्तनमतिव्याप्तिः। ७. यत्र लक्ष्ये क्वाप्यवर्तनमसम्भवः। ८. पञ्चम्यन्तस्यैव

तथाहि-प्रमाणं स्वापूर्वार्थव्यवसायात्मकं ज्ञानं भवति, प्रमाणत्वात्। यत्तु स्वापूर्वार्थव्यवसायात्मकं ज्ञानं न भवति, न तत्प्रमाणम्, यथा [1]संशयादिर्घटादिश्च। प्रमाणञ्च विवादापन्नम्[2]। [3]तस्मात्स्वापूर्वार्थव्यवसायात्मकं ज्ञानमेव भवतीति। न च प्रमाणत्वमसिद्धम्; सर्वप्रमाणस्वरूपवादिनां प्रमाणसामान्ये[5] विप्रतिपत्त्यभावात्, [6]अन्यथा स्वेष्टानिष्टसाधन-दूषणायोगात्[7]।

अथ धर्मिण एव हेतुत्वे [8]प्रतिज्ञार्थैकदेशासिद्धो हेतुः स्यादिति चेन्न, विशेषं धर्मिणं कृत्वा सामान्यं हेतुं ब्रुवतां दोषाभावात्।

अब उक्त प्रयोगका खुलासा करते हैं—स्वापूर्वार्थव्यवसायात्मक ज्ञान प्रमाण है, क्योंकि प्रमाणता उसीमें पाई जाती है। जो स्वापूर्वार्थव्यवसायात्मक ज्ञान नहीं, वह प्रमाण भी नहीं है। जैसे-संशयादिक स्वापूर्वार्थव्यवसायात्मक ज्ञान नहीं, अतः प्रमाण नहीं। तथा जैसे घट-पटादिक स्वार्थपूर्वाव्यवसायात्मक ज्ञान नहीं, अतः वे भी प्रमाण नहीं है। यतः प्रमाण स्वापूर्वार्थव्यवसायात्मक होता है, अतः वह ज्ञान ही हो सकता है। यहां प्रमाणत्वरूप हेतुका कथन असिद्ध भी नहीं है, क्योंकि प्रमाणका स्वरूप माननेवाले किसी भी वादीको प्रमाणसामान्यके माननेमें कोई भी विवाद नहीं है। यदि प्रमाणको न माना जाय तो अपने इष्ट तत्त्वका साधन और अनिष्ट तत्त्वका दूषण नहीं बन सकता है।

शङ्का—ऊपर अनुमानका प्रयोग करते हुए प्रमाणरूप धर्मीका ही हेतुरूपसे प्रयोग किया गया है, अतः वह हेतु न रह कर प्रतिज्ञार्थैकदेशासिद्ध नामका हेत्वाभास हो गया है और हेत्वाभाससे अभीष्ट साध्यकी सिद्धि होती नहीं है।

समाधान—यह कहना ठीक नहीं है; क्योंकि प्रमाणविशेषको धर्मी मानकर प्रमाणसामान्यको हेतुरूपसे प्रयोग करनेपर कोई दोष नहीं है।

हेतुत्वात्-प्रथमान्तस्य कथं हेतुत्वमिति शङ्कायामाह—प्रथमान्तस्येति। यथा—गुरवो राजमाषा न भक्षणीया इत्यत्र प्रथमान्तोऽपि गुरुत्वादिति हेतुः। प्रत्यक्षं धर्मी विशदं ज्ञानं भवितुमर्हति; प्रत्यक्षत्वात्।

१. बौद्धान् प्रति दृष्टान्तः। २. नैयायिकान् प्रति दृष्टान्तः। ३. निगमनम्। ४. प्रमाणत्वात्। ५. सर्वेषु प्रमाणेषु प्रमाणत्वसम्भवात् विवादाभावात् सामान्यनैककथनात्। ६. प्रमाणाभावे। ७. शून्यवादिनाम्।

८. धर्मधर्मिसमुदायः प्रतिज्ञा तदेकदेशो धर्मो धर्मी वा हेतुश्चेत् प्रमाणत्वस्य स्वरूपासिद्धत्वं माभूत्, प्रतिज्ञार्थैकदेशासिद्धत्वं स्यादित्याशङ्क्यते।

[1]एतेनापक्षधर्मत्व[2]मपि प्रत्युक्तम्[3], सामान्यस्याशेषविशेषनिष्ठत्वात् । न च पक्षधर्मताबलेन हेतोर्गमकत्वम्, अपि त्वन्यथानुपपत्ति[4]बलेनेति । सा चात्र नियमवती[5] विपक्षे [6]बाधकप्रमाणबलान्निश्चितैव । एतेन[7] विरुद्धत्व[8]मनैकान्तिकत्वञ्च[9] निरस्तं बोद्धव्यम् । विरुद्धस्य व्यभिचारिणश्चाविनाभावनियमनिश्चयलक्षणत्वायोगात् । अतो [10]भवत्येव साध्यसिद्धिरिति केवलव्यतिरेकिणोऽपि हेतोर्गमकत्वात्, सात्मकं जीवच्छरीरं प्राणादिमत्वादितिवत्[11] ।

इस पूर्वोक्त कथनसे अर्थात् हेतुके अन्यथानुपपत्तिनियमनिश्चयके समर्थनसे हेतुकी अपक्षधर्मताका भी निराकरण किया गया समझना चाहिए; क्योंकि सामान्य अपने समस्त विशेषोंमें व्याप्त होकर रहता है। तथा पक्षधर्मताके बलसे हेतुकी साध्यके प्रति गमकता नहीं है; अपितु अन्यथानुपपत्तिके बलसे ही साध्यके प्रति गमकता है। साध्यके विना साधनके नही होनेको अन्यथानुपपत्ति कहते हैं। वह अन्यथानुपपत्ति यहां प्रकृतमें प्रमाणत्व हेतुकी स्वापूर्वार्थव्यवसायात्मक ज्ञानरूप साध्यके साथ नियमवती है, अर्थात् नियमसे पाई जाती है, इसलिए वह विपक्ष जो संशयादिक उनमें बाधक-प्रमाणके बलसे निश्चित ही है। इसी कथनसे हेतुके विरुद्धपने और अनैकान्तिकपनेका भी निराकरण किया गया समझना चाहिए; क्योंकि विरुद्ध हेतुके और व्यभिचारी (अनैकान्तिक) हेतुके अविनाभावरूप नियमके निश्चयस्वरूप लक्षणपनेका अभाव है। अतः प्रमाणत्व हेतुसे यथोक्त साध्यकी सिद्धि होती ही है; क्योंकि केवलव्यतिरेकी हेतुको भी गमकपना माना गया है। जैसे कि जीता हुआ शरीर आत्मा-सहित है; क्योंकि वह प्राणादिमान् है। जो आत्म-सहित नहीं होता, वह प्राणादिमान् भी नहीं होता; जैसे श्वासोच्छ्वासादिसे रहित मृतक शरीर। यहांपर प्राणादिमत्व यह हेतु केवलव्यतिरेकी है, क्योकि इसके अन्वयव्याप्तिरूप दृष्टान्तका अभाव है।

---

१. हेतोरन्यथानुपपत्तिनियमनिश्चयसमर्थनेन । २. विवादाध्यासितं तथा चेदं प्रमाणं न भवतीति । ३. निरस्तम् । ४. साध्याभावे साधनाभावः । साध्यं विना हेतोरभवनमविनाभावो यतः—अतएव उदेष्यति शकटं कृतिकोदयादित्यादौ कृतिकोदयः शकटधर्मो न भवति, साध्यमन्तरेण हेतोरभवनं न विद्यते । ५. अविनाभाववती । ६. प्रमाणत्वस्य हेतोः सन्निकर्षादावप्रवर्तकत्वात् । ७. साध्यसाधनेन । ८. साध्यविपरीतव्याप्तो विरुद्धः । ९. सव्यभिचारोऽनैकान्तिकः । १०. हेतोरसिद्धविरुद्धानैकान्तिकदोषत्रयाभावः समर्थितो यतः । ११. यन्न सात्मकं तन्न प्राणादिमद् दृष्टं यथा मृतकशरीरम् ।

[1]अथेदानीं[2] स्वोक्तप्रमाणलक्षणस्य ज्ञानमिति विशेषणं समर्थयमानः प्राह—

हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत् ॥२॥

हितं सुखं [3]तत्कारणञ्च। अहितं दुःखं तत्कारणञ्च[4]। हितं चाहितं च हिताहिते। तयोः प्राप्तिश्च परिहारश्च, तत्र समर्थम्[5]। 'हि' शब्दो यस्मादर्थे। तेनायमर्थः सम्पादितो भवति—यस्माद्धिताहितप्राप्तिपरिहारसमर्थं प्रमाणम्, ततस्तत्प्रमाणत्वेनाभ्युपगतं[7] वस्तु[8] ज्ञानमेव भवितुमर्हति, नाज्ञानरूपं सन्निकर्षादिः। तथा च प्रयोगः[9]—प्रमाणं ज्ञानमेव, हिताहितप्राप्तिपरिहारसमर्थत्वात्। यत्तु न ज्ञानं तन्न हिताहितप्राप्तिपरिहारसमर्थम्, यथा घटादि। [10]हिताहितप्राप्तिपरिहारसमर्थञ्च विवादापन्नम्[11], [12]तस्माज्ज्ञानमेव भवतीति[13]। न[14] चैतदसिद्धम्, हितप्राप्तयेऽहितपरिहाराय च प्रमाणमन्वेषयन्ति[15] प्रेक्षापूर्वकारिणो न व्यसनितया[16]; सकलप्रमाणवादिभिरभिमतत्वात्।

अब आगे अपने कहे गये प्रमाणके लक्षणमें जो ज्ञान यह विशेषण दिया है, उसका समर्थन करते हुए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—यतः प्रमाण हितकी प्राप्ति और अहितका परिहार करनेमें समर्थ है, अतः वह ज्ञान ही हो सकता है, अज्ञानरूप सन्निकर्षादिक नहीं ॥२॥

सुख और सुखके कारणको हित कहते है। दुःख और दुःखके कारणको अहित कहते हैं। पहले इन दोनोंका द्वन्द्वसमास करना, पुनः प्राप्ति और परिहारका द्वन्द्वसमास करना। 'हि' शब्द हेतुके अर्थमें है। तब यथाक्रमसे दोनोंको मिलानेपर यह अर्थ सम्पादित होता है—यतः हितकी प्राप्ति और अहितके परिहारमें समर्थ प्रमाण है, अतः वह प्रमाणस्वरूपसे स्वीकृत वस्तु ज्ञान ही होनेके योग्य है, अज्ञानरूप सन्निकर्षादिक नहीं। सूत्रोक्त कथनका अनुमान-प्रयोग इस प्रकार है—प्रमाण ज्ञान ही है (प्रतिज्ञा), क्योंकि वह हितकी प्राप्ति और अहितके परिहारमें समर्थ है (हेतु)। जो वस्तु ज्ञानरूप नहीं है, वह हितकी प्राप्ति और अहितके परिहारमें समर्थ भी नहीं है; जैसे घटादिक (उदाहरण)। हितकी प्राप्ति और अहितके परिहारमें समर्थ विवादापन्न प्रमाण है (उपनय), अतः वह ज्ञान ही हो सकता है (निगमन)। इसप्रकार

---

१. असाधारणप्रमाणस्वरूपकथनानन्तरम्। २. सूत्रसामान्यस्वरूपं प्रतिपाद्य। ३. स्रग्वस्त्रादि, सम्यग्दर्शनादि। ४. कण्टकादि, मिथ्यात्वादि। ५. शक्तियुक्तम्। ६. वक्ष्यमाणार्थः। ७. अङ्गीकृतम्। ८. प्रमाणम्। ९. अनुमानम्। १०. उपनयस्तथा चेदम्। ११. ज्ञानमज्ञानं चेति विप्रतिपन्नं प्रमाणं भवति। १२. हिताहितप्राप्तिपरिहारसमर्थत्वात्। १३. निगमनम्। १४. एतत्साध्यसाधनमसिद्धमित्युक्ते नेत्याह। १५. विचारयन्ति। १६. कार्यं विना प्रवृत्तिर्व्यसनम्।

अत्राह सौगतः—भवतु नाम सन्निकर्षादिव्यवच्छेदेन ज्ञानस्यैव प्रामाण्यम्[1], न तदस्माभिर्निषिध्यते। तत्तु व्यवसायात्मकमेवेत्यत्र न युक्तिमुत्पश्यामः। अनुमानस्यैव व्यवसायात्मनः[2] प्रामाण्याभ्युपगमात्[3]। [4]प्रत्यक्षस्य तु निर्विकल्पकत्वे[5]ऽप्यविसंवादकत्वेन प्रामाण्योपपत्तेरिति तत्राह—

तन्निश्चयात्मकं समारोपविरुद्धत्वादनुमानवत् ॥३॥

तत्प्रमाणत्वेनाभ्युपगतं [6]वस्त्विति धर्मिनिर्देशः। [7]व्यवसायात्मकमिति साध्यम्। [8]समारोप[9]विरुद्धत्वादिति हेतुः। [10]अनुमानवदिति दृष्टान्तः इति। अयमभिप्रायः—

सूत्रोक्त अर्थका यह पञ्च अवयवरूप अनुमान-प्रयोग है। इसमें प्रयुक्त हेतु असिद्ध नही है, क्योंकि विचारपूर्वक कार्य करनेवाले बुद्धिमान् लोग हितकी प्राप्ति और अहितके परिहारके लिए प्रमाणका अन्वेषण करते हैं, व्यसनरूपसे नहीं; यह बात सभी प्रमाणवादियोंने स्वीकार की है।

यहां पर बौद्ध लोग कहते हैं कि सन्निकर्षादिकी प्रमाणताका निराकरण करके ज्ञानके ही प्रमाणता भले ही रही आवे, उसका हम निषेध नहीं करते हैं। किन्तु वह ज्ञान व्यवसायात्मक (निश्चयात्मक) ही हो, इसमें हम कोई युक्ति नहीं देखते है। हम लोगोंने तो व्यवसयात्मक अनुमानकी ही प्रमाणता स्वीकार की है। प्रत्यक्ष तो निर्विकल्प है, अतः व्यवसायात्मक नहीं है, तथापि अविसंवादी होने से उसकी प्रमाणता बन जाती है। इस प्रकार कहनेवाले बौद्धोंको लक्ष्य करके आचार्य उत्तर सूत्र कहते है—

सूत्रार्थ—वह ज्ञान निश्चयात्मक है; क्योंकि वह समारोपका विरोधी है। जैसे अनुमान ॥ ३ ॥

सूत्रोक्त 'तत्' पदके द्वारा प्रमाणरूपसे स्वीकृत ज्ञानरूप वस्तु विवक्षित है, इस प्रकार धर्मीका निर्देश किया। व्यवसायात्मक यह साध्य है। समारोप-विरोधित्व हेतु है और अनुमान यह दृष्टान्त है। इसका यह अभिप्राय है—

---

१. उपादेयभूतार्थक्रियाप्रसाधकार्थप्रदर्शकत्वात्। २. निश्चयात्मनः। ३. अङ्गीकारात्। ४. कल्पनापोढमभ्रान्तं प्रत्यक्षम्। ५. अव्यवसायात्मकत्वेऽपि।

६. प्रमाणभूतं ज्ञानम्। ७. निश्चयात्मकम्। ८. संशयविपर्ययानध्यवसाय-लक्षणसमारोप., तत्प्रतिपक्षत्वात्। प्रत्यक्षस्य प्रामाण्यमविसंवादिकत्वेन, तदपि अर्थक्रिया-स्थितत्वेन, तदप्यर्थप्रापकत्वेन, तदपि प्रवर्तकत्वेन, तदपि स्वविषयोपदर्शकत्वेन, तदपि निश्चयोत्पादकत्वेन, तदपि गृहीतार्थाव्यभिचारत्वेन। ९. अन्धकारप्रकाशयोरहिनकुलयोः, स्पर्शयोः सहानवस्थान-बध्यघातक परस्पर-परिहारस्थितिलक्षणेषु विरोधेष्वत्र सहानवस्थान-लक्षणविरोधो ग्राह्यः। १०. अनुमानप्रमाणवत्। अनुमानपुनःपुरेण साधनान्तरेण

संशयविपर्यासानध्यवसायस्वभावसमारोपविरोधिग्रहणलक्षणव्यवसायात्मकत्वे सत्येवाविसंवादित्व[१]मुपपद्यते। अविसंवादित्वे[२] च प्रमाणत्वमिति [३]चतुर्विधस्यापि समक्षस्य[४] प्रमाणत्वमभ्युपगच्छता[५] समारोपविरोधिग्रहणलक्षणं[६] निश्चयात्मकमभ्युपगन्तव्यम्। ननु[७] तथापि समारोपविरोधिव्यवसायात्मकत्वयोः समानार्थकत्वात्[८] कथं साध्य-साधनभाव इति न मन्तव्यम्, ज्ञानस्वभावतया [९]तयोरभेदेऽपि व्याप्य[१०]-व्यापकत्व[११]धर्माधारतया भेदोपपत्तेः शिंशपात्ववृक्षत्ववत्।

संशय, विपर्यय और अनध्यवसायके स्वभावरूप जो समारोप है उसके विरोधी पदार्थको ग्रहण करना अर्थात् जानना ही जिसका लक्षण है, इस प्रकारके व्यवसायात्मकपनाके होने पर ही अविसंवादीपना बन सकता है और अविसंवादीपनाके होनेपर ही ज्ञानकी प्रमाणता हो सकती है। इसलिए पूर्वोक्त चारों प्रकारके प्रत्यक्षोंको प्रमाणता स्वीकार करनेवाले बौद्धोंको चाहिए कि वे उसे (प्रत्यक्षको) समारोपका जो विरोधी कहिए जानना है लक्षण जिसका ऐसे निश्चयात्मक ज्ञानको ही प्रमाणरूपसे स्वीकार करें।

शङ्का—आपके कथनानुसार तो समारोपका विरोधी होना और व्यवसायात्मक होना ये दोनों समानार्थक है, तब उनमें साध्य-साधन-भाव कैसे बन सकता है?

समाधान—ऐसा नहीं समझना चाहिए, क्योंकि ज्ञानस्वभावरूपसे उन दोनोंमें अभेद होनेपर भी व्याप्य-व्यापकरूप धर्मोंके आधारकी अपेक्षा भेद बन जाता है। जैसे शिंशपात्व और वृक्षत्वमें।

विशेषार्थ—जो सबमें रहे वह व्यापक और अल्पमें रहे वह व्याप्य कहलाता है। जैसे वृक्षपना व्यापक है, क्योंकि वह आम, नीम, शीशम

व्यवस्थापयतीति जैनः। १. निश्चयो ग्रहणं ह्यस्ति तच्चासत्येऽपि सत्यवत्। ज्ञाने यत्तु समारोपविरोधित्वं सत्यमेव तत्॥ २. इदमपि व्यापकत्वं प्रमाणत्वस्य। ३. स्वसंवेदनेन्द्रियमनोयोगिप्रत्यक्षस्य। ४. प्रत्यक्षस्य। ५. अङ्गीकुर्वता सौगतेन। ६. ज्ञानम्। ७. बौद्ध आह। ८. साध्यसमोऽयं हेतुः। ९. समारोपविरोधिव्यवसायात्मकत्वयोः। १०. तदभाववदवृत्तित्वं व्याप्यत्वम्। ११. तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वम्। व्यापकं तदतन्निष्ठं व्याप्यं तन्निष्ठमेव च। व्याप्यं गमकमादिष्टं व्यापकं गम्यमिष्यते॥ अत्र व्यापकं व्यवसायात्मकं तत्तु विपर्ययज्ञानेऽपि विद्यते। समारोपविरोधित्वं व्याप्यं तत्तु व्यवसाये एव, न तु विपर्यये तस्माद्भेदः।

आदि सभी जातिके वृक्षोंमें रहता है, और शीशमपना व्याप्य है, क्योंकि वह केवल शीशम जातिके वृक्षोंमें ही रहता है। अतः व्यापक गम्य और व्याप्यको गमक कहा जाता है। जैसे शीशम कहनेसे वृक्षत्वका बोध स्वयं हो जाता है, अतः व्याप्य शीशम तो गमक है और व्यापक वृक्ष गम्य है। इसी प्रकार प्रकृतमे व्यवसायात्मक ज्ञान तो व्यापक है; क्योंकि वह यथार्थ निश्चयात्मक प्रमाणरूप ज्ञानमें भी रहता है और अन्यथा-निश्चयात्मक विपर्ययज्ञानमें भी रहता है। समारोपका विरोधीपना तो यथार्थ-निश्चयात्मक ज्ञानमें ही रहता है, विपर्यज्ञानमे नहीं, इसलिए वह व्याप्य है। इस प्रकार दोनोंमें भेद कहा गया है। अर्थात् समारोपविरोधीपना साधन होनेसे व्याप्य है और निश्चयात्मकपना साध्य है अतः व्यापक है। इसप्रकार समारोपविरोधित्व और व्यवसायात्मकत्वमें साध्य-साधनभाव तथा व्याप्य-व्यापकभाव बन जाता है। बौद्ध लोग प्रमाण तो प्रत्यक्ष और अनुमान इन दोनो ज्ञानोंको मानते हैं, किन्तु व्यवसायात्मक केवल अनुमानको ही मानते हैं, प्रत्यक्षको नही। इतने पर भी प्रत्यक्षका लक्षण कल्पनासे रहित, अभ्रान्त और अविसंवादी कहते है, इसीसे उसे अर्थक्रिया-स्थित, वस्तुका प्राप्त करनेवाला, प्रर्वतक, स्वविषयोपदर्शक, निश्चयोत्पादक और गृहीतार्थ-अव्यभिचारी कहते हैं। परन्तु प्रत्यक्षके ये सर्व विशेपण तो उसे व्यवसायात्मक मानने पर ही सम्भव है, अन्यथा नहीं। इसीलिए यह कहा गया है कि जैसे बौद्ध अनुमान-प्रमाणको अर्थका निश्चायक मानते है, उसी प्रकार उन्हें प्रत्यक्ष-प्रमाणको भी निश्चयात्मक मानना चाहिए। इसी सूत्रमें प्रमाणको समारोपका विरोधी कहा है। सो संशय,, विपर्यय और अनध्यवसायरूप ज्ञानको समारोप कहते है। सन्देहात्मक ज्ञानको संशय, विपरीत ज्ञानको विपर्यय और अनिश्चयरूप ज्ञानको अनध्यवसाय कहते हैं। विरोध तीन प्रकारका माना गया है—सहानवस्थानलक्षण, परस्परपरिहारलक्षण और वध्यघातकलक्षण। अन्धकार और प्रकाश एक साथ नहीं रह सकते, अतः उनमे सहानवस्थानलक्षण विरोध है। रूप और रस एक साथ रहते है, फिर भी उन दोनोंका लक्षण परस्पर भिन्न है, अतः रूप-रसमें परस्परपरिहारलक्षण विरोध माना जाता है। सर्प और नकुलमें वध्यघातक विरोध है क्योंकि नकुल सर्पका घातक है और सर्प नकुलका वध्य। प्रकृतमें यहाँपर समारोप और यथार्थ व्यवसायात्मकपनेके सहावस्थानलक्षण विरोध है; क्योंकि जहां वस्तुका यथार्थ निश्चय हो वहां संशय, विपर्यय और अनध्यवसायरूप समारोपका रहना सम्भव नहीं है।

[1]अथेदानीं [2]सविशेषणमर्थग्रहणं समर्थयमानस्तदेव स्पष्टीकुर्वन्नाह—

अनिश्चितोऽपूर्वार्थः ॥४॥

यः प्रमाणान्तरेण[3] संशयादिव्य[4]वच्छेदेनानध्यवसितः[5] सोऽपूर्वार्थः। तेनेहादिज्ञानविषयस्यावग्रहादिगृहीतत्वेऽपि न पूर्वार्थत्वम्। अवग्रहादिनेहादिविषयभूतावान्तरविशेषनिश्चयाभावात्।

अब आगे प्रमाणके लक्षणमें अर्थपदको जो अपूर्व विशेषण दिया है उसका समर्थन करते हुए आचार्य उसके अर्थका स्पष्टीकरण कहते हैं—

सूत्रार्थ—जिस पदार्थका पहले किसी प्रमाणसे निश्चय नहीं किया गया है, उसे अपूर्वार्थ कहते हैं ॥ ४ ॥

जिस वस्तुका संशयादिके व्यवच्छेद करनेवाले किसी अन्य प्रमाणसे पहले निश्चय नहीं हुआ है, अर्थात् जो वस्तु किसी यथार्थग्राही प्रमाणसे अभी तक जानी नहीं गई है, उसे अपूर्वार्थ कहते हैं। जो वस्तु किसी प्रमाणके द्वारा पहले जानी जा चुकी है, उसका पुनः किसी ज्ञानके द्वारा जानना व्यर्थ है, इस बातके दिखानेके लिए ही अपूर्व विशेषण पहले सूत्रमें दिया गया है। इसलिए यहाँपर ईहा आदि ज्ञानोंका विषयभूत पदार्थ अवग्रहादि ज्ञानोंके द्वारा गृहीत या ज्ञात होनेपर भी पूर्वार्थ नहीं, अपितु अपूर्वार्थ ही रहता है; क्योंकि अवग्रहादिके द्वारा ईहादिज्ञानके विषयभूत अवान्तरविशेषका निश्चय नहीं होता है।

विशेषार्थ—अवग्रह, ईहा, अवाय और धारणारूप जो मतिज्ञानके चार भेद जैन आगममें बतलाये गये हैं, उनकी व्यवस्था यह है कि जिस पदार्थको

---

१. प्रत्यक्षज्ञानस्य व्यवसायात्मकत्वसमर्थनानन्तरम्। २. व्यवसायात्मकं भवतु, अर्थविशेषणं माऽस्तु, इति विज्ञानाद्वैतवादिनाम् 'अपूर्व' इति विशेषणेन सह वर्तमानम्।

३. प्रकृतात्प्रमाणादन्यत्प्रमाणान्तरम्, तेन येन केनचित्प्रमाणान्तरेण। ४. त्यागेन। ५. अनिश्चितः। ६. अवग्रहो विशेषाकाङ्क्षेहावायो विनिश्चयः। धारणा स्मृतिहेतुः स्यान्मतिज्ञानं चतुर्विधम्॥ विषयविषयिसन्निपाते सति दर्शनं भवति। तत्पश्चादर्थरूपग्रहणमवग्रह उच्यते। यथा चक्षुषा शुक्लं रूपमिति ग्रहणमवग्रहः। अवग्रहेण गृहीतार्थस्य विशेषपरिज्ञानाकाङ्क्षणमीहा कथ्यते। यथा शुक्लं रूपं मया दृष्टं तद्बलाका आहोस्वित्पताका वेति विशेषाकाङ्क्षणमीहा। तदनन्तरमेवोत्पतति निपतति पक्षविक्षेपादिकं करोति, तेन ज्ञायतेऽनया बलाकया भवितव्यम्। एवं याथात्म्यावगमनं वस्तुरूपनिर्धारणमवाय इति। अवायस्य सम्यक्परिज्ञानस्य यत्कालान्तराविस्मरणकारणं सा धारणा।

अथोक्तप्रकार एवापूर्वार्थ[1], किमन्योऽप्यस्तीत्याह—

दृष्टोऽपि समारोपात्तादृक् ॥५॥

दृष्टोऽपि गृहीतोऽपि, न केवलमनिश्चित एवेत्यपि शब्दार्थः। [2]तादृगपूर्वार्थो भवति। समारोपादिति हेतुः। एतदुक्तं भवति—गृहीतमपि ध्यामलिताकारतया[3] यन्निर्णेतुं न शक्यते, तदपि वस्त्वपूर्वमिति व्यपदिश्यते; प्रवृत्तसमारोपाव्यवच्छेदात्।

अवग्रह विषय करता है, ईहाके द्वारा उसीके विषयमें विशेष जाननेकी इच्छा होती है, अवायके द्वारा उसीका निश्चय किया जाता है और धारणाके द्वारा वही वस्तु कालान्तर तक हृदयमें धारण की जाती है। ये चारों ही ज्ञान उक्त व्यवस्थाके अनुसार यतः गृहीत-ग्राही हैं, अतः उत्तर-उत्तर ज्ञानका विषयभूत पदार्थ अपूर्व नहीं माना जा सकता। और इसीलिए उन्हें प्रमाण भी नहीं मानना चाहिए, ऐसी आशङ्का किसी जिज्ञासुने की। उसका समाधान करते हुए कहा गया है कि यद्यपि अवग्रहसे जाने हुए पदार्थको ही ईहा और ईहासे जाने हुए पदार्थको ही अवाय विषय करता है, तथापि उनके विषयभूत पदार्थमें अपूर्वता बनी रहती है; क्योंकि उन ज्ञानोंका विषय उत्तरोत्तर अवान्तर विशेषताओंको जानना है। अवग्रह जहाँ मनुष्य सामान्य को जानता है, वहाँ ईहाके द्वारा उसके दक्षिणी या उत्तरी होनेके रूपमें एक विशेषताकी जिज्ञासा उत्पन्न होती है और अवायके द्वारा उसके रहन-सहन और बोल-चालके द्वारा उत्तरी या दक्षिणी होनेका निश्चय किया जाता है। इसलिए उक्त सब ज्ञानोंके विषयभूत अर्थ अपूर्व ही रहते हैं।

अपूर्वार्थ क्या उक्त प्रकारका ही है, अथवा अन्य प्रकारका भी है; ऐसी शङ्काका समाधान करनेके लिए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—दृष्ट अर्थात् किसी अन्य प्रमाणसे ज्ञात भी पदार्थ समारोप हो जानेसे तादृक् अर्थात् अपूर्वार्थ हो जाता है॥ ५॥

सूत्र-पठित अपि शब्दका यह अर्थ है कि केवल अनिश्चित ही पदार्थ अपूर्वार्थ नहीं, अपि तु प्रमाणान्तरसे निश्चित या गृहीत भी पदार्थमें यदि संशय, विपर्यय या अनध्यवसाय आदि हो जाय, तो वह भी अपूर्वार्थ ही जानना चाहिए। यहाँ समारोप होनेसे यह हेतु है। इस प्रकार सूत्रका यह अर्थ हुआ—

---

१. संशयादिव्यवच्छेदेनोत्पन्नेन प्रथमज्ञानेन गृहीतोऽर्थः द्वितीयज्ञानस्यापूर्वार्थः, गृहीतत्वात्संशयादीनां प्रथमज्ञानेन व्यवच्छेदाभावात्। २. विस्मृतपदार्थवत्। ३. अव्यक्ताकारतया।

ननु[1] भवतु नामापूर्वार्थव्यवसायात्मकत्वं विज्ञानस्य; स्वव्यवसायं तु न विद्म इत्यत्राह—

स्वोन्मुखतया प्रतिभासनं[2] स्वस्य व्यवसायः ॥६॥

स्वस्योन्मुखता स्वोन्मुखता, तया स्वोन्मुखतया स्वानुभवतया[3] प्रतिभासनं[4] स्वस्य व्यवसायः ।

अत्र दृष्टान्तमाह—

अर्थस्येव तदुन्मुखतया ॥७॥

तच्छब्देनार्थोऽभिधीयते । यथाऽर्थोन्मुखतया प्रतिभासनमर्थव्यवसायस्तथा स्वोन्मुखतया प्रतिभासनं स्वस्य व्यवसायो भवति ।

कि किसी ज्ञानके द्वारा विषयरूपसे गृहीत भी वस्तु यदि धूमिल आकार हो जानेसे निर्णय न की जासके तो वह भी अपूर्व नामसे ही कही जायगी; क्योंकि उसके विषयमें जो समारोप उत्पन्न हो गया है, उसका निराकरण नहीं हुआ अर्थात् वह बना हुआ है ।

जो लोग ज्ञानको स्वव्यवसायी नहीं मानते हैं, उनका कहना है कि ज्ञानको अपूर्वार्थका निश्चायक भले ही माना जाय । किन्तु उसको स्वव्यवसायी हम नहीं मानते हैं, आचार्य उन लोगोंको लक्ष्य करके उत्तर सूत्र कहते हैं—

सूत्रार्थ—स्वोन्मुखरूपसे अपने आपको जानना, यह स्वव्यवसाय है ॥६॥

अपने आपको जाननेके अभिमुख होनेको स्वोन्मुखता कहते हैं । उस स्वोन्मुखता कहिए स्वानुभवरूपसे जो प्रतिभास अर्थात् आत्मप्रतीति होती है, वही स्वव्यवसाय कहलाता है । सारांश—अपने आपको जाननेका नाम स्वव्यवसाय है ।

उक्त अर्थको आचार्य दृष्टान्त-द्वारा स्पष्ट करते हैं—

सूत्रार्थ—जैसे अर्थके उन्मुख होकर उसे जानना अर्थव्यवसाय है ॥७॥

सूत्रमें कहे गये 'तत्' शब्दसे अर्थ (पदार्थ) का ग्रहण किया गया है । जिस प्रकार पदार्थके अभिमुख होकर उसके जाननेको अर्थव्यवसाय कहते हैं, उसीप्रकार स्व अर्थात् अपने आपके अभिमुख होकर जो अपने-आपका प्रतिभास होता है अर्थात् आत्म-प्रतीति या आत्म-निश्चय होता है, वह स्वव्यवसाय कहलाता है ।

---

१. योगः प्राह । २. आत्माभिमुखतया प्रतीतिः प्रतिभासनम् । ३. स्वस्य परिज्ञानतया । ४. ज्ञानस्य आत्मानं स्वं जानातीति प्रतीतिः प्रतिभासनम् ।

अत्रोल्लेख[1]माह—

[2]घटमहमात्मना[3] वेद्मि[4] ॥८॥

ननु ज्ञानमर्थमेवाध्यवस्यति,[5] न[6] स्वात्मानम्[7]। आत्मानं [8]फलं वेति केचित्[9]। [10]कर्तृ कर्मणोरेव प्रतीतिरित्यपरे[11]। कर्तृ-कर्म-क्रियाणामेव प्रतीतिरित्यन्ये[12]। तेषां मतमखिलमपि प्रतीतिबाधितमिति दर्शयन्नाह—

कर्मवत्[13] कर्तृकरणक्रियाप्रतीतेः[14] ॥९॥

ज्ञानविषयभूतं[15] वस्तु कर्माभिधीयते, तस्यैव ज्ञप्तिक्रियया व्याप्यत्वात्, तस्यैव

अब आचार्य उक्त कथनको एक उल्लेखके द्वारा स्पष्ट करते हैं—

सूत्रार्थ—मैं घटको अपने आपके द्वारा जानता हूं ॥ ८ ॥

यहाँपर 'अहं' पद कर्त्ता है, 'घट' कर्म है, 'आत्मना' पद करण है और 'वेद्मि' यह क्रिया है। जैसे जाननेवाला पुरुष अपने आपके द्वारा घटको जानता है, वैसे ही अपने आपको भी जानता है।

यहाँपर नैयायिक कहते हैं कि ज्ञान केवल पदार्थको ही जानता है, अपने आपको नहीं जानता है। कितने ही लोग कहते हैं कि ज्ञान अपने आपको और फलको ही जानता है। भाट्ट कहते है कि कर्त्ता और कर्मकी ही प्रतीति होती है, शेषकी नहीं। जैमिनीय कहते है कि कर्त्ता, कर्म और क्रियाकी ही प्रतीति होती है, करणकी नही। उक्त वादियोंके ये सभी मत प्रतीतिबाधित हैं, यह बात दिखलानेके लिए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—कर्मके समान कर्त्ता, करण और क्रियाकी भी प्रतीति होती है ॥ ९ ॥

ज्ञानकी विपयभूत वस्तु कर्म कहलाती है; क्योंकि उसका ही ज्ञप्तिक्रियाके

---

१. दृष्टान्तदार्ष्टान्तिकयोरुदाहरणमुल्लेखः। २. प्रमेय-प्रमातृ-प्रमाण-प्रमितयो यथासङ्ख्येन गृह्यन्ते। ३. आत्मना ज्ञानस्वरूपेण। ४. स्वपरावभासो दर्शितः। ५. प्रत्यक्षीकरोति, निश्चिनोति। ६. ज्ञानस्वरूपं न निश्चिनोति। ७. स्वरूपं पुरुषकर्त्तारं न प्रत्यक्षीकरोति। ८. अज्ञाननिवृत्तिर्हानोपादानोपेक्षाश्च फलम्। ९. नैयायिकाः। १०. कर्मक्रिययोरेव प्रतीतिरिति वृत्तावनुक्तमुपलक्षणीयमिति प्राभाकराः। ११. भाट्टाः। परोक्षं जैमिनेर्ज्ञानं ज्ञानमात्मा प्रभाकृतः। ज्ञानं फलं च भट्टस्य शेषं प्रत्यक्षमिष्यते ॥ १२. जैमिनीयाः। १३. तत्रेति सूत्रेऽस्यार्थे षष्ठ्यन्तात्कर्मशब्दात्तत्प्रत्ययः प्रकरणाच्चाज्ञेयम्। १४ प्रमातृप्रमाणप्रमितिक्रियाणां प्रतिभासनात्। १५. ज्ञानविषयभूतं कर्म कथं

तद्वत् । कर्त्ता आत्मा । करणं प्रमाणम् । क्रिया प्रमितिः । कर्त्ता[1] च करणं[2] च क्रिया[3] च तासां प्रतीतिः;[4] तस्याः । इति हेतौ[5] का[6] । प्रागुक्तानुभवोल्लेखे यथाक्रमं तत्प्रतीतिर्द्रष्टव्या ।

ननु[7] शब्दपरामर्शसचिवेयं प्रतीतिर्न[8] वस्तुबलोपजातेत्यत्राह—

साथ व्याप्यपना पाया जाता है। जैसेकि ज्ञप्तिक्रियाका कर्मके साथ। जानने-रूप क्रियाको ज्ञप्ति कहते हैं; ज्ञप्तिरूप क्रियाके द्वारा जो कुछ जाना जाता है, उसे कर्म कहते हैं। किसी भी वस्तुको जाननेवाला आत्मा कर्त्ता कहलाता है। जिसके द्वारा वह जानता है, ऐसा प्रमाणरूप ज्ञान करण कहलाता है और प्रमिति क्रिया है। प्रमाणके फलको प्रमिति कहते हैं। इसप्रकार कर्त्ता, करण और क्रियाका पहले द्वन्द्वसमास करके पीछे प्रतीति शब्दके साथ षष्ठी तत्पुरुष समास करना चाहिए। प्रतीति पदके अन्तमें पञ्चमी विभक्तिका निर्देश हेतुके अर्थमें किया गया है। जैनेन्द्रव्याकरणमें पञ्चमी विभक्तिकी संज्ञा 'का' है। इस प्रकार पहले कहे गये अनुभवके उल्लेखमें कर्म-कर्त्तादिककी यथाक्रमसे प्रतीति जाननी चाहिए। अर्थात् पूर्वसूत्रमें निर्दिष्ट 'घट' कर्म है, 'अहं' कर्त्ता है, 'आत्मना' करण है और 'वेद्मि' क्रिया है।

भावार्थ—जैसे ज्ञान अपने विषयभूत पदार्थको जानता है, उसी प्रकार वह कर्त्ता, करण और क्रियाको भी जानता है। यहां यह शङ्का नहीं करनी चाहिए कि एक ही ज्ञानमें कर्त्ता, करणादि अनेक कारकरूप प्रवृत्ति कैसे सम्भव है, क्योंकि अवस्था-भेदकी विवक्षासे एकमें भी अनेक कारकोंकी प्रवृत्ति होनेमें कोई विरोध अनेकान्तवादियोंके नहीं आता। वह तो सर्वथा एकान्तवादियोंके ही मतमें सम्भव है।

यहाँ कोई शङ्काकार कहता है कि यह कर्त्ता-कर्मादिककी प्रतीति तो शब्दका उच्चारणमात्र ही है, वस्तुके स्वरूपबलसे उत्पन्न नहीं हुई है अर्थात् वास्तविक नहीं है। उसका आचार्य उत्तर देते हैं—

भवति ? 'क्रियाव्याप्यं कर्म, इति सूत्रसद्भावाद् दूषणं न भवत्येकार्थत्वात् । १. प्रमाता । २. प्रमाणम् । ३. प्रमितिः । ४. फलज्ञानम् । ५. हेतौ गुणे स्त्रियामिति निषेधात्कथं पञ्चमीति नाशङ्कनीयम्; 'स्थाने कर्माधारे' इति सूत्रेण पञ्चमी भवति, इत्युक्तत्वात् अप्रयुक्तेऽपि यस्यार्थः प्रतीयते स स्थानी स्यादिति । प्रतीतिमवलम्ब्येत्यर्थः । ६. पञ्चमी । ७. शब्दविकल्पप्रधानानां तेषां कर्मादीनाम् । ८. शब्दविकल्पप्रधानो विचारः ।

शब्दानुच्चारणेऽपि स्वस्यानुभवनमर्थवत् ॥१०॥

यथाः घटादिशब्दानुच्चारणेऽपि घटाद्यनुभवस्तथाऽहमहमिकया योऽयमन्तर्मुखाकार-तया[1]ऽवभासः स शब्दानुच्चारणेऽपि स्वयमनुभूयत इत्यर्थः।

अमुमेवार्थमुपपत्तिपूर्वकं परं प्रति [2]सोल्लुण्ठमाचष्टे—

को वा तत्प्रतिभासिन[3]मर्थमध्यक्षमिच्छंस्तदेव तथा नेच्छेत् ॥११॥

को वा लौकिकः परीक्षको वा। तेन ज्ञानेन[4] प्रतिभासितुं शीलं यस्य स तथोक्तस्तं प्रत्यक्षविषय[5]मिच्छन् विषयिधर्मस्य विषये उपचारात्[6] तदेव ज्ञानमेव तथा प्रत्यक्षत्वेन नेच्छेत्? अपि त्विच्छेदेव। अन्यथा अप्रामाणिकत्वप्रसङ्गः स्यादित्यर्थः।

सूत्रार्थ—पदार्थके समान शब्दका उच्चारण नहीं करनेपर भी अपने आपका अनुभव होता है ॥ १० ॥

जैसे घट आदि शब्दके उच्चारण नहीं करनेपर भी घट आदिका अनुभव होता है, उसी प्रकार बाहरमें शब्दका उच्चारण नहीं करनेपर भी 'अहं' 'अहं' इसप्रकारके अन्तर्मुखाकाररूपसे अपने आपका स्वयं अनुभव होता ही रहता है। कहनेका भाव यह है कि जैसे घटादिको देखनेपर घटादि शब्दके बोले विना ही उसका बोध होता है, उसी प्रकार 'अहं' इत्यादि शब्दके विना कहे ही अपने आपका भी बोध होता है, अतः कर्त्ता-कर्मादिककी प्रतीतिको केवल शाब्दिक नहीं, किन्तु वास्तविक मानना चाहिए।

आगे आचार्य इसी ही अर्थको युक्तिपूर्वक परका उपहास करते हुए कहते हैं—

सूत्रार्थ—कौन ऐसा पुरुष है जो ज्ञानसे प्रतिभासित हुए पदार्थको प्रत्यक्ष मानता हुआ भी स्वयं ज्ञानको ही प्रत्यक्ष न माने ॥ ११ ॥

कौन ऐसा लौकिक या परीक्षक पुरुष है, जो उस ज्ञानसे प्रतिभासन-शील पदार्थको प्रत्यक्ष ज्ञानका विषय मानते हुए भी उसी ज्ञानको प्रत्यक्ष-रूपसे स्वीकार न करे, अपितु वह करेगा ही। यहाँपर विषयी ज्ञानके प्रत्यक्ष-पनेरूप धर्मका विषयभूत पदार्थमें उपचार करके उक्त प्रकारका निर्देश किया गया है. अन्यथा अप्रामाणिकपनेका प्रसङ्ग ।१ होगा।

---

१. अन्तर्जल्पाकारतया, अन्तःपरिच्छेद्यतया। २. उपहास-सहितम्। ३. अन्तर्मुखाकारतया प्रतिभासिनं ज्ञानमेव। ४. ज्ञानस्य ग्राहकशक्तिशीलत्वमर्थस्य ज्ञेयशक्तिशीलत्वम्। ५. मुख्यतयार्थः प्रत्यक्षरूपो नास्ति, किन्तूपचारात्प्रत्यक्षव्यवहारः। तत्र निमित्तं विषयविषयिसन्निपातः। ६. ज्ञानधर्मः प्रत्यक्षत्वं घटाद्यर्थ उपचारः, 'मुख्याभावे सति प्रयोजने निमित्ते चोपचारः प्रवर्तते' इति वचनात्।

अत्रोदाहरणमाह—

प्रदीपवत्[1] ॥१२॥

इदमत्र तात्पर्यम्—ज्ञानं स्वावभासने स्वातिरिक्तसजातीयार्थान्तरानपेक्षं प्रत्यक्षार्थगुणत्वे सति अदृष्टानुयायिकरणत्वात्[2], प्रदीपभासुराकारवत्[3]।

भावार्थ—मुख्य वस्तुके अभावमें प्रयोजन और निमित्तके होनेपर उपचारकी प्रवृत्ति होती है। प्रकृतमें प्रत्यक्षपना तो ज्ञानका मुख्य धर्म है, पदार्थका नहीं। किन्तु पदार्थ ज्ञानका विषय है, अतः उसमें व्यवहारके प्रयोजनसे प्रत्यक्षपनेका उपचार किया गया है। यहाँ निमित्त ज्ञान और पदार्थमें विषय-विषयीभावरूप सम्बन्धका है। यदि ऐसा न माना जाय, तो लोकका व्यवहार अप्रामाणिक हो जायगा।

अब आगे उक्त अर्थके दृढ़ करनेके लिए आचार्य उदाहरण कहते हैं—

सूत्रार्थ—दीपकके समान ॥ १२ ॥

जिसप्रकार दीपककी प्रकाशता और प्रत्यक्षताको स्वीकार किये विना उससे प्रतिभासित हुए घटादिक पदार्थकी प्रकाशता और प्रत्यक्षता सम्भव नहीं है उसी प्रकार यदि प्रमाणस्वरूप ज्ञानकी भी प्रत्यक्षता न मानी जाय, तो उसके द्वारा प्रतिभासित पदार्थकी भी प्रत्यक्षता माननी सम्भव नहीं है। अतः दीपकके समान ज्ञानकी भी स्वयंप्रकाशता और प्रत्यक्षता माननी चाहिए।

---

१. यथैव हि प्रदीपस्य स्वप्रकाशता प्रत्यक्षतां वा विना तत्प्रतिभासिनोऽर्थस्य प्रकाशता प्रत्यक्षता वा नोपपद्यते, तथा प्रमाणस्यापि प्रत्यक्षतामन्तरेण तत्प्रतिभासिनोऽर्थस्य प्रत्यक्षता न स्यात्। २. अर्थान्तरानपेक्षमित्येतावति साध्ये घटादिभिः सिद्धसाध्यता स्यात्, तत उक्तम्—सजातीयेति। तस्मिन्नप्युच्यमाने पुरुषान्तरविज्ञानेन सिद्धसाध्यता स्यात्, तन्निषेधार्थं स्वातिरिक्तग्रहणम्। तथापि परार्थानुभवनेन सिद्धसाध्यता स्यात्, अतस्तत्परिहारार्थं स्वावभासनग्रहणम्। साध्यं प्रति करणत्वादित्येतावति साधनेऽदृष्टेन व्यभिचारः, अत उक्तम्—अदृष्टानुयायीति। तथापि कुठारादिना व्यभिचारः अत उक्तम्—गुणत्वे सतीति। तथापि सन्निकर्षेण व्यभिचारः, अत उक्तम्—प्रत्यक्षार्थेति। पुनरपि प्रकारान्तरेण व्यभिचारवारणायोच्यते—करणत्वादिति साधने सति कुठारादिभिर्व्यभिचारस्तत्परिहारार्थं प्रत्यक्षार्थगुणत्वे सतीत्युच्यते। तावत्युच्यमानेऽदृष्टेन शक्तिना व्यभिचारः, अतस्तत्परिहारार्थम्—अदृष्टानुयायिकरणत्वादित्युच्यते। अस्मिन्नप्युच्यमाने चक्षुरादिना व्यभिचारः, अतस्तत्परिहारार्थं प्रत्यक्षार्थगुणत्वे सतीत्युच्यते। ३. प्रदीपवदित्युक्ते प्रदीपस्य द्रव्यत्वेनागुणत्वात्साधनविकलोऽयं दृष्टान्तः, अत उक्तम्—भासुराकारवत्।

अथ भवतु नामोक्तलक्षणलक्षितं प्रमाणम्, तथापि तत्प्रामाण्य[1] स्वतः परतो वा? न तावत्स्वतः, अविप्रतिपत्तिप्रसङ्गात्[2]। नापि परतः, अनवस्थाप्रसङ्गात्[3] इति मतद्वयमाशङ्क्य तन्निराकरणेन स्वमतमवस्थापयन्नाह—

यहाँ यह तात्पर्य है—ज्ञान अपने आपके प्रतिभास करने अर्थात् जाननेमें अपनेसे अतिरिक्त (भिन्न) सजातीय अन्य पदार्थोंकी अपेक्षासे रहित है; क्योंकि पदार्थको प्रत्यक्ष करनेके गुणसे युक्त होकर अदृष्ट-अनुयायी करणवाला है, जैसे कि दीपकका भासुराकार।

भावार्थ—ज्ञान अपने आपके जाननेमें अन्य ज्ञानकी अपेक्षा नही करता, किन्तु स्वयं ही अपने आपको जानता है, क्योंकि ज्ञान आत्माका ही गुण है। जब वह जाननेकी शक्तिरूप अदृष्टके विना व्यक्तिरूप अनुयायी करणपनेको अवस्थाको प्राप्त होता है, तब वह किसी अन्यको अपेक्षाके विना ही अपने विषयभूत पदार्थको जानता है। जैसे दीपककी प्रकाशरूप लौ अपने आपको प्रकाश करनेमें किसी दूसरी प्रकाशमान वस्तुकी अपेक्षा नहीं करती, स्वयं ही अपने आपको प्रकाशित करती है।

यहाँ कोई शङ्काकार कहता है कि प्रमाणका जो लक्षण पहले कह आये है, वही रहा आवे। तथापि प्रमाणकी प्रमाणता 'स्वतः' कहिए अपने आप ही होती है, अथवा 'परतः' अर्थात् अन्यसे होती है। स्वतः तो मानी नहीं जा सकती; क्योंकि यदि प्रमाणकी प्रमाणता स्वतः हो, तो फिर उसके विषयमें किसीको विवाद नहीं होना चाहिए। प्रमाणकी प्रमाणता परतः भी नहीं मान सकते, क्योंकि परसे प्रमाणता माननेपर उसकी भी प्रमाणता परसे माननी पड़ेगी, इस प्रकार अनवस्थादोषका प्रसङ्ग आता है। इन दो मतोंकी आशङ्का करके उनके निराकरण-पूर्वक अपने मतकी स्थापना करते हुए आचार्य उत्तर

---

१. किन्नाम प्रमाणस्य प्रामाण्यम्? प्रतिभातविषयाऽव्यभिचारित्वम्। तत्प्रामाण्यं स्वतः, अप्रामाण्यं परतः इति मीमांसकाः सङ्गिरन्ते। अप्रामाण्यं स्वतः, प्रामाण्यं तु परत इति ताथागताः कथयन्ति। उभयं स्वत इति साङ्ख्याः। उभयमपि परत इति नैयायिकाः। उभयमपि कथञ्चित्स्वतः कथञ्चित्परत इति स्याद्वादिनो जैनाः प्रथयन्ति। इत्येवं बहुवादिविप्रतिपत्तेः सद्भावात्संशयः स्यात्। तन्निराकरणार्थं प्रामाण्यं निरूपणीयमिति। २. प्रामाण्यं सर्वथा स्वतश्चेदविप्रतिपत्तिप्रसङ्गोऽस्तु, तथा नास्ति। ३. जलज्ञानं प्रमाणं स्नानपानक्रियान्यथानुपपत्तेः। तर्ह्यनुमानस्य प्रामाण्यं कुतः? अन्यस्मात्। एवमनवस्थानर्तकी परतः प्रामाण्यवादिनं चक्रमीति। किमनवस्था नाम? अप्रामाणिकानन्तपदार्थपरिकल्पनया विश्रान्त्यभावोऽनवस्था नाम।

तत्प्रामाण्यं[1] स्वतः परतश्च ॥१३॥

सोपस्काराणि[2] हि वाक्यानि भवन्ति। तत इदं प्रतिपत्तव्यम्—अभ्यास-
दशायां स्वतोऽनभ्यासदशायां च परत इति। तेन[3] प्रागुक्तैकान्तद्वयनिरासः।
न चानभ्यासदशायां परतः प्रामाण्येऽप्यनवस्था समाना[4], ज्ञानान्तरस्याभ्यस्तविषयस्य[5]
स्वतः[6] प्रमाणभूतस्याङ्गीकरणात्। अथवा[7] प्रामाण्यमुत्पत्तौ परत एव, विशिष्ट-

---

सूत्र कहते हैं। यहाँ इतना विशेष जानना चाहिए कि मीमांसक तो प्रमाणकी
प्रमाणता स्वतः मानते हैं और अप्रमाणता परतः। सांख्य प्रमाणता परतः और
अप्रमाणता स्वतः मानते हैं। नैयायिक प्रमाणता और अप्रमाणता दोनों ही
परतः मानते हैं। प्रमाणतासे अभिप्राय उसकी यथार्थतारूप सत्यतासे है और
अप्रमाणतासे अभिप्राय उसकी अयथार्थतारूप असत्यतासे है। आचार्य इस
विषयमें अपना निर्णय देते हैं—

सूत्रार्थ—प्रमाणकी वह प्रमाणता अभ्यासदशामें स्वतः और अनभ्यास-
दशामें परतः होती है॥ १३॥

सूत्रवाक्य उपस्कार-सहित होते हैं अर्थात् उनका ठीक अर्थ जाननेकेलिए
तत्संबद्ध और तत्सूचित अर्थका ऊपरसे अध्याहार करना पड़ता है, इसलिए
यहाँपर इस सूत्रका यह अर्थ जानना चाहिए कि वह प्रमाणता अभ्यासदशामें
स्वतः और अनभ्यासदशामें परतः होती है। इस कारण पूर्वमें कहे गये दोनों
एकान्तवादोंका निराकरण हो जाता है। अनभ्यासदशामें परतः प्रामाण्य मानने-
पर भी एकान्तपक्षके समान अनवस्था दोष प्राप्त नहीं होता, क्योंकि
अभ्यस्त विषयस्वरूप अन्य ज्ञानकी हमने प्रमाणता स्वतः स्वीकार की
है। अथवा प्रमाणकी प्रमाणता प्रथम वार उत्पत्तिकी अपेक्षा तो परतः ही
होती है, क्योंकि विशिष्ट कार्यकी उत्पत्ति विशिष्ट कारणसे ही होती है।

---

१. तस्य प्रमाणस्य (ज्ञानस्य) प्रामाण्यमिति तत्प्रामाण्यं प्रतिभातविषयाव्यभि-
चारित्वं सुनिश्चितासम्भवद्बाधकत्वमिति। २. कार-
२. शब्देन शब्दान्तरमेलनमुपस्कारः, तेन सहितानि सोपस्काराणि। ३. कार-
णेन। ४. जैनाना न समाना। कुतो न समाना ? इति चेदाह—। ५. अभ्यस्तविषयो
येन ज्ञानान्तरेण। ६. स्वतः प्रमाणभूतस्य अन्तरङ्गात् (क्षयोपशमाद्) उत्पन्नस्य
घटचेटिकापेटक-दर्दुरराव-सरोजगन्धाद्यन्यथानुपपत्तिबलेन स्वतो निश्चितप्रामाण्यस्यानु-
मानस्याभ्युपगमात्। ७. अथवा—उत्पत्तिर्ज्ञप्तिश्च द्वेधाऽत्र विशेषः।

कारणप्रभवत्वाद्विशिष्टकार्यस्येति । विषयपरिच्छित्तिलक्षणे[1] प्रवृत्तिलक्षणे वा [2]स्वकार्ये अभ्यासेतरदशापेक्षया क्वचित्स्वतः परतश्चेति निश्चीयते ।[3] ननूत्पत्तौ विज्ञानकारणातिरिक्त-कारणान्तर[4]सव्यपेक्षत्वमसिद्धम्[5] प्रामाण्यस्य [6]तदितरस्यैवाभावात् । [7]गुणाख्यमस्तीति

किन्तु विषयपरिच्छित्तिलक्षण अर्थात् विषयके जाननेरूप और प्रवृत्तिलक्षण-अर्थात् विषयमें प्रवर्तनरूप जो प्रमाणका कार्य है उसमें अभ्यासदशाकी अपेक्षा प्रमाणता स्वतः और अनभ्यासदशाकी अपेक्षा परतः होती है, ऐसा निश्चय जानना चाहिए।

विशेषार्थ—परिचित अवस्थाको अभ्यासदशा और अपरिचित अवस्था-को अनभ्यासदशा कहते हैं। हमें अपने गांवके जलाशय, नदी, बावड़ी आदि परिचित है, अतः उनकी ओर जानेपर जो जलज्ञान उत्पन्न होता है, उसकी प्रमाणता तो स्वतः ही होती है,। किन्तु अन्य अपरिचित ग्रामादिकमें जानेपर 'यहां जल होना चाहिए' इस प्रकार जो जलज्ञान होगा, वह शीतल वायुके स्पर्शसे, कमलोंकी सुगन्धिसे या पानी भरकर आते हुए व्यक्तियोंके देखने आदि पर निमित्तोंसे ही होगा, अतः उस जलज्ञानकी प्रमाणता अनभ्यासदशामें परतः मानी जायगी। उत्पत्तिमें परतः प्रमाणता कहनेका तात्पर्य यह है कि अन्तरङ्ग कारण ज्ञानावरण कर्मका क्षयोपशम होनेपर भी वाह्यकारण इन्द्रियादिक-के निर्दोष होनेपर ही नवीन प्रमाणतारूप कार्य उत्पन्न होता है, अन्यथा नही। अतः उत्पत्तिमें परतः प्रमाणता स्वीकार की गई है। तथा विषयके जानने रूप और प्रवृत्तिरूप प्रमाणके कार्यमें अभ्यासदशाकी अपेक्षा तो प्रमाणकी प्रमाणता स्वतः अर्थात् वाह्यकारणोंके विना अपने आप ही होती है और अनभ्यास-दशामें परतः अर्थात् वाह्यकारणोंके मिलनेपर ही होती है।

शङ्का—प्रमाणताकी उत्पत्तिमे विज्ञानके कारण जो निर्दोष नेत्रादिक, उनसे भिन्न अन्य कारणोंकी अपेक्षा असिद्ध है अर्थात् अन्य कारण नहीं है। अतः प्रमाणकी प्रमाणता स्वतः ही होती है; क्योंकि ज्ञानके अतिरिक्त अन्य कारणका अभाव है। यदि कहा जाय कि अन्य कारण नेत्रादिककी निर्मलता

---

१. अज्ञाननिवृत्तिलक्षणे। २. स्वस्य ज्ञानस्य कार्ये प्रामाण्यं तस्मिन्। ३. प्रामाण्यमुत्पत्तौ परत एव, ज्ञानकारणातिरिक्तकारणान्तरसव्यपेक्षत्वात्प्रदीप-वदित्युच्यमाने मीमांसकः प्राह—। ४. चक्षुरादेर्नैर्मल्यं—। ५. यतो ज्ञानेनैव पुरुषा अनन्य-[illegible]कार्येऽपि प्रवर्तन्ते, ततः ज्ञानातिरिक्तकारणान्तरसव्यपेक्षत्वमसिद्धमिति। ६. ज्ञाना-तिरिक्तकारणान्तरस्यैव। ७. नयने गुणाः सन्ति, यथार्थोपलब्धेः प्रामाण्यान्यथानुपपत्तेरिति।

नाङ्मात्रम्, विधिमुखेन[1] कार्यमुखेन[2] वा गुणानामप्रतीतेः[3]। नाप्यप्रामाण्यं स्वत एव, प्रामाण्यं तु परत एवेति विपर्ययः शक्यते कल्पयितुम्[4]; अन्वय-व्यतिरेकाभ्यां हि त्रि[5]रूपाल्लिङ्गा[6]देव केवलात्[7] प्रामाण्यमुत्पद्यमानं दृष्टम्। प्रत्यक्षादिष्वपि तथैव प्रतिपत्तव्यम्[8], नान्यथेति। तत[9] एवाऽऽप्तोक्तत्वगुणसद्भावेऽपि न तत्कृतमागमस्य प्रामाण्यम्। तत्र[10] हि गुणेभ्यो दोषाणामभावस्तदभावाच्च संशय-विपर्यासलक्षणाप्रामाण्यद्वयासत्त्वेऽपि प्रामाण्य-

---

आदि गुण पाये जाते हैं, सो यह कहना वचन-मात्र ही है, वास्तविक नहीं; क्योंकि विधिमुखसे अर्थात् प्रत्यक्षसे और कार्यमुखसे अर्थात् अनुमानसे गुणोंकी प्रतीति नहीं होती है। प्रत्यक्ष तो गुणोंके जाननेमें समर्थ है नहीं, क्योंकि इन्द्रिय प्रत्यक्षकी अतीन्द्रिय अर्थमें प्रवृत्ति नहीं हो सकती, अतः उससे गुणोंकी प्रतीति माननेमें विरोध आता है। और अनुमान भी गुणोंके जाननेमें समर्थ नहीं है, क्योंकि साध्य-साधनके सम्बन्ध-बलसे ही अनुमान प्रवृत्त होता है। गुणोंका कोई लिङ्ग दृष्टिगोचर नहीं होता, जिससे कि साध्यरूप गुणोंका अनुमान किया जा सके। तथा प्रमाणमें अप्रमाणता स्वतः होती है और प्रमाणता परतः होती है, ऐसी विपरीत कल्पना करना भी शक्य नहीं, क्योंकि प्रत्यक्ष और अनुमानादिक प्रमाणोंमें प्रमाणता स्वतः प्रतिपादित की गई है। अन्वय-व्यतिरेकके द्वारा त्रिरूप लिङ्गसे अर्थात् पक्षधर्मत्व, सपक्षसत्त्व और विपक्षाद्व्यावृत्तिरूप केवल हेतुसे प्रमाणता उत्पन्न होती हुई देखी जाती है। तथा 'यह जल है' इत्यादि प्रकारके प्रत्यक्षज्ञानमें उसके स्वकारणसे ही प्रमाणता उत्पन्न होती है, ऐसा मानना चाहिए, अन्यथा नहीं। तथा आगमसे भी गुणोंका सद्भाव नहीं जाना जाता। यद्यपि आगममें आप्तके द्वारा कहा जाना यह गुण विद्यमान है, तथापि आगममें प्रमाणता उस गुणके कारण नहीं है। किन्तु आगममें गुणोंसे दोषोंका अभाव है और दोषोंके अभावसे संशय-विपर्यय-

---

१. प्रत्यक्षेण। २. अनुमानेन। ३. न खलु प्रत्यक्षं गुणान् प्रत्येतुं समर्थम्, तस्यातीन्द्रियार्थाप्रवृत्तेर्न गुणानां तेन प्रतीतिः, विरोधात्। नाप्यनुमानम्, तस्य प्रतिबन्धबलेनोत्पत्त्यभ्युपगमात्। प्रतिबन्धश्चेन्द्रियगुणैः सह लिङ्गस्य, स च प्रत्यक्षेण गृह्यतेऽनुमानेन वा। न तावत् प्रत्यक्षेण, तस्य तत्सम्बन्धग्रहणविरोधात्। नाप्यनुमानेन, तस्यापि गृहीतसम्बन्धलिङ्गप्रभवत्वात्। तत्राप्यनुमानान्तरेण तत्सम्बन्धग्रहणेऽनवस्थाप्रसङ्गात्। ४. यतः प्रत्यक्षानुमानादौ स्वतः प्रामाण्यप्रतिपादनादिति। ५. पक्षधर्मत्वसपक्षसत्त्वपक्षव्यावृत्तिरूपात्। ६. नयने गुणाः सन्ति, यथार्थोपलब्धेः। ७. गुणनिरपेक्षात्। ८. इदं जलमिति प्रत्यक्षज्ञाने तत्कारणादेव प्रामाण्यमुत्पद्यते, इति प्रतिपत्तव्यम्; न भिन्नकारणेन। ९. प्रत्यक्षानुमानादौ स्वतः प्रामाण्यप्रतिपादनादेव। १०. आगमे।

मौत्सर्गिक[1]मनपोदित[2]मास्त एवेति । ततः[3] स्थितम्—प्रामाण्यमुत्पत्तौ न सामग्र्यन्तर[4] सापेक्षमिति । [5]नापि विषयपरिच्छित्तिलक्षणे[6] स्वकार्ये[7] स्वग्रहणसापेक्षम्[8], अगृहीत-प्रामाण्यादेव ज्ञानाद्विषयपरिच्छित्तिलक्षणकार्यदर्शनात् ।

[9]ननु न परिच्छित्तिमात्रं प्रमाणकार्यम्, तस्य मिथ्याज्ञानेऽपि सद्भावात् । परिच्छित्तिविशेषं तु नागृहीतप्रामाण्यं विज्ञान जनयतीति ? [10]तदपि बालविलसितम्; न[11] हि प्रामाण्यग्रहणोत्तरकालमुत्पत्त्यवस्थातः आरभ्य परिच्छित्तेर्विशेषोऽवभासते, अगृहीत-प्रामाण्यादपि विज्ञानान्निर्विशेषविषयपरिच्छेदोपलब्धेः[12] । ननु[13] परिच्छित्तिमात्रस्य शुक्ति-

रूप जो दो अप्रमाण ज्ञान उनका अभाव है, अतएव आगमकी प्रमाणता स्वाभाविकरूपसे अबाधित सिद्ध हो जाती है। इसलिए यह बात स्थित हुई कि प्रमाणकी प्रमाणता उत्पत्तिमें अन्य सामग्रीकी अपेक्षा नहीं रखती है। और न विषयपरिच्छित्तिलक्षण स्वकार्यमे ही अपने ग्रहणकी अपेक्षा रखती है; क्योंकि जिसकी प्रमाणता गृहीत नहीं है अर्थात् जानी नहीं गई है ऐसे ज्ञानसे विषयकी परिच्छित्ति-स्वरूप कार्य देखा जाता है।

यहां पर नैयायिक मीमांसकांसे पूछते है कि प्रमाणका कार्य जानना-मात्र है, या ज्ञान-विशेषरूप है ? इनमेसे जाननामात्र तो प्रमाणका कार्य माना नहीं जा सकता; क्योंकि वह मिथ्याज्ञानमें भी पाया जाता है। यदि ज्ञानविशेष माना जाय, तो उसे अगृहीत प्रमाणतावाला विज्ञान उत्पन्न नहीं कर सकता है। नैयायिकके इस आक्षेपका उत्तर देते हुए मीमांसक कहते है कि आपका यह कथन बालकके वचन-विलास-समान है; क्योंकि प्रमाणकी प्रमाणता ग्रहण करनेके उत्तर कालमें उत्पत्ति-अवस्थासे लेकर जाननेरूप क्रियाकी कुछ भी विशेषता प्रतिभासित नहीं होती है। प्रत्युत अगृहीत प्रमाणतावाले भी विज्ञानसे विशेषता-रहित सामान्य विषयका ज्ञान पाया जाता है। इसपर नैयायिक कहते है कि जाननामात्र सामान्य ज्ञान तो सीपमें जो चांदीका ज्ञान

१. स्वाभाविकम् । २. अबाधितमनिराकृतमिति । ३. विज्ञानकारणादेव प्रामाण्यमुत्पद्यमानं प्रतिभासते यतः । ४. विज्ञानातिरिक्तकारणान्तरापेक्षम् । ५. ज्ञप्तिपक्षोऽयम् । ६. अज्ञानस्य निवृत्तिलक्षणे । ७. ज्ञानकार्ये । ८. नात्मग्रहणसापेक्षम् । कोऽर्थः ? पूर्वमात्मनैव ज्ञानं (कर्तृ) प्रामाण्य गृह्णातीत्ययमभिप्रायोऽस्य । ९. मीमांसकं प्रति नैयायिकः प्राह—प्रमाणकार्यं परिच्छित्तिमात्रं वा परिच्छित्तिविशेषो वेति विकल्पद्वयं कृत्वा दूषयन्ति जैनाः । १०. चेष्टितम् । ११. मीमांसकः प्राह— । १२. पूर्वं यद्रजतादि ज्ञातं तथैवाप्यनन्तरं वर्णादिकं न दृश्यते, इति निर्विशेषविषयपरिच्छेदोपलब्धिः । १३. मीमांसकं प्रति नैयायिकः प्राह— ।

कायां रजतज्ञानेऽपि सद्भावात्तस्यापि प्रमाणकार्यत्वप्रसङ्ग इति चेत्—भवेदेवम्[1], यत्रार्था-न्यथात्व[2]प्रत्ययस्वहेतूत्थदोष[3]ज्ञानाभ्यां तन्नापोद्येत[4]। तस्माद्यत्र[5] कारणदोषज्ञानं बाधकप्रत्ययो[6] वा नोदेति, तत्र स्वत[7] एव प्रामाण्यमिति। न चैव[8]मप्रामाण्येऽप्याशङ्कनीयम्[9]; तस्य विज्ञानकारणातिरिक्तदोषस्वभावसामग्रीसव्यपेक्षतयोत्पत्तेः; निवृत्तिलक्षणे[10] च स्वकार्ये [11]स्वग्रहणसापेक्षत्वात्। [12]तद्धि यावन्न ज्ञातं न तावत् [13]स्वविषयात्पुरुषं निवर्तयतीति।

होता है, उसमें भी पाया जाता है, इसलिए उसे भी प्रमाणका कार्य मान जायगा? इसका उत्तर देते हुए मीमांसक कहते हैं कि ऐसा तब हो, जब यदि पदार्थके अन्यथापनेकी प्रतीति और अपने कारणोंसे उत्पन्न हुए दोषका ज्ञान इन दोनोंके द्वारा उसका निराकरण न किया जावे। कहनेका भाव यह कि सीपमें चांदीका जो विपरीत ज्ञान होता है, वह उसके पश्चात् उक्त दोनों कारणोंसे दूर हो जाता है। इसलिए जहाँ पर कारणके दोषका ज्ञान और बाधक प्रत्ययका उदय नहीं होता, वहांपर स्वतः ही प्रमाणता होती है। और अप्रामाण्यके विषयमें भी ऐसी आशङ्का नहीं करनी चाहिए। अर्थात् अप्रमाणता स्वतः होती है, ऐसा नहीं मानना, क्योंकि विज्ञानके कारणोंसे अतिरिक्त जो दोषस्वभावरूप सामग्री है, उसकी अपेक्षासे अप्रमाणता उत्पन्न होती है। अप्रमाणता-निवृत्तिस्वरूप जो स्वकार्य है, उसमें अपने अप्रमाणतारूप स्वरूपके ग्रहणकी अपेक्षा है सो वह जब तक ज्ञात नहीं है, तब तक वह अपने अन्यथा प्रतीतिरूप विषयसे पुरुषको निवृत्त नहीं करती है। अर्थात् जब अप्रमाणताकी प्रतीति होती है, तभी उससे निवृत्ति होती है। इस प्रकार मीमांसकोंने यह

---

१. मीमांसकः प्राह—प्रथमं सर्वज्ञानं प्रमाणमेवोत्पद्यते, तस्माच्छुक्तिकायां रजत-ज्ञानमपि प्रथमं प्रमाणं भवेत्। २. अर्थो रजतलक्षणस्तस्यान्यथात्वं नेदं रजतं शुक्तिकेयं नीलपृष्ठत्रिकोणदर्शनादित्यनेन ज्ञानेन। ३. चक्षुरादिगतकाचकामलादिदोषज्ञानेन। ४. न निराक्रियेत। ५. वस्तुनि। ६. शुक्तिकेयमित्यादि बाधकज्ञानम्। ७. केवल विज्ञान-कारणचक्षुराद्यपेक्षयैव प्रामाण्यं परतः प्रतिपद्यते, न तु गुणापेक्षया। उक्तञ्च—स्वतः सर्व-प्रमाणानां प्रामाण्यमिति गम्यताम्। न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते॥ ८. उत्पत्त्यवस्थायामिति शेषः। ९. भोः जैन, अप्रामाण्यं स्वत इति नाशङ्कनीयम्। यथा प्रमाणं प्रथममुत्पन्नं तथा सर्वेषु पदार्थेषु अप्रमाणमेव ज्ञानं जायते इति नेत्यर्थः। केवल-चक्षुराद्युत्पत्तौ प्रामाण्यं परत एवेति प्रतिपद्यते। १०. यदि शुक्तिकाया रजतज्ञानेऽपि विज्ञानकारणातिरिक्तदोषाद्यपेक्ष्यस्तर्हि तन्निवृत्तिलक्षणे स्वग्रहणं कथमिति तन्निरूपयति। ११. आत्मग्रहणमिति। १२. यदा शुक्तिकाया रजतज्ञानं भवति, तदा तन्निवृत्तिलक्षणं कार्यं न रजतम्; किन्तु शुक्तिकेयमिति ज्ञप्तिपक्षेऽप्रामाण्यं परत एवेति प्रदर्श्यते। १३. रजतात्।

'तदेतत्सर्वमनल्पतमोविलसितम्। तथाहि—न तावत्प्रामाण्यस्योत्पत्तौ सामग्रयन्त[2]-रापेक्षत्वमसिद्धम्, आप्तप्रणीतत्वलक्षणगुणसन्निधाने सत्येवाऽऽप्तप्रणीतवचनेषु प्रामाण्य-दर्शनात्। यद्भावाभावाभ्यां[3] यस्योत्पत्त्यनुत्पत्ती तत् तत्कारणकमिति लोकेऽपि सुप्रसिद्ध-त्वात्। यदुक्तं—'विधिमुखेन कार्यमुखेन वा गुणानामप्रतीतिरिति' तत्र तावदाप्तप्रणीत-शब्दे न प्रतीतिर्गुणानामित्ययुक्तम्, आप्तप्रणीतत्वहानिप्रसङ्गात्। [4]अथ चक्षुरादौ [5]गुणा-नामप्रतीतिरित्युच्यते, तदप्ययुक्तम्, नैर्मल्यादिगुणानामबलाबालादिभिरप्युपलब्धेः। अथ नैर्मल्य स्वरूपमेव[6], न गुणः; [7]तर्हि हेतोरविनाभाववैकल्यमपि स्वरूपविकलतैव, न दोष इति समानम्[8]। अथ तद्वैकल्यमेव दोषः, तर्हि लिङ्गस्य[9] चक्षुरादेर्वा तत्स्वरूपसाकल्यमेव

सिद्ध किया कि प्रमाणकी प्रमाणता स्वतः और अप्रमाणता परतः होती है।

मीमांसकोंके उक्त कथनका परिहार करते हुए आचार्य कहते हैं—आपका कह सभी कथन महान् अज्ञानरूप अन्धकारके विलास-समान है। आगे यही स्पष्ट करते हैं—आपने जो प्रामाण्यकी उत्पत्तिमें अन्य सामग्रीकी अपेक्षाका होना असिद्ध कहा, सो ठीक नहीं है; क्योंकि आगमके आप्तप्रणीतत्व-लक्षण गुणके सन्निधान (सामीप्य) होने पर ही आप्त-प्रणीत वचनोंमें प्रमाणता देखी जाती है। जिसके सद्भावमें जिस कार्यकी उत्पत्ति हो और जिसके अभावमें कार्यकी उत्पत्ति न हो, वह पदार्थ उस कार्यका कारण होता है, यह बात लोकमें भी सुप्रसिद्ध है। अतः आगमकी प्रमाणता सत्यार्थ आप्तके प्रणीत होनेसे है, अन्यथा नहीं, ऐसा जानना चाहिए। और जो आपने कहा कि विधिमुख (प्रत्यक्ष) से अथवा कार्यमुख (अनुमान) से गुणोंकी प्रतीति नहीं होती है, सो आप्त-प्रणीत शब्दमें गुणोंकी प्रतीति नहीं होती, यह कहना ही अयुक्त है; क्योंकि यदि ऐसा माना जावे तो आगमकी आप्त-प्रणीतताकी हानिका प्रसङ्ग आता है, अर्थात् फिर आगम अनाप्त पुरुषके वचन-समान ठहरेगा। और जो आपका यह कहना है कि चक्षु आदि इन्द्रियोंमें गुणोंकी प्रतीति नहीं होती, सो आपका यह कथन भी अयुक्त है; क्योंकि नेत्रादिकमें निर्मलता आदि गुणोंकी उपलब्धि स्त्रियों और बालकों आदिको भी होती है। यदि आप कहें कि निर्मलता नेत्रादिकका स्वरूप ही है, गुण नहीं, तो हेतुके अविना-

१. अतः प्राह। २. नैर्मल्यादिगु-। ३. अन्वयव्यतिरेकाभ्याम्। ४. मीमांसकः [illegible]। ५. गुणानां प्रतीतिः सर्वथा नास्तीति वदति मीमांसकः। तस्मात् कुत्रचित्स्थले [illegible]। ६. गुणहेतुर्निरर्थकत्वात्। ७. [illegible]। ८. [illegible] नैर्मल्यादिगुणानां [illegible]। ९. [illegible]।

गुणः कथं न भवेत् ? 'आप्तोक्तेऽपि शब्दे'[1] मोहादिल[3]क्षणस्य दोषस्याभावमेव यथार्थ ज्ञानादि[4]लक्षणगुणसद्भावमभ्युपगच्छन्नन्यत्र[5] तथा[6] नेच्छतीति कथमनुन्मत्तः[7] ? अथोक्त[8]मेव—शब्दे[9] गुणाः[10] सन्तोऽपि[11] न प्रामाण्योत्पत्तौ व्याप्रियन्ते, किन्तु दोषाभाव एवेति। सत्यमुक्तम्, किन्तु न युक्तमेतत्; प्रतिज्ञामात्रेण[12] साध्यसिद्धेरयोगात्। न हि गुणेभ्यो दोषाणामभाव इत्यत्र[13] किञ्चिन्निबन्धनमुत्पश्यामोऽन्यत्र महामोहात्[14]। अथानुमानेऽपि त्रिरूपलिङ्गमात्रजनितप्रामाण्योपलब्धिरेव तत्र[15] हेतुरिति[16] चेन्न, उक्तोत्तर[17]त्वात्।

भावकी विकलता भी स्वरूपकी विकलता ही है, दोष नहीं; यह भी समान है। सारांश यह कि इस प्रकार गुणका निषेध और दोषका निषेध दोनों समान कोटिमें आते है। यदि कहा जाय कि स्वरूपकी विकलता तो दोष है, तो फिर हेतुके और नेत्रादिके अपने स्वरूपकी सकलता (सम्पन्नता) को ही गुण क्यों न माना जावे ? इसी प्रकार आप्तके कहे आगममें भी मोह, राग, द्वेषादि लक्षणवाले दोषके अभावको ही यथार्थ ज्ञान, वैराग्य, क्षमा आदि लक्षणवाले गुणके सद्भावको स्वीकार करते हुए भी मीमांसक अन्यत्र निर्मलता आदिमें गुणके सद्भावको नहीं मानते हैं, अतः वे उन्मत्तता-रहित कैसे माने जायें ? अर्थात् उन्हें उन्मत्त ही कहना चाहिये।

और जो आपने कहा है कि आगममें पूर्वापर विरोध-रहितपना आदि गुण तो हैं, पर वे प्रमाणताकी उत्पत्तिमें व्यापार नहीं करते हैं, किन्तु दोषका अभाव ही प्रमाणताकी उत्पत्तिमें व्यापार करता है, सो आपका यह कथन यद्यपि सत्य है, किन्तु युक्ति-युक्त नहीं हैं; क्योंकि प्रतिज्ञामात्रसे अर्थात् केवल कह देनेसे ही साध्यकी सिद्धि नहीं हो जाती है। 'गुणोंसे दोषोंका अभाव होता है' इस कथनमें आपके महामोहको छोड़कर हम अन्य कुछ भी कारण नहीं देखते हैं। यदि आप कहें कि अनुमानमें भी त्रिरूप लिङ्गमात्रसे उत्पन्न प्रमाणताकी उपलब्धि ही दोषके अभावमें कारण है सो यह कहना ठीक नहीं है, क्योंकि इसका उत्तर पहले ही दिया जा चुका है। हेतुमें त्रिरूपताका होना

---

१. न केवलमपौरुषेये वेद इत्यपि शब्दार्थः। २. आगमे। ३. आदिशब्देन रागद्वेषौ गृह्येते। ४. आदिशब्देन वैराग्यक्षमे गृह्येते। ५. प्रत्यक्षाद्युत्पत्तिसामग्रीविशेषे चक्षुरादिनैर्मल्यादौ। ६. गुणसद्भावम्। ७. काकुः। ८. तत एवाऽऽप्तोक्तत्वगुणसद्भावेत्यादिग्रन्थेन पूर्वमुक्तमेवेति भावः। ९. आप्तोक्तगुणसद्भावेऽपि। १०. पूर्वापरविरोधरहितत्वादयः। ११. अनुमानादपि गुणाः प्रतीयन्ते, न केवलं प्रत्यक्षादित्यपि शब्दार्थः। १२. वाङ्मात्रेण। १३. वचने। १४. महामोहं वर्जयित्वा। १५ दोषाभावे। १६. कारणम्। १७. तर्हि लिङ्गस्य चक्षुरादेर्वा तत्स्वरूपसाकल्यमेव गुण इत्यादिप्रकारेण।

तत्र[1] हि त्रैरूप्यमेव गुणो[2] यथा तद्वैकल्यं दोष इति नासम्मतो[3] हेतुः। अपि चाप्रामाण्येऽप्येवं[4] वक्तुं शक्यत एव। तत्र हि दोषेभ्यो गुणानामभावस्तदभावाच्च प्रामाण्यासत्त्वेऽप्रामाण्यमौत्सर्गिकमास्त इत्यप्रामाण्यं स्वत[5] एवेति तस्य भिन्नकारणप्रभवत्ववर्णनमुन्मत्तभाषितमेव स्यात्। किञ्च[6] गुणेभ्यो दोषाणामभाव इत्यभिदधता[7] गुणेभ्यो गुणा एवेत्यभिहितं स्यात्; 'भावान्तरस्वभावत्वादभावस्य[8]। ततोऽप्रामाण्यासत्त्वं प्रामाण्यमेवेति नैतावता परपक्षप्रतिक्षेपः[10]; अविरोधकत्वात्[11]। तथा[12] अनुमानतोऽपि[13] गुणाः प्रतीयन्त[14] एव। तथा हि—प्रामाण्यं विज्ञानकारणातिरिक्तकारण[15]प्रभवम्, विज्ञानान्यत्वे सति [16]कार्यत्वादप्रामाण्य-

ही गुण है. जैसे कि उसकी विकलता अर्थात् त्रिरूपताका न होना दोष है, इस प्रकार हेतु असम्मत नहीं है अर्थात् भले प्रकारसे माना हुआ है। दूसरी बात यह है कि अप्रमाणताके विषयमें भी ऐसा ही कहा जा सकता है कि दोषोंसे गुणोंका अभाव होता है, और उनके अभावसे प्रमाणताके अभावमें अप्रमाणता स्वभावतः सिद्ध होती है, इस प्रकार अप्रमाणताके स्वतः सिद्ध होने पर उसकी भिन्न कारणोंसे उत्पत्तिका वर्णन उन्मत्त-भाषित ही सिद्ध होता है।

भावार्थ—मीमांसक ज्ञानमें प्रमाणता तो स्वतः मानते हैं, किन्तु अप्रमाणता परतः मानते हैं। किन्तु ऊपरके कथनानुसार दोनों ही स्वतः सिद्ध होते हैं अतः उनकी उक्त मान्यता खण्डित हो जाती है।

और एक बात यह भी है कि 'गुणोंसे दोषोंका अभाव होता है' ऐसा कहनेवाले मीमांसकोंके द्वारा गुणोंसे गुण होते है, यही कहा गया है; क्योंकि अभाव भी भावान्तर-स्वभाववाला होता है, तुच्छाभावरूप नहीं। इसलिए अप्रामाण्यका अभाव ही प्रामाण्य है, सो इतने कहने मात्रसे पर-पक्षका निराकरण नहीं हो जाता है, क्योंकि यह कथन पर-पक्षका विरोधी नहीं है। तथा अनुमानसे भी गुण प्रतीत होते ही है। आचार्य स्वयं ही उसे कहते है—प्रामाण्य विज्ञानके कारणोंसे अतिरिक्त अन्य कारणोंसे उत्पन्न होता है, क्योंकि

१. हेतौ। २. अविनाभावित्वं गुणस्तद्वैकल्यमेव दोषः। ३. कथं न सम्मतो हेतुः, गुणयुक्तत्वात्। ४. गुणेभ्यो दोषाणामभाव इत्यादिप्रकारेण। ५. एवं च सति प्रामाण्यं स्वत एव जायते, गुणेभ्यो दोषाणामभाव इत्यादिना। ६. प्रकारान्तरेण वदति। ७. त्वया मीमांसकेन। ८. भावान्तरस्वभावो हि कयाचित्तु व्यपेक्षया, घटाभावस्य पटान्तरभाववत्। ९. प्रध्वंसाभावस्य। १०. जैनपक्षनिराकरणम्। ११. अप्रतिषेधकत्वात्। १२. प्रत्यक्षप्रकारेणोक्तम्। १३. अनुमानतोऽपि गुणाः प्रतीयन्ते एव, न केवलं प्रत्यक्षादिनापि शब्दार्थः। १४. प्रामाण्योत्पत्तौ गुणा व्याप्रियन्ते, अनुमानात् परिनिश्चितास्त्वया [illegible]। १५. निर्मलादिगुणजन्य वा। १६. कार्यत्वादित्युक्ते

वत[1]। तथा[2] प्रमाणप्रामाण्ये[3] भिन्नकारणजन्ये, भिन्नकार्यत्वात्; घटवस्त्रवदिति च। ततः स्थितं प्रामाण्यमुत्पत्तौ [4]परापेक्षमिति। तथा[5] विषयपरिच्छित्तिलक्षणे वा [6]स्वकार्ये स्वग्रहणं[7] नापेक्षत इति नैकान्तः, क्वचिदभ्यस्तविषय[8] एव परानपेक्षत्वव्यवस्थानात्[9]। अनभ्यस्ते तु जलमरीचिकासाधारणप्रदेशे जलज्ञानं [10]परापेक्षमेव। सत्यमिदं जलम्, विशिष्टाकारधारित्वात्, घटचेटिकापेटक-दर्दुराराव-सरोजगन्धवत्त्वाच्च; परिदृष्टजलवदित्यनुमानज्ञानादर्थ[11]क्रियाज्ञानाच्च स्वतः [12]सिद्धप्रामाण्यात्[13] प्राचीनज्ञानस्य [14]यथार्थत्वमा-

---

वह विज्ञानसे भिन्न होकर कार्य है; जैसे कि अप्रामाण्य। तथा अन्य अनुमान-प्रयोग करते हैं—प्रमाण और प्रामाण्य ये दोनों भिन्न-भिन्न कारणोंसे उत्पन्न होते है, क्योंकि दोनों भिन्न-भिन्न कार्य हैं। जैसे घट और वस्त्र भिन्न-भिन्न कार्य हैं, सो वे मिट्टी और सूत इन भिन्न-भिन्न कारणोंसे उत्पन्न होते हैं। इसलिए यह स्थित (सिद्ध) हुआ कि प्रमाणता उत्पत्तिमें पर की अपेक्षा रखती है अर्थात् परतः उत्पन्न होती है। तथा प्रमाणका कार्य जो अपने विषयको जानना और उनमें प्रवृत्ति करना है, उसमें भी वह अपने ग्रहणकी अपेक्षा नहीं रखता, ऐसा कोई एकान्त नहीं है; क्योंकि क्वचित् किसी अभ्यस्त (परिचित) प्रदेशमें ही परकी अपेक्षा नहीं होती, ऐसी व्यवस्था है। किन्तु अनभ्यस्त (अपरिचित) ऐसे जल और मरीचिकावाले साधारण प्रदेशमें जलज्ञान परकी अपेक्षासे ही उत्पन्न होता है। इसका अनुमान-प्रयोग इस प्रकार है—इस स्थलपर हमें जो जलज्ञान हुआ है, वह सत्य है; क्योंकि वह विशिष्ट आकारका धारक है। तथा यहाँ पर घटचेटिकाओं (पानी भरनेवाली स्त्रियों) का समूह है, मेंढकोंका शब्द सुनाई दे रहा है, कमलोंकी सुगन्धि आ रही है; इन सब कारणोंसे सिद्ध है कि हमारा जलज्ञान सत्य है। जैसे कि प्रत्यक्ष देखे हुए जलका ज्ञान सत्य होता है। इस प्रकारके स्वतः सिद्ध प्रमाणतावाले अनुमान ज्ञानसे और जलकी स्नान-पानादिरूप अर्थ-क्रियाके ज्ञानसे पूर्वमें

विज्ञानेन व्यभिचारः, यतस्तत्कार्यम्; परन्तु तत्र साध्यत्वं नास्ति। ततो हेतोः साध्यविरुद्धव्याप्तत्वाद् व्यभिचारित्वम्, अतो विज्ञानान्यत्वे सतीत्युक्तम्। एवं सति नित्यत्वादात्मना व्यभिचारो यतोऽसौ विज्ञानादन्यो भवति; कारणप्रभवो न भवति, तस्य नित्यत्वात्। ततः सर्वं साधनविधानम्। १. भेदे प्रामाण्याप्रामाण्यसाधारणी प्रतीतिः।
२. अनुमानान्तरम्। ३. चक्षुरादिधर्मिणि। ४. अनुमानापेक्षम्। ५. गुणापेक्षम्।
यथोत्पत्तौ प्रमाणस्य परानपेक्षत्वं न घटते। ६. प्रमाणकार्यं। ७. प्रमाणग्रहणम्।
८. प्रदेशे। ९. समर्थनात्। १०. अनुमानादि। ११. स्नानपानादि। १२. प्रत्यक्षानुमान-लक्षणज्ञानात्। १३. पूर्वजलज्ञानस्य। १४. परमार्थत्वम्। अनुमान-सापेक्षं प्रामाण्यम्।

'कल्पमवकल्प्यत[2] एव । यदप्यभिमतम्[3]—'प्रामाण्यग्रहणोत्तरकालमुत्पत्त्यवस्थातः परिच्छित्ते-र्विशेषो[4] नावभासत इति' । तत्र[5] यद्यभ्यस्तविषये नावभासत इत्युच्यते, तदा तदिष्यत[6] एव । तत्र प्रथममेव निःसंशयं विषयपरिच्छित्तिविशेषाभ्युपगमात् । अनभ्यस्तविषये तु [7]तद्ग्रहणोत्तरकाल[8]मस्त्येव विषयावधारणस्वभावपरिच्छित्तिविशेषः[9], पूर्वं[10] प्रमाणा-प्रमाणसाधारण्या[11] एव परिच्छित्तेरुत्पत्तेः । ननु[12] प्रामाण्य-परिच्छित्त्योरभेदात्कथं पौर्वा-पर्यमिति ? नैवम्, न हि सर्वाऽपि परिच्छित्तिः प्रामाण्यात्मिका; प्रामाण्यं तु परिच्छित्त्या-

उत्पन्न हुए जलज्ञानकी सत्यतारूप यथार्थता कल्पकाल पर्यन्त निश्चित होती है ।

और आपने जो यह कहा था—कि प्रमाणताके ग्रहण करनेके उत्तर काल में उत्पत्ति-अवस्थामें लेकर परिच्छित्तिका विशेष प्रतिभासित नहीं होता; सो यदि अभ्यस्त विषयमें नहीं प्रतिभासित होता, ऐसा आप कहते हैं, तो यह हम भी मानते हैं; क्योंकि वहाँपर प्रथम ही निःसन्देह रूपसे विषयकी परिच्छित्ति-विशेषता स्वीकार की गई है । अनभ्यस्त विषयमें तो प्रमाणता ग्रहण करनेके उत्तर कालमें विषयके निश्चय करनेरूप स्वभाववाली परिच्छित्ति-की विशेता प्रतिभासित होती ही है; क्योंकि अनभ्यस्त विषयमें पहले प्रमाण और अप्रमाणमें समानरूपसे रहनेवाली ही परिच्छित्ति उत्पन्न होती है ।

शङ्का—प्रमाणता और परिच्छित्तिमें कोई भेद नहीं है, अतः उनमें पौर्वापर्य (आगे-पीछे होना) कैसे सम्भव है ?

समाधान—यह कहना ठीक नहीं; क्योंकि सभी परिच्छित्तियाँ प्रामाण्यात्मक ही नही होती, किन्तु प्रामाण्य परिच्छित्त्यात्मक ही होता है । इसलिए कोई दोष नहीं है ।

भावार्थ—प्रमाणकी प्रमाणता तो सदा ही वस्तुको यथाथ जाननेवाली होती है, किन्तु वस्तुके जाननेवाली सभी क्रियाएँ प्रमाणतावाली नहीं होतीं, उनमेंसे कितनी ही उत्तरकालमे अप्रामाणिक सिद्ध होती है । अतः प्रमाणता और परिच्छित्तिमें अन्तर है, इसीलिए उनमें पूर्वापरता बन जाती है ।

१. कल्पपर्यन्तम् । २. निश्चीयते । ३. त्वया मीमांसकेन । ४. अनुमानसापेक्ष परिच्छित्तिविशेषः । ५. विकल्पद्वयं कृत्वोच्यते । ६. यद्यपि तदिष्यते [illegible] । ७. प्रमाणग्रहण- । ८ [illegible] । ९. निश्चयेन सत्यमेव [illegible] । १०. [illegible] एव । ११. तावद्गुणत्व समानाशः । १२. मीमांसकः प्राह ।

...क्रमेणेति न दोषः[1]। यदप्युक्तम्—'बाधककारण[2]-दोषज्ञानाभ्यां [3]प्रामाण्यमपोह्यत[4] इति' तदपि फल्गुभाषितमेव; अप्रामाण्येऽपि तथा वक्तुं शक्यत्वात्। तथा हि—प्रथमम[5]प्रमाणमेव ज्ञानमुत्पद्यते, पश्चाद्बाधबोध[6]-गुण[7]ज्ञानोत्तरकालं तदपोह्यत[8] इति। तस्मा[9]प्रामाण्यमप्रामाण्यं वा स्वकार्ये क्वचिदभ्यासानभ्यासापेक्षया स्वतः परतश्चेति निर्णेतव्यमिति[10]।

और जो आपने कहा है कि 'बाधक कारण और दोष-ज्ञानसे प्रमाणता निराकरण कर दी जाती है। सो आपका यह कथन भी निःसार है; क्योंकि अप्रामाण्यके विषयमें भी हम ऐसा ही कह सकते हैं—कि सर्वप्रथम अप्रमाण ज्ञान ही उत्पन्न होता है, पश्चात् बाधा-रहित ज्ञान और गुणका ज्ञान उत्पन्न होता है। पुनः उसके उत्तर कालमें उस अप्रमाणरूप ज्ञानका निराकरण होता है। इसलिए यह निश्चित हुआ कि प्रमाणता और अप्रमाणता अर्थकी परिच्छित्तिरूप स्वकार्यमें क्वचित् अभ्यासदशाकी अपेक्षा स्वतः उत्पन्न होती है और क्वचित् अनभ्यासदशाकी अपेक्षा परतः उत्पन्न होती है। अतः यही निर्णय करना चाहिए।

उपसंहार—बौद्ध लोग प्रमाणकी प्रमाणता स्वतः मानते हैं, नैयायिक प्रमाणकी प्रमाणता परतः ही मानते हैं। मीमांसक उत्पत्ति और ज्ञप्ति दोनों ही अवस्थाओंमें प्रमाणता स्वतः और अप्रमाणता परतः मानते है। सांख्य प्रमाणता तो परतः मानते है किन्तु अप्रमाणता स्वतः मानते हैं। विभिन्न मतावलम्बियोंके उक्त कथनोंका आचार्यने भली प्रकार निराकरण और दोषापादन करते हुए अन्तमें सूत्रोक्त बातको सप्रमाण सिद्ध किया है कि परिचित अवस्थामें प्रमाणकी प्रमाणता स्वतः और अपरिचित दशामें परतः होती है। यही बात अप्रमाणताके विषयमें भी जानना चाहिए।

---

१. इति न विरोधः। २. ज्ञानावरणादि बाधकम्, काचकामलादि दोषः। बाधकं च कारणदोषज्ञानं च ताभ्याम्। ३. परिच्छित्त्यात्मकम्। ४. निराक्रियते। ५. शुक्तिकाया रजतज्ञानम्। ६. परिच्छित्तिः। ७. वस्तुयाथात्म्यज्ञानम्। ८. निराक्रियते। अन्धकूपवत्, यथाऽन्धकूपे जलं नास्तीति निश्चितं वर्तते, तदा कश्चिदागत्य प्रतिपादयति यदन्धकूपे जलमस्तीति। तदैव स्वत एवेत्यप्रामाण्यमवधार्यतेऽनभ्यस्तत्वात्। अनभ्यस्तदशायामप्रामाण्यं परत एव। ९. अर्थपरिच्छित्तिलक्षणं। १०. स्वतो बुद्धोऽन्यतो यौगो ज्ञप्त्युत्पत्त्योर्द्वयं स्वतः। प्रामाण्यं परतोऽन्यच्च जैमिनिः कपिलोऽन्यथा ॥१॥

देवस्य सम्मतमपास्तसमस्तदोषं
वीक्ष्य प्रपञ्चरुचिरं रचितं समस्य ।
माणिक्यनन्दिविभुना शिशुबोधहेतो-
र्मानस्वरूपममुना[1] स्फुटमभ्यधायि ॥६॥

इति परीक्षामुखलघुवृत्तौ प्रमाणस्य स्वरूपोद्देशः ॥ १ ॥

अकलङ्कदेवके द्वारा सम्मत, समस्त दोषोंसे रहित, विस्तृत और सुन्दर प्रमाणके स्वरूपको माणिक्यनन्दी स्वामीने देख करके अर्थात् स्वयं जान करके शिशुजनोंके बोधके लिए उसे परीक्षामुख नामक ग्रन्थमें संक्षेपसे रचा अर्थात् कहा। उसीको इस अनन्तवीर्यने स्पष्ट रूपसे यहाँपर कहा है ॥ ६ ॥

इस प्रकार परीक्षामुखकी लघुवृत्तिमें प्रमाणके स्वरूपका वर्णन करनेवाला
प्रथम समुद्देश समाप्त हुआ।

१. अदस्तु विप्रकृष्टे दूरतरं तेन, अनन्तवीर्येण मया ।

द्वितीयः समुद्देशः

अथ प्रमाणस्वरूपविप्रतिपत्तिं निरस्येदानीं सङ्ख्याविप्रतिपत्तिं प्रतिक्षिपन्[1] सकलप्रमाणभेदसन्दर्भसङ्ग्रहपरं[2] प्रमाणेयत्ता[3]-प्रतिपादकं वाक्य[4]माह—

[5]तद् द्वेधा ॥१॥

तच्छब्देन प्रमाणं परामृश्यते। तत्प्रमाणं स्वरूपेणावगतं द्वेधा द्विप्रकारमेव[6], सकलप्रमाणभेदाना[7]मत्रै[8]वान्तर्भावात्[9]।

तद्द्वित्वमध्यक्षानुमानप्रकारेणापि सम्भवतीति तदाशङ्कानिराकरणार्थं सकलप्रमाणभेदसङ्ग्रहशालिनीं सङ्ख्यां प्रव्यक्तीकरोति—

उक्त प्रकारसे प्रमाणकी स्वरूपविप्रतिपत्तिका निराकरण करके अब इस समय आचार्य प्रमाणकी संख्याविप्रतिपत्तिका निराकरण करते हुए प्रमाणके समस्त भेदोंके सन्दर्भका संग्रह करनेवाले और प्रमाणकी संख्याका प्रतिपादन करनेवाले सूत्रको कहते हैं—

सूत्रार्थ—वह प्रमाण दो प्रकारका है ॥ १ ॥

यहां पर 'तद्' शब्दसे प्रमाणका परामर्श किया गया है। जिसका स्वरूप जान लिया है, ऐसा वह प्रमाण दो प्रकारका ही है; क्योंकि प्रमाणके समस्त भेदोंका इन दो ही भेदोंमें अन्तर्भाव हो जाता है।

प्रमाणके ये दो भेद प्रत्यक्ष और अनुमान प्रकारसे भी सम्भव हैं, इस प्रकार बौद्धोंकी आशङ्काका निराकरण करनेके लिए प्रमाणके समस्त भेदोंका संग्रह करनेवाली संख्याको आचार्य उत्तरसूत्रके द्वारा व्यक्त करते हैं—

---

१. निराकुर्वन्। २. रचनासंक्षेपाचरणपरम्। ३. सख्या। ४. परस्परापेक्षाणां पदानां निरपेक्षसमुदायो वाक्यम्। ५. तच्छब्देन व्याप्तिप्रत्यासत्त्योः प्रत्यासत्तिर्गरीयसी न्यायमाश्रित्य प्रामाण्यं न परिगृह्यते, अपि तु गौणमुख्योर्मुख्ये कार्यः सम्प्रत्ययः; इति प्रमाणमेव परामृश्यते। यतः प्रमाणस्य मुख्यत्वं प्रकृतप्रमेयत्वात्; प्रामाण्यस्य गौणत्वमानुषङ्गिकप्रमेयत्वादिति।

६. सकलं निर्धारणमेवेति न्यायादेवकारः। ७. अनुमानादीनाम्। ८. द्वित्वसंख्यायाम्। ९. व्यक्तिभेदे लक्षणैकत्वमन्तर्भावः।

[1]प्रत्यक्षेतर[2]भेदात् ॥२॥

प्रत्यक्षं वक्ष्यमाणलक्षणम्, इतरत्परोक्षम्, ताभ्यां भेदात् प्रमाणस्येति शेषः। न हि [3]परपरिकल्पितैक[4]द्वित्रिचतुःपञ्चषट्प्रमाणसङ्ख्यानियमे निखिलप्रमाणभेदाना[5]मन्तर्भावविभावना शक्या कर्तुम्। तथा हि—प्रत्यक्षैकप्रमाणवादिनश्चार्वाकस्य नाध्यक्षे लैङ्गिक[6]स्यान्तर्भावो युक्तः; तस्य[7] तद्विलक्षणत्वात्[8], सामग्री-स्वरूपभेदात्[9]।

अथ[10] नाप्रत्यक्षं प्रमाणमस्ति[11], विसंवादसम्भवात्[12]। निश्चिताविनाभावाल्लिङ्गा[13]

सूत्रार्थ—प्रत्यक्ष और इतर अर्थात् परोक्षके भेदसे प्रमाण दो प्रकारका है ॥ २ ॥

प्रत्यक्षका लक्षण आगे कहा जा रहा है, उससे भिन्न ज्ञान परोक्ष है। उनके भेदसे प्रमाणके दो भेद होते है। अन्यमतावलम्बियोंके द्वारा परिकल्पित एक, दो, तीन, चार, पांच और छह प्रकारकी प्रमाण-संख्याके नियममें प्रमाणके समस्त भेदोंका अन्तर्भाव करना शक्य नहीं है। आगे इसीको स्पष्ट करते है—एकमात्र प्रत्यक्षप्रमाणवादी चार्वाकके प्रत्यक्षमें अनुमानका अन्तर्भाव करना सम्भव नहीं है; क्योंकि अनुमान प्रत्यक्ष-प्रमाणसे विलक्षण है, दोनोंकी सामग्री और स्वरूपमें भेद है। अर्थात् प्रत्यक्षज्ञानकी सामग्री इन्द्रियां है और विशदता (निर्मलता) उसका स्वरूप है। अनुमानकी सामग्री लिङ्ग (साधन-हेतु) है और अविशदता उसका स्वरूप है।

यहां चार्वाक कहता है कि प्रत्यक्षके अतिरिक्त अन्य कोई प्रमाण नहीं है, क्योंकि उनके माननेमें विसंवाद सम्भव है। देखो—अनुमानको प्रमाण माननेवालोंका कहना है कि निश्चित अविनाभावी लिङ्गसे अर्थात् साध्यके

---

१. अक्षमात्मानं प्रत्याऽऽश्रितं प्रत्यक्षमिति मुख्यप्रत्यक्षम्। अक्षमक्षं प्रति वर्तते इति प्रत्यक्षं सांव्यवहारिकप्रत्यक्षम्। २. अश्नोति व्याप्नोति तान् तान् गुणपर्यायानित्यक्ष आत्मा, तस्मात् परावृत्तं परोक्षम्। अथवा परैरिन्द्रियादिभिरुक्ष्यते सिच्यतेऽभिवर्ध्यते इति परोक्षम्। ३. चार्वाक सौगत सांख्य नैयायिक-वैशेषिक-प्राभाकर-भाट्टाः। ४ जैमिनेः षट् प्रमाणानि चत्वारि न्यायवादिनः। सांख्यस्य त्रीणि वाच्यानि द्वे वैशेषिकबौद्धयोः ॥ १ ॥ ५. स्मृत्यादीनाम्। ६. लिङ्गाज्जातस्यानुमानस्य। ७. अनुमानस्य। ८. प्रत्यक्षानुमानविलक्षणत्वात्। ९. उत्पादकारणं प्रत्यक्षस्य इन्द्रियं सामग्री, वैशद्यं स्वरूपम्। अनुमानस्य लिङ्गं सामग्री, अवैशद्यं स्वरूपम्। १०. चार्वाकः प्राह। ११. इतरद् चार्वाकेन साध्यसाधनतया स्वीकृतेनानुमानेन, [illegible]। १२. व्यभिचारसम्भवात्, [illegible]। १३. [illegible] नियते [illegible] लिङ्ग।

लिङ्गिनि[1] ज्ञानमनुमानमित्यानुमानिकशासनम्, तत्र[2] च[3] स्वभावलिङ्गस्य[4] बहुलमन्यथापि[5] भावो[6] दृश्यते। [7]तथा हि—कषायरसोपेतानामामलकानामेतद्देशकालसम्बन्धिनां दर्शनेऽपि देशान्तरे कालान्तरे [8]द्रव्यान्तरसम्बन्धे चान्यथापि[9] दर्शनात्स्वभावहेतुर्व्यभिचार्येव,[10] लता[11]चूतवल्लताशिंशपादि[12]सम्भावनाच्च। तथा[13] कार्यलिङ्गमपि [14]गोपालघटिकादौ धूमस्य श[15]क्रमूर्ध्नि चान्यथापि[16] भावात्पावकव्यभिचार्येव। ततः[17]

विना जिसका न होना निश्चित है, ऐसे साधन (हेतु) से लिङ्गी जो साध्यका ज्ञान होता है, वह अनुमान कहलाता है। ऐसा अनुमानवादियोंका कथन है। हेतु (लिङ्ग) तीन प्रकारका है—स्वभावलिङ्ग, कार्यलिङ्ग और अनुपलब्धिलिङ्ग। इनमेंसे स्वभावलिङ्गके प्रायः अन्यथाभाव अर्थात् साध्यके विना भी सद्भाव पाया जाता है। आगे इसे ही स्पष्ट करते हैं—इस देश और काल-सम्बन्धी आंवलोंके कसैले रससे युक्त दिखाई देनेपर भी देशान्तरमें और कालान्तरमें अन्य द्रव्यके सम्बन्ध मिलनेपर अन्यथा भी स्वभाव देखा जाता है, अर्थात् दुग्धादिके द्वारा सींचे जानेपर किसी देशमें और किसी कालमें आंवलोंका मधुर रसरूप परिणमन पाया जाता है, अतः स्वभावहेतु व्यभिचारी है। इसी प्रकार किसी देशमें आम्र वृक्षरूप है, तो किसी देशमें आम्र लताके आकारमें पाया जाता है। कहीं शीशम वृक्षरूप है, तो कहीं लताके रूपमें होनेकी सम्भावना है। इसलिए स्वभावहेतुके व्यभिचारी होनेसे उसके द्वारा होनेवाला साध्यका ज्ञानरूप अनुमान भी व्यभिचारी सिद्ध होता है। तथा कार्यलिङ्ग भी व्यभिचारी ही

१. साध्ये। २. त्रिषु लिङ्गेषु। ३. स्वभावलिङ्ग-कार्यत्वादिहेतोर्व्यभिचारित्वं दर्शयति। ४. सौगताभिमतस्य। ५. साध्यं विनापि। ६. सद्भावः। ७. स्वभावहेतोर्व्यभिचारित्वं दर्शयति। ८. दुग्धादिद्रव्यसेचने। ९. मधुररसोपेतत्वेनापि। १०. इदं फलं कषायरसोपेतम्, आमलकफलत्वात्, परिदृष्टामलकफलवत्। इत्यत्र मधुररसोपेतामलकफलेन व्यभिचारः—देशान्तर्वर्तीनि आमलकफलानि कषायरसोपेतानि, आमलकफलत्वात्; परिदृष्टामलकीफलवत्। ११. वृक्षोऽयं चूतत्वादित्यत्र चूतो धर्मी, 'वृक्षो भवतीति साध्यं धर्मः; चूतत्वादिति हेतुः। 'यो यश्चूतः स वृक्षः' इति नियमो न, यतोऽत्र लताचूतेन व्यभिचारः; लताकाराम्रवत्। १२. वृक्षोऽयं शिंशपात्वादित्यत्र देशान्तरसम्भवशिंशपालतया व्यभिचारः, यतो देशान्तरेऽपि लताशिंशपा भवति। तथा वेत्रबीजं दग्धं कदलीकाण्डं जनयति; न तु पणसबीजम्। अतः स्वभावहेतुर्व्यभिचारी। १३. कार्यहेतोर्व्यभिचारित्वं दर्शयति। १४. इन्द्रजालघटिकादौ। १५. वल्मीकशिरसि। १६. अग्निं विनापि। १७. स्वभावकार्यहेत्वोरविनाभावित्वाभावात्तदुद्भूतानुमानस्य

प्रत्यक्षमेवैकं प्रमाणमस्यैवाविसंवादकत्वा[१]दिति ।

तदेतद् वालविलसितमिवाभाति; उपपत्तिशून्यत्वात् । तथाहि—किमप्रत्यक्षस्योत्पादककारणाभावादालम्ब[२]नाभावाद्वा प्रामाण्यं निषिध्यते ? तत्र[३] न तावत्प्राक्तनः पक्षः; तदुत्पादकस्य सुनिश्चितान्यथानुपपत्ति[४]-नियतनिश्चयलक्षणस्य साधनस्य सद्भावात् । नो खल्वप्युदीचीनः[५] पक्षः तदालम्बनस्य[६] पावकादेः सकल[७]विचारचतुरचेतसि सर्वदा प्रतीयमानत्वात् । यदपि स्वभावहेतोर्व्यभिचारसम्भावनमुक्तम्, तदप्यनुचितमेव; स्वभावमात्रस्याहेतुत्वात् । व्याप्य[८]रूपस्यैव स्वभावस्य व्यापकम्प्रति[९] गमकत्वाभ्युपगमात् । न च व्याप्यस्य व्यापकव्यभिचारित्वम्, व्याप्यत्वविरोधप्रसङ्गात् ।

है । यदि धूमको अग्निका कार्य मानकर उससे अग्निका अनुमान करते हैं, तो इन्द्रजालियाके घट आदिमें तथा बाँवीमें धूम अग्निके विना भी निकलता हुआ देखा जाता है । अतः कार्यहेतुके व्यभिचारी होनेसे उसके द्वारा होनेवाले साध्यका ज्ञान भी यथार्थ नहीं हो सकता है । (अनुपलब्धिरूप लिङ्ग तो अभावको ही सिद्ध करता है अतः उससे प्रकृतमें किसी इष्टकी सिद्धि नहीं होती ।) इसलिए एकमात्र प्रत्यक्ष प्रमाणको ही मानना ठीक है; क्योंकि उसके ही अविसंवादीपना पाया जाता है ।

चार्वाकका यह कथन वाल-विलासके समान प्रतिभासित होता है, क्योंकि उनका कथन युक्ति-शून्य है । आगे उसीको स्पष्ट करते हैं—आचार्य उनसे पूछते हैं कि आप लोग अप्रत्यक्ष अर्थात् परोक्षरूप अनुमान ज्ञानकी प्रमाणताका निषेध उत्पादक कारणोंके अभावसे करते हैं, अथवा विषयरूप आलम्बनके अभावसे करते हैं ? इनमेंसे प्रथम पक्ष तो माना नहीं जासकता; क्योंकि जिसकी अन्यथानुपपत्ति सुनिश्चित है, ऐसे लक्षणवाले अनुमानके उत्पादक साधनका सद्भाव पाया जाता है । दूसरा पक्ष भी ठीक नहीं है; क्योंकि; अनुमानके विषयरूप आलम्बन अग्नि आदिक सभी विचार-चतुर लोगोंके चित्तमें सदा प्रतीत होते है । और जो आपने स्वभावहेतुके व्यभिचारकी संभावना कही, सो वह भी अनुचित ही है, क्योंकि केवल स्वभावको हेतुपना नहीं स्वीकार किया गया है, किन्तु व्याप्यरूप स्वभावको ही व्यापकके प्रति गमक माना गया है अतः व्याप्यके व्यापकसे व्यभिचारपना भी नहीं है;

प्रमाणत्वं न घटते यतः । १. प्रत्यक्षं धर्मि प्रमाणं भवतीति साध्यो धर्मः अविसंवादकत्वात् [illegible] हेतुः । २. विषयाभावात् । ३. उत्पादककारण[illegible] [illegible] । ४. साध्याविनाभावेन [illegible]नुपपत्तिः । ५. द्वितीयः । ६. अनुमान[illegible]नुमाना- [illegible] । ७. [illegible] । ८. [illegible] । ९. व्यापकं प्रति ।

किञ्चैवंवादिनो[1] नाध्यक्षं प्रमाणं व्यवतिष्ठते; [2]तत्राप्यसंवादस्यागौणत्वस्य[3] च[4] स्वभावहेतोः प्रामाण्याविनाभावित्वेन निश्चेतुमशक्यत्वात्। यच्च कार्यहेतोरप्यन्यथापि[5] सम्भावनम्, तदप्यशिक्षितलक्षितम्; सुविवेचितस्य[6] कार्यस्य कारणाव्यभिचारित्वात्। यादृशो हि धूमो ज्वलनकार्यं भूधरनितम्बादावतिबहलधवलतया प्रसर्पन्नुपलभ्यते, न तादृशो [7]गोपालघटिकादाविति। यदप्युक्तम्—'शक्रमूर्ध्नि[8] धूमस्यान्यथापि भाव' इति तत्र किमयं शक्रमूर्द्धा अग्निस्वभावोऽन्यथा[9] वा? यद्यग्निस्वभावस्तदाऽग्निरेवेति कथं तदुद्भूत[10]धूमस्यान्यथाभावः[11] शक्यते कल्पयितुम्। अथानग्निस्वभाव[12]स्तदा तदुद्भवो[13] धूम एव न भवतीति कथं तत्र तस्य[14] तद्व्यभिचारित्व[15]मिति। तथा चोक्तम्—

जो व्यभिचार हो तो वह व्याप्य ही न कहा जा सकेगा।

और विशेष बात यह है कि अनुमानको प्रमाण नहीं माननेवाले तथा स्वभावहेतुको व्यभिचारी कहनेवाले चार्वाकके मतमें प्रत्यक्ष भी प्रमाण नहीं ठहरता है; क्योंकि, प्रत्यक्षमें अविसंवादकता और अगौणता अर्थात् मुख्यता ये दोनों ही बातें अनुमानके माने विना निश्चित नहीं की जा सकती और इन दोनोंका प्रमाणताके साथ अविनाभावी सम्बन्ध है। और जो आपने कार्य हेतुके अन्यथा अर्थात् अग्निके विना भी होनेकी सम्भावना व्यक्त की है, सो आपका यह कथन भी अशिक्षित-जैसा प्रतीत होता है, क्योंकि सुनिश्चित कार्यका कारणके साथ व्यभिचार नहीं पाया जाता। जैसा अग्निका कार्यरूप धूम पर्वतके तटभाग आदिमें अति सघन और धवल आकाररूपसे फैलता हुआ देखा जाता है, वैसा धूम इन्द्रजालियाके घट आदिमें नहीं पाया जाता। और जो आपने कहा कि बाँबीमें धूमका अन्यथा भी सद्भाव देखा जाता है। सो इस विषयमें हम आपसे पूछते हैं कि यह बाँबी अग्निस्वभाव है या अनग्निस्वभाव? यदि वह अग्निस्वभाव है, तो वह फिर अग्नि ही है, अतः उससे उत्पन्न हुए धूमके अन्यथाभावकी कल्पना कैसे की जा सकती है। और यदि वह बाँबी अग्निस्वभाव नहीं है, तब उससे निकलनेवाला पदार्थ धूम ही नहीं है, तो फिर उसका अग्निके साथ व्यभिचारपना कैसे सम्भव है। जैसा कि कहा है—

---

१. अनुमानाप्रामाण्यवादिनस्तव स्वभावहेतुर्व्यभिचारीति वादिनः। २. प्रत्यक्षेऽपि। ३. प्रत्यक्षं धर्मि, प्रमाणं भवतीति साध्यो धर्मः; अविसंवादकत्वादगौणत्वाच्चेत्यनुमानेन। ४. प्रत्यक्षप्रामाण्येऽप्रवर्तमानप्रत्यक्षेण निश्चेतुमशक्यस्य। ५. अग्निं विनापि। ६. सुनिश्चितस्य। ७. इन्द्रजालघटिकादौ। ८. वल्मीके। ९. अनग्निस्वभावः। १०. अग्निस्वभाववामलूरोत्पन्नधूमस्य। ११. अग्निव्यभिचारित्वम्। १२. शक्रमूर्द्धा। १३. वामलूरोत्पन्नः। १४. धूमस्य। १५. अग्निव्यभिचारित्वम्।

अग्निस्वभावः शक्रस्य मूर्द्धा चेदग्निरेव सः ।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत् ॥ १ ॥ इति ।

किञ्च—प्रत्यक्षं प्रमाणमिति कथमयं[1] परं[2] प्रतिपादयेत् ? परस्य[3] प्रत्यक्षेण[4] ग्रहीतुमशक्यत्वात् । [5]व्याहारादिकार्यप्रदर्शनात्तं[6] प्रति[7]पद्येतेति चेदायातं तर्हि कार्यात्कारणानुमानम् । अथ लोकव्यवहारापेक्षयेष्यत एवानुमानमपि, परलोकादावेवानभ्युपगमात्तदभावादिति कथं तदभावोऽनुपलब्धेरिति चेत् तदाऽनुपलब्धिलिङ्गजनितमनुमानमपरमापतितमिति । प्रत्यक्षप्रामाण्यमपि स्वभावहेतुजातानुमितिमन्तरेण नोपपत्तिमिय[8]र्तीति प्रागेवोक्तमित्युपरम्यते[9] । यदप्युक्तं[10] धर्मकीर्तिना—

यदि शक्रमूर्धा (बाँबी) अग्निस्वभाव है, तो वह अग्नि ही है। और यदि वह अग्निस्वभाव नहीं है, तो उससे निकलनेवाला वाष्प धूम कैसे हो सकता है ? ॥ १ ॥

दूसरी बात यह है कि एक प्रत्यक्षप्रमाणको ही माननेवाला यह चार्वाक शिष्यादि पर पुरुषको प्रत्यक्ष प्रमाण कैसे प्रतिपादन करेगा ? क्योंकि पर पुरुषका आत्मा प्रत्यक्षसे ग्रहण नहीं किया जा सकता है । प्रत्यक्षसे तो पर पुरुषका शरीर ही ग्रहण किया जाता है । यदि कहा जाय कि वचन चातुर्यादि कार्यके देखनेसे परकी बुद्धि आदिको जान लेगा, तब तो कार्यसे कारणका अनुमान ही आ गया फिर अनुमानका निषेध कैसे करते हो । यदि कहा जाय कि लोक-व्यवहारकी अपेक्षा हम अनुमानको मानते ही हैं, केवल परलोक आदिके सद्भावके विषयमें ही उसे नहीं मानते हैं, क्योंकि परलोकादिका अभाव है, तब हम पूछते है आप परलोकादिका अभाव कैसे कहते हो ? यदि आप कहें कि परलोकादिकी उपलब्धि नहीं अर्थात् दिखाई नही देते, इसलिए उनका अभाव मानते है, तब तो अनुपलब्धिलिङ्ग-जनित एक और तीसरा अनुमान आ गया, फिर अनुमानका निषेध कहाँ रहा ? तथा प्रत्यक्षकी प्रमाणता भी स्वभावहेतु-जनित अनुमानके विना युक्ति-संगतिताको प्राप्त नहीं होती, यह

१. चार्वाकः । २. शिष्यम् (शिष्यात्मानम्) । ३. चिद्रूपस्य, परोक्षित-मात्मनोरिति परमात्मन इत्यर्थः । ४. प्रत्यक्षेण शरीरस्यैव ग्रहणात् । आत्मनः शरीरा-[illegible]भिन्नत्वाच्छरीरेण ज्ञानस्वरूपात्मनोऽपि ग्रहणमिति चेन्न; शरीरप्रत्यक्षेऽपि बुद्धिविकल्पे संशयात् । तत्कथमित्युक्तं उच्यते—परं पश्यतः पुरुषस्य शरीरमात्रं दृष्ट्वा [illegible] [illegible] निश्चयो न भवति । अन्यथा परीक्षामन्तरेणापि तस्य [illegible] [illegible] । ५. वचनचातुर्यादि । ६. परबुद्ध्यादिकम् । ७. [illegible] । ८. [illegible] । ९. [illegible] मीयते । १०. प्रमाणविनिश्चये (?) ।

अथानुभूयमानस्य[1] विषयस्याभावात् स्मृतेरप्रामाण्यम् ? न[2], तथापि[3] अनुभूतेनार्थेन[4] सावलम्बनत्वोपपत्तेः। अन्यथा[5] प्रत्यक्षस्याप्यनुभूतार्थविषयत्वादप्रामाण्य मनिवार्यं

था। यदि उसे ऐसा प्रत्यभिज्ञान न हो, तो वह कभी भी धनको वापिस नहीं देगा और न मांगनेवाला मांग ही सकता है। प्रत्यभिज्ञानका प्रधान कारण या आधार स्मृति ही है और उसको प्रमाण माने विना लोक-व्यवहार चल नहीं सकता, अतः बौद्ध-सम्मत प्रमाणकी दो संख्या विघटित हो जाती है।

यदि कहा जाय कि अनुभूयमान विषय (पदार्थ) के अभाव होनेसे स्मृतिकी अप्रमाणता है, अर्थात् बौद्धमतानुसार प्रत्येक पदार्थ क्षणिक है, स्थायी नहीं; अतः जिस पदार्थका अनुभव किया था, वह स्मरण-कालतक विद्यमान ही नहीं रहता, तब उसकी स्मृतिको प्रमाण कैसे माना जा सकता है ? सो बौद्धोंका ऐसा कहना भी ठीक नहीं है; क्योंकि अनुभूयमान पदार्थके नष्ट हो जानेपर भी अनुभूत पदार्थके सावलम्बनता बन जाती है। अर्थात् स्मृतिकालमें अनुभूत वस्तुके अविद्यमान रहनेपर भी यतः उस वस्तुका उसकी विद्यमानतामें ही अनुभव हुआ था, अतः उसका स्मरण निरालम्ब तो नहीं है, सावलम्ब ही है। स्मरणको निरालम्ब तो तब माना जाय, जब वह विना किसी वस्तुके पूर्वमें अनुभव किये ही अकस्मात् उत्पन्न हो! सो ऐसा है नहीं। यदि उक्त प्रकारसे अनुभूत वस्तुके स्मरण होनेपर भी उसे निरालम्ब कहा जायगा तो प्रत्यक्षके भी अनुभूत अर्थका विषय होनेसे अप्रमाणता अनिवार्य हो जायगी।

भावार्थ— बौद्धलोगोंने प्रत्यक्षको अतीत पदार्थका विषय करनेवाला माना है। इस विषयमें उनको युक्ति यह है कि प्रत्येक पदार्थ प्रतिक्षण विनष्ट होते हुए भी अपना आकार उत्तर क्षणवर्त्ती ज्ञानको समर्पण करता जाता अतः प्रत्यक्षसे अतीतकालवर्ती पदार्थका ज्ञान होता है। यदि स्मृतिको प्रम न माना जाय, तो पदार्थके विनष्ट हुए पूर्व आकारका जो वर्तम

१. स्मृतिव्यतिरिक्तज्ञानमनुभवः, तेन ज्ञायमानस्य पदार्थस्य। २. बौद्ध प्रति जै प्राहेति चेन्न। ३. अनुभूयमानविषयाभावेऽपि। ४. स्वग्रामतटाकादिना। ५. उ विपर्ययेऽन्यथा शब्दः। अनुभूतेनार्थेन स्मृतेः सावलम्बनत्वेऽपि तदप्रामाण्ये। ६. भि काऊं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः। हेतुत्वमेव युक्तिज्ञास्तदाकारार्पणक्षमम्॥ इ सौगतैरङ्गीकारात्। प्रत्यक्षस्यातीतार्थविषयत्वात्तस्याप्यप्रामाण्य स्यात्। प्रत्यक्षस्यातीतार्थ विषयत्वं सौगतमतापेक्षयोक्तमिति बोद्धव्यम्। अथवा अनुभूतार्थविषयमात्रेण स्मृतेर ामाण्येऽनुमानेनाधिगतेऽग्नौ यत्प्रत्यक्षं तदप्यप्रमाणं स्यादनुभूतार्थविषयत्वाविशेषादिति।

स्यात्[1] । स्वविषयावभासन स्मरणेऽप्यवशिष्ट[2]मिति । किञ्च–स्मृतेरप्रामाण्येऽनुमानवार्तापि दुर्लभा; तया[3] 'व्याप्तेरविषयीकरणे[4] तदुत्थानायोगादिति[5] । तत इदं वक्तव्यम्—'स्मृतिः प्रमाणम्, अनुमानप्रामाण्यान्यथानुपपत्तेरिति[6] सैव प्रत्यक्षानुमानस्वरूपतया प्रमाणस्य द्वित्वसङ्ख्यानियमं विघटयतीति किं नश्चिन्तया ।

तथा[7] प्रत्यभिज्ञानमपि सौगतीयप्रमाणसङ्ख्यां विघटयत्येव; तस्यापि प्रत्यक्षानु-

---

क्षणमें प्रत्यक्षसे ग्रहण किया जाता है, वह ज्ञान असत्य ठहरेगा और इस प्रकार प्रत्यक्षकी अप्रमाणता रोकनेपर भी नहीं रुकेगी। अथवा अनुभूत अर्थको विषय करने मात्रसे ही यदि स्मृतिकी अप्रमाणता मानी जायगी, तो अनुमानसे जानी हुई अग्निमें जो प्रत्यक्ष प्रवृत्ति हो रही है, वह भी अप्रमाण माननी पड़ेगी; क्योंकि वहाँपर भी पहले अनुमानसे अग्निके निश्चय करनेरूप अनुभूत अर्थका विषय करना समान है।

यदि कहा जाय कि अपने विषयका जानना प्रमाण है, अतः प्रत्यक्ष-में अप्रमाणता सम्भव नहीं है, तो अपने विषयका जानना स्मरणमें भी समान है, फिर उसे आप लोग प्रमाण क्यों नहीं स्वीकार करते। दूसरी बात यह है कि स्मृतिको प्रमाणता न माननेपर अनुमानके प्रमाणताकी बात करना भी दुर्लभ हो जायगी, क्योंकि उस स्मृतिसे ही साध्य-साधनके सम्बन्धकी व्याप्ति विषय की जाती है। जब स्मृति प्रमाण ही नही मानी जायगी, तो उससे व्याप्तिका भी ग्रहण नही होगा। और इस प्रकार व्याप्तिके अविषय रहनेपर अनुमानका उत्थान भी नही हो सकेगा। इसलिए यह कहना चाहिए कि 'स्मृति प्रमाण है: अन्यथा अनुमानकी प्रमाणता नही बन सकती'। और इस प्रकार वह स्मृति प्रमाणकी बौद्धाभिमत प्रत्यक्ष-अनुमान-स्वरूप द्वित्व संख्याके नियमका विघटन कर देती है, फिर हमें चिन्ता करनेसे क्या लाभ है।

तथा प्रत्यभिज्ञान प्रमाण भी सौगतीय (सौगत अर्थात् बौद्धोंके द्वारा मानी गई) प्रमाण-संख्याका विघटन करता ही है, क्योंकि उसका भी बौद्धों-के द्वारा माने गये प्रत्यक्ष और अनुमान प्रमाणमें अन्तर्भाव नही किया जा सकता।

१. [illegible] २. [illegible] ३. स्मृत्या। ४. [illegible] । ५. [illegible] । ६. [illegible] । ७. स्मृतिरूपेण।

मानयोरनन्तर्भावात्। ननु[1] तदिति स्मरणमिदमिति प्रत्यक्षमिति ज्ञानद्वयमेव, न ताभ्यां[2] विभिन्नं प्रत्यभिज्ञानाख्यं वयं प्रतिपद्यमानं प्रमाणान्तरमुपलभामहे। कथं तेन[3] प्रमाण सङ्ख्याविघटनमिति? तदप्यघटितमेव,[4] यतः स्मरणप्रत्यक्षाभ्यां प्रत्यभिज्ञानविषयस्यार्थस्य ग्रहीतुमशक्यत्वात्। [5]पूर्वोत्तरविवर्त[6]वर्त्येकद्रव्यं हि प्रत्यभिज्ञाविषयः, न च [7]तत्स्मरणेनोपलभ्यते,[8] तस्यानुभूतविषयत्वात्। नापि प्रत्यक्षेण, तस्य वर्त्तमान[9]-विवर्तवर्तित्वात्। यदप्युक्तम्—'ताभ्या[10] भिन्नमन्यद् ज्ञानं नास्तीति' तदप्ययुक्तम्, अभेद[11]परामर्शरूपतया भिन्नस्यैवावभासनात्। न तयोरन्यतरस्य[12] वाऽभेदपरामर्शकत्वमस्ति;

शङ्का—यहांपर बौद्ध कहते हैं कि 'यह वही है' इस प्रकारके ज्ञानको आप जैन लोग प्रत्यभिज्ञान कहते है। सो 'यह' ऐसा कहना तो प्रत्यक्ष ज्ञान है और 'वही' यह स्मरण ज्ञान है। इस प्रकार स्मरण और प्रत्यक्ष इन दो ज्ञानोंसे भिन्न प्रत्यभिज्ञान नामका कोई अन्य प्रमाण प्रतीत होता हुआ हम नहीं देखते हैं, फिर उससे हमारी प्रमाण-संख्याका विघटन कैसे सम्भव है?

समाधान—आप लोगोका यह कथन भी घटित नहीं होता, क्योंकि स्मरण और प्रत्यक्षसे प्रत्यभिज्ञानके विषयभूत अर्थका ग्रहण करना शक्य नहीं है। इसका कारण यह है कि पूर्व और उत्तर काल-वर्ती दो पर्यायोमे रहनेवाला एक द्रव्य ही प्रत्यभिज्ञानका विषय है, सो वह पर्यायैकत्वरूप द्रव्य न तो स्मरणसे जाना जाता है, क्योंकि उसका विषय अनुभूत पदार्थको जानना है। और न वह पर्यायैकत्वरूप द्रव्य प्रत्यक्षसे ही जाना जाता है, क्योंकि उसका विषय वर्तमान पर्यायको जानना है। और जो आपने कहा कि इस स्मरण और प्रत्यक्षसे भिन्न कोई तीसरा ज्ञान नहीं है, सो आपका यह कहना भी अयुक्त है, क्योंकि पूर्वोत्तर पर्यायोमें रहनेवाले एकत्व आदिको ग्रहण करनेवाले प्रत्यभिज्ञानकी स्पष्टतया भिन्नरूपसे ही प्रतीति होती है। उक्त प्रकारके पूर्वोत्तर-विवर्तवर्त्ती एकत्वको परामर्श करना अर्थात् जानना न तो प्रत्यक्षके लिए ही सम्भव है, न स्मरणके लिए ही; और न उन दोनोके लिए ही, क्योंकि उनका विषय भिन्न-भिन्न है। यदि आप कहें कि हम अपने दोनो

१. बौद्धः प्राह—भो जैन! २. स्मरण-प्रत्यक्षाभ्याम्। ३. प्रत्यभिज्ञानेन। ४. जैनः प्राह—भो बौद्ध! त्वदुक्तमयुक्तमेव, ततः संख्यां विघटत्येव। ५. कोऽयं प्रत्यभिज्ञानस्य विषय इति मनसि कृत्वा तमेवाह। ६. पर्याय—। ७. पर्यायैकत्वम्। ८. उपलक्ष्यत इत्यपि पाठः। ९. 'सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादिना' अमुना प्रमाणेन तस्य वर्तमानविषयत्वसमर्थनादिति। १०. स्मरण-प्रत्यक्षाभ्याम्। ११ पूर्वोत्तरविवर्तवर्त्येकद्रव्यपरामर्शोऽभेदपरामर्शः। १२. तयोः स्मरण प्रत्यक्षयोरेकतरस्य वा।

विभिन्नविषयत्वात् । न चैतत्[1] प्रत्यक्षेऽन्तर्भवति, अनुमाने वा; तयोः[2] पुरोऽवस्थितार्थ-[3]विषयत्वेनाविनाभूतलिङ्गसम्भावितार्थविषयत्वेन[4] च पूर्वापरविकारव्याप्येकत्वाविषयत्वात् । नापि स्मरणे, तेनापि [5]तदेकत्वस्याविषयीकरणात् ।

अथ[6] संस्कार[7]-स्मरणसहकृतमिन्द्रियमेव प्रत्यभिज्ञानं जनयति, इन्द्रियजं चाध्यक्षमेवेति न प्रमाणान्तरमित्यपरः[8] । सोऽप्यतिबालिश एव[9], स्वविषयाभिमुख्येन[10] प्रवर्तमानस्येन्द्रियस्य सहकारिशतसमवधाने[11]ऽपि विषयान्तरप्रवृत्तिलक्षणातिशयायोगात् । विषयान्तरं चातीत-साम्प्रतिकावस्थाव्याप्येकद्रव्यमिन्द्रियाणां रूपादिगोचरचारित्वेन चरितार्थ-

---

प्रमाणोंमे से किसी एकमे उसका अन्तर्भाव कर लेंगे; सो न तो उसका प्रत्यक्षमें अन्तर्भाव किया जा सकता है, क्योंकि, वह तो सम्मुख अवस्थित अर्थको विषय करता है, और न अनुमानमे ही उसका अन्तर्भाव हो सकता है, क्योंकि वह अविनाभावी लिङ्गसे सम्भावित अर्थको विषय करता है। अतः इन दोनों ही प्रमाणोके द्वारा पूर्वापर विकार अर्थात् पर्याय-व्यापी एकत्वरूप द्रव्य विषय नही किया जा सकता। यदि आप स्मरणको भी तीसरा प्रमाण मानकर उसमें अन्तर्भाव करना चाहे, तो वह भी सम्भव नहीं; क्योकि स्मरणके द्वारा वह पूर्वापर पर्याय-व्यापी एकत्व विषय नहीं किया जा सकता।

यहांपर यौग कहते है कि संस्कार—जो कि धारणा-ज्ञानरूप एक प्रत्यक्ष-विशेष है—और स्मरणसे सहकृत इन्द्रिय ही प्रत्यभिज्ञानको उत्पन्न करती है और जो इन्द्रियोसे उत्पन्न हुआ ज्ञान है वह प्रत्यक्ष ही है, इसलिए प्रत्यभिज्ञान कोई भिन्न प्रमाण नहीं है। आचार्य कहते है कि ऐसा कहनेवाला व्यक्ति भी अतिमूर्ख ही है, क्योकि अपने विषयकी ओर अभिमुख होकर प्रवर्तमान इन्द्रियके सैकड़ो सहकारी कारणोंके सन्निधान होनेपर भी अपने विषयको छोड़कर विषयान्तरमें प्रवृत्ति करनेरूप अतिशयका होना असम्भव है। नेत्रादि इन्द्रियोकी प्रवृत्ति अपने-अपने रूपादि विषयमें ही होती है, रसादि विषयान्तरमे नहीं। इन्द्रियोंके लिए तो प्रत्यभिज्ञानका विषयभूत अतीत (भूत) और साम्प्रतिक (वर्तमान) कालवर्त्ती अवस्थाओंमे रहनेवाला एक

---

१. प्रत्यभिज्ञानम् । २. प्रत्यक्षानुमानयोः । ३. प्रत्यक्षस्य विषयः प्रदर्शितः । ४. अनुमानस्य विषयः प्रदर्शितः । ५. पूर्वापरविकार-व्याप्येकत्वस्य ।

६. यौगः प्राह । ७. प्रत्यक्षविशेषो धारणाज्ञानं संस्कारः । स्वाश्रयस्य प्रागुद्भू-[illegible]स्मरणानामनन्तरापादकोऽतीन्द्रियो धर्मो वा संस्कारः । ८. यौगः । ९. ना[illegible] प्रत्यभिज्ञाने [illegible] तदयुक्तम् । किन्तु विषयान्तरमप्यन्योन्यनुय प्रतिपादयति । १०. विषयाभिमुख्येन । ११. सन्निधानेऽपि ।

त्वाच्च[1]। नाप्यदृष्ट[2]-सहकारिसव्यपेक्षमिन्द्रियमेकत्वविषयम्, उक्तदोषादेव। किञ्च—अदृष्टसंस्कारादिसव्यपेक्षादेवाऽऽत्मन[3]स्तद्विज्ञान[4]मिति किन्न कल्प्यते[5]? दृश्यते हि स्वप्न[6]-सारस्वत[7]-चाण्डालिकादि[8]विद्यासंस्कृतादात्मनो विशिष्टज्ञानोत्पत्तिरिति।

[9]ननु अञ्जनादिसंस्कृतमपि चक्षुः[10] सातिशयमुपलभ्यत इति चेन्न, तस्य[11] स्वार्थ[12]-

---

द्रव्य विषयान्तर ही है; क्योंकि इन्द्रियां तो अपने रूपादि विषयोंमें प्रवृत्ति करके ही चरितार्थ होती हैं। यदि कहा जाय कि पुण्य-पाप-स्वरूप या किसी अदृश्य शक्तिरूप अदृष्टके सहकारीपनेकी अपेक्षा इन्द्रिय उस एकत्वको विषय कर लेगी, तो यह भी कहना ठीक नहीं; क्योंकि ऐसा माननेमें भी उक्त दोष आता है अर्थात् अदृष्ट आदि सैकड़ों ही सहकारी विशिष्ट कारणोंके मिल जानेपर भी इन्द्रियां अपने विषयको छोड़कर विषयान्तरमें प्रवृत्ति नहीं कर सकती हैं। अतः आप यौग लोग अदृष्ट और संस्कारादि सहकारी कारणोंकी अपेक्षासे आत्माके ही उस एकत्वको ग्रहण करनेवाला विज्ञान अर्थात् प्रत्यभिज्ञानरूप विशिष्ट ज्ञान क्यों नहीं मान लेते हैं जिससे कि उक्त अनर्थक कल्पनाएँ करनेकी आवश्यकता ही न रहे। स्वप्न, सारस्वत और चाण्डालिका आदि विद्याओंसे आत्माके विशिष्ट ज्ञानकी उत्पत्ति देखी ही जाती है।

विशेषार्थ—भूत भविष्यत् वर्तमान कालसम्बन्धी हानि लाभ आदि की सूचना जिससे मिले, वह स्वप्नविद्या है। असाधारण वादित्व, कवित्व आदिकी शक्ति जिससे प्राप्त हो वह सारस्वतविद्या है। नष्ट मुष्टि आदिकी करने और सूचना देनेवाली विद्याको चाण्डालिका विद्या कहते हैं। इन विद्याओंकी सिद्धिसे आत्माके अनेक लौकिक चमत्कार करनेवाले ज्ञानकी उत्पत्ति होती है।

शङ्का—यहाँ यौग कहते हैं—कि अञ्जनादिसे संस्कृत चक्षुके भी सातिशयपना देखा जाता है। अतः हमें प्रत्यभिज्ञानादि किसी विशिष्ट ज्ञानके मानने की आवश्यकता नहीं है।

१. प्रवृत्तार्थत्वात्। २. पुण्यपापलक्षण-। मतान्तरे विधिनिषेधजन्यत्वे मतीत्यतीन्द्रियत्वमित्युक्तम्। ३. एकत्वग्राहकत्वमात्मनः कल्पनीयम्, नत्विन्द्रियस्य। ४. उत्पद्यते इति शेषः। ५. त्वया यौगेन। ६. अतीतानागतवर्तमानलाभालाभादिसूचनी या सा स्वाप्नविद्या। ७. असाधारणवादित्व कवित्वादिविधायिनी सारस्वतविद्या। ८. नष्टमुष्ट्यादिसूचिका चाण्डालिका विद्या, मन्त्रविशेषः।
९. यौगः प्राह। १०. न केवलमात्मा। ११. चक्षुषः। १२. सन्निहितवर्तमान-

नतिक्रमेणैवातिशयोपलब्धेर्न [1]विषयान्तरग्रहण[2]लक्षणातिशयस्य। तथा चोक्तम्[3]—

[4]यत्राप्यतिशयो दृष्टः स [5]स्वार्थानतिलङ्घनात्।
दूर-सूक्ष्मादिदृष्टौ स्यान्न [6]रूपे श्रोत्रवृत्तितः ॥३॥

[7]नन्वस्य वार्तिकस्य[8] सर्वज्ञ-[9]प्रतिषेधपरत्वाद्विषमो[10] दृष्टान्त इति चेन्न; [11]इन्द्रियाणां विषयान्तरप्रवृत्तावतिशयाभावमात्रे सादृश्याद् दृष्टान्तत्वोपपत्तेः। न हि सर्वो दृष्टान्तधर्मो दार्ष्टान्तिके भवितुमर्हति, अन्यथा दृष्टान्त एव न स्यादिति।

समाधान—उनका यह कहना ठीक नहीं; नेत्रादिके अपने रूपादि विषयका उल्लंघन नहीं करके ही अतिशय देखा जाता है, न कि उनके स्वविषयको अतिक्रमण कर विषयान्तरको ग्रहण करनेवाला अतिशय देखा जाता है। जैसा कि कहा गया है—

जहाँ कहीं भी अतिशय देखा जाता है, वह अपने विषयका उल्लंघन नहीं करके देखा जाता है। गृद्धके दूरवर्त्ती पदार्थके देखनेमें और शूकरके सूक्ष्म वस्तु आदिके देखनेमें जो विशेषता है, वह नेत्रेन्द्रियकी विषयभूत सीमाके ही भीतर है, न कि श्रोत्रेन्द्रियसे रूपके देखनेमें अतिशय कहीं देखा गया है ॥३॥

शङ्का—यौग जैनोंसे कहते हैं कि मीमांसाश्लोकवार्तिकमें यह श्लोक सर्वज्ञताके निषेध करनेके लिए दिया गया है, वह यहाँपर प्रकरण-संगत न होनेसे विषम दृष्टान्त है।

समाधान—यह कोई दोष नहीं, क्योंकि वह यहाँपर इन्द्रियोंकी विषयान्तरमें प्रवृत्ति करनेरूप अतिशयके अभाव-मात्रमें सादृश्य (समानता) होनेसे कहा गया है, अतः उसके दृष्टान्तपना बन जाता है, क्योंकि दृष्टान्तके सभी धर्म दार्ष्टान्तमें होना चाहिए, ऐसा कोई नियम नहीं है; अन्यथा वह दृष्टान्त ही न रहेगा, बल्कि दार्ष्टान्त हो जायगा।

[illegible]नतिक्रमेणैव। १. रसादि-। २. उपलब्धि-। ३. भट्टेन मीमांसाश्लोकवार्तिके।

४. [illegible]दिनेत्रादौ। यतश्चक्षुः प्राबल्यं गृद्धस्य, श्रोत्रप्राबल्यं वराहस्य। ५. [illegible]दिवातिशयो दृष्टो नाविषये। ६. रूपविषये श्रोत्रवृत्तितोऽतिशयो [illegible]। ७. यौगो जैनं प्रति प्राह। ८. उक्तानुक्तदुरुक्तचिन्ता वार्त्तिकम्। [illegible] [illegible] परिचिन्तया। [illegible]भिधानं च यत्र तं वार्त्तिकं विदुः ॥१॥ [illegible] वार्त्तिकम्। उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते। [illegible] [illegible] ॥२॥ श्लोकवार्त्तिके [illegible] [illegible] [illegible]। ९. [illegible]। [illegible] १०. [illegible]। ११. [illegible]

ततः[1] स्थितम्—प्रत्यक्षानुमानाभ्यामर्थान्तरं प्रत्यभिज्ञानं [2]सामग्री-[3]स्वरूपभेदादिति। न[4] चैतदप्रमाणम्, [5]ततोऽर्थं परिच्छिद्य[6] [7]प्रवर्तमानस्यार्थक्रियायामविसंवादात् प्रत्यक्षवदिति। न चैकत्वापलापे[8] बन्ध-मोक्षादिव्यवस्था, अनुमानव्यवस्था वा। एकत्वाभावे [9]बद्धस्यैव मोक्षादेर्गृहीत-[10]सम्बन्धस्यैव [11]लिङ्गस्यादर्शनात्, अनुमानस्य च व्यवस्थायोगादिति। न चास्य[12] विषये[13] बाधक-[14]प्रमाणसद्भावादप्रामाण्यम्, तद्विषये[15] प्रत्यक्षस्य लैङ्गिकस्य चाप्रवृत्तेः प्रवृत्तौ वा प्रत्युत[16] [17]साधकत्वमेव, न बाधकत्वमित्यलमतिप्रसङ्गेन।

इस प्रकार उपर्युक्त कथनसे यह सिद्ध हुआ कि प्रत्यक्ष और अनुमानसे भिन्न एक प्रत्यभिज्ञान प्रमाण है, क्योंकि उसकी उत्पादक सामग्री और स्वरूपमें भेद पाया जाता है। और इस प्रत्यभिज्ञानको अप्रमाण कहा नहीं जा सकता, क्योंकि उससे पदार्थको जानकर प्रवृत्ति करनेवाले पुरुषकी अर्थक्रियामें प्रत्यक्षके समान कोई विसंवाद नहीं पाया जाता। तथा प्रत्यभिज्ञानके विषयभूत एकत्वके अपलाप (निषेध) करनेपर अर्थात् नहीं माननेपर न तो बन्ध-मोक्षादिकी व्यवस्था हो सकती है और न अनुमानकी ही व्यवस्था हो सकती है; क्योंकि जो पहले बंधा होगा, वही पीछे छूटेगा। बौद्ध लोग जब पूर्वापर कालव्यापी एकत्वरूप द्रव्य को ही नहीं मानते और उसका अपलाप करते हैं, तब उनके यहाँ जो पहले बंधा था, वह अब छूटा है, इस प्रकारकी बन्ध और मोक्षकी व्यवस्था भी कैसे बनेगी? इसी प्रकार एकत्वके विना अनुमानका साधन जो लिङ्ग उसका साध्यके साथ अविनाभावरूप सम्बन्धका भी ग्रहण नहीं हो सकेगा, अतः अनुमानकी भी व्यवस्था नहीं बनती। यदि कहा जाय कि प्रत्यभिज्ञानके विषयमें बाधकप्रमाणका सद्भाव होनेसे अप्रमाणता है, सो भी कहना ठीक नहीं; क्योंकि प्रत्यभिज्ञानके विषयमें प्रत्यक्ष और अनुमान प्रमाणकी प्रवृत्ति नहीं है। यदि किसी प्रकार प्रवृत्ति मानी भी

---

१. पूर्वोत्तरविवर्त्तवर्त्येकत्व प्रत्यक्षानुमानयोरविषयो यतः। २. दर्शनस्मरणे। ३. स एवायमिति सङ्कलनम्। ४. प्रत्यभिज्ञानमप्रमाणं रजतज्ञानवद् ब्रूपे इति चेन्न। ५. प्रत्यभिज्ञानात्। ६. ज्ञात्वा। ७. पुरुषस्य। ८. यो यत्रैव स तत्रैव यो यदैव तदैवसः। न देशकालयोर्व्याप्तिर्भावानामिह दृश्यते॥ इत्येकत्वालापो बौद्धाना पूर्वोत्तरविवर्तवर्त्येकद्रव्यस्यापन्हवे सति क्षणिकत्वाङ्गीक्रियमाणे च सति। ९. पुंसः। १०. गृहीतसम्बन्धस्यादर्शनं भवत्येकत्वालापे सति। ११. महानसेऽग्निधूमयोर्गृहीतसम्बन्धस्य धूमलक्षणस्य लिङ्गस्य दर्शनादिति प्रतिपादनानन्तरमत्र तदर्शनादिति। १२. प्रत्यभिज्ञानस्य। १३. एकत्वे। १४. बाधकप्रमाणमेव नास्त्यस्य। १५. प्रत्यभिज्ञानविषये। १६. व्यावृत्य। १७. प्रत्यभिज्ञानेन विषयीकृतं प्रत्यक्षं साधयति, अनुमानं साधयति, तदा साधकत्वम्।

तथा[1] सौगतस्य प्रमाणसङ्ख्याविरोधिविध्वस्तबाधं [2]तर्काख्यमुपढौकत एव। न चैतत्प्रत्यक्षेऽन्तर्भवति; साध्य-साधनयोर्व्याप्य[3]-व्यापकभावस्य [4]साकल्येन प्रत्यक्षाविषयत्वात्। न हि [5]तदियतो व्यापारान् कर्तुं शक्नोति; [6]अविचारकत्वात् [7]सन्निहितविषयत्वाच्च। [8]नाप्यनुमाने; तस्यापि देशादिविषयविशिष्टत्वेन [9]व्याप्त्यविषयत्वात्। तद्विषयत्वे

जाय, तो वे बाधक नहीं, प्रत्युत प्रत्यभिज्ञानकी प्रमाणताके साधक ही हैं। इसलिए इस प्रसङ्गमें अधिक कहनेसे विराम लेते हैं।

तथा सौगतकी प्रमाण-संख्याका विरोधी और अबाधित विषयवाला ऐसा एक और निर्दोष तर्क नामका प्रमाण आकर उपस्थित है। इसका प्रत्यक्षमें तो अन्तर्भाव किया नहीं जा सकता; क्योंकि साध्य-साधनका व्याप्य-व्यापक भावरूप सम्बन्ध देशान्तर और कालान्तरके साकल्यसे प्रत्यक्षका विषय नहीं हो सकता।

भावार्थ—व्याप्तिके ज्ञानको तर्क कहते हैं। व्याप्ति सर्व देश और सर्व कालका उपसंहार करनेवाली होती है। जहाँ जहाँ अर्थात् जिस किसी भी देशमें और जब जब अर्थात् जिस किसी भी कालमें जितना भी धूम है, वह सभी अग्निसे उत्पन्न हुआ है, किसी भी देश और किसी भी कालमें वह अग्निके विना नहीं उत्पन्न हुआ और न आगे उत्पन्न हो सकेगा। सो इस प्रकारकी सर्व देश और कालकी उपसंहारिणी व्याप्ति प्रत्यक्षप्रमाणके द्वारा ग्रहण नहीं की जासकती है।

और न प्रत्यक्ष इतने व्यापारोंको कर ही सकता है, क्योंकि वह अविचारक है अर्थात् आप बौद्धोंने प्रत्यक्षको निर्विकल्पक माना है। दूसरे इन्द्रिय-प्रत्यक्ष सन्निहित (समीपवर्ती) सम्बद्ध और वर्तमान पदार्थ को ही विषय करता है। तथा अनुमानमें भी इस तर्क प्रमाणका अन्तर्भाव नहीं किया जा सकता है; क्योंकि अनुमानका विषय कोई एक देशादि-सम्बन्धी विशिष्ट पदार्थ है; अतः वह सर्व देश और सर्व कालका उपसंहार करनेवाली व्याप्तिको विषय नहीं कर सकता है। इतनेपर भी यदि आप उसे (व्याप्तिको)

---

१. [illegible]प्रत्यभिज्ञानप्रकारेण। २. [illegible] संशयविपर्यय[illegible] तर्कः। ३. [illegible] धूमस्याभावात् [illegible]भावादिति तर्कस्यैव [illegible]। ४. [illegible]। ५. यावान् कश्चिद् धूमः स सर्वोऽप्यग्निजन्मा, [illegible] न भवतीति इयतो व्यापारान् [illegible]। ६. निर्विकल्पकत्वात्। ७. [illegible]। ८. नाप्यनुमानेऽन्तर्भवति इति [illegible]। ९. अनि-

वा प्रकृतानुमानान्तरविकल्पद्वयानतिक्रमात् । तत्र[1] प्रकृतानुमानेन व्याप्तिप्रतिपत्तावितरेतराश्रयत्वप्रसङ्गः—व्याप्तौ हि [2]प्रतिपन्नायामनुमानमात्मान[3]मासादयति, तदात्मलाभे च व्याप्तिप्रतिपत्तिरिति । [4]अनुमानान्तरेणाविनाभाव-[5]प्रतिपत्तावनवस्थाचमूरी[6] परपक्ष[7]चमूं चञ्चमीतीति[8] नानुमानगम्या व्याप्तिः ।

नापि साङ्ख्यादि[9]परिकल्पितैरागमोप[10]मानार्थापत्त्य[11]भावैः साकल्येनाविनाभावावगतिः तेषां[12] समय[13]सङ्गृहीतसादृश्यानन्यथा[14]भूताभावविषयत्वेन व्याप्त्यविषयत्वात् परैस्तथा[15]ऽनभ्युपगमाच्च[16] ।

अनुमानका विषय मानेंगे, तो यहाँपर दो विकल्प उठते हैं—कि प्रकृत अनुमान व्याप्तिको विषय करेगा, अथवा दूसरा अनुमान? उनमेंसे प्रकृत अनुमानके द्वारा व्याप्तिके ग्रहण करनेपर तो इतरेतराश्रय (अन्योन्याश्रय) दोषका प्रसङ्ग आता है—कि व्याप्तिके ग्रहण कर लेनेपर अनुमान उत्पन्न हो और अनुमानके उत्पन्न होनेपर व्याप्तिका ग्रहण हो। इस प्रकार दोनोंमेंसे किसी एकको भी सिद्धि नहीं होती। यदि अन्य अनुमानसे अविनाभावरूप व्याप्तिका ग्रहण मानेंगे, तो उस अनुमानकी व्याप्तिका ग्रहण भी अन्य अनुमानसे मानना पड़ेगा। इस प्रकार उत्तरोत्तर अनुमानोंकी कल्पना करनेपर अनवस्थारूपी व्याघ्री पर-पक्षरूपी बौद्ध-सेनाको बिलकुल चबा डालेगी (सर्वथा खा जायगी) इसलिए व्याप्ति अनुमान-गम्य भी नहीं है, किन्तु उसको ग्रहण करनेवाला एक तर्क नामका स्वतन्त्र ही प्रमाण मानना आवश्यक है।

और न सांख्यादि विभिन्न दार्शनिकोंके द्वारा परिकल्पित आगम, उपमान, अर्थापत्ति और अभाव प्रमाणोंके द्वारा सामस्त्यरूपसे अविनाभावरूप व्याप्तिका ज्ञान हो सकता है, क्योंकि इन सभी प्रमाणोंका विषय भिन्न-भिन्न

यतदिग्देशकालादिविषया व्याप्तिः । १. प्रकृतानुमानानुमानान्तरयोर्मध्ये । २. गृहीतायां सत्याम् । ३. अनुमानस्वरूपम् । ४. व्याप्तिरस्ति, अनुमानान्यथानुपपत्तेरित्यनुमानान्तरात्प्रकृतानुमाने व्याप्तिसद्भावः स्यात्तर्ह्यत्रानुमानान्तरे व्याप्तिरस्ति; सा व्याप्तिः कस्मात्? अनुमानान्तरात्स्यात्तस्मिन्नप्यपरादित्यनवस्था । ५. व्याप्तिप्रतिपत्तौ । ६. व्याघ्री । ७. सौगतपक्षसेनाम् । ८. 'चमु अदने' अतिशयेन भक्षयतीति चञ्चमीति ।

९. नैयायिकाक्षपादप्राभाकरजैमिनीयैः । १०. प्रसिद्धसाधर्म्यादप्रसिद्धस्य साधनमुपमानम् । उक्तञ्च—उपमानं प्रसिद्धार्थसाधर्म्यात्साध्यसाधनमिति । ११. प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत् । अदृष्टं कल्पयेदन्यत्साऽर्थापत्तिरुदाहृता । अथवा दृष्टः श्रुतो वाऽर्थोऽन्यथानुपपद्यत इत्यदृष्टार्थकल्पनाऽर्थापत्तिः । अथवाऽन्यथाभूतस्यार्थस्य दर्शनादर्थान्तरप्रतिपत्तिः । १२. आगमादीनां । १३. सङ्केत- । १४. पीनोऽयं दिवा न भुङ्क्ते, आयातं रात्रौ भुङ्क्ते । १५. व्याप्तिग्राहकत्वेन । १६. आगमादीनाम् ।

अथ प्रत्यक्षपृष्ठभाविविकल्पात् [1]साकल्येन साध्य-साधनभाव[2]प्रतिपत्तेर्न प्रमाणान्तरं[3] तदर्थं मृग्यमित्यपरः[4]। सोऽपि न युक्तवादी; विकल्पस्याध्यक्ष[5]गृहीतविषयस्य तदगृहीत-विषयस्य वा तद्[6]व्यवस्थापकत्वम्? आद्ये पक्षे [7]दर्शनस्येव तदनन्तरभाविनिर्णयस्यापि[8] नियतविषयत्वेन[9] व्याप्त्यगोचरत्वात्। द्वितीयपक्षेऽपि विकल्पद्वयमुपढौकत एव—तद्विकल्पज्ञानं प्रमाणमन्यथा[10] वेति? प्रथमपक्षे प्रमाणान्तरमनुमन्तव्यम्; [11]प्रमाणद्वयेऽन-

---

है व्याप्तिको ग्रहण करना किसीका भी नहीं। देखो आगमका विषय तो संकेत-द्वारा वस्तुको ग्रहण करना है, उपमानका विषय सादृश्यको ग्रहण करना है, अर्थापत्तिका विषय अनन्यथाभूत अर्थको ग्रहण करना है अर्थात् वह दृष्ट वस्तुकी सामर्थ्यसे अदृष्ट अर्थको अन्य ग्रहण करती है और अभाव तो वस्तुके अभाव को ही विषय करता है। इसलिए उक्त चारो प्रमाणोंमेंसे किसी भी प्रमाणके द्वारा व्याप्तिको ग्रहण नहीं किया जासकता। और न उन प्रमाणोंके माननेवाले सांख्य, यौग, प्राभाकर और जैमिनीयोंने उन्हें व्याप्तिका विषय करनेवाला माना ही है।

यहाँपर बौद्ध पुनः कहते हैं कि प्रत्यक्षके पीछे होनेवाले विकल्पके द्वारा सामस्त्यरूपसे साध्य-साधनभावका ज्ञान होजायगा, अतः व्याप्तिके ग्रहण करनेके लिए तर्कनामक एक अन्य प्रमाणका अन्वेषण नहीं करना चाहिए। आचार्य कहतेहै कि ऐसा कहनेवाले बौद्ध भी युक्तिवादी नही है, हम पूछते है कि प्रत्यक्षसे जिसका विषय गृहीत है ऐसे विकल्पको आप व्याप्तिका व्यवस्थापक मानते है, अथवा प्रत्यक्षसे जिसका विषय गृहीत नहीं है ऐसे विकल्पको व्याप्तिका व्यवस्थापक मानते हैं? आद्य पक्षके माननेपर तो दर्शनस्वरूप निर्विकल्पक प्रत्यक्षके समान उसके पीछे होनेवाले विकल्परूप निर्णयके भी विशिष्ट देश-कालरूपसे नियत (सीमित)विषयपना ठहरता है, अतः उसकेद्वारा अनियत देश-कालवाली व्याप्ति विषय नहीं की जा सकती है। द्वितीय पक्षके माननेपर पुनरपि दो विकल्प उपस्थित होते है—निर्विकल्प प्रत्यक्षके पीछे होनेवाला विकल्पज्ञान प्रमाण है या अप्रमाण है? यदि प्रमाण है, तो उसे प्रत्यक्ष-अनुमानके अतिरिक्त एक तीसरा प्रमाण मानना चाहिए; क्योंकि उसका उक्त दोनों प्रमाणोंमे अन्तर्भाव नही होता।

---

1. [illegible] । 2. [illegible] । 3. [illegible] । 4. बौद्धः । 5. [illegible] । 6. व्याप्तिव्यवस्थापकत्वम् । 7. प्रत्यक्षस्येव । 8. [illegible] । 9. [illegible] । 10. अप्रमाणम् । 11. [illegible]

न्तर्भावात्। उत्तरपक्षे तु न [1]ततोऽनुमानव्यवस्था; न हि व्याप्तिज्ञानस्याप्रामाण्ये तत्पूर्वकमनुमानं प्रामाण्यमास्कन्दति, सन्दिग्धादिलिङ्गाद्युत्पद्यमानस्य प्रामाण्यप्रसङ्गात्। ततो [2]व्याप्तिज्ञानं सविकल्पमविसंवादकं च प्रमाणं प्रमाणद्वयान्य[3]दभ्युपगम्यमिति न सौगताभिमतप्रमाणसङ्ख्यानियमः।

[4]एतेनानुपलम्भात्[5] [6]कारण-[7]व्यापकानुपलम्भाच्च कार्यकारण-व्याप्यव्यापकभावसंवित्तिरिति वदन्नपि प्रत्युक्तः;[9] अनुपलम्भस्य [10]प्रत्यक्षविषयत्वेन[11] कारणाद्यनुपलम्भस्य

भावार्थ—प्रत्यक्षके पीछे होनेवाले विकल्पज्ञानका प्रत्यक्षमें तो इसलिए अन्तर्भाव नहीं हो सकता कि उसमें बौद्धोंके द्वारा माना गया निर्विकल्परूप प्रत्यक्षका लक्षण असम्भव है, क्योंकि वह स्वयं विकल्परूप है। और अनुमानमें इसलिए अन्तर्भाव नहीं हो सकता; क्योंकि उसका कोई अविनाभावी निश्चित लिङ्ग नहीं पाया जाता।

और यदि उत्तरपक्ष मानते हैं अर्थात् प्रत्यक्षपृष्ठभावी उस विकल्पज्ञानको आप अप्रमाण मानते हैं, तो अप्रमाणभूत उस विकल्पज्ञानसे अनुमानकी भी व्यवस्था नहीं हो सकती है, क्योंकि व्याप्तिके ज्ञानको अप्रमाण मानने पर व्याप्तिपूर्वक उत्पन्न होनेवाला अनुमान भी प्रमाणताको नहीं प्राप्त कर सकता है। अन्यथा सन्दिग्ध, विपर्यस्त आदि लिङ्गसे उत्पन्न होनेवाले अनुमानको भी प्रमाण माननेका प्रसङ्ग आता है। यतः व्याप्तिका ग्रहण प्रत्यक्ष-पृष्ठभावी विकल्पज्ञानसे सम्भव नहीं, अतः व्याप्तिज्ञानरूप तर्कप्रमाणको सविकल्पक, अविसंवादक और प्रत्यक्ष-अनुमान इन दोनों से भिन्न एक पृथक् ही प्रमाण मानना चाहिए। इस प्रकारसे बौद्धोंके द्वारा मानी गई प्रमाणकी दो संख्याका नियम नहीं रहता।

इसी उपर्युक्त कथनके द्वारा अनुपलम्भसे अर्थात् किसी वस्तुके सद्भावका निषेध करनेवाले स्वभावानुपलम्भ से, कारणानुपलम्भसे और व्यापकानुपलम्भसे कार्य-कारणभाव और व्याप्य-व्यापकभावका ज्ञान होता है, ऐसा कहने

---

१. अप्रमाणात्सविकल्पात्। २. प्रत्यक्षपृष्ठभाविना विकल्पेन गृहीतुमशक्या व्याप्तिर्यतः। ३. तर्काख्यम्। ४. बौद्धेन प्रत्यक्षानुमानाभ्यां भिन्नं प्रमाणमङ्गीकर्तव्यम्, तदेतत्संज्ञान्तरं सविकल्पकं तर्काख्यमेवेत्यभिप्रायः।

५. प्रत्यक्षानुमानयोर्व्याप्तिग्रहणनिराकरणपरेण न्यायेन। ६. प्रत्यक्षेण भूतले घटोऽनुपलब्धेरिति स्वभावानुपलम्भः। ७. नास्त्यत्र धूमोऽनग्नेरिति कारणानुपलम्भः। ८. नास्त्यत्र शिंशपा वृक्षानुपलब्धेरिति व्यापकानुपलम्भः। ९. बौद्धो निराकृतः। १०. प्रत्यक्षाविसंवादित्वेन इत्यपि पाठः। ११. केवलं विधिप्रतिपत्तेरेवान्यत्र प्रतिषेधरूपत्वादिति अष्टसहस्याम्।

च लिङ्गत्वेन तज्जनितस्यानुमानत्वात् [1]प्रत्यक्षानुमानाभ्यां व्याप्तिग्रहणपक्षोपक्षिप्तदोषानुषङ्गात्[2] ।

[3]एतेन प्रत्यक्षफलेनोहापोहविकल्पज्ञानेन व्याप्तिप्रतिपत्तिरित्यप्यपास्तम्[4] ।

वाले बौद्धोंका भी निराकरण हो जाता है ; क्योंकि स्वभावानुपलम्भ तो प्रत्यक्षका ही विषय है और कारणानुपलम्भ तथा व्यापकानुपलम्भ लिङ्गरूप है, और उनसे उत्पन्न होनेवाला ज्ञान अनुमान ही है, अतः प्रत्यक्ष और अनुमानसे व्याप्तिके ग्रहण करनेके पक्षमें जो दोष प्राप्त होते थे, वे ही यहाँपर भी प्राप्त होंगे ।

विशेषार्थ—बौद्धोंने अनुपलम्भरूप हेतुके तीन भेद माने हैं—स्वभावानुपलम्भ, कारणानुपलम्भ और व्यापकानुपलम्भ । इस स्थानपर घड़ा नहीं है, क्योंकि पाया नहीं जाता; यह स्वभावानुपलम्भ है । यहाँ धूम नहीं है, क्योंकि धूमका कारण जो अग्नि उसका यहाँपर अभाव है; यह कारणानुपलम्भ है । यहाँ शीशमका पेड़ नहीं है; क्योंकि उसका व्यापक वृक्ष नहीं पाया जाता; यह व्यापकानुपलम्भ है । बौद्धोंका कहना है कि कार्य-कारण और व्याप्य-व्यापकभावके सम्बन्ध ग्रहण करनेको ही व्याप्तिज्ञान या तर्क कहते हैं । सो इसे एक पृथक् प्रमाण माननेकी आवश्यकता नहीं है, क्योंकि इस कार्य-कारण भाव और व्याप्य-व्यापकभावरूप सम्बन्धका ज्ञान हमारे द्वारा मानेगये अनुपलम्भहेतुके उक्त तीनों भेदों द्वारा हो ही जाता है । आचार्यने उनके उत्तर में यह कहा है कि स्वभावानुपलम्भ तो प्रत्यक्षका ही विषय है । अत: उससे व्याप्तिका ग्रहण हो नहीं सकता, यह बात हम पहले ही बतला आये हैं । शेष दोनों अनुपलम्भ यतः हेतु-स्वरूप ही है, अतः उनसे साध्यका ज्ञान होगा जिसे कि अनुमान कहते है, किन्तु साध्य-साधन, कार्य-कारण और व्याप्य-व्यापकके सम्बन्धरूप अविनाभावका अर्थात् सर्व देश-कालोपसंहारिणी व्याप्तिका ज्ञान कैसे होगा ? यदि आप फिर भी मानेंगे, तो वे सभी दोष आकर प्राप्त होंगे, जिन्हें हम पहले कह आये है ।

इसी उपर्युक्त कथनसे प्रत्यक्षके फलरूप ऊहापोह विकल्पज्ञानके द्वारा व्याप्तिकी प्रतिपत्ति होती है, ऐसा कहनेवाले वैशेषिकोंके मतका भी खण्डन

---

१. [illegible] प्रत्युक्तमित्याशङ्कायामाह—उपलम्भकारणव्यापकानुपलम्भात्मके [illegible] प्रत्यक्षेणानुमानज्ञानेन वा भवितव्यम् । २. आरोपितदोषप्रसङ्गात् । ३. [illegible] व्याप्तिग्रहणे प्रत्यक्षानुमानपक्षोपक्षिप्तदोषदर्शनेन । ४. पूर्वपूर्व[illegible] [illegible] प्रत्यक्षेणेति । ५. विज्ञातसर्वसम्बन्धानेन [illegible] । ६. [illegible] विशदार्थाप्रत्यक्षत्वात् सम्बन्धानवगमेन । ७. वैशेषिकमतं निराकृतम् ।

[1]प्रत्यक्षफलस्यापि प्रत्यक्षानुमानयोरन्यतरत्वे[2] व्याप्तेरविषयीकरणात्, [3]तदन्यत्वे प्रमाणान्तरत्वमनिवार्यमिति।

[4]अथ [5]व्याप्तिविकल्पस्य [6]फलत्वान्न प्रामाण्यमिति न युक्तम्, फलस्याप्यनुमानलक्षणफलहेतुतया प्रमाणत्वाविरोधात्। तथा [7]सन्निकर्षफलस्यापि विशेषणज्ञानस्य[8] विशेष्यज्ञानलक्षणफलापेक्षया प्रमाणत्वमिति न वैशेषिकाभ्युपगतोहापोहविकल्पः प्रमाणान्तरत्वमतिवर्तते।[11]

कर दिया गया समझना चाहिए; क्योंकि प्रत्यक्षके फलको प्रत्यक्ष और अनुमानमेंसे किसी एक रूप माननेपर उसके द्वारा व्याप्ति विषय नहीं की जा सकती; और उनसे भिन्न माननेपर उसको भिन्न प्रमाण मानना अनिवार्य हो जाता है।

विशेषार्थ—जाने हुए पदार्थका अवलम्बन लेकर अन्य पदार्थोंमें भी व्याप्तिके बलसे उसी प्रकारकी तर्कणा करनेको ऊह या ऊहा कहते हैं। कथनकी कुशलता और युक्तियोंके बल-द्वारा आनेवाली आपत्तियोंकी सम्भावना करके उनका परिहार करनेको अपोह कहते हैं। इस प्रकारके ऊह और अपोह रूप जो विकल्पात्मक ज्ञान है, वह प्रत्यक्षज्ञानका फल है, ऐसी मान्यता वैशेषिकोंकी है। और इसी ऊहापोहके द्वारा वे व्याप्तिका ज्ञान मानते हैं। आचार्यने उनकी इस मान्यताका जिस प्रकारसे परिहार किया है, वह बतला ही चुके हैं। जैनलोग इस ऊहापोहरूप ज्ञानको प्रत्यक्ष-ज्ञानका फल न मानकर उसे तर्क नामका स्वतन्त्र ही प्रमाण मानते हैं।

यहां नैयायिक कहते हैं कि व्याप्तिके विकल्परूप जो तर्क ज्ञान है वह तो प्रत्यक्षज्ञानका फल है, इसलिए उसको प्रमाणता नहीं मानी जा सकती। उनका यह कहना भी युक्त नहीं है, क्योंकि फलरूप होते हुए भी वह अनुमानका कारण है और अनुमान उसका फल है, अतः उसे प्रमाण माननेमें

१. प्रत्यक्षफलज्ञान प्रत्यक्षानुमानाभ्यां भिन्नम्; ताभ्या व्याप्तिग्रहणं नास्ति। फलज्ञानेनास्ति-चेत् फलज्ञान प्रमाणान्तरं स्यात्। २. प्रत्यक्षफलं प्रत्यक्षमनुमान वेति विकल्पद्वयम्, तयोर्मध्ये एकतरत्वे सति। ३. ताभ्या प्रत्यक्षानुमानाभ्यामन्यत्वे भिन्नत्वे।

४. नैयायिकः प्राह। ५. व्याप्तिग्राहकस्य तर्कस्य। ६. प्रत्यक्षफलत्वात्, प्रत्यक्षज्ञानफलं व्याप्तिविकल्पः। ७. इन्द्रियार्थयोः सम्बन्धः सन्निकर्षः। ८. दण्डज्ञानस्य, विशेषणज्ञानस्य विशेष्यज्ञानं फलम्। ९. 'नागृहीतविशेषणा बुद्धिर्विशेष्ये' इति न्यायात्। दण्डिज्ञानस्वरूपफलापेक्षया। १०. व्याप्तिज्ञानम्। ११. न निराकरोतीत्यर्थः।

एतेन[1] त्रि-चतुः-पञ्च षट्प्रमाणवादिनोऽपि साङ्ख्याक्षपाद-प्रभाकर-जैमिनीयाः स्वप्रमाणसङ्ख्या न व्यवस्थापयितुं क्षमा इति प्रतिपादितमवगन्तव्यम्। उक्तन्यायेन[2] स्मृति प्रत्यभिज्ञान-तर्काणा [3]तदभ्युपगतप्रमाणसङ्ख्यापरिपन्थित्वादिति[4] प्रत्यक्षेतर[5]भेदाद् द्वे एव प्रमाणे इति स्थितम्।

अथेदानीं प्रथमप्रमाणभेदस्य स्वरूपं निरूपयितुमाह—

विशदं प्रत्यक्षम् ॥३॥

ज्ञानमित्यनुवर्तते। [6]प्रत्यक्षमिति [7]धर्मिनिर्देशः। विशदज्ञानात्मकं साध्यम्। प्रत्यक्षत्वादिति हेतुः[8]। तथाहि—प्रत्यक्षं विशदज्ञानात्मकमेव, प्रत्यक्षत्वात्। यन्न विशदज्ञानात्मकं

कोई विरोध नहीं है। जैसे कि सन्निकर्षके फलरूप भी विशेषणके ज्ञानको विशेष्यज्ञानके लक्षणरूप फलकी अपेक्षा प्रमाणता आपलोग मानते हैं इस प्रकार वैशेषिकों द्वारा माना गया ऊहापोह विकल्परूप ज्ञान भी तर्कज्ञानकी प्रमाणान्तरताका उल्लंघन नहीं करता है।

इस प्रकार बौद्धोंके द्वारा मानी गई प्रमाण-संख्याके निराकरणसे तीन प्रमाणवादी सांख्य, चार प्रमाणवादी अक्षपाद (नैयायिक-वैशेषिक) पांच प्रमाणवादी प्राभाकर और छह प्रमाण माननेवाले जैमिनीय भी अपनी-अपनी प्रमाण-संख्याकी सयुक्तिक स्थापना करनेमें समर्थ नहीं है, यह बात प्रतिपादित जैसी ही समझना चाहिए। क्योंकि इसी उक्त न्यायसे स्मृति, प्रत्यभिज्ञान और तर्क प्रमाण सांख्यादिके द्वारा स्वीकृत प्रमाणसंख्याके परिपन्थी हैं अर्थात् विरोध करनेके कारण शत्रुभूत है। इसलिए प्रत्यक्ष और परोक्षके भेदसे दो ही प्रमाण है, यह स्थित अर्थात् सिद्ध हुआ।

अब आचार्य प्रमाणका प्रथम भेद जो प्रत्यक्ष उसका स्वरूप-निरूपण करनेके लिए उत्तर सूत्र कहते हैं—

सूत्रार्थ—विशद अर्थात् निर्मल और स्पष्ट ज्ञानको प्रत्यक्ष कहते है ॥३॥

इस सूत्रमें ज्ञानपदकी अनुवृत्ति होती है। यहाँपर प्रत्यक्ष यह धर्मीका निर्देश है अर्थात् पक्ष है, ज्ञानकी विशदता साध्य है और प्रत्यक्षपना हेतु है। आगे इसी अनुमानको स्पष्ट करते है—प्रत्यक्ष विशद ज्ञानस्वरूप ही है,

---

१. बौद्धस्य प्रमाणसङ्ख्याप्रतिपादनताऽसामर्थ्यसमर्थनेन। २. व्याप्तिज्ञानस्य प्रमाणत्वव्यवस्थापनेन स्मृत्यादीनां प्रमाणताव्यवस्थापनेनोक्तन्यायेन च। ३. साख्यादिना। ४. साख्यादिस्वीकृतप्रमाणसङ्ख्याविपक्षित्वात् स्मृत्यादितस्करविद्यमानत्वादित्यर्थः। ५. विपक्षत्वात्। ६. विवक्षितं प्रत्यक्षं प्रमाणं धर्मी। ७. साध्यधर्माधारो धर्मी पक्षः। ८ व्यतिरेकी हेतुः।

तन्न प्रत्यक्षम्, यथा परोक्षम्[1]। प्रत्यक्षं च विवादापन्नम्[2]। तस्माद्विशदज्ञानात्मकमिति[3]। प्रतिज्ञार्थैकदेशासिद्धो हेतुरिति चेत् का पुनः प्रतिज्ञा तदेकदेशो[4] वा ? धर्मि धर्मसमुदायः प्रतिज्ञा। तदेकदेशो धर्मो धर्मी वा ? हेतुः प्रतिज्ञार्थैकदेशासिद्ध[5] इति चेन्न, धर्मिणो हेतुत्वे असिद्धत्वायोगात्। तस्य पक्षप्रयोगकालवद्धेतुप्रयोगेऽप्यसिद्ध[6]त्वायोगात्।

क्योंकि यह प्रत्यक्ष है। जो विशदज्ञानात्मक नहीं वह प्रत्यक्ष नहीं; जैसे परोक्षज्ञान। और प्रत्यक्ष विवादापन्न है, इसलिए वह विशदज्ञानात्मक है, इस प्रकार अनुमानके पांच अवयव-प्रयोगरूप यह सूत्र है।

शङ्का—सूत्रमें तो एकमात्र धर्मी प्रत्यक्षका निर्देश किया गया है, उसे ही आपने हेतु बनाया है। पक्षके वचनको प्रतिज्ञा कहते है, उस प्रतिज्ञारूप अर्थके एक देशको हेतु बनानेसे यह हेतु प्रतिज्ञार्थैकदेशासिद्ध नामका असिद्ध हेत्वाभास हो गया, और असिद्ध हेतुसे साध्यकी सिद्धि होती नहीं है, अतः प्रत्यक्षत्वको हेतु बनाना उचित नहीं ?

प्रतिशङ्का—ऐसा दोष देनेवालेसे आचार्य पूछते है कि प्रतिज्ञा क्या वस्तु है और उसका एक देश क्या है ?

समाधान—धर्म अर्थात् साध्य और धर्मी अर्थात् पक्षके समुदायको प्रतिज्ञा कहते है। उसका एक देश धर्म अथवा धर्मी है। उनमेंसे एकको हेतु बनानेपर वह प्रतिज्ञार्थैकदेशासिद्ध हेत्वाभास हो जाता है।

प्रतिसमाधान—आपका यह आक्षेप ठीक नहीं है, क्योंकि धर्मीको हेतु बनानेपर असिद्धपना नहीं प्राप्त होता। पक्षप्रयोगकालमें धर्मीके जैसे असिद्धपना नहीं है, उसीप्रकार हेतु प्रयोगकालमें भी उसके असिद्धपना नहीं आ सकता।

भावार्थ—शङ्काकारने धर्म और धर्मीके समुदायको प्रतिज्ञा कहा है। सो धर्म नाम तो साध्यका है और साध्य सदा ही असिद्ध होता है। सूत्रकारने आगे स्वय ही इसका लक्षण 'इष्टमबाधितमसिद्धं साध्यम्' कहा है। यदि यहाँपर धर्मको अर्थात् विशदात्मकतारूप साध्यको हेतु बनाया गया होता, तो वह अवश्य प्रतिज्ञार्थैकदेशासिद्ध हेत्वाभास कहलाता। किन्तु यहाँपर तो धर्मी रूप पक्षको हेतु बनाया गया है और धर्मीको वादी और प्रतिवादी सभीने

१. उदाहरणम्। २. उपनयः। ३. निगमनम्। ४. वादि-प्रतिवादिनोः प्रसिद्ध एव धर्मी भवति। ५. प्रतिज्ञा एवार्थः प्रतिज्ञार्थः, तस्यैकदेशः सो हेतुरसिद्धः। ६. पक्षः प्रत्यक्षम्, तस्य प्रत्यक्षस्य प्रयोगकालः प्रत्यक्षं विशदज्ञानात्मकं प्रत्यक्षत्वात्। यथा पक्षस्य प्रत्यक्षत्वं तथा हेतोः। ७. वादि-प्रतिवादिनोः प्रसिद्ध एव धर्मी भवतीत्यर्थः।

धर्मिणो हेतुत्वे अनन्वय[1] दोष इति चेन्न; विशेषस्य[2] धर्मित्वात्, सामान्यस्य[3] च हेतुत्वात्। तस्य च विशेषेष्वनुगमो[4] "विशेषनिष्ठत्वात्सामान्यस्य[5]।

अथ साध्यधर्मस्य[7] हेतुत्वे प्रतिज्ञार्थैकदेशासिद्धत्वमिति। तदप्यसम्मतम्[8], साध्यस्य स्वरूपेणैवासिद्धत्वान्न प्रतिज्ञार्थैकदेशत्वेन तस्यासिद्धत्वम्, धर्मिणा व्यभिचारात्[9]।

प्रसिद्ध माना है। स्वयं सूत्रकारने आगे 'प्रसिद्धो धर्मी' ऐसा कहा है। अतः जब धर्मी प्रसिद्ध है, तब उसे हेतु बनानेपर वह असिद्ध कैसे हो सकता है? क्योंकि प्रमाणसे सिद्ध वस्तुको प्रसिद्ध और प्रमाणसे जो सिद्ध नहीं उसे असिद्ध कहते है। इसलिए आचार्यने बहुत ठीक कहा है कि जैसे धर्मी पक्ष-प्रयोगके समय असिद्ध नहीं है, वैसे ही हेतु-प्रयोगके समय भी असिद्ध नहीं है।

शङ्का—धर्मीको हेतु बनानेपर अनन्वयदोप प्राप्त होता है? क्योंकि पक्षरूप धर्मीका साध्यरूप धर्मके साथ कोई अन्वयसम्बन्ध नहीं पाया जाता। जैसे कोई कहे कि 'यह पर्वत अग्निमान् है, क्योंकि वह पर्वत है, तो इस अनुमानमें हेतुरूपसे प्रयुक्त पर्वतत्वका अग्निमत्त्व साध्यके साथ जो जो पर्वत होंगे, वे सभी अग्निमान् होंगे, इसप्रकारका कोई अन्वय सम्बन्ध नहीं है।

समाधान—यह कहना ठीक नहीं; क्योंकि यहाँपर प्रत्यक्ष-विशेषको धर्मी बनाया गया है और प्रत्यक्षत्व-सामान्यको हेतु बनाया है। तथा सामान्यका अपने विशेषोंमें अनुगम अर्थात् अन्वय रहता ही है। 'सामान्य अपने सभी विशेषोंमें रहता है' ऐसा स्वयं आप यौगोंने कहा है।

शङ्का—साध्यरूप धर्मको हेतु बनानेपर तो वह प्रतिज्ञार्थैकदेशासिद्ध हेत्वाभास हो जायगा? क्योकि साध्य असिद्ध होता है।

समाधान—यह कथन भी हमारे लिए असम्मत है अर्थात् हमें मान्य नही है; क्योंकि हमने तो साध्यरूप धर्मको हेतु नहीं बनाया है। साध्यके स्वरूपसे ही असिद्धता है, न कि प्रतिज्ञार्थके एक देश होनेसे असिद्धता है; अन्यथा धर्मीके द्वारा व्यभिचार आता है।

---

१. पर्वतोऽयमग्निमान्, पर्वतत्वादित्यादिवदनन्वयदोषः। २. प्रत्यक्षस्य। ३. प्रत्यक्षत्वस्य। ४. अन्वयो वर्तते। ५. निर्विशेषं हि सामान्यं भवेच्छशविषाणवत्। सामान्यरहितत्वाच्च विशेषास्तद्वदेव हि। ६. भो यौग! तव मतेन वर्तते। ७. साध्यमेव धर्मः साध्यधर्मः। ८. मया साध्यधर्मस्य हेतुत्वं न प्रतिपाद्यते। ९. कथम्-प्रत्याह साध्यधर्मस्य हेतुत्वं ब्रूषे? शब्दो नित्यो भवितुमर्हति, नित्यत्वादित्येवं प्रकारेण प्रतिवादिना (जैनेन) साध्यधर्मस्यानङ्गीकरणात्। किञ्च साध्यस्य हेतुत्वे स्वरूपासिद्धं च आगच्छत्, न प्रतिज्ञार्थैकदेशासिद्धत्वम्। अन्यथा यो यः प्रतिज्ञार्थैकदेशः स सोऽसिद्ध

सपक्षे[1] वृत्त्यभावाद्धेतो[2]रनन्वय[3] इत्यप्यसत्, सर्वभावानां[4] क्षणभङ्ग[5]सङ्गमभे श्रृङ्गारमङ्गीकुर्वतां ताथागतानां सत्त्वादिहेतूनामनुदयप्रसङ्गात्[6]। विपक्षे[7] बाधकप्रमाणाभावात् पक्षव्यापकत्वाच्चानन्वयत्वं प्रकृतेऽपि समानम्[8]।

विशेषार्थ—यहाँपर शङ्काकारने यह शङ्का उठाई है कि यदि साध्य धर्मको हेतु बनाया जायगा, तो वह प्रतिज्ञार्थैकदेशासिद्ध हो जायगा। कि शब्द नित्य है; क्योंकि उसमें नित्यता पाई जाती है, इत्यादि। इस समाधान आचार्यने यह किया है कि हमने साध्य धर्मको हेतु नहीं बनाया जिससे कि आपके द्वारा दिया गया दूषण हमपर लागू हो। यदि केवल प्रतिज्ञा एकदेश होनेमात्रसे ही हमपर प्रतिज्ञार्थैकदेशासिद्धताका दोषारोपण अ करना चाहते हों, तो वैसी दशामें आपके कथनमें धर्मीके द्वारा व्यभिच दोष आता है; क्योंकि वह भी प्रतिज्ञाका एकदेश है। धर्मीकी प्रतिज्ञार्थै देशासिद्धताका परिहार हम पहले कर ही आये हैं। दूसरी विशेष बात यह कि साध्यको हेतु बनानेपर उसे स्वरूपासिद्ध तो कहा जा सकता है, प्रतिज्ञार्थै देशासिद्ध नहीं। अन्यथा जो जो प्रतिज्ञार्थैकदेश है, वह वह असिद्ध है ऐस व्याप्ति होनेपर धर्मीके द्वारा व्यभिचार आता है। अथवा जो जो प्रतिज्ञार्थैक देश है, वह वह असिद्ध है, ऐसी व्याप्तिमें धर्मीके भी प्रतिज्ञार्थैकदेशत होनेसे वादि-प्रतिवादी दोनोंके ही साध्यके समान हेतुके भी असिद्धता प्राप्त होगी। इसलिए इस विषयमें अधिक क्षोद-क्षेम करना व्यर्थ है।

शङ्का—आपने ऊपर अनुमान-प्रयोग करते हुए धर्मीको हेतु बनाया और व्यतिरेकव्याप्तिपूर्वक व्यतिरेक ही दृष्टान्त दिया, सो हेतुके सपक्षमें न रहनेसे और अन्वय-दृष्टान्तके न पाये जानेसे आपके अनन्वय दोष प्राप्त होता है।

समाधान—यह कथन भी समीचीन नहीं है; क्योंकि सर्व पदार्थोंके क्षणभङ्ग-सङ्गमरूप अङ्ग-श्रृङ्गारको अङ्गीकार करनेवाले ताथागतो (बौद्धों) के सत्त्वादि हेतुओंके अनुदयका प्रसङ्ग प्राप्त होता है।

इति व्याप्तौ धर्मिणा व्यभिचारात्। अथवा यो यः प्रतिज्ञार्थैकदेशः स सोऽसिद्ध इति व्याप्तौ धर्मिणोऽपि प्रतिज्ञार्थैकदेशत्वाद्वादि-प्रतिवादिनोः साध्यवत्तस्याप्यसिद्धता स्यात्।

१. साध्यसाधनधर्मा धर्मी सपक्षस्तस्मिन् सपक्षे। २. प्रत्यक्षत्वस्य हेतोः। ३. असपक्षधर्मत्वम्। ४. पदार्थानां कारणत्वेन जनकत्वेन। ५. क्षणे क्षणे भङ्गः क्षणभङ्गः, प्रतिसमयं नाश इत्यर्थः। ६. सर्वं क्षणिकं सत्त्वादित्यत्रापि हेतोः सपक्षे वृत्ति नास्ति, सर्वस्य पक्षीकृतत्वेन सपक्षस्याभावात्। ७. क्षणिकत्वे साध्ये नित्यत्वं विपक्षः। ८. नित्यः पदार्थो नास्ति, क्रमयौगपद्याभ्यामर्थक्रियाकारित्वाभावात्, खरविषाणवदिति बौद्धमते बाधकप्रमाणम्। ९. अप्रत्यक्षे प्रत्यक्षत्वं नास्ति, परोक्षत्वात्, शिंशपादिवदिति प्रकृतेऽपि प्रकृतानुमानेऽपि प्रत्यक्षेऽपि बाधकप्रमाणमस्ति।

विशेषार्थ—ऊपर विशद ज्ञानको प्रत्यक्षता सिद्ध करते हुए किसी अन्यके सपक्ष न होनेसे व्यतिरेकव्याप्तिपूर्वक परोक्षज्ञानको व्यतिरेक दृष्टान्त रूपसे बतलाया गया है। उसमें बौद्धोंने यह दूषण दिया कि हेतुके तीन रूप होते है—पक्षधर्मत्व, सपक्षसत्त्व और विपक्षाद् व्यावृत्ति। सो उस अनुमानमें प्रयुक्त हेतुके सपक्षसत्त्वरूप दूसरे हेतुरूपका अभाव है और इसीलिए अन्वय दृष्टान्त भी नहीं दिया जा सका। अतः उक्त अनुमानमें अनन्वयदोष आता है। आचार्यने उसका यह समाधान किया है कि आप बौद्धोंने भी तो सर्व पदार्थोंको क्षणिक सिद्ध करनेके लिए जो सत्त्व हेतु दिया है, वहांपर भी तो सपक्षसत्त्वका और अन्वय-दृष्टान्तका अभाव है, क्योंकि सभी पदार्थोंको पक्ष बना लिया गया है। फिर उसे आप क्यों समीचीन हेतु मानते है। उनका वह प्रयोग इस प्रकार है—सर्व पदार्थ क्षणिक है, क्योंकि सत् रूप हैं, जो क्षणिक नही होता, वह सत् भी नही होता; जैसे खर-विषाण। इसी अनुमान प्रयोगसे बौद्ध लोग सर्व पदार्थोंको क्षणिक सिद्ध करते हैं। यदि इतने पर भी आप जैनोंको अनन्वय दूषण देनेका प्रयास करेगे तो आपने उक्त अनुमानमें जो सत्त्व आदि हेतुओंका प्रयोग किया है, वह नहीं हो सकेगा, क्योंकि उसमें भी अनन्वय दोष प्राप्त होता है।

यदि इतनेपर भी बौद्ध कहें कि हेतुके विपक्षमें बाधक प्रमाणका सद्भाव होनेसे तथा पक्षमे व्यापक होनेसे हमारे सत्त्व हेतुके अनन्वय दूषण नही प्राप्त होता, तो यह बात प्रकृतमें भी समान है, अर्थात् हमारे प्रत्यक्षत्व हेतुको भी अनन्वय दूषण नही प्राप्त होता।

विशेषार्थ—बौद्धोंने 'सर्व पदार्थ क्षणिक है, सत् रूप होनेसे' इस अनुमानमें अनन्वय दोपके परिहारके लिए दो युक्तियां दी है, जिनमेंसे पहली युक्ति है—हेतुके विपक्षमे बाधक प्रमाणका सद्भाव। इसका अभिप्राय यह है कि उक्त अनुमानमे क्षणिकत्व साध्य है, अतः उसका विपक्ष नित्यत्व है और पदार्थोंके नित्यत्व सिद्ध करनेमें बाधक प्रमाण पाया जाता है। यथा—पदार्थ नित्य नहीं है, क्योंकि नित्य पदार्थमें क्रमसे और एकसाथ इन दोनो ही प्रकारोंसे अर्थक्रियाकारिताका अभाव है। इस प्रकार विपक्षाद्-व्यावृत्तिरूप हेतुका तीसरा लक्षण हमारे सत्व हेतुमें पाया जाता है। दूसरी युक्ति दी है—हेतुकी पक्षमें व्यापकता अर्थात् हमारा सत्व हेतु पक्षभूत सभी पदार्थोंमे पाया जाता है, जिसे कि हेतुका पहला लक्षण कहा गया है। अतः सत्वहेतुके सपक्षमे रहने रूप दूसरे हेतु-लक्षणके नही पाये जानेपर भी पहले और तीसरे

'तच्च प्रत्यक्षं द्वेधा, मुख्य-संव्यवहारभेदादिति' मनसि कृत्य प्रथमं साव्यवहारिक-प्रत्यक्षस्योत्पादिकां सामग्रीं तद्भेदं च प्राह—

[1]इन्द्रियानिन्द्रिय[2]निमित्तं देशतः सांव्यवहारिकम् ॥५॥

शङ्का—यदि आप अवग्रह ज्ञानको प्रत्यक्ष मानते हैं और अवग्रह तथा ईहा इन दो ज्ञानोंसे व्यवधान होनेपर भी अवायज्ञानको प्रत्यक्ष मानते हैं, तो इसी क्रमसे किसी पुरुषके पहले अनुमानसे अग्निका ज्ञान हुआ, वह तो परोक्ष हैं, क्योंकि उसमें धूमज्ञानसे व्यवधान है। पुनः वही पुरुष समीप जाकर जब अग्निको देखता है, तब उसका यह प्रत्यक्ष ज्ञान भी परोक्ष मानना पड़ेगा; क्योंकि उसमें प्रतीत्यन्तररूप अनुमानज्ञान से व्यवधान है, तथा दोनोंका विषय भी भिन्न है-पहलेका परोक्ष अग्नि विषय है और दूसरेका प्रत्यक्ष अग्नि विषय है। अतः भिन्न विषयोंकी उपलब्धिके कारण उक्त प्रकारसे उत्पन्न हुए प्रत्यक्षज्ञानके परोक्षपना प्राप्त होता है ?

समाधान—आपका यह कहना अयुक्त है; क्योंकि यहांपर भिन्नविषय-पनेका अभाव है। कहनेका भाव यह है कि अनुमान और प्रत्यक्ष की विषय-भूत अग्नि एक है, भिन्न नहीं। अनुमान ने जिस अग्नि को जाना है प्रत्यक्ष ने भी उसी अग्नि को जाना है। एक ही अग्नि को विभिन्न प्रमाणों द्वारा जानने में कोई बाधा भी नहीं है। अत; यहाँ अनुमान और प्रत्यक्ष का विषय एक होने से प्रत्यक्ष में प्रतीत्यन्तर व्यवधान नही कहा जा सकता। क्योंकि विसदृश (विलक्षण) सामग्री से उत्पन्न हुई और भिन्न विषयवाली प्रतीति को प्रतीत्यन्तर कहते हैं। यद्यपि अनुमान और प्रत्यक्ष विसदृश सामग्री से उत्पन्न हुए हैं तथापि उनका विषय एक है। अतः प्रत्यक्षमें प्रतीत्यन्तरसे व्यवधान नहीं है और इस कारण उसमें परोक्षता का प्रसंग भी नहीं आता।

केवल प्रतीत्यन्तरके अव्यवधानसे होनेवाले ज्ञानका नाम ही वैशद्य नहीं है; अपितु वस्तुके वर्ण-गन्धादि तथा संस्थान (आकार-प्रकार) आदि विशेषताओंके द्वारा होनेवाले विशिष्ट प्रतिभासको भी वैशद्य कहते हैं।

वह प्रत्यक्ष मुख्य और संव्यवहारके भेदसे दो प्रकारका है ऐसा अभि-प्राय मनमें रखकर आचार्य पहले सांव्यवहारिक प्रत्यक्षकी उत्पन्न करनेवाली सामग्री और उसके भेदको कहते हैं—

सूत्रार्थ—इन्द्रिय और मनके निमित्तसे होनेवाले एकदेश विशद ज्ञानको सांव्यवहारिक प्रत्यक्ष कहते है ॥ ५ ॥

---

१. 'लवुध्वजाद्येति' सूत्रेण मुख्यस्य प्राक् प्रयोगः। २. इन्दति परमैश्वर्यमनुभव-तीति इन्द्र आत्मा, इन्द्रस्य लिङ्गमिन्द्रियम्। ३. ईषदिन्द्रियमनिन्द्रियम्।

विशदं ज्ञानमिति चानुवर्तते । देशतो विशदं ज्ञानं सांव्यवहारिकमित्यर्थः । समीचीनः[1] प्रवृत्तिनिवृत्तिरूपो व्यवहारः, तत्र[2] भवं सांव्यवहारिकम् । पुनः किम्भूतम् ? इन्द्रियानिन्द्रियनिमित्तम् । इन्द्रियं चक्षुरादि, अनिन्द्रियं मनः ते निमित्तं कारणं यस्य । [3]समस्तं [4]व्यस्तं च कारणमभ्युपगन्तव्यम् । इन्द्रियप्राधान्यादनिन्द्रिय[5]बलाधानादुपजातमिन्द्रियप्रत्यक्षम् । अनिन्द्रियादेव [6]विशुद्धिसव्यपेक्षादुपजायमानमनिन्द्रियप्रत्यक्षम् ।

[7]तत्रेन्द्रियप्रत्यक्षमवग्रहादि[8]धारणापर्यन्ततया चतुर्विधमपि [9]बह्वादिद्वादशभेदमष्टचत्वारिंशत्सङ्ख्यं प्रतीन्द्रियं प्रतिपत्तव्यम् । अनिन्द्रियप्रत्यक्षस्य चोक्तप्रकारेणाष्टचत्वा-

---

यहांपर पूर्वसूत्रसे विशद और ज्ञान इन दो पदोंकी अनुवृत्ति होती है। एकदेशसे विशद जो ज्ञान है, वह सांव्यवहारिक प्रत्यक्ष है। 'सम्' अर्थात् समीचीन प्रवृत्ति-निवृत्तिरूप व्यवहारको संव्यवहार कहते है, उसमे होनेवाले ज्ञानको सांव्यवहारिक कहते हैं। पुनः वह सांव्यवहारिक प्रत्यक्ष कैसा है? इन्द्रिय और अनिन्द्रिय-निमित्तक है। इन्द्रिय कहिये चक्षु-श्रोत्रादिक और अनिन्द्रिय कहिये मन, ये दोनों जिसके निमित्त अर्थात् कारण हैं। इन्द्रिय और मन ये समस्त अर्थात् दोनों भी सांव्यवहारिक प्रत्यक्षके कारण हैं और व्यस्त अर्थात् पृथक्-पृथक् भी कारण है, ऐसा जानना चाहिए। इन्द्रियोंकी प्रधानतासे और मनकी सहायतासे उत्पन्न होनेवाले ज्ञानको इन्द्रियप्रत्यक्ष कहते हैं। ज्ञानावरण और वीर्यान्तराय कर्मके विशिष्ट क्षयोपशमरूप विशुद्धिकी अपेक्षा-सहित केवल मनसे ही उत्पन्न होनेवाले ज्ञानको अनिन्द्रियप्रत्यक्ष कहते है।

इनमेंसे जो इन्द्रियप्रत्यक्ष है; वह अवग्रह, ईहा, अवाय और धारणाके भेदसे चार प्रकारका है। वह भी बहु-अबहु, बहुविध-एकविध, क्षिप्र-अक्षिप्र, अनिःसृत-निःसृत, उक्त-अनुक्त और ध्रुव-अध्रुव इन बारह विषयोंके भेदसे अड़तालीस भेदरूप प्रत्येक इन्द्रियके प्रति जानना चाहिए। अतः पांचों इन्द्रियोंके (४८×५ = २४०) दो सौ चालीस भेद हो जाते हैं।

---

१. अबाधितः । २. तस्मिन् कर्तव्ये । ३. इन्द्रियानिन्द्रियम । ४. मन इन्द्रियं वा । ५. सहायात् । ६. ज्ञानावरणवीर्यान्तरायक्षयोपशमलक्षणा विशुद्धिः ।

७. द्वयोर्मध्ये । ८. अवगृह्यतेऽर्थस्य सत्त्वसामान्यादवान्तरं जातिविशेषो येन सः । विषयविषयिसन्निपाते सत्येवाद्यं ग्रहणमवग्रहः । ईह्यतेऽवग्रहगृहीतार्थस्य विशेष आकाङ्क्ष्यते यया सेहा, विशेषाकाङ्क्षणमीहा । अवयते निश्चीयतेऽर्थो येनासाववायः, निश्चयोऽवायः, धार्यते कालान्तरेऽपि न विस्मर्यतेऽनया सा कालान्तराविस्मरणकारणा धारणा । ९. बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणां सेतराणाम् (तत्त्वा० अ० १. सू०

रिंशद्भेदेन [1]मनोनयनरहितानां [2]चतुर्णामपीन्द्रियाणां [3]व्यञ्जनावग्रहस्याष्टचत्वारिंशद्भेदेन च [4]समुदितस्येन्द्रियानिन्द्रियप्रत्यक्षस्य षट्त्रिंशदुत्तरा त्रिशती सङ्ख्या प्रतिपत्तव्या।

अनिन्द्रियप्रत्यक्षके भी इसी प्रकार अड़तालीस भेद होते है। उन्हें दो सौ चालीसमें मिला देनेपर (२४०+४८ = २८८) दो सौ अठासी भेद व्यक्त पदार्थकी अपेक्षा होते हैं। किन्तु व्यञ्जन अर्थात् अव्यक्त पदार्थका केवल अवग्रह ही होता है, ईहादि नहीं। तथा वह मन और नेत्रेन्द्रियसे नहीं होता, केवल शेष चार ही इन्द्रियोंके द्वारा बहु-अबहु आदि बारह विषयोंके केवल अवग्रह रूप होनेसे अड़तालीस भेदरूप होता है। इन्हें उक्त दो सौ अठासीमें सम्मिलित करदेनेपर (२८८+४८ = ३३६) तीन सौ छत्तीस भेद इन्द्रिय और अनिन्द्रिय प्रत्यक्षके जानना चाहिए।

सांव्यवहारिक प्रत्यक्ष या मतिज्ञानके इन ३३६ भेदोंका विशेष अर्थ तत्त्वार्थसूत्रकी बड़ी टीकाओंसे जानना चाहिए।

---

१६)। बह्वेकव्यक्तिविज्ञानं बह्वेकं च क्रमाद्यथा। बहवस्तरवः सूपो बहुश्चैक वनं नरः ॥१॥ बह्वेकजातिविज्ञानं स्याद्बह्वेकविधं यथा। वर्णा नृणा बहुविधाः गौर्जात्येकविधेति च ॥२॥ आश्वर्थस्य ग्रहः क्षिप्रं स्यादक्षिप्रं शनैर्ग्रहः। मृत्पात्रं यद्वदादत्ते नूतं वाऽनूतनं जलम् ॥३॥ वस्त्वेकदेशाद्वस्तुनो वस्त्वंशाद्वस्तुनोऽथवा। तत्रासन्निहितान्यस्याऽनिःसृत मनन यथा ॥४॥ घटार्वाग्भागकन्यास्य गवयग्रहणे क्षणे। स्फुटं घटेन्दुगोज्ञानमभ्याससमयान्विते ॥५॥ वस्त्वेकदेशमात्रस्य विज्ञानं निःसृतं मतम्। घटार्वाग्भागमात्रेऽपि क्वचिज्ज्ञान हि दृश्यते ॥६॥ प्रत्यक्षे नियतान्यादृग्गुणार्थैकाक्षबोधनम्। अनुक्तमेकदैवोक्तं प्रत्यक्ष नियतग्रहः ॥७॥ चक्षुषा दीपरूपावलोकावसर एव तत्। तदुष्णस्पर्शविज्ञान यथोक्तार्थः प्ररूप्यते ॥८॥ स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं मनश्च खम्। अर्थः स्पर्शो रसो गन्धो रूपः शब्दः श्रुतादयः ॥९॥ स्यान्नित्यत्वविशिष्टस्य स्तम्भादेर्ग्रहणं ध्रुवः। विद्युदादेरनित्यत्वेनान्वितस्याध्रुवो ग्रहः ॥१०॥ तत्रार्थस्य द्वादशपदार्थैः सहावग्रहादीनामिन्द्रियाणां मनसश्च गुणने २८८ भेदा भवन्ति। व्यञ्जनावग्रहस्य द्वादशपदार्थैः 'न चक्षुरनिन्द्रियाभ्याम्' इति निषेधाच्चक्षुरनिन्द्रियव्यतिरिक्तचतुर्णामिन्द्रियाणां गुणने सति ४८ भेदा भवन्ति। अर्थावग्रहस्य व्यञ्जनावग्रहस्य च सर्वे समुदिताः ३३६ भेदा मतिज्ञानस्य सन्ति। १. अप्राप्यकारित्वमेतयोः। व्यक्तमर्थावग्रहस्य; प्राप्याप्राप्यकारित्वेन्द्रियेषु प्रवृत्तिः। अव्यक्तं व्यञ्जनावग्रहस्य, प्राप्यकारित्वेन्द्रियेषु प्रवृत्तिः। २. श्रोत्रत्वग्जिह्वाघ्राणेन्द्रियाणां प्राप्यकारित्वम्। ३. अर्थावग्रहस्य स्पष्टत्वास्पष्टत्वम्। व्यञ्जनेऽस्पष्टत्वम्। व्यञ्जनमव्यक्तशब्दादिजातम्, तस्यावग्रह एव भवति; नूतनभाण्डस्योपरिक्षितजलवत्संस्थाजनितकालवत्। ४. मिलितस्य।

ननु[1] स्वसंवेदन[2]भेदमन्यदपि प्रत्यक्षमस्ति, तत्कथं नोक्तमिति न वाच्यम्; तस्य सुखादिज्ञानस्वरूपसंवेदनस्य मानसप्रत्यक्षत्वात्[3], इन्द्रियज्ञानस्वरूपसंवेदनस्य चेन्द्रियसमक्षत्वात्[4]। अन्यथा[5] तस्य[6] स्वव्यवसायायोगात्। स्मृत्यादिस्वरूपसंवेदनं [7]मानसमेवेति नापरं[8] स्वसंवेदनं नामाध्यक्षमस्ति।

[9]ननु प्रत्यक्षस्योत्पादकं कारणं वदता ग्रन्थकारेणेन्द्रियवदर्थालोकावपि किं न कारणत्वेनोक्तौ? तदवचने[10] कारणानां साकल्यस्यासङ्ग्रहाद्विनेयव्यामोह[11] एव स्यात्, तदियत्ताऽनवधारणात्। न च भगवतः[12] परमकारुणिकस्य चेष्टा[13] तद्-व्यामोहाय प्रभवतीत्याशङ्कायामुच्यते—

शङ्का—बौद्धोंका कहना है कि 'मैं सुखी, मै दुःखी' इत्यादि रूप एक अन्य भी स्वसंवेदन प्रत्यक्ष है, उसे आपने क्यों नहीं कहा?

समाधान—ऐसा नही कहना चाहिए, क्योंकि सुख-दुःखादिके ज्ञानस्वरूप जो स्वसंवेदन होता है, उसका मानस प्रत्यक्षमें अन्तर्भाव हो जाता है और जो इन्द्रियज्ञानस्वरूप संवेदन होता है, उसका इन्द्रियप्रत्यक्षमें अन्तर्भाव हो जाता है। यदि ऐसा न माना जाय तो स्वसंवेदनरूप ज्ञानके स्वव्यवसायकता नहीं बन सकती है। तथा स्मृति आदि स्वरूप जो संवेदन होता है, वह भी मानस प्रत्यक्ष ही है। इसलिए इससे भिन्न स्वसंवेदन नामका अन्य कोई प्रत्यक्ष नहीं है।

यहाँ नैयायिक कहते है कि प्रत्यक्षके उत्पादक कारण बतलाते हुए ग्रन्थकारने इन्द्रिय-अनिन्द्रियके समान अर्थ और आलोकको कारणरूपसे क्यों नहीं कहा? क्योंकि अर्थ यानी पदार्थके निमित्तसे भी ज्ञान उत्पन्न होता है और आलोक अर्थात् प्रकाशके निमित्तसे भी ज्ञान उत्पन्न होता है। इनके नहीं कहनेसे सकल कारणोंका संग्रह नही हुआ और इसलिए शिष्यजनोंको व्यामोह अर्थात् सन्देह और विभ्रम ही होगा, क्योंकि ज्ञानोत्पत्तिके जितने भी कारण हैं उनकी संख्या शिष्यजनोंको अज्ञात रहेगी। और परम करुणावान् भगवान्की कोई भी चेष्टा (प्रवृत्ति) शिष्यजनोंके व्यामोहके लिए नहीं हो

---

१. बौद्धः प्राह। २. अहं सुखी, अहं दुःखीत्यादिरूपम्। ३. अनिन्द्रियप्रत्यक्षत्वात्। ४. यथेन्द्रियज्ञानं समक्षं तथेन्द्रियज्ञानस्वरूपसंवेदनस्यापि समक्षत्वमिति। ५. मनोऽक्षप्रभवज्ञानाभ्यामन्यत्वे। ६. स्वसंवेदनस्य। ७. तस्यानिन्द्रियनिमित्तत्वात्। ८. भावप्रमेयापेक्षायां प्रमाणाभासनिह्नवः। बहिःप्रमेयापेक्षायां प्रमाणं तन्निभं च ते ॥१॥

९. नैयायिकः प्राह। १०. कारणसाकल्यावचने सति। ११. सन्देहभ्रम.। १२. आचार्यस्य ग्रन्थकर्तुः। १३. प्रवृत्तिः।

नार्थालोकौ[1] [2]कारणं [3]परिच्छेद्यत्वात्तमोवत् ॥६॥

सुगममेतत् । ननु बाह्या[4]लोकाभावं विहाय तमसोऽन्यस्याभावात् साधनविकलो[5] दृष्टान्त इति ? नैवम्, एवं सति[6] बाह्यालोकस्यापि तमोऽभावादन्यस्यासम्भवात्तेजोद्रव्यस्यासम्भव इति विस्तरेणैतदलङ्कारे[7] प्रतिपादितं बोद्धव्यम् ।

सकती । नैयायिकोंकी ऐसी आशङ्का होनेपर ग्रन्थकार उसका उत्तर देते हुए कहते हैं—

सूत्रार्थ—अर्थ और आलोक ये दोनों ही सांव्यवहारिक प्रत्यक्षके कारण नहीं हैं; क्योंकि ये परिच्छेद्य अर्थात् ज्ञानके विषय हैं—जानने योग्य ज्ञेय हैं। जो ज्ञानका विषय होता है, वह ज्ञानका कारण नहीं होता। जैसे अन्धकार ॥ ६ ॥

यह सूत्र सुगम है ।

भावार्थ—अन्धकार ज्ञानका विषय तो है क्योंकि यह सभी जानते हैं और कहते भी हैं कि यहाँ अन्धकार है। परन्तु वह ज्ञानका कारण नहीं, प्रत्युत ज्ञानका प्रतिबन्धक है अर्थात् अन्धकारके कारण सामने रखे हुए भी पदार्थोंका ज्ञान नहीं होने पाता। यदि पदार्थोंको ज्ञानका कारण माना जाय तो विद्यमान ही पदार्थोंका ज्ञान होगा, और जो उत्पन्न ही नहीं हुए, अथवा नष्ट हो गये है, उनका ज्ञान नहीं होगा; क्योंकि जो नष्ट और अनुत्पन्न पदार्थ इस समय विद्यमान ही नहीं हैं, वे जाननेमें कारण कैसे हो सकते हैं। इसी प्रकार जो आलोकको ज्ञानका कारण मानते हैं उन्हें रात्रिमें कुछ भी ज्ञान नहीं होगा, वे यह भी नहीं कह सकेंगे कि यहां अन्धकार है।

शङ्का—बाह्य आलोकके अभावको छोड़कर अन्धकार अन्य कोई वस्तु नहीं है, अतः आपका 'तमोवत्' यह दृष्टान्त साधन-विकल है। अर्थात् जब अन्धकार कोई वस्तु ही नहीं है, तब वह परिच्छेद्य (जानने योग्य) कैसे हो सकता है, अतः उसमें परिच्छेद्यत्व साधनके नहीं पाये जानेसे आपके द्वारा उपन्यस्त दृष्टान्त साधन-विकल हो जाता है।

समाधान—यह कहना ठीक नहीं; क्योंकि ऐसा माननेपर तो बाह्य

---

१. तमोवत्परिच्छेद्यौ । २. सांव्यवहारिकप्रत्यक्षस्य कारणं नेति भावः । ३. प्रमेयत्वात्प्रत्यक्षगोचरत्वादित्यर्थः । ४. बाह्यालोकाभावस्य तमसः परिच्छेद्यत्वं नास्ति । बाह्यमिति विशेषणेनान्तरज्ञानत्वं प्रतिपादितं भवति, न तु तमस्त्वमिति । ५. बाह्यालोकस्याभावस्यैव तमसः साधनात्तमसः परिच्छेद्यत्वं नास्ति, अतः साधनविकलत्वं दृष्टान्तस्य । ६. तमोऽभाव एव बाह्यालोकः । ७. प्रमेयकमलमार्त्तण्डे ।

अत्रैव साध्ये हेत्वन्तरमाह—

तदन्वय[1]-व्यतिरेकानुवि[2]धानाभावाच्च केशो[3]ण्डुकज्ञानवन्नक्त[4]ञ्चर-ज्ञानवच्च ॥७॥

अत्र[5] व्याप्तिः—[6]यद्यस्या[7]न्वयव्यतिरेकौ नानुविदधाति, न तत्तत्कारणकम्, यथा केशोण्डुकज्ञानम्। नानुविधत्ते च ज्ञानमर्थान्वयव्यतिरेकाविति[8]। तथाऽऽलोकेऽपि[9]। एतावान् विशेषस्तत्र नक्तञ्चरदृष्टान्त इति। नक्तञ्चरा मार्जारादयः[10]।

प्रकाशके विषयमें भी हम कह सकते हैं कि अन्धकारका अभाव ही प्रकाश है, इसके अतिरिक्त प्रकाश नामका कोई पदार्थ नहीं है। इस प्रकार प्रकाशके असम्भव हो जानेसे तेजो द्रव्यका मानना भी असम्भव हो जायगा। इसका विस्तारसे प्रतिपादन परीक्षामुखके अलङ्कारभूत प्रमेयकमलमार्तण्ड नामक महान् ग्रन्थमें किया गया है उसे वहींसे जानना चाहिए।

अब सूत्रोक्त इसी साध्यको दूसरी युक्तियोंसे सिद्ध करते हैं—

सूत्रार्थ—अर्थ और आलोक ज्ञानके कारण नहीं हैं, क्योंकि ज्ञानका अर्थ और आलोकके साथ अन्वय-व्यक्तिरेकरूप सम्बन्धका अभाव है। जैसे केशमें होनेवाले उण्डुक-ज्ञानके साथ, तथा नक्तंचर उलूक आदिको रात्रिमें होनेवाले ज्ञानके साथ ॥ ७ ॥

अर्थ और आलोक ज्ञानके कारण नहीं हैं, इस विषयमें व्याप्ति इस प्रकार है—जो कार्य जिस कारणके साथ अन्वय और व्यतिरेकको धारण नही करता है, वह तत्कारणक नहीं है। जैसे केशमें होनेवाला उण्डुकका ज्ञान अर्थके साथ अन्वय-व्यतिरेकको नहीं धारण करता। तथा आलोकमें भी ज्ञानके साथ अन्वय-व्यतिरेकसम्बन्ध नहीं है। इतना विशेष है कि यहाँपर नक्तञ्चर दृष्टान्त है। रात्रिमें विचरण करनेवाले उल्लू, चमगीदड़ मार्जार आदिको नक्तञ्चर कहते है।

विशेषार्थ—पदार्थ ज्ञानके उत्पन्न करनेमें कारण नहीं है; क्योकि ज्ञानका पदार्थके साथ अन्वय-व्यतिरेकसम्बन्ध नहीं है। कारणके होनेपर कार्यके होनेको अन्वय कहते है और कारणके अभावमे कार्यके अभावको व्यतिरेक कहते है।

---

१. ज्ञानं धर्मी अर्थालोककारणकं न भवति, तस्मादर्थालोकयोः। २. अनुगमन। ३. अनेन दृष्टान्तेन ज्ञानमर्थकारणकमिति निरस्तम्। ४. अनेन ज्ञानमालोककारणकमिति निरस्तम्। ५. अर्थालोकौ कारणं न भवत इत्यत्र। ६. कार्यं ज्ञानम्। ७. कारणस्यार्थस्य। ८. अर्थे सति ज्ञानमिति नियमो नः यतोऽर्थाभावेऽपि ज्ञानसद्भावात्। ९. व्याप्तिः। १०. आदिशब्देनाञ्जनसंस्कृतमपि चक्षुः।

ननु[1] विज्ञानमर्थजनितमर्थाकारं चार्थस्य ग्राहकम्; [2]तदुत्पत्तिमन्तरेण विषयं[3] प्रति नियमायोगात्। [4]तदुत्पत्तेरालोकादाव[5]विशिष्टत्वात्ताद्रूप्य[6]सहिताया एव [7]तस्यास्तं प्रति नियमहेतुत्वात्, [8]भिन्नकालत्वेऽपि ज्ञान-ज्ञेययोर्ग्राह्यग्राहकभावाविरोधात्। तथ चोक्तम्—

इस प्रकार ज्ञानका अन्वयव्यतिरेकसम्बन्ध पदार्थके साथ नहीं पाया जाता जैसे कि केशोंमें उण्डुकका ज्ञान। किसी व्यक्तिके मस्तकपर मच्छरोंका समूह उड़ रहा था, उसे देखकर किसीको भ्रम हो गया कि केशोंका गुच्छा उड़ रहा है। अथवा इसे यों भी कह सकते हैं कि किसीके शिरके केश उड़ रहे थे उन्हें देखकर किसीको मच्छरोंके झुण्ड उड़नेका ज्ञान होगया। इस प्रकार के ज्ञानमें केशोंके होते हुए केशोंका ज्ञान तो नहीं हुआ, उलटा मच्छरोंका ज्ञान हुआ। अथवा मच्छरोंके रहते हुए मच्छरोंका तो ज्ञान नहीं हुआ, प्रत्युत केशोंका ज्ञान होगया। इससे ज्ञात होता है कि पदार्थके साथ ज्ञानका अन्वय व्यतिरेक सम्बन्ध नहीं है। इसी प्रकार प्रकाशके साथ भी ज्ञानका अन्वय-व्यतिरेक नहीं पाया जाता। देखो—दिनमें प्रकाशके होते हुए भी उल्लू और चमगीदड़ आदिको सामनेकी वस्तुका ज्ञान नहीं होता। और रात्रिमें प्रकाशके अभावमें भी उसका ज्ञान होता है। इससे सिद्ध होता है कि प्रकाश भी ज्ञानका कारण नहीं है। यदि होता, तो रात्रिमें उल्लू आदिको ज्ञान कभी नहीं होता।

बौद्धोंकी मान्यता है कि जो ज्ञान जिस पदार्थसे उत्पन्न होता है, वह ज्ञान उसी अर्थके आकार होता है और उसीका ग्राहक होता है अर्थात् उसे जानता है। क्योंकि तदुत्पत्तिके विना विषयके प्रति कोई नियम नहीं बन सकता। अर्थात् यदि घट-विषयक ज्ञानको घटसे उत्पन्न हुआ न माना जाय तो घटज्ञान घटको ही विषय करे और पटको न करे, इसका कोई नियम नहीं ठहरेगा। यदि केवल तदुत्पत्तिको ही विषयके जाननेमें नियामक माना जाय, तो वह आलोक आदिमें भी समान है, अर्थात् आलोकके होनेपर ज्ञानकी

---

१. बौद्धः यौगाचारो वक्ति। २. तस्माद्विज्ञातविषयादिति। ३. प्रत्येकव्यापारम्। ४. आत्माऽदृष्टेन्द्रियाणि सामान्यात्। ५. सत्याऽऽलोके ज्ञानस्योत्पत्तिः कथ नालोकं गृह्णाति; तदाकारत्वाभावात्। ६. अतस्ताद्रूप्यग्रहणम्। ताद्रूप्यतदुत्पत्ती नील क्षणादौ। तस्य विषयस्य रूपं यत्तत्तद्रूपं तस्य भावस्ताद्रूप्यम्। ७. तदुत्पत्तेः। ८. ज्ञानं नीलक्षणादुत्पन्नं तदाकारधारि सत्तद् गृह्णातीति तदसत्यम्, तयोर्भिन्नकालत्वात्। नीलक्षणमतीतसमये नष्टम्, तदुत्पन्नं ज्ञानं वर्तमानसमये प्रवर्तते यत एक आत्मलाभक्षणो द्वितीयस्तस्य ज्ञानजननक्षणः।

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः।
हेतुत्वमेव[1] युक्तिज्ञास्तदाकारार्पणक्षमम्[2] ॥४॥

इत्याशङ्का[3]यामिदमाह—

उत्पत्ति देखी जाती है, फिर भी वह ज्ञान तदाकारताके अभावसे आलोकको ग्रहण नहीं करता है, अतः ताद्रूप्य-सहित तदुत्पत्तिको ही विषयके प्रति नियामक कारण माना गया है। यदि कहा जाय कि ज्ञान और ज्ञेय भिन्नकालवर्ती हैं; अर्थात् जिस पदार्थसे ज्ञान उत्पन्न हुआ है, वह तो पूर्वक्षणमें नष्ट हो गया और उससे उत्पन्न हुआ। न अब वर्तमान समयमें प्रवृत्त हो रहा है, ऐसी दशामें ज्ञान और ज्ञेयमें ग्राह्य और ग्राहकपना कैसे वन सकेगा? सो यह कहना भी ठीक नहीं, क्योंकि पूर्व क्षणवर्ती पदार्थ नष्ट होते हुए भी अपना आकार उससे उत्पन्न होनेवाले ज्ञानको अर्पण करके नष्ट होता है, अतः ग्राह्य-ग्राहकभावमें कोई विरोध नहीं आता। जैसा कि कहा है—

यदि कोई पूछे कि भिन्नकालवर्त्ती पदार्थ ग्राह्य कैसे हो सकता है? तो युक्तिके जाननेवाले आचार्य ज्ञानमें तदाकारके अर्पण करनेकी क्षमता वाले हेतुत्वको ही ग्राह्यता कहते हैं ॥ ४ ॥

विशेषार्थ—बौद्धोंसे कोई पूछ सकता है कि आपके यहाँ ज्ञान और ज्ञेयका काल भिन्न है; क्योंकि जिस समय ज्ञान उत्पन्न होता है उस समय पदार्थ नष्ट हो जाता है। अतः भिन्न कालवर्ती ज्ञान ज्ञेयको कैसे जानेगा? बौद्ध इसका उत्तर इस प्रकार देते है कि ज्ञानके लिए अपना आकार अर्पण करनेमें समर्थ ज्ञानकी उत्पत्तिका कारण पदार्थ ही ग्राह्य कहा गया है। अर्थात् नष्ट होते समय पदार्थ ज्ञानको अपना आकार सौंप जाता है और फिर ज्ञान उसी आकारको जानता है। इस प्रकार भिन्नकाल होनेपर भी अर्थमें ग्राह्यता सिद्ध हो जाती है।

पर जैन लोग तो ज्ञानकी अर्थसे उत्पत्ति मानते नहीं है, अतः उनके यहाँ ज्ञान और ज्ञेयमें ग्राह्य-ग्राहकपना कैसे वनेगा? ऐसी बौद्धोंकी आशङ्का के होनेपर आचार्य उत्तर देते हुए कहते है—

---

१. ज्ञानोत्पत्तिकारणत्वमेव। २. तस्मै आकारार्पणक्षमम्। ३. यद्येवं ज्ञानस्य तदुत्पत्तिमनुपगम्यते प्रागभावस्यान्यर्थहेतूनामिति वचनात् तर्हि कारणभूतार्थस्य कार्यभूतज्ञानेऽभाव एव। तथा च तस्य कथं ग्राह्यत्वमित्याशङ्कायामाह इति बौद्धशङ्कायामाहेत्यर्थः।

अतज्जन्यमपि[1] तत्प्रकाशकं[2] प्रदीपवत् ॥८॥

अर्थाजन्यमप्यर्थप्रकाशकमित्यर्थः । अतज्जन्यत्वमुपलक्षण[3]म् । तेनातदाकारमपीत्यर्थः । उभयत्रापि प्रदीपो दृष्टान्तः । यथा प्रदीपस्यातज्जन्यस्यातदाकारधारिणोऽपि तत्प्रकाशकत्वम्, तथा ज्ञानस्यापीत्यर्थः ।

ननु[4] यद्यर्थादजातस्यार्थरूपाननुकारिणो ज्ञानस्यार्थसाक्षात्कारित्वं[5] तदा नियतदिग्देशकालवर्तिपदार्थप्रकाशप्रतिनियमे[6] [7]हेतोरभावात्सर्वं विज्ञानमप्रतिनियतविषयं[8] स्यादिति शङ्कायामाह—

सूत्रार्थ—अर्थसे नहीं उत्पन्न होकरके भी ज्ञान अर्थका प्रकाशक होता है, दीपकके समान ॥ ८ ॥

अतज्जन्य अर्थात् अर्थसे नहीं उत्पन्न हुआ भी ज्ञान तत्प्रकाशक अर्थात् पदार्थका ज्ञायक होता है। यहाँपर अतज्जन्यता उपलक्षणरूप है, अतः उससे अतदाकारताका भी ग्रहण करलेना चाहिए। अतज्जन्यता और अतदाकारता इन दोनोके विषयमें प्रदीपका दृष्टान्त समान है। जैसे दीपक घट-पटादि पदार्थोंसे उत्पन्न नहीं होकर और उनके आकार नहीं होकरके भी उनका प्रकाशक है वैसे ही ज्ञान भी घटादि पदार्थोंसे उत्पन्न नहीं होकर और उनके आकार नहीं होकरके भी उन पदार्थोंको जानता है।

यहाँपर बौद्ध शङ्का करते है कि यदि अर्थसे नहीं उत्पन्न हुए और अर्थके आकारको भी नहीं धारण करनेवाले ज्ञानको आप जैन लोग अर्थका साक्षात्कारी मानते है, तब नियतदिशावर्ती, नियतदेशवर्ती और नियतकालवर्ती पदार्थोके जाननेके प्रतिनियममें तदुत्पत्ति-ताद्रूप्यहेतुके अभावसे सभी ज्ञान अप्रतिनियत विषयवाले हो जायेगे ? अर्थात् किसी भी व्यक्तिका कोई एक भी ज्ञान विभिन्न दिग्देशवर्ती त्रैकालिक पदार्थोंका जाननेवाला हो जायगा; क्योंकि तदुत्पत्ति-ताद्रूप्यके विना अमुक ज्ञान अमुक पदार्थको ही जाने, इसका कोई नियामक कारण नहीं रहता। फिर तो प्रत्येक ज्ञान विश्वके त्रिकालवर्ती और त्रिजगद्-व्यापी पदार्थोंका जाननेवाला हो जायगा। बौद्धोंकी ऐसी शङ्काके होनेपर आचार्य उत्तर देते हुए कहते हैं—

१. न तज्जन्यमतज्जन्यमर्थाजन्यमपि । २. अर्थप्रकाशनस्वभावात् । ३. अतदाकारधारित्वमर्थमुपसन्धत्ते इत्युपलक्षणम् । यथा काकेभ्यो दधि रक्ष्यतामित्युक्ते गृध्रेभ्योऽपि रक्षणीयम् · न केवलं काकेभ्यः । तथाऽतदाकारधारित्वमप्युपलक्षणीयम् । अथवा स्वस्य सदृशस्य ग्राहकमुपलक्षणम् । ४. बौद्धः प्राह । ५. भो जैन, यद्येवं ब्रूषे । ६. निश्चये । ७. तदुत्पत्तिताद्रूप्यहेतुमन्तरेण । ८. अतीतानागतव्यवहितदूरान्तरितानां प्रमाणस्य प्रकाशकत्वं भवत्वित्यनिष्टापादनं जैनानाम् ।

स्वावरणक्षयोपशमलक्षणयोग्यतया[1] हि प्रतिनियतमर्थं व्यवस्थापयति ॥९॥

स्वानि च तान्यावरणानि च स्वावरणानि। तेषां क्षय[2] उदयाभावः। तेषामेव सदवस्था उपशमः,[3] तावेव लक्षणं यस्या योग्यतायास्तया हेतुभूतया [4]प्रतिनियतमर्थं व्यवस्थापयति प्रत्यक्षमिति शेषः। हि यस्मादर्थे। यस्मादेव ततो नोक्तदोष इत्यर्थः।

इदमत्र तात्पर्यम्—कल्पयित्वापि[5] ताद्रूप्यं तदुत्पत्तिं तदध्यवसायं[6] च योग्यताऽव-

सूत्रार्थ—अपने आवरण कर्मके क्षयोपशमलक्षणवाली योग्यतासे प्रत्यक्ष-प्रमाण प्रतिनियत पदार्थोंके जाननेकी व्यवस्था करता है ॥ ९ ॥

भावार्थ—प्रत्येक व्यक्तिके ज्ञानपर उसे रोकनेवाले असंख्य आवरण-कर्म चढ़े हुए हैं। उन आवारक कर्मोंकी जैसी जैसी क्षयोपशम शक्तिरूपी योग्यता प्रकट होती जाती है, वैसे वैसे ही आत्मामे जाननेकी शक्ति भी स्वयमेव प्रकट होती जाती है। जिस वस्तु-विषयक ज्ञानका आवरण दूर होता जाता है, आत्मा उसे बाहिरी अर्थ, आलोक, आदि कारणोंके विना तथा तदुत्पत्ति और तदाकारताके विना ही स्वतः स्वभाव जानने लगता है। अतः ज्ञानावरण और वीर्यान्तरायकर्मोंके क्षयोपशमरूप योग्यताको ही जैन लोग प्रतिनियत विपयका नियामक मानते है।

अपने ज्ञानके रोकनेवाले आवरणको स्वावरणों कहते है। उदय-प्राप्त उन आवरणकर्मोंके वर्तमानकालमे उदयाभावको क्षय कहते है और अनुदय-प्राप्त उन्हीं कर्मोंके सत्तामें अवस्थित रहनेको उपशम कहते है। ये दोनों ही जिसके लक्षण है, ऐसी योग्यताके द्वारा प्रत्यक्ष ज्ञान प्रतिनियत अर्थकी व्यवस्था करता है। इस ज्ञानका यह पदार्थ ही विपय है, अन्य नहीं, ऐसी व्यवस्थाको प्रतिनियत व्यवस्था कहते हैं। यहाँ प्रत्यक्ष यह पद शेप है, सूत्रमे नहीं कहा गया है, अतः ऊपरके सूत्रसे उसका अध्याहार कर लेना चाहिए। सूत्रमे पठित 'हि' शब्द 'यस्मात्' के अर्थमें है, यतः योग्यता वस्तु-ज्ञानकी व्यवस्थापक है, अतः आप बौद्धोंके द्वारा कहा गया कोई दोप हम जैनोंपर लागू नहीं होता, ऐसा जानना चाहिए ?

यहाँ यह तात्पर्य है कि उक्त प्रकारसे तदुत्पत्ति (ज्ञानका पदार्थसे

---

१. अर्थग्रहणशक्तिर्योग्यता, तया। २. मतिज्ञानावरणवीर्यान्तरायकर्मद्वयाणामनुभागस्य सर्वघातिस्पर्धकानामुदयाभावः क्षयः। ३. तेषामेवानुदयप्राप्तानां सदवस्था उपशमः। ४. अत्र ज्ञानस्यायमेवार्थ इति।

५. स्वतोऽर्थे तथा न भवति, तथापि कल्पयित्वापि योग्यता स्वीकर्तव्या त्वया। ६. अभिनिश्चयम्।

श्याऽभ्युपगन्तव्या[1] । ताद्रूप्यस्य[2] समानार्थैस्तदुत्प[3]त्तेरिन्द्रिया[4]दिभिस्तद्द्वयस्यापि[5] समानार्थ[6]-[7]समनन्तर[8]प्रत्ययै[9]स्तत्त्रितयस्यापि[10] [11]शुक्ले शङ्खे पीताकारज्ञानेन व्यभिचाराद् योग्यता-श्रयणमेव श्रेय इति ।

उत्पन्न होना), ताद्रूप्य (पदार्थके आकार होना) और तदध्यवसाय (उसी पदार्थका जानना) यद्यपि प्रतिनियत अर्थके जाननेमें कारणरूपसे नियामक नहीं है, तथापि अपने दुराग्रहवश कल्पना करके भी अर्थात् उन तीनोंको मान करके भी आप लोगोंको योग्यता अवश्य ही स्वीकार करना चाहिए। इसका कारण यह है कि ताद्रूप्यका समानार्थोंके साथ, तदुत्पत्तिका इन्द्रियादिकोंके साथ, इन दोनोंका समानार्थ समनन्तर प्रत्ययके साथ और ताद्रूप्य, तदुत्पत्ति और तदध्यवसाय इन तीनोंका भी शुक्ल शंखमें पीताकार ज्ञानके साथ व्यभिचार आता है, अतः योग्यताका आश्रय लेना ही आप लोगों के लिए श्रेयस्कर है।

विशेषार्थ—यदि तदाकारतासे ज्ञान पदार्थका नियामक हो, तो जो ज्ञान जिस पदार्थसे उत्पन्न हुआ है, वह ज्ञान उस पदार्थके समान जितने

---

१. एतत्त्रयं सहकारिकारण वर्तते, तथापि कल्पनया किमुपकरण कल्पितं यद्योग्यताऽवश्याऽभ्युपगन्तव्या । २. तदाकारतया सदृशलक्षणैः । यदि ताद्रूप्याद्बोधोऽर्थस्य नियामकस्तर्हि निखिलसमानार्थेष्वेकवेदनापत्तिः स्यात् । न च ताद्रूप्याद्बोधस्य समानार्थेषु नियामकत्वं घटते; अतो नियामकाभावात्तैर्व्यभिचारः । ३. अर्थादुत्पत्तिश्चेत् । ४. इन्द्रियादिभिर्व्यभिचारः स्याद्यतो ज्ञानमिन्द्रियादुत्पन्नं सत्तन्न जानाति । ५. भो जैन, त्वयैकैकस्य निराकरण कृतम् ; तन्न युक्तम्, यतस्तद्द्वयस्यापि प्रमाणस्य कारणत्वमिति शङ्कायां तद्द्वयमपि निराकरोति जैनः । ६. प्राक्तनज्ञानस्य य एव नीलाद्यर्थो विषयः स एवोत्तरज्ञानस्येत्येकसन्तानवर्तित्वेन समानोऽर्थ एको नीलः । ७. ईप् । ८. प्रथमक्षणे नीलमिति ज्ञानमुत्पन्नम्, तच्च द्वितीयस्य जनकम् । तत्र ताद्रूप्यमस्ति तदुत्पत्तिश्च, ज्ञानत्वेन समानमन्याव्यवहितत्वेन समनन्तरमिति । ९. तदुत्पत्तेस्ताद्रूप्याच्च यद्यर्थस्य बोधो नियामकस्तदा प्राक्तनज्ञानेन व्यभिचारः कथम् ? द्वितीयज्ञानस्य प्राक्तनज्ञानात्तदुत्पत्तिताद्रूप्यसद्भावेऽपि द्वितीयज्ञानेन पूर्वान्तरज्ञानस्य नियामकत्वायोगात् । न हि ज्ञान ज्ञानस्य नियामक स्वप्रकाशकत्वात्तस्य । अयमाशयः—प्राक्तनज्ञानलक्षणैः सह तदनन्तरजातद्वितीयज्ञानस्य व्यभिचारः, यतो द्वितीय ज्ञानं प्राक्तनं न गृह्णाति । १०. ननु न ताद्रूप्यतदुत्पत्तिभ्या बोधोऽर्थस्य नियामकः, किन्तु तदध्यवसायित्वसहिताभ्यामेवेत्याशङ्काया तत्त्रयमपि निराकरोति जैनः । तत्त्रितयस्य तदुत्पत्तिताद्रूप्यतदध्यवसायस्य । ११. ननु वीतं ज्ञानं प्रतिनियतनीलादिविषयं तज्जन्यतद्रूपतदध्यवसायित्वादित्यत आह—'तदिति' काचकामलाद्युपहतचक्षुषः शुक्ले शङ्खे पीताकारज्ञानादुत्पन्नस्य तद्रूपस्य तदध्यवसायिनो द्वितीयज्ञानस्य पीताकारेण प्राक्तनज्ञानेन व्यभिचारः ।

एतेन[1] यदुक्तं परेण[2]—

भी पदार्थ हैं, उन सबको उसी समय क्यों नहीं जानता ? क्योंकि वे पदार्थ भी तो उसी पदार्थके सदृश आकारवाले हैं, जिससे कि ज्ञान उत्पन्न हुआ है। इस प्रकार ताद्रूप्य ज्ञानको अर्थका नियामक माननेमें समान आकारवाले पदार्थोंसे व्यभिचार आता है। तदुत्पत्तिको पदार्थके जाननेमें नियामक माननेपर इन्द्रियादिसे व्यभिचार आता है, क्योंकि ज्ञान इन्द्रियोंसे उत्पन्न तो होता है, पर इन्द्रियोंको नहीं जानता। यदि ताद्रूप्य और तदुत्पत्ति इन दोनोंको जाननेमें नियामक मानते हैं, तो समानार्थसमनन्तर प्रत्ययसे व्यभिचार आता है। इसका भाव यह है कि बौद्धोंकी व्यवस्थाके अनुसार किसी व्यक्तिको प्रथम क्षणमें 'यह नील पदार्थ है', ऐसा ज्ञान हुआ, द्वितीय क्षणमें भी 'यह नील है' यह ज्ञान हुआ और तृतीय क्षणमें भी 'यह नील है' यह ज्ञान हुआ। यहाँपर तीनों ही ज्ञान समान अर्थवाले हैं और प्रथम ज्ञानकी अपेक्षा दूसरा ज्ञान बीचमें अन्यके व्यवधान नहीं होनेसे समनन्तर प्रत्यय (प्रतीति) रूप भी है। यहाँपर प्रथमक्षणवर्ती ज्ञानसे द्वितीयक्षणवर्ती ज्ञान उत्पन्न हुआ, अतः तदुत्पत्ति भी है, और पूर्व ज्ञानके आकार हुआ, अतः तदाकारता भी है, फिर भी बौद्धमान्यताके अनुसार दूसरा ज्ञान प्राक्तन (पहलेके) ज्ञानको नहीं जानता। अतः ताद्रूप्य और तदुत्पत्ति इन दोनोंको नियामक माननेमें समानार्थ-समनन्तर प्रत्ययसे व्यभिचार दोष आता है। यदि कहा जाय कि ताद्रूप्य, तदुत्पत्ति और तदध्यवसाय इन तीनोंको हम अर्थका नियामक मानते हैं, तो काच-कामलादिक रोगके हो जानेसे शुक्लवर्णका भी शंख पीला दिखाई देने लगता है। अतः पीताकार ज्ञानसे व्यभिचार आता है। इसका भाव यह है कि पीलिया रोगवाले व्यक्तिको प्रथम क्षणमें जैसा पीताकारका ज्ञान हुआ तदनन्तर दूसरे क्षणमें भी वैसा ही ज्ञान हुआ और तदनन्तर तीसरे भी समयमें वैसा ही ज्ञान हुआ। यहाँपर ताद्रूप्य, तदुत्पत्ति और तदध्यवसाय ये तीनों ही हैं, फिर भी द्वितीयक्षणवर्ती पीताकाररूप ज्ञान प्रथमक्षणवर्ती पीताकार ज्ञानको नहीं जानता। इस प्रकार व्यभिचार आनेसे ताद्रूप्य आदिको जाननेका नियामक न मानकर योग्यताको ही प्रतिनियत अर्थका व्यवस्थापक मानना चाहिए।

इस प्रकार ताद्रूप्य आदिके व्यभिचार प्रतिपादन करनेसे बौद्ध-द्वारा जो यह कहा गया है—

१. स्वावरणेत्यादिना ताद्रूप्यादीना व्यभिचार-प्रतिपादनेन । २. बौद्धेन ।

६

[1]अर्थेन [2]घटयत्येनां [3]न हि मुक्त्वाऽर्थरूपताम्[4]।
तस्मात्प्रमेयाधिगतेः[5] प्रमाणं मेयरूपता ॥५॥

इति तन्निरस्तम्; [6]समानार्थाकारनानाज्ञानेषु मेयरूपतायाः सद्भावात्। न च [7]परेषां [8]सारूप्यं नामास्ति वस्तुभूतमिति योग्यतयैवार्थप्रतिनियम इति स्थितम्।

इदानीं कारणत्वात्परिच्छेद्यो[9]ऽर्थ इति मतं निराकरोति—

कारणस्य च परिच्छेद्यत्वे [10]करणादिना व्यभिचारः ॥१०॥

करणादिकारणं परिच्छेद्यमिति तेन व्यभिचारः। न ब्रूमः कारणत्वात्परिच्छेद्यत्वम्, अपि तु परिच्छेद्यत्वात्कारणत्वमिति चेन्न; तथापि केशोण्डुकादिना व्यभिचारात्।

अर्थरूपता अर्थात् तदाकारताको छोड़कर अन्य कोई भी वस्तु इस निर्विकल्प प्रत्यक्ष बुद्धिका अर्थके साथ सम्बन्ध स्थापित नहीं करती है, अतएव प्रमाणके विषयभूत पदार्थको जाननेके लिए मेयरूपता अर्थात् पदार्थके आकाररूप तदाकारता ही प्रमाण है ॥ ५ ॥

यह कथन निरस्त (खण्डित) हो जाता है; क्योंकि समान अर्थाकारवाले नाना ज्ञानोंमें मेयरूपता यानी तदाकारता पाई जाती है। फिर भी एक ज्ञानके द्वारा एक ही पदार्थ जाना जाता है, तत्सदृश अन्य नहीं। और बौद्धोंके यहां सदृश परिणाम-लक्षणवाला यौगाभिमत सामान्य पदार्थ जैसा कोई सारूप्य वास्तविक है नहीं। अतः यही सिद्ध हुआ कि आवरणकर्मके क्षयोपशम लक्षणवाली योग्यता ही विषयके प्रतिनियमका कारण है।

अब जो लोग पदार्थको ज्ञानका कारण होनेसे परिच्छेद्य अर्थात् जानने योग्य ज्ञेय कहते हैं, आचार्य उनके मतका निराकरण करते हैं—

सूत्रार्थ—कारणको परिच्छेद्य माननेपर करण आदिसे व्यभिचार आता है क्योंकि इन्द्रियाँ ज्ञान की कारण तो है, परन्तु विषय नहीं है। अर्थात् इन्द्रियाँ अपने आपको नहीं जानती हैं ॥ १० ॥

यतः करणादि (इन्द्रिय आदि) ज्ञानके कारण हैं, अतः परिच्छेद्य (ज्ञेय) हैं, इसलिए इन्द्रियादिसे व्यभिचार सिद्ध है।

शङ्का—यहाँ बौद्ध कहते है कि हम लोग पदार्थको ज्ञानका कारण होनेसे परिच्छेद्य नहीं कहते हैं अपि तु परिच्छेद्य होनेसे उसे ज्ञानका कारण कहते हैं।

---

१. सह। २. संबध्नाति। ३. निर्विकल्पप्रत्यक्षबुद्धिम्। ४. अर्थरूपतां मुक्त्वाऽन्यत् किञ्चिन्निर्विकल्पप्रत्यक्षबुद्धिमर्थेन न घटयतीत्यर्थः। ५. फलस्य।
६. समानोऽर्थानामाकारो येषु। ७. सौगतानाम्। ८. सारूप्यं सदृशपरिणामलक्षणं सामान्यम्, तच्च सौगतानां मते नास्ति वास्तवम्, तत्कथमर्थक्रियाकारि?
९. विषयः कारकाणाम्। १०. साधकतमं कारणं करणं चक्षुरादि, तेन।

इदानीमतीन्द्रियप्रत्यक्षं व्याचष्टे—

सामग्रीविशेषविश्लेषिताखिलावरणमतीन्द्रियमशेषतो मुख्यम् ॥११॥

सामग्री[1] द्रव्यक्षेत्रकालभावलक्षणा, तस्या विशेषः समग्रतालक्षणः। तेन[2] [3]विश्लेषितान्यखिलान्यावरणानि येन[4] तत्तथोक्तम्। किंविशिष्टम्? अतीन्द्रियमिन्द्रियाण्यतिक्रान्तम्[5]। पुनरपि कीदृशम्? अशेषतः सामस्त्येन विशदम्। [6]अशेषतो वैशद्ये किं कारणमिति चेत् प्रतिबन्धाभाव[7] इति ब्रूमः। तत्रापि किं कारणमिति चेदतीन्द्रियत्वमनावरणत्वं चेति ब्रूमः। एतदपि कुतः? इत्याह—

समाधान—यह कहना भी ठीक नहीं; क्योंकि परिच्छेद्य होनेसे यदि पदार्थको ज्ञानका कारण मानेंगे, तो भी केशोण्डुक आदिसे व्यभिचार दोष आता है; क्योंकि जैसा पहले बतला आये हैं कि किसी व्यक्तिके सिरपर मच्छर उड़ते देखकर जिस पुरुषको केशोंके उड़नेका ज्ञान हो रहा है, उसके वे मच्छर ज्ञानके कारण नहीं होते हैं।

अब ग्रन्थकार अतीन्द्रिय जो मुख्य प्रत्यक्ष है, उसका स्वरूप कहते हैं—

सूत्रार्थ—सामग्रीकी विशेषतासे दूर हो गये हैं समस्त आवरण जिसके, ऐसे अतीन्द्रिय और पूर्णतया विशद ज्ञानको मुख्य प्रत्यक्ष कहते हैं॥ ११ ॥

योग्य द्रव्य, क्षेत्र, काल और भावकी प्राप्तिको सामग्री कहते हैं। उसका विशेष सर्व कारण-कलापोंकी परिपूर्णता है। उस सामग्री-विशेषसे विश्लेषित अर्थात् विघटित कर दिये हैं अखिल (समस्त) आवरण जिसने, ऐसा वह ज्ञान है। पुनः कैसा है? अतीन्द्रिय है अर्थात् इन्द्रियोंको अतिक्रमण (उल्लंघन) करके यानी इन्द्रियोंको सहायताके विना ही वह समस्त ज्ञेय पदार्थोंको जाननेमें समर्थ है। पुनरपि वह कैसा है? अशेष अर्थात् सामस्त्य-रूपसे विशद (निर्मल या स्पष्ट) है, ऐसा सर्व श्रेष्ठ, निरावरण अतीन्द्रिय विशद ज्ञान मुख्य प्रत्यक्ष कहलाता है।

शङ्का—उस मुख्य प्रत्यक्षके सामस्त्यरूपसे विशद होनेमें क्या कारण है?

---

१. कर्मक्षययोग्योत्तमसंहननोत्तमप्रदेशोत्तमकालोत्तमसम्यग्दर्शनादिपरिणतिस्वरूपा सामग्री। २. सामग्रीविशेषेण। ३. विघटितानि। ४. ज्ञानेन। ५. इन्द्रियाण्यतिक्रम्योत्कर्षेण प्रवर्तत इत्यतीन्द्रियमिति। ६. उत्तरसूत्रपातनिका। ७. ज्ञानस्य प्रतिबन्धका आवरणानि, तेषामभावः प्रध्वंसाभावः। सावृतत्वेऽक्षजन्ये च प्रतिबन्धो हि सम्भवेत्। स्वच्छ चात्मनि साक्षिप्यमात्रापेक्षत्वतो मतम्॥ १॥

सावरणत्वे करणजन्यत्वे च प्रतिबन्धसम्भवात् ॥१२॥

नन्ववधि-मनःपर्ययोरने[1]नासङ्ग्रहादव्यापकमेतल्लक्षणमिति न वाच्यम्; तयोरपि स्वविषयेऽशेषतो विशदत्वादिधर्मसम्भवात् । न चैवं मति-[2]श्रुतयोरित्यतिव्याप्ति[3]-परिहारः । तदेतदतीन्द्रियमवधि-मनःपर्यय-केवलप्रभेदात् त्रिविधमपि मुख्यं प्रत्यक्षमात्म सन्निधिमात्रापेक्षत्वादिति ।

समाधान—ज्ञानके प्रतिबन्धक (अवरोधक) कारणोंका अभाव ही ज्ञानके पूर्ण विशद होनेमें कारण है ।

शङ्का—उसमें भी क्या कारण है ?

समाधान—अतीन्द्रियपना और निरावरणता कारण हैं, ऐसा हम कहते है ।

शङ्का—यह भी क्यों ?

उक्त शङ्काका समाधान करनेके लिए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—क्योंकि, आवरण-सहित और इन्द्रिय-जनित माननेपर ज्ञानका प्रतिबन्ध सम्भव है ॥ १२ ॥

भावार्थ—जब तक ज्ञानपर आवरण चढ़ा रहेगा और इन्द्रियादिकी सहायतासे उत्पन्न होगा, तब तक ज्ञानमें प्रतिबन्ध (रुकावट) आनेकी सम्भावना बनी रहेगी। जब ज्ञानपरके समस्त आवरण हट जाते है, और इन्द्रियादि बाहिरी किसी भी सहायककी उसे आवश्यकता नहीं रहती है, तब वह अतीन्द्रिय और निरावरण ज्ञान त्रैलोक्य और त्रिकालवर्त्ती चराचर समस्त पदार्थोंको हस्तामलकवत् स्पष्टरूपसे जानने लगता है, अतः ज्ञानकी विशदताके लिए उसका निरावरण और अतीन्द्रिय होना अत्यावश्यक है ।

शङ्का—आपके द्वारा प्रतिपादित मुख्य प्रत्यक्ष-लक्षणवाले इस सूत्रसे अवधिज्ञान और मनःपर्ययज्ञानका संग्रह नहीं होता, अतः उक्त लक्षण अव्यापक है; क्योंकि वह अपने सभी लक्ष्योंमें नहीं रहता है ।

समाधान—ऐसा नहीं कहना चाहिए; क्योंकि उन दोनोंके भी अपने

---

१. सूत्रेण । २. पञ्चभिरिन्द्रियैर्मनसा च मननं मतिः स्मृत्यादिकमपि । श्रुतावरणविश्लेषाच्छ्रवणं वा श्रुतम् । तदुक्तं श्लोकवार्त्तिके—"मत्यावरणविच्छेदविशेषान्मन्यते यथा । मननं मन्यते यावत्स्वार्थे मतिरसौ मता ॥१॥ श्रुतावरणविश्लेषविशेषाच्छ्रवणं श्रुतम् । शृणोति स्वार्थमिति वा श्रूयते स्मेति वाऽऽगमः" ॥२॥ ३. अत्यन्तविशदत्वाभावादिति द्रष्टव्यम् । अवधिमनःपर्ययवन्मतिश्रुते विशदे न भवतो यतः । ततस्तयोः करणजन्यत्व इत्यनेन निरासः कृतः ।

[1]नन्वशेषविषयविशदावभासिज्ञानस्य तद्वतो[2] वा प्रत्यक्षादिप्रमाणपञ्चकाविषयत्वेनाभावप्रमाणविषमविषधरविध्वस्तसत्ताकत्वात् कस्य मुख्यत्वम्? तथाहि[3]—नाध्यक्षमशेषज्ञविषयम्[4], तस्य[5] रूपादिनियतगोचरचारित्वात् [6]सम्बद्धवर्तमानविषयत्वाच्च। न चाशेषवेदी [7]सम्बद्धो वर्तमानश्चेति। नाप्यनुमानात्तत्सिद्धिः। अनुमानं हि गृहीतसम्बन्धस्य[8]एकदेशदर्शनादसन्निकृष्टे[9] बुद्धिः। न च सर्वज्ञसद्भावाविनाभाविकार्यलिङ्गं स्वभावलिङ्गं[10] वा सम्पश्यामः; तज्ज्ञतेः[11] पूर्वं तत्स्वभावस्य तत्कार्यस्य वा तत्सद्भावाविनाभाविनो [12]निश्चेतु-

विषयमें अशेषरूपसे विशदत्व आदि धर्म पाये जाते है। अतः मुख्य प्रत्यक्षके लक्षणमें अव्याप्ति नामका दूषण नहीं है।

तथा मतिज्ञान और श्रुतज्ञान ऐसे नहीं हैं; अर्थात् उन दोनोंमें विशदपना नहीं पाया जाता, अतः उक्त लक्षणमें अतिव्याप्ति दूषण भी नहीं है। इस प्रकार यह अतीन्द्रिय मुख्य प्रत्यक्ष अवधिज्ञान, मनः पर्ययज्ञान और केवलज्ञानके भेदसे तीन प्रकारका है। यतः यह मुख्य-प्रत्यक्ष इन्द्रिय, आलोक आदि समस्त पर वस्तुओंकी सहायतासे रहित केवल आत्माके सन्निधिमात्रकी अपेक्षासे उत्पन्न होता है, अतः इसे अतीन्द्रिय कहते है।

यहाँ भाट्ट (मीमांसक) कहते हैं कि समस्त विषयोंको विशद जाननेवाला ज्ञान अथवा उस प्रकारका ज्ञानवान् पुरुष प्रत्यक्षादि पाँच प्रमाणोंका विषय नहीं है, और अभाव प्रमाण तो विषम विषधर सर्पके समान उसकी सत्ताको ही विध्वस्त करता है। अतः किसी भी प्रमाणसे जब उसकी सत्ता सिद्ध नहीं होती है, तब आप मुख्यप्रत्यक्षता किसके कहते हैं? वह अपने कथनको स्पष्ट करता हुआ कहता है—कि प्रत्यक्ष प्रमाण तो अशेष जगत्को जाननेवाले सवज्ञको विषय नहीं करता है; क्योंकि वह प्रत्यक्ष तो रूपादि नियत विषयोंको ही विषय करता है, तथा इन्द्रिय-सम्बद्ध और वर्तमान पदार्थ ही उसका विषय है। किन्तु अशेषवेदी (सर्वज्ञ) पुरुष न तो नेत्रसे सम्बद्ध ही है और न वर्तमान ही है। अनुमानसे भी उस सर्वज्ञकी सिद्धि नहीं होती है; क्योंकि साध्य-साधनके सम्बन्धको जिसने ग्रहण किया है, ऐसे पुरुषके ही साधनरूप एकदेश धूमके देखनेसे असन्निकृष्ट अर्थात् दूरवर्ती परोक्ष अग्निमें

१. भाट्टः प्राह। २. पुरुषस्य सर्वज्ञस्य। ३. उक्तार्थं विवृणोति। ४. अशेषज्ञो विदां यस्य। ५. प्रत्यक्षस्य। ६. 'सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना' इत्यभिधानात्। ७. चक्षुषा संबद्धः पुरुषो न। ८. पुरुषस्य। ९. परोक्षे वह्निलक्षणे। "स एव (पर्वतादिः अग्निविशिष्टः) चोभयात्माऽयं गम्यो गमक एव च। असिद्धेनैकदेशेन गम्यः सिद्धेन बोधकः" ॥१॥ १०. अग्न्यादि। ११. सर्वज्ञावगमात्। १२. लिङ्गैरिति शेषः।

मशक्तेः। नाप्यागमात्तत्सद्भावः,। स[1] हि नित्योऽ[2]नित्यो वा तत्सद्भावं [3]भावयेत्? न तावन्नित्यः, [4]तस्यार्थवाद[5]रूपस्य कर्म[6]विशेषसंस्तवनपरत्वेन पुरुषविशेषावबोधकत्वायोगात्। अनादेरागमस्यादिमत्पुरुषवाचकत्वाघटनाच्च। नाप्यनित्य[7] आगमः सर्वज्ञं साधयति, तस्यापि तत्प्रणीतस्य तन्निश्चयमन्तरेण प्रामाण्यानिश्चयादितरेतराश्रयत्वाच्च[8] इतरप्रणीतस्य[9] त्वनाप्तादित[10]प्रमाणभावस्याशेषज्ञप्ररूपणपरत्वं नितरामसम्भाव्यमिति। [11]सर्वज्ञसदृशस्यापरस्य ग्रहणासम्भवाच्च नोपमानम्। अनन्यथाभूतस्यार्थस्याभावान्नार्था-

जो बुद्धि उत्पन्न होती है, उसे अनुमान कहते हैं। सो सर्वज्ञके सद्भावका अविनाभावी न तो हम स्वभावलिङ्ग ही देखते हैं और न कार्यलिङ्ग ही। और सर्वज्ञके जाननेसे पहले उसके सद्भावका अविनाभावी सर्वज्ञके स्वभावका और उसके कार्यका निश्चय नहीं किया जासकता। आगमसे भी सर्वज्ञका सद्भाव नहीं जाना जाता। यदि आप जैन लोग कहें कि आगमसे सर्वज्ञका सद्भाव जाना जाता है, तो हम पूछते हैं कि वह वेदरूप नित्य आगम सर्वज्ञके सद्भावको बतलाता है, अथवा स्मृति आदिके स्वरूपवाला अनित्य आगम सर्वज्ञके सद्भावको बतलाता है? नित्य आगम तो माना नहीं जासकता; क्योंकि वह अर्थवादरूप है, अर्थात् प्रकृतिगत तत्त्वोंका सामान्यरूपसे स्तुति निन्दा करनेवाला और यज्ञ-यागादि कर्म-विशेषोंका संस्तवन करनेवाला है, अतः उसके द्वारा सर्वज्ञरूप किसी पुरुषविशेषके सद्भावका ज्ञान होना सम्भव नहीं हैं। दूसरी बात यह भी है कि वेदरूप अनादि आगमसे आदिमान् पुरुषका कथन होना घटित भी नहीं हो सकता। तथा अनित्य आगम भी सर्वज्ञको सिद्ध नहीं करता है, क्योंकि हम पूछते हैं कि वह अनित्य आगम सर्वज्ञ-प्रणीत है, अथवा असर्वज्ञ-प्रणीत; जो कि सर्वज्ञके सद्भावका प्रतिपादक हो? यदि सर्वज्ञ-प्रणीत अनित्य आगमको सर्वज्ञके सद्भावका आवेदक कहें तो प्रथम तो सर्वज्ञके निश्चय हुए विना उसके द्वारा प्रणीत आगमका निश्चय ही नहीं किया जासकता है। दूसरे इतरेतराश्रय दोष आता है कि पहले जब सर्वज्ञ सिद्ध हो जाय, तब उसके द्वारा प्रणीत आगमके प्रमाणता सिद्ध हो, और जब आगमके प्रमाणता सिद्ध हो जाय, तब उसके द्वारा सर्वज्ञका सद्भाव

१. आगमः। २. नित्यो वेदः, अनित्या स्मृतिस्तत्पूर्वकत्वात्। ३. ज्ञापयेत। ४. अपौरुषेयवेदस्य। ५. यागप्रशंसावादस्तुतिनिन्दार्थवादरूपस्य। ६. यज्ञादि। ७. अनित्यः साधयति चेत्स तु सर्वज्ञप्रणीत इतरप्रणीतो वेति विकल्पद्वयं मनसि कृत्वा दूषयति। ८. सर्वज्ञप्रणीतत्वादागमप्रामाण्यसिद्धिः, निश्चितप्रामाण्यादागमात्सर्वज्ञसिद्धिरितीतरेतराश्रयत्वम्। ९. असर्वज्ञप्रणीतस्य। १०. अप्रात-। ११. "सर्वज्ञसदृशं किञ्चिद्यदि दृश्येत

[1]पत्तिरपि सर्वज्ञावबोधिकेति [2]धर्माद्युपदेशस्य व्यामोहादपि सम्भवात्। द्विविधो ह्युपदेशः—सम्यङ्-मिथ्योपदेशभेदात्। तत्र मन्वादीनां सम्यगुपदेशो यथार्थज्ञानोदयवेदमूलत्वात्। [3]बुद्धादीनां तु व्यामोहपूर्वकः, [4]तदमूलत्वात् [5]तेषामवेदार्थज्ञत्वात्। ततः प्रमाणपञ्चका-विषयत्वादभावप्रमाणस्यैव प्रवृत्तिस्तेन चाभाव[6] एव ज्ञायते; [7]भावांशे प्रत्यक्षादिप्रमाण-पञ्चकस्य व्यापारादिति।

सिद्ध हो। यदि इतर असर्वज्ञजनके द्वारा प्रणीत आगमको सर्वज्ञके सद्भावका प्रतिपादक मानते हो, तो जिसे स्वयं प्रमाणता प्राप्त नहीं है, ऐसे आगमको अशेषज्ञके निरूपण करनेवाला मानना तो अत्यन्त असम्भव ही है। इस प्रकार आगमसे भी सर्वज्ञ सद्भाव सिद्ध नहीं होता। उपमानसे भी सर्वज्ञका सद्भाव सिद्ध नहीं होता, क्योंकि सर्वज्ञके सदृश अन्य पुरुषका मिलना असम्भव है। अनन्यथाभूत अर्थके अभावसे अर्थापत्ति भी सर्वज्ञके सद्भावकी अवबोधिका नहीं है; क्योंकि धर्मादिका उपदेश व्यामोहसे भी सम्भव है। उपदेश दो प्रकारका है—सम्यक् उपदेश और मिथ्या उपदेश। उनमेंसे मनु-आदि पुरुषोंका तो सम्यक् उपदेश है; क्योंकि उनके वेदमूलक यथार्थ ज्ञानका उदय पाया जाता है। और बुद्ध आदिका उपदेश मिथ्या है—व्यामोह पूर्वक है, वेद-अमूलक है; क्योंकि बुद्धादिक वेदके अर्थके ज्ञाता नहीं हैं। इसलिए सर्वज्ञके विषयमें प्रत्यक्ष, अनुमान, आगम, उपमान और अर्थापत्ति इन पाँच प्रमाणोंकी प्रवृत्ति न होनेसे अभाव-प्रमाणकी ही प्रवृत्ति होती है सो उसके द्वारा सर्वज्ञका अभाव ही जाना जाता है, क्योंकि किसी भी वस्तुके भाव-अंशमें अर्थात् सद्भावमें प्रत्यक्षादि पाँच प्रमाणोंका ही व्यापार होता है।

साम्प्रति। उपमानेन सर्वज्ञं जानीयाम ततो वयम्" ॥१॥ १. "प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत्। अदृष्टं कल्पयेदन्यत्सार्थापत्तिरुदाहृता" ॥२॥ २. धर्माद्युपदेशस्त्वस्ति, परन्त्वसावन्यथापि सम्भवतीत्यनूद्य दूषयति। ३. सर्वज्ञोऽस्ति, धर्माद्युपदेशान्यथानुपपत्तेरित्यपि दूषयति। ४. वेद-। ५. बुद्धादीनाम्। ६. "गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्। मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥१॥ प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते। वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥२॥ न तावदिन्द्रियेणैषा नास्तीत्युत्पद्यते मतिः। भावांशेनैव सम्बन्धो योग्यत्वादिन्द्रियस्य हि ॥३॥ प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते। साऽऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनि ॥४॥ न च स्याद्व्यवहारोऽयं कारणादिविभागतः। प्रागभावादिभेदेन नाभावो (नार्थो वा) यदि विद्यते (भिद्यते) ॥५॥ यद्वानुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्त्वयम्। तस्माद् गवादिवद्वस्तु प्रमेयत्वाच्च गृह्यताम्" ॥६॥ ७. "प्रत्यक्षाद्यवतारश्च भावांशो गृह्यते यदा। व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षिते" ॥७॥

अत्र प्रतिविधीयते[1]—यत्तावदुक्तम्—'प्रत्यक्षादिप्रमाणाविषयत्वमशेषज्ञस्येति' तदयुक्तम्; तद्[2]-ग्राहकस्यानुमानस्य सम्भवात्। तथाहि—[3]कश्चित्पुरुषः सकलपदार्थसाक्षात्कारी[4], तद्ग्रहणस्वभावत्वे[5] सति प्रक्षीणप्रतिबन्धप्रत्ययत्वात्[6]। यथाऽपगततिमिरं लोचनं रूपसाक्षात्कारि। तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययश्च विवादापन्नः

अब आचार्य वादीके उपर्युक्त कथनका प्रतिवाद करते हैं—जो आपने कहा—'कि सर्वज्ञ प्रत्यक्षादि प्रमाणोंका विषय नहीं है' सो यह कहना अयुक्त है; क्योंकि सर्वज्ञके सद्भावका ग्राहक अनुमान पाया जाता है। वह इस प्रकार है—कोई पुरुष समस्त पदार्थोंका साक्षात् करनेवाला है, क्योंकि उन पदार्थोंका ग्रहण-स्वभावी होकर प्रक्षीण प्रतिबन्ध प्रत्यय (ज्ञान) वाला है। अर्थात् जिसके ज्ञानके प्रतिबन्ध करनेवाले सभी आवरण कर्म नष्ट हो गये हैं, ऐसा पुरुष सभी देश, काल और स्वभावसे विप्रकृष्ट, अन्तरित और सूक्ष्म पदार्थोंका प्रत्यक्ष द्रष्टा है, क्योंकि ज्ञानका स्वभाव सभी ज्ञेय पदार्थोंके जाननेका है। जो जिसका ग्रहण-स्वभावी होकरके प्रक्षीण प्रतिबन्ध प्रत्ययवाला होता है, वह उस पदार्थका साक्षात्कारी होता हैं; जैसे तिमिर (अन्धकार) से रहित लोचन (नेत्र) रूपका साक्षात्कारी अर्थात् प्रत्यक्षदर्शी होता है। तद्-ग्रहण स्वभावी होकर प्रक्षीण प्रतिबन्ध प्रत्ययवाला विवाद-ग्रस्त कोई पुरुष विशेष है।

मीमांसक अनुमानके चार ही अवयव मानते हैं, अतः यहांपर उनकी दृष्टिसे निगमनका प्रयोग नहीं किया गया है।

---

१. इतो भाट्टमतस्य जैनेन प्रतिविधानं क्रियते। २. अशेषज्ञ-। ३. अनि-
दिष्टनामा। ४. रूपादिमत्प्रतिनियतवर्तमानसूक्ष्मान्तरितदूरार्थाः सकलपदार्थास्तेषां साक्षा-
त्कारी प्रत्यक्षद्रष्टेत्यर्थः। ५. प्रक्षीणप्रतिबन्धप्रत्ययत्वादित्येतावत्युच्यमाने यौगपरिकल्पित-
मुक्तजीवेन व्यभिचारः, अत उक्तं तद्-ग्रहणस्वभावत्वे सतीति। यौगपरिकल्पितमुक्तजीवस्य
प्रक्षीणप्रतिबन्धप्रत्ययत्वमस्ति, पदार्थग्रहणस्वभावो नास्ति; अतस्तद्व्यवच्छेदार्थं तद्ग्रहण-
स्वभावत्वे सतीत्युक्तम्। तद्ग्रहणस्वभावत्वादित्युच्यमाने काचकामलादिजुष्टेन चक्षुषा व्यभि-
चारः, अत उक्तं प्रक्षीणप्रतिबन्धप्रत्ययत्वात्। यतस्तद्-ग्रहणस्वभावत्वादेतावन्मात्रस्योच्यमाने
काचकामलादिदुष्टे चक्षुषि तद्-ग्रहणस्वभावोऽस्ति, ग्रहणं नास्तीति भाट्टं प्रति। ६. प्रक्षीण-
श्चासौ प्रतिबन्धश्च स एव प्रत्ययः कारणं यस्य स, तस्य भावस्तत्त्वम्। प्रक्षीणप्रतिबन्ध-
प्रत्ययत्वादित्युक्ते प्रतिबन्धविवर्जिते वह्नौ व्यभिचारोऽतस्तद्व्यवच्छेदार्थं तद्ग्रहणस्वभावत्वे
सतीत्युच्यते। अतः सर्वं साधनमिति सुष्ठूक्तम्। ७. प्रत्ययत्वात्कारणत्वात्।

कश्चिदिति[1]। सकलपदार्थग्रहणस्वभावत्वं नात्मनोऽसिद्धम्[2]; चोदनातः[3] सकलपदार्थ[4]-परिज्ञानस्यान्यथा[5]ऽयोगा[6]त्, अन्धस्येवाऽऽदर्शाद्रूपप्रतिपत्तेरिति। [7]व्याप्तिज्ञानोत्पत्तिबलाच्चा-शेषविषय[8]ज्ञानसम्भवः। केवलं वैशद्ये विवादः[9], तत्र चावरणापगम[10] एव कारणं [11]रजो-[12]नीहाराद्यावृतार्थज्ञानस्येव तदप[13]गम इति।

प्रक्षीणप्रतिबन्धप्रत्ययत्वं कथमिति चेदुच्यते—दोषावरणे[14] [15]क्वचिन्निर्मूलं प्रलय-

---

यदि कहा जाय कि आत्माका समस्त पदार्थोंके ग्रहण करनेका स्वभाव असिद्ध है, सो नहीं कह सकते; अन्यथा वेद-वाक्यसे सकल पदार्थोंका परि-ज्ञान नहीं हो सकेगा; जैसे कि अन्धेको दर्पणसे भी अपने रूपका ज्ञान नहीं हो सकता है। (किन्तु आप लोगोंने वेद-वाक्यको भूत, भविष्यत्, वर्तमान कालवर्ती सूक्ष्मादि सभी पदार्थोंका अवगमक स्वयं माना है। आश्चर्य है कि फिर भी आप लोग आत्माका स्वभाव सर्व पदार्थोंके जाननेका नहीं मानते हैं।) तथा जो सत् है, वह सर्व अनेक धर्मात्मक है, इत्यादि व्याप्तिज्ञानकी उत्पत्ति के बलसे समस्त विषयोंका परोक्षज्ञान सम्भव है ही। केवल वैशद्य (निर्म-लतारूप प्रत्यक्षपने) में अपना विवाद रह जाता है, सो उसमें कर्मके आव-रणका दूर होना ही कारण है। जैसे रज (धूलि) और नीहार (बर्फ) आदिसे आवृत पदार्थका स्पष्ट ज्ञान उसके आवरण दूर होनेपर होता है।

शङ्का—ज्ञानके प्रतिबन्धक सर्व आवरण सर्वथा क्षय हो सकते हैं, यह कैसे जाना जाता है?

समाधान—अनुमानसे जाना जाता है, वह इस प्रकार है—दोष (राग-द्वेषादि भावकर्म) और आवरण (ज्ञानावरणादि द्रव्यकर्म) किसी

---

१. पञ्चावयवान् यौगश्चतुरो मीमांसकस्त्रीन् साङ्ख्यो द्वौ जैनो बौद्धस्त्वेकमेव हेतुं प्रयोजयतीत्युक्तत्वान्मीमांसकं प्रति चत्वार एव अवयवा प्रयुक्ताः। २. असिद्धोऽयं हेतुरिति शङ्का, तां निराकरोति। ३. वेदात्, वेदवाक्यात्। ४. चोदना हि भूतं भवन्तं भविष्यन्तं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयितुमलं पुरुषविशेषानिति वदन् स्वयं प्रतीयन्नपि मीमांसकः सकलार्थज्ञानस्वभावत्वमात्मनो न प्रत्येतीति कथं स्वस्थः? तच्च न ज्ञानमात्मनो भिन्नमेव मीमांसकस्य कथञ्चिद्भेदोपगमादन्यथा मतान्तरप्रसङ्गात्। ततः सिद्धं तत्स्वभावत्वम्। ५. आत्मनः सकलपदार्थज्ञानस्वभावत्वं विना। ६. चोदनातः सकलार्थज्ञत्वं न युज्यते। ७. यत्सत्स्वरूपं तत्सर्वमनेकान्तात्मकमित्यादिव्याप्तिज्ञानाच्च सकलार्थज्ञत्वं युज्यते; अन्यथाऽनियतदिग्देशादिस्थितानेः परिज्ञानं कथमुत्पद्यते। ८. सर्व-सामान्यादिविषयक। ९. आवयोः। १०. आवरणाभावः। ११. धूलिः। १२. तुषारः। १३. रजोनीहारादेरभावः। १४. भावद्रव्यकर्मणी। १५. आत्मनि।

सुपव्रजतः; प्रकृष्यमाण[1]हानिकत्वात्। यस्य प्रकृष्यमाणहानिः स क्वचिन्निर्मूलं प्रलयमुपव्रजति। यथाऽग्निपुटपाकापसारितकिट्टकालिकाद्यन्तरङ्गबहिरङ्गमलद्वयात्मनि हेम्नि मलमिति। [2]निर्ह्रासातिशयवती च दोषावरणे इति।

[3]कथं पुनर्विवादाध्यासितस्य ज्ञानस्यावरणं सिद्धम्[4], प्रतिषेधस्य[5] विधिपूर्वकत्वादिति। अत्रोच्यते[6]—विवादापन्नं ज्ञानं सावरणम्, विशदतया[7] 'स्वविषयानवबोधकत्वाद्[8] रजोनीहाराद्यन्तरितार्थज्ञानवदिति। न चात्मनोऽमूर्त्तत्वादावार[10]कावृत्य[11]योगः; अमूर्ताया अपि चेतनाशक्तेर्मदिरामदनकोद्रवादिभिरावरणोपपत्तेः। न चेन्द्रियस्य[12]तैरा-

---

पुरुषविशेषमें निर्मूल विनाशको प्राप्त होते हैं, क्योंकि इनकी प्रकृष्यमाण अर्थात् वढ़ती हुई चरम सीमाको प्राप्त हानि देखी जाती है। जिसकी प्रकृष्यमाण हानि होती है, वह कहीं पर निर्मूल प्रलयको प्राप्त होता है। जैसे कि अग्निपुटके पाकसे दूर किये गये हैं कीट और कालिमा आदि अन्तरङ्ग और बहिरङ्ग ये दोनों मल जिसके भीतरसे ऐसा सुवर्ण मल-रहित सर्वथा शुद्ध हो जाता है इसी प्रकार अत्यन्त निर्मूल विनाशरूप अतिशयवाले दोष और आवरण हैं इस अनुमानसे जाना जाता है कि ज्ञानके प्रतिबन्धक आवरण भी सर्वथा क्षयको प्राप्त हो सकते हैं।

शङ्का—विवादापन्न ज्ञानका आवरण कैसे सिद्ध है? क्योंकि किसी भी वस्तुका प्रतिषेध विधिपूर्वक ही होता है?

समाधान—इस शङ्कापर आचार्य कहते हैं कि वक्ष्यमाण अनुमानसे ज्ञानका आवरण सिद्ध है। वह इस प्रकार है—विवादापन्न ज्ञान आवरण-सहित है; क्योंकि वह अतिविशदरूपसे अपने विषयको नहीं जानता है। अथवा पाठान्तरकी अपेक्षा अविशदरूपसे अपने विषयको जानता है। जैसे कि रज और नीहार आदिसे अन्तरित (आच्छादित) पदार्थका ज्ञान अतिविशदरूपसे अपने विषयको नहीं जानता है। इस अनुमानसे ज्ञानकी सावरणता सिद्ध है।

शङ्का—आत्मा तो अमूर्त्त है, अतः अमूर्त्त होनेसे उसका ज्ञानावरणादि मूर्त्त आवारकोंके द्वारा आवरण नहीं हो सकता है?

---

१. वर्धमानहानिदर्शनात्, प्रतिपुरुषं वर्धमानातिशयदर्शनात्। २. विनाश-। ३. बौद्धः प्राह। ४. अपि तु न कुतः। ५. प्राप्तिपूर्वको हि निषेधः। ६. जैनैः। ७. स्पष्टाकारतया। ८. धूमादि-। ९. 'अविशदतया (अव्यक्ताकारतया) स्वविषयावबोधकत्वात्' इति पाठान्तरम्। १०. आवृणोतीति आवारकम्। ११. ज्ञानावरणादिना प्रच्छादनायोगः। १२ भो भट्ट, यद्येवं ब्रूषे यदिन्द्रियाणामावरणमिति तदेत्था-

वरणम्, इन्द्रियाणामचेतनानामप्यनावृतप्रख्यत्वात्[1] [2]स्मृत्यादि[3]प्रतिबन्धायोगात्[4]। नापि[5] मनसस्तैरावरणम्; आत्मव्यतिरेकेणापरस्य [6]मनसो निषेत्स्यमानत्वात्[7]। ततो नामूर्तस्याऽऽवरणाभावः। अतो नासिद्धं तद्-[8]ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वम्। नापि विरुद्धम्; विपरीत[9]निश्चिताविनाभावात्[10]। नाप्यनैकान्तिकम्; देशतः

समाधान—यह शङ्का उचित नहीं; क्योंकि अमूर्त्त भी चैतन्यशक्ति का मदिरा, मदन कोद्रव (मतौनिया कोदों) आदि मूर्त्त पदार्थोंसे आवरण होता हुआ देखा जाता है। यदि कहा जाय कि मदिरा आदिसे इन्द्रियोंका आवरण होता है, सो भी कहना ठीक नहीं है; क्योंकि इन्द्रियां अचेतन हैं, सो उनका आवरण भी अनावरणके तुल्य है। यदि फिर भी इन्द्रियोंका आवरण माना जाय, तो मदिरापान करनेवाले पुरुषके स्मृति, प्रत्यभिज्ञान आदि ज्ञानोंका प्रतिबन्ध नहीं होना चाहिए, अर्थात् मदिरा-पायी पुरुषके वस्तुओंका स्मरण आदि स्वस्थ दशाके समान बना रहना चाहिए। किन्तु उस दशामें उसके वस्तुका स्मरण आदि देखा नहीं जाता, अतः सिद्ध है कि मदिरा आदिसे चैतन्य शक्तिका आवरण होता है। यदि कहा जाय कि मदिरा आदिसे मनका आवरण होता है, सो भी कहना ठीक नहीं; क्योंकि आत्माके अतिरिक्त अन्य मनका आगे निषेध किया गया है, अर्थात् आत्माके सिवाय मन अन्य कोई वस्तु नहीं है, यह बात हम आगे चलकर सिद्ध करेंगे। इसलिए अमूर्त्त चैतन्य शक्तिका आवरण नहीं होता, यह कहना ठीक नहीं है।

इस प्रकार 'तद्-ग्रहण-स्वभावी होकर प्रक्षीण प्रतिबन्धप्रत्ययत्व' यह हमारा हेतु असिद्ध नहीं है। और न विरुद्ध ही है; क्योंकि विपरीतके साथ निश्चित अविनाभावका अभाव है। यहाँ आत्माके सकल पदार्थोंका साक्षात् करना साध्य है, और उनका साक्षात् न करना यह साध्यका विपरीत है, उसके साथ हेतु निश्चित रूपसे व्याप्ति रखनेवाला अविनाभावी सम्बन्ध नहीं पाया जाता है। तथा हमारा उक्त हेतु अनेकान्तिक भी नहीं है, क्योंकि एक देशसे अथवा

[illegible] दूषयति। १. समानत्वात्। २. अन्यथेन्द्रियाणामावरणं चेत्। ३. आदिशब्देन प्रत्यभिज्ञानतर्कादिः। ४. आत्मन आवरणाभावे मद्योन्मत्तस्य स्मरणं भवतु; नास्ति च स्मरणम्। तस्मादात्मन एवाऽऽवरणं सिद्धं मदिरादिभिः। ५. यदि [illegible] मनस आवरणं [illegible] तदप्ययुक्तम्। ६. [illegible] आत्मनो [illegible]। ७. अग्रे निषेत्स्यते। ८. सकलपदार्थग्रहण। ९. आत्मनः [illegible] निर्णयः। १०. [illegible] सह सम्बन्धाभावात्।

साकल्येन वा विपक्षे[१] वृत्त्यभावात्। [२]विपरीतार्थोपस्थापक[३]प्रत्यक्षागमासम्भवान्न कालात्ययापदिष्टत्वम्[४]। नापि सत्प्रतिपक्षम्[५]; प्रतिपक्षसाधनस्य हेतोरभावात्[६]।

[७]अथेदमस्त्येव—विवादापन्नः पुरुषो नाशेषज्ञो वक्तृत्वात्पुरुषत्वात्पाण्यादिमत्त्वाच्च; रथ्यापुरुषवदिति। नैतच्चारु; वक्तृत्वादेरसम्यग्घेतुत्वात्। वक्तृत्वं हि दृष्टे[८]ष्टविरुद्धार्थ-वक्तृत्वं[९] तदविरुद्धवक्तृत्वं वक्तृत्वसामान्यं वा; गत्यन्तराभावात्[१०]। न तावत् प्रथमः पक्षः, सिद्धसाध्यतानुषङ्गात्[११]। नापि द्वितीयः पक्षः; विरुद्धत्वात्। तदविरुद्धवक्तृत्वं[१२] हि ज्ञानातिशयमन्तरेण नोपपद्यत इति। वक्तृत्वसामान्यमपि [१३]विपक्षाविरुद्धत्वान्न प्रकृत-साध्यसाधनायालम्[१४], ज्ञानप्रकर्षे वक्तृत्वापकर्षादर्शनात्[१५]। प्रत्युत ज्ञानातिशयवतो वच-नातिशयस्यैव सम्भवात्।

सर्व देशसे उसके विपक्षमें रहनेका अभाव है। विपरीत अर्थकी स्थापना करने-वाले प्रत्यक्ष और आगम प्रमाणका अभाव होनेसे उक्त हेतु कालात्ययापदिष्ट भी भी नहीं है; क्योंकि जो हेतु प्रत्यक्षादि प्रमाणोंसे बाधित पक्षके अनन्तर प्रयुक्त होता है, उसे कालात्ययापदिष्ट कहते हैं। और न हमारा हेतु सत्प्रतिपक्ष (प्रकरणसम) ही है, क्योंकि प्रतिपक्षके साधन करनेवाले हेतुका अभाव है।

यहाँपर मीमांसक कहते हैं कि प्रतिपक्षका साधन करनेवाला हेतु पाया जाता है; वह इस प्रकार है—विवादापन्न पुरुष अशेषज्ञ (सर्वज्ञ) नहीं है; क्योंकि वह वक्ता है, पुरुष है और हस्त-पादादि अंग-उपांगोंका धारक है। [illegible] कि गली-कूचेमें घूमनेवाला साधारण पुरुष। उनका यह कहना भी सुन्दर नहीं; क्योंकि वक्तृत्व आदि सम्यक् हेतु नहीं हैं। हम पूछते हैं कि वक्तृत्वका अर्थ प्रत्यक्ष और अनुमानसे विरुद्ध अर्थका वक्तापना आपके अभीष्ट है, अथवा उससे अविरुद्ध वक्तापना, अथवा वक्तृत्व सामान्य अभीष्ट है; क्योंकि इनके अतिरिक्त अन्य विकल्प सम्भव नहीं है। इनमेंसे प्रथम पक्ष ठीक नहीं है, क्योंकि उसके माननेपर सिद्ध-साध्यताका प्रसङ्ग प्राप्त होता है। हम भी तो यह कहते हैं कि जो प्रत्यक्ष और अनुमानसे विरुद्ध वक्ता है, वह

---

१. सकलपदार्थसाक्षात्कारिणि पुरुषे। २. अग्निरनुष्ण इत्यादिवत्। ३. व्यवस्था-पक-। ४. प्रत्यक्षागमबाधितकाला-(पक्षा-) नन्तरं प्रयुक्तत्वात्कालात्ययापदिष्टः। ५. सन् प्रतिपक्षो यस्य हेतुरूपस्य तत्तथोक्तम्। ६. न प्रकरणसम इत्यर्थः।

७. मीमांसकः प्राह। ८. प्रत्यक्षानुमानाभ्याम्। ९. दृष्टेष्टाविरुद्धवक्तृत्वम्। १०. विकल्पान्तराभावात्। ११. सम्पर्कात्। १२. प्रत्यक्षानुमानाभ्यामविरुद्धवक्तृत्वम्। १३. सर्वज्ञेन सहाविरुद्धत्वात्। १४. असर्वज्ञत्वसाध्यसाधनाय न समर्थं वक्तृत्वं हेतुः। १५. ज्ञानातिशये सति वचनस्य हानित्वं न दृश्यते। हानिरभाव इत्यर्थः।

[1]एतेन [2]पुरुषत्वमपि निरस्तम् । [3]पुरुषत्वं हि रागादिदोषदूषितम्[4], तदा सिद्धसाध्यता । तददूषितं तु विरुद्धम्[5] वैराग्य[6]-ज्ञानादिगुणयुक्तपुरुषत्वस्याशेषज्ञत्वमन्तरेणायोगात् । पुरुषत्वसामान्यं तु सन्दिग्धविपक्ष[7]व्यावृत्तिकमिति सिद्धं सकलपदार्थसाक्षात्कारित्वं कस्यचित्पुरुषस्यातोऽ[8]नुमानात् । इति न [9]प्रमाणपञ्चकाविषयत्वमशेषज्ञस्य ।

सर्वज्ञ नहीं हो सकता । द्वितीय पक्ष भी ठीक नहीं है; क्योंकि वह विरुद्ध हेत्वाभासरूप है । इसका कारण यह है कि प्रत्यक्ष और अनुमानसे अविरुद्ध वक्तापन तो ज्ञानातिशयके विना नहीं वन सकता है । और वैसी दशामें वह आपके साध्यसे विरुद्ध अर्थको सिद्ध करनेके कारण विरुद्ध हेत्वभास हो जाता है । वक्तृत्वसामान्यरूप तृतीय विकल्प भी ठीक नहीं है; क्योंकि वह विषयभूत सर्वज्ञताके साथ अविरोधी है, अतः वह प्रकृत साध्य जो असर्वज्ञता उसे सिद्ध करनेके लिए समर्थ नहीं है । इसका कारण यह है कि ज्ञानके प्रकर्ष होनेपर वक्तृत्वका अपकर्ष नहीं देखा जाता; प्रत्युत ज्ञानातिशयवाले पुरुषके वचनोंका अतिशय ही सम्भव है । इस प्रकार वक्तृत्व हेतु विवादापन्न पुरुषको असर्वज्ञ सिद्ध नहीं करता है ।

इसी वक्तृत्व हेतुके असर्वज्ञता-साधन करनेके निराकरणसे द्वितीय पुरुषत्व हेतुका भी निराकरण कर दिया गया समझना चाहिए । क्योंकि हम आपसे पूछते हैं कि पुरुषत्वसे आपका अभिप्राय यदि रागादि दोषसे दूषित पुरुषसे है, तो सिद्धसाध्यता है; हम भी कहते है कि रागादि दोषसे दूषित पुरुष सर्वज्ञ नहीं हो सकता है । यदि पुरुषत्वसे अभिप्राय रागादि दोषसे अदूषित (रहित) पुरुषसे है, तो आपका हेतु विरूद्ध हेत्वाभास हो जाता है; क्योंकि रागका अभाव वीतरागताको, द्वेषका अभाव शान्त मनोवृत्तिको तथा मोहका अभाव सर्वज्ञताको सिद्ध करता है । और अशेषज्ञता (सर्वज्ञता) के विना वैराग्य वा विशिष्ट ज्ञान आदि गुणोंसे युक्त पुरुषपन वन नहीं सकता । यदि पुरुषत्वसामान्यरूप हेतु आपको अभीष्ट हो, तो वह सन्दिग्धविपक्षवृत्तिक हेत्वाभास हो जाता है; क्योंकि असर्वज्ञताका विपक्ष

---

१. वक्तृत्वस्य सर्वज्ञत्वसाधननिराकरणेन । २. द्वितीयसाधनम् । ३. पुरुषत्वं हि रागादिदोषदूषितं तददूषितं पुरुषत्वसामान्यं चेति विकल्पत्रयं मनसि निधाय [illegible] दूषयति । ४. रागद्वेषमोहैर्दूषितं संयुक्तम् । ५. रागाभावे वीतरागत्वं द्वेषाभावे शान्तत्वं मोहाभावे सर्वज्ञत्वं साधयति तस्माद्विरुद्धम् । ६. [illegible] । ७. सन्दिग्ध[illegible] [illegible] । ८. कश्चित् पुरुषः सकलपदार्थसाक्षात्कारी, [illegible] । ९. प्रत्यक्षानुमानागमोपमानार्था-पत्त्यभावाख्यम् ।

अथास्मिन्ननुमानेऽर्हतः 'सर्ववित्त्वमनर्हतो[2] वा ? अनर्हतश्चेदर्हद्वाक्यमप्रमाणं स्यात्। अर्हतश्चेत्सोऽपि न श्रुत्या[3] [4]सामर्थ्येन वाऽवगन्तुं पार्यते। स्वशक्त्या[5] दृष्टान्तानुग्रहेण[6] वा हेतो[7]: पक्षान्तरेऽपि[8] तुल्यवृत्तित्वादिति।

तदेतत्परेषां[9] स्ववधाय [10]कृत्योत्थापनम्; [11]एवंविधविशेषप्रश्नस्य सर्वज्ञसामान्या-

---

सर्वज्ञता है, उसका किसी पुरुष में रहना सम्भव है, अतः विपक्षसे व्यावृत्ति सन्दिग्ध है।

(तीसरा पाण्यादिमत्व हेतु भी ठीक नहीं है; क्योंकि हाथ-पैर आदिके होनेका असर्वज्ञताके साथ कोई सम्बन्ध नहीं है।)

इस प्रकार हमारे द्वारा कहे गये अनुमानसे किसी पुरुषविशेषके सकल पदार्थोंका साक्षात्कारित्व सिद्ध है। इस लिए यह कहना ठीक नहीं नहीं है कि सर्वज्ञता प्रत्यक्षादि पाँच प्रमाणोंका विषय नहीं है, अतः कोई सर्वज्ञ नहीं है।

पुनः असर्वज्ञवादी कहता है कि आपके द्वारा प्रयुक्त इस अनुमानसे जो सामान्य सर्वज्ञता सिद्ध होती है, वह आप अर्हत्‌के मानते हैं, या अनर्हत् बुद्ध आदिके मानते हैं? यदि अनर्हत्‌के मानते हैं, तो अर्हद्वाक्य अप्रमाण हो जायंगे। यदि अर्हत्‌के मानते हैं, तो हम पूछते हैं कि अर्हत्‌के सर्वज्ञता श्रुति (आगम) से सिद्ध करते हैं, अथवा सामार्थ्यसे, अथवा स्वशक्ति से, अथवा दृष्टान्तके अनुग्रहसे सिद्ध करते हैं। इनमेंसे श्रुतिसे और सामर्थ्यसे तो अर्हत् जाना नहीं जाता है अर्थात् अर्हन्तके सर्वज्ञता सिद्ध नहीं होती है। स्वशक्ति कहिये अविनाभावी लिङ्गसे अथवा आपके द्वारा प्रयुक्त दृष्टान्तके बलसे कहें, तो तद्-ग्रहणस्वभावी होकर प्रक्षीण प्रति-बन्धप्रत्ययत्व हेतु हरि-हर-हिरण्यगर्भादि पक्षान्तरमें भी समान रूपसे रहता है। अर्थात् उस हेतुसे अर्हन्तके समान ब्रह्मा, विष्णु, महेश, बुद्ध आदि सभी के सर्वज्ञता सिद्ध होती है, जो कि आपको भी अभीष्ट नहीं है।

आचार्य उक्त कथनका प्रतिवाद करते हुए कहते हैं कि असर्वज्ञ वादियोंका यह कथन अपने वधके लिए कृत्या-उत्थापनके अर्थात् सोती हुई

---

१. सर्वज्ञत्वम्। २. बुद्धादेः। ३. आगमेन। ४. व्यापकत्वेन व्यञ्जकत्वेनाविनाभावित्वेन वा। ५. हेतोरविनाभावशक्त्या सामर्थ्येन नावगन्तुं पार्यत इत्येतद्विवृणोति। ६. यथाऽपगततिमिरं लोचनं रूपसाक्षात्कारीति दृष्टान्तस्तस्य बलेन। ७. तद्-ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वस्य। ८. हरिहरहिरण्यगर्भादौ। ९. भाट्टानामसर्वज्ञवादिनाम्। १०. कर्णाटकभाषायां मारि। ११. कुतः

भ्युपगमपूर्वकत्वात्। अन्यथा[1] न कस्याप्यशेषज्ञत्वमित्येवं वक्तव्यम्[2]। प्रसिद्धानुमाने[3]ऽप्यस्य[4] दोषस्य सम्भवेन [5]जात्युत्तरत्वाच्च। तथाहि[6]—नित्यः शब्दः, [7]प्रत्यभिज्ञायमानत्वात्; इत्युक्ते व्यापकः[8] शब्दो नित्यः प्रसाध्यते, अव्यापको वा? यद्यव्यापकः, तदा व्यापकत्वेनोपकल्प्यमानो[9] न कञ्चिदर्थं पुष्णाति। अथ व्यापकः, सोऽपि न श्रुत्या सामर्थ्येन वाऽवगम्यते[10]। स्वशक्त्या दृष्टान्तानुग्रहेण वा [11]पक्षान्तरेऽपि [12]तुल्यवृत्तित्वादिति सिद्धमतो[13] निर्दोषात्साधनादेशषज्ञत्वमिति।

मारक राक्षसीके जगानेके समान है; क्योंकि इस प्रकारके विशेष प्रश्न सर्वज्ञसामान्यकी स्वीकृति-पूर्वक ही पूछे जा सकते हैं और सर्वज्ञसामान्यके माननेपर आपके असर्वज्ञरूप पक्षका घात हो जाता है अन्यथा (यदि सर्वज्ञ-सामान्य नहीं मानते है, तो,) किसीके भी सर्वज्ञता नहीं है, ऐसा ही कहना चाहिए। तथा सर्वज्ञके अभावको सिद्ध करनेवाले आपके उस प्रसिद्ध अनुमानमें भी अर्हत्‌के सर्वज्ञता है, या अनर्हत्‌के, इत्यादि प्रश्नरूप इस दोषकी सम्भावनासे जातिनामक दूपणरूप उत्तर होता है। असत् उत्तरको जाति कहते हैं, अथवा दोनों पक्षोंमें प्रश्न और उत्तरके समान होनेको जात्युत्तर-दोष कहते हैं। वह दोष इस प्रकारसे प्राप्त होता है—किसीने अनुमानका प्रयोग किया—कि शब्द नित्य है, क्योंकि उसका प्रत्यभिज्ञान होता है, ऐसा कहनेपर जातिवादी उससे पूछे कि आप इस अनुमानसे व्यापक शब्द के नित्यता सिद्ध करते हैं, तो व्यापकरूपसे कल्पना किया हुआ वह शब्द किसी भी अर्थको पुष्ट नहीं करता है। अर्थात् फिर शब्दको व्यापक मानना निरर्थक है, क्योंकि मीमांसक शब्दको व्यापक मानते हैं। और यदि व्यापक शब्द्के नित्यता सिद्ध करते है, तो उसकी व्यापकरूप नित्यता श्रुतिसे और सामर्थ्यसे तो जानी नहीं जाती है। यदि स्वशक्तिसे और दृष्टान्तके अनुग्रह

स्वपक्षोच्छेदनं वाञ्छाम्यहमिति पृच्छसि चेदाह। १. सर्वज्ञसामान्यानभ्युपगमे। २. मीमांसकेन त्वया। ३. तव मते उभयवादिप्रसिद्धानुमानेऽपि। ४. अर्हतः सर्ववित्त्वमनर्हतो वेत्थंप्रकारस्य। ५. असदुत्तरं जातिः। दोषसम्भवात्प्रयुक्ते स्थापनाहेतौ दूषणासमर्थमुत्तरं जातिमाहुः। अथान्ये तु स्वव्याघातकमुत्तरं सन्दर्भेण दूषणासमर्थं वा समानाभिमतदूषणसमर्थमुत्तरं वा जात्युत्तरमाहुः। ६. प्रसिद्धानुमानेऽप्ययं दोषः कथं सम्भवति? तदेव विवृणोति। ७. स एवायमिति प्रत्यभिज्ञानात्। ८. मीमांसकमते व्यापकः सर्वगतः शब्दो नित्यस्त्व। ९. कल्प्यमानः शब्दः। १०. अवगन्तुं न पार्यते। ११. अव्यापके नित्ये शब्दे। १२. जात्युत्तरम्। १३. तद् [illegible] प्रसिद्धानुमानात्।

यच्चाभावप्रमाणकवलितसत्ताकत्वमशेषज्ञत्वस्येति, तदयुक्तमेव; अनुमानस्य तद्ग्राहकस्य सद्भावे सति प्रमाणपञ्चकाभावमूलस्याभावप्रमाणस्योपस्थापनायोगात्।

गृहीत्वा वस्तुसद्भावं[1] स्मृत्वा च प्रतियोगिनम्[2]।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया[3] ॥ ६ ॥

इति च भावत्कं[4] दर्शनम्[5]। तथा[6] च कालत्रय-त्रिलोकलक्षणवस्तुसद्भावग्रहणेऽ[7]न्यत्रान्यदा[8] गृहीतस्मरणे च सर्वज्ञनास्तिताज्ञानमभावप्रमाणं युक्तम्, नापरथा[9]। न च कस्यचिदर्वाग्द[10]र्शिनस्त्रिजगत्त्रिकालज्ञानमुपपद्यते[11], सर्वज्ञस्यातीन्द्रियस्य वा। सर्वज्ञत्वं

से कहें तो अव्यापक नित्य शब्दरूप पक्षान्तरमें भी उस हेतुका रहना समान है। इस प्रकार से दोषोद्भावन कर असत् उत्तर देना तो जात्युत्तर दोष है। इस प्रकार तद्-ग्रहणस्वभावी होकर प्रक्षीण प्रतिबन्धप्रत्ययत्वरूप निर्दोष हेतुसे सर्वज्ञता सिद्ध है।

और जो आप लोगोंने कहा कि 'सर्वज्ञताकी सत्ता तो अभावप्रमाणसे कवलित (ग्रसित) है, अर्थात् अभावप्रमाणसे सर्वज्ञताका सद्भाव नहीं, प्रत्युत अभाव ही सिद्ध होता है, सो यह कहना भी अयुक्त ही है; क्योंकि जब सर्वज्ञताके ग्राहक (साधक) अनुमानका सद्भाव पाया जाता है, तब प्रत्यक्षादि पाँच प्रमाणोंका अभाव ही जिसका मूल है, ऐसे अभावप्रमाणके उपस्थापनका अयोग है, अर्थात् अभावप्रमाणकी प्रवृत्ति वहींपर होती है, जहाँपर कि प्रत्यक्षादि किसी भी प्रमाणसे वस्तुके सद्भावकी सिद्धि न हो। जब सर्वज्ञताका साधक अनुमान प्रमाण पाया जाता है, तब अभाव प्रमाणकी प्रवृत्ति ही नहीं हो सकती। तथा—

वस्तुके सद्भावको ग्रहणकर अर्थात् घट-रहित केवल भूतलको देखकर और प्रतियोगीको स्मरण कर अर्थात् घटकी याद कर बाह्य इन्द्रियोंकी अपेक्षासे रहित नास्तितारूप मानस ज्ञान होता है, अन्य प्रकारसे नहीं ॥६॥

ऐसा आप लोगोंका मत है। सो इस व्यवस्थाके अनुसार तो त्रिकाल-त्रिलोकवर्ती समस्त वस्तुओंके सद्भावको ग्रहण करलेनेपर, तथा अन्यत्र (क्षेत्रान्तरमें) और अन्यदा (कालान्तरमें) जाने हुए सर्वज्ञका स्मरण होने-पर और उससे भिन्न किसी देश और कालमें सर्वज्ञके दृष्टिगोचर न होनेपर सर्वज्ञकी नास्तिताका जो ज्ञान हो, उसे अभावप्रमाण मानना युक्त है, अन्यथा

१. घटव्यतिरिक्तं भूतलं गृहीत्वा। २. घटं स्मृत्वा। ३. बाह्येन्द्रियानपेक्षया। ४. भवदीयम्। ५. मतम्। ६. एवं सति। ७. क्षेत्रान्तरे। ८. कालान्तरे। ९. अन्यथाऽभावप्रमाणं भवितुं नार्हति केनचित्प्रकारेण। १०. किञ्चिज्ज्ञस्य। ११. असर्वज्ञ-

हि चेतोधर्मतयाऽतीन्द्रियम्, तदपि न [1]प्रकृतपुरुषविषयमिति कथमभावप्रमाण मुदय[2]मासादयेत्[3]; असर्वज्ञस्य तदुत्पाद-सामग्र्या[4] असम्भवात् । [5]सम्भवे वा तथा[6] ज्ञातुरेव सर्वज्ञत्वमिति । [7]अत्रा[8]धुना[9] तदभावसाधन[10]मित्यपि न युक्तम्; [11]सिद्धसाध्यतानुषङ्गात् । ततः सिद्धं [12]मुख्यमतीन्द्रियज्ञानमशेषतो विशदम् ।

सर्वज्ञज्ञानस्यातीन्द्रियत्वादशुच्यादिदर्शनं [13]तद्रसास्वादनदोषोऽपि परिहृत एव ।

नहीं । सो अर्वाग्दर्शी किसी भी छद्मस्थ, असर्वज्ञ पुरुषके न तो त्रिलोक और त्रिकालका ज्ञान हो सकता है और न सर्वज्ञ और उसके अतीन्द्रियज्ञानका ही परिज्ञान हो सकता है । क्योंकि सर्वज्ञता तो चैतन्यका धर्म होनेसे अतीन्द्रिय है, अतः वह किसी साधारण प्रकृत पुरुषके ज्ञानका विषय नहीं हो सकती । ऐसी अवस्थामें आपके अभावप्रमाणका उदय कैसे हो सकता है, क्योंकि असर्वज्ञ जनके अभावप्रमाणकी उत्पन्न करनेवाली सामग्रीका मिलना असम्भव है । और यदि असर्वज्ञके सर्वदेश और सर्वकालका ज्ञान मान कर सर्वज्ञके अभावकी प्रतिपादक सामग्रीका सद्भाव सम्भव माना जाय, तो इस प्रकार त्रिलोक और त्रिकालके ज्ञाता पुरुपके ही सर्वज्ञता सिद्ध हो जाती है । यदि कहा जाय कि आज इस देश और इस कालमें कोई सर्वज्ञ नहीं है, इस प्रकार हम वर्तमान देश-कालकी अपेक्षासे सर्वज्ञके अभावका साधन करते है, तो यह कहना भी युक्त नहीं है; क्योकि ऐसा माननेपर तो सिद्धसाध्यताका प्रसंग प्राप्त होता है; हम जैन लोग भी वर्तमानमें यहाँपर सर्वज्ञका अभाव मानते है । इस प्रकार अतीन्द्रिय और सम्पूर्णरूपसे विशद ज्ञान मुख्य प्रत्यक्ष है, यह सिद्ध हुआ ।

जो लोग सर्वज्ञके ज्ञानको लक्ष्य करके यह कहते है कि जब सर्वज्ञ संसारके समस्त पदार्थोंको देखता-जानता है, तो अशुचि और गन्दे पदार्थों को भी देखता-जानता होगा और फिर उसे उन अशुचि पदार्थोंके रसका

जनस्य तद्विषयं न किञ्चिदपि ज्ञानमुत्पद्यते । १. मध्यमः सज्जनोऽसर्वज्ञजनः । २. उत्पत्तिम् । ३. प्रापयेत् । ४. सर्वज्ञविषयाभावप्रमाणोत्पादकसामग्र्याः । ५. असर्वज्ञ-भावोत्पादकसामग्रीसम्भवे वा । ६. कालत्रयत्रिलोकज्ञानवज्ज्ञानसद्भावप्रकारेण, अन्यथान्यथा [illegible] सर्वज्ञस्यास्माकमपि ज्ञातुः । ७. अत्राधुना सर्वज्ञो नास्तीति कथनं तदपि न युक्तम् । ८. अस्मिन् क्षेत्रे । ९. अस्मिन् काले । १०. सर्वज्ञाभावसाधनम् । ११. [illegible] । १२. प्रत्यक्षम् । १३. [illegible] ।

[1]कथमतीन्द्रियज्ञानस्य वैशद्यमिति चेत्—यथा सत्यस्वप्नज्ञानस्य [2]भावनाज्ञानस्य चेति। दृश्यते हि भावनाबलादेतद्देश[3]वस्तुनोऽपि विशददर्शनमिति।

पिहिते कारागारे तमसि च सूचीमुखाग्रदुर्भेद्ये।
मयि च निमीलितनयने तथापि कान्ताननं व्यक्तम् ॥७॥

इति बहुलमुपलम्भात्[4]।

[5]ननु च नावरणविश्लेषादशेषज्ञत्वम्; अपि तु तनुकरणभुवनादिनिमित्तत्वेन। न चात्र तन्वादीनां बुद्धिमद्धेतुकत्वमसिद्धम्; अनुमानादेस्तस्य सुप्रसिद्धत्वात्। तथाहि—

आस्वाद भी प्राप्त होता होगा? सो ऐसा आक्षेप करनेवालोंको आचार्य उत्तर देते हैं, कि यतः सर्वज्ञका ज्ञान अतीन्द्रिय है, अतः अशुचि पदार्थोंके देखने और उनके रसका आस्वादन करनेरूप दोषका भी परिहार उक्त कथनसे हो जाता है। अशुचि पदार्थोंके रसास्वादन आदिका दोष तो इन्द्रियज्ञानके ही सम्भव है, अतीन्द्रियज्ञानके नहीं।

शङ्का—अतीन्द्रिय ज्ञानके विशदता कैसे सम्भव है?

समाधान—जैसे कि सत्य स्वप्न-ज्ञानके और भावना-ज्ञानके सम्भव है। भावनाके बलसे दूरदेशवर्ती भी वस्तुका विशद दर्शन पाया जाता है। जैसा कि कोई कारागार (जेलखाना) बद्ध कामी पुरुष कहता है—

कारागारका द्वार बन्द है, और अन्धकार इतना सघन है कि सूईके अग्रभाग (नोक) से भी नहीं भेदा जा सकता, मैंने अपने नेत्र बन्द कर रखे हैं, फिर भी मुझे अपनी प्यारी स्त्रीका मुख स्पष्ट दिखाई दे रहा है॥ ७॥

इस प्रकार इन्द्रिय और पदार्थका सम्बन्ध नहीं होनेपर भी परोक्ष-ज्ञानमें विशदता प्रायः देखनेमें आती है।

शङ्का—यहाँपर यौग कहते हैं कि उक्त प्रकारसे सर्वज्ञताकी तो सिद्धि हो जाती है, परन्तु आवरणोंके विश्लेषसे—पृथिक् होनेसे—सर्वज्ञता नहीं बनती, अपि तु तनु (शरीर) करण (इन्द्रिय) भुवन आदिके निमित्तसे सर्वज्ञता बनती है। और तनु-करण-भुवनादिका बुद्धिमान् पुरुषके निमित्तसे होना असिद्ध भी नहीं है, क्योंकि अनुमान आदि प्रमाणोंसे उसका होना सुप्रसिद्ध

१. इन्द्रियार्थयोः सम्बन्धाभावात्। २. मानसिकज्ञानस्य। ३. भावनाज्ञानाधि-करणपुरुषस्य भिन्नदेशवर्तिवस्तुनोऽपि। ४. इन्द्रियार्थयोः सम्बन्धाभावेऽपि विशदत्वो-पपत्तेः। ५. यौगः प्राह। प्रश्नावधारणाऽनुज्ञाऽनुनयाऽऽमन्त्रणे ननु। ननु च स्याद्वि-रोधोक्ताविन्यमरः।

विमत्यधिकरणभावापन्नं[1] उर्वीपर्वततरुतन्वादिकं बुद्धिमद्धेतुकम्, कार्यत्वादचेतनोपादानत्वात्सन्निवेश[2]विशिष्टत्वाद्वा वस्त्रादिवदिति ।

आगमोऽपि तदावेदकः[3] श्रूयते—

[4]विश्वतश्चक्षु[5]रुत विश्वतो[6]मुखो विश्वतो [7]बाहुरुत विश्वतः[8]पात् ।
[9]सम्बाहुभ्यां [10]धमति [11]सम्पतत्रैर्द्यावाभूमी जनयन् देव[12] एकः ॥८॥

है। वह इस प्रकार है—विवादापन्न उर्वी (पृथ्वी) पर्वत, तरु (वृक्ष) और तनु (शरीर) आदिक पदार्थ बुद्धिमद्धेतुक हैं; अर्थात् किसी बुद्धिमान् पुरुषके निमित्तसे बने हुए हैं, क्योंकि ये कार्य हैं और जो कार्य होता है, वह किसी न किसीके द्वारा किया ही जाता है, विना किये नहीं होता। दूसरे उर्वी, पर्वत आदिका उपादान कारण अचेतन है, अतः उन्हें किसी चेतन पुरुषसे अधिष्ठित होकर ही कार्यरूपमें परिणत होना चाहिए। तीसरे उर्वी-पर्वतादिकी सन्निवेश- (संस्थान-आकार-) गत विशिष्टता पाई जाती है, जो कि विना किसी बुद्धिमान् पुरुषके सम्भव नहीं है; वस्त्रादिके समान। जैसे नानाप्रकारके वस्त्रादिका निर्माण उनके बनानेवाले बुनकर (जुलाहा) आदिके विना सम्भव नहीं है, उसीप्रकार उर्वी, पर्वत, तनु, करण, भुवनादिका भी निर्माण विना किसी बुद्धिमान पुरुषके सम्भव नहीं है।

तथा आगम भी उस बुद्धिमान् पुरुषका प्रतिपादक सुना जाता है—

जो विश्वतश्चक्षु है, सर्व ओर नेत्रवाला है, अर्थात् विश्वदर्शी है, विश्वतो मुख है—सर्व ओर मुखवाला है अर्थात् जिसके वचन विश्वव्यापी हैं, विश्वतो बाहु है—सर्व ओर भुजाओंवाला है, अर्थात् जिसकी भुजाओंका व्यापार सर्वजगत् में है यानी जो सर्व जगत् का कर्त्ता है, विश्वतःपात् है—जिसके पाद (पैर) सभी ओर है अर्थात् जो विश्वमें व्याप्त है, पुण्य-पापरूप सम्बाहुओंसे सर्व प्राणियोंको संयुक्त करता है और जो परमाणुओंसे दिव् अर्थात् आकाश और भूमिको उत्पन्न करता हुआ वर्तमान है ऐसा एक देव अर्थात् ईश्वर है॥ ८॥

१. विविधा मतयो विमतयः, विमतीनामधिकरणं तत्र भावमापन्नं प्राप्तं विमत्यधिकरणभावापन्नम्, विवादापन्नमित्यर्थः । २. संस्थानं रचनाविशेषः ।

३. बुद्धिमत्प्रतिपादकः, कारक इत्यर्थः । ४. विश्वतश्चक्षुः प्रपञ्चे । ५. [illegible] विश्वदर्शीत्यर्थः । ६. [illegible] । ७. [illegible] । ८. [illegible] । ९. [illegible] । १०. [illegible] । ११. [illegible] । १२. ईश्वरः ।

तथा व्यासवचनञ्च—

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥६॥

न चाचेतनैरेव परमाण्वादिकारणैः पर्याप्तत्वाद् बुद्धिमतः कारणस्यानर्थक्यम्; अचेतनानां स्वयं कार्योत्पत्तौ व्यापारायोगात्तुर्यादिवत्[1] । न चैवं चेतनस्यापि चेतनान्तरपूर्वकत्वादनवस्था;[2] तस्य[3] सकलपुरुषज्येष्ठत्वान्निरति[4]शयत्वात्सर्वज्ञबीजस्य[5] क्लेशकर्मविपाकाशयैरपरामृष्टत्वादनादिभूतानश्वरज्ञानसम्भवाच्च ।

तथा व्यासके भी वचन उस ईश्वरके पोषक हैं—

यह अज्ञ प्राणी अपने सुख और दुःखमें अनीश है अर्थात् स्वयं स्वामी नहीं है । वह ईश्वरसे प्रेरित होकर कभी स्वर्गको जाता है और कभी श्वभ्र (नरक) को ॥ ९ ॥

यदि कहा जाय कि अचेतन ही परमाणु आदि कारण अपने-अपने कार्योंके उत्पन्न करनेमें समर्थ हैं, अतः किसी बुद्धिमान् कारणकी कल्पना करना अनर्थक है, सो यह कहना ठीक नहीं, क्योंकि अचेतन पदार्थोंका अपने कार्योंके उत्पन्न करनेमें स्वयं व्यापार सम्भव नहीं है; तुरी आदिके समान । जैसे वस्त्र बनानेके साधनभूत तुरी, वेम, शलाका और तन्तु (सूत) आदि अचेतन पदार्थ स्वयं ही वस्त्र नहीं बना सकते । किन्तु सचेतन कुविन्द (बुनकर-जुलाहा) से अधिष्ठित होकरके ही वस्त्र-निर्माणमें सहायक होते हैं। इसीप्रकार प्रकृतमें भी पार्थिव परमाणु आदिसे पृथ्वी आदि कार्य अपने आप नहीं उत्पन्न हो सकते; किन्तु सचेतन सर्वज्ञ ईश्वरसे अधिष्ठित होकरके ही वे अपने-अपने कार्योंको उत्पन्न करने में समर्थ होते हैं । यदि कहा जाय कि जिस प्रकार चेतन कुविन्द आदिको बाल्यकालमें वस्त्रादि बनानेका उपदेश अपने पिता या गुरुजनादिसे मिलता है, और उन्हें भी अपने अपने पूर्वजोंसे । इसी प्रकार पूर्व-पूर्ववर्त्ती चेतनान्तरसे अधिष्ठित कार्योंकी उत्पत्ति माननेपर अनवस्था दोष प्राप्त होगा, सो भी बात नहीं, क्योंकि वह जगत्का कारणभूत

---

१. यथा तुरीतन्तुवेमशलाकादीनामचेतनानां स्वयं कार्योत्पत्तौ व्यापारायोगाच्चेतनकुविन्दाधिष्ठितेनैव कार्यकर्तृत्वं तथा प्रकृतेऽपि । २. यथा चेतनस्य कुविन्दादेर्बाल्यकाले पितुरुपदेशमन्तरेणाकर्तृत्वाच्चेतनान्तरेण भाव्यम्, तथा चेतनान्तरेऽपरचेतनान्तरेण । एवं परापरचेतनप्रयुज्यकर्तृत्वादनवस्था । ३. ईश्वरस्य । ४. अतिशयातिक्रान्तत्वात् । अतिशयानां परमप्रकर्षता, तया निष्क्रान्तत्वात् । ५. सर्वज्ञ एव बीजं कारणं सर्वस्य मूलन्याद्बीजमिव बीजम्, तस्य जगत्कारणभूतस्येत्यर्थः ।

यदाह पतञ्जलिः[1]—

"क्लेश[2]कर्म[3]विपा[4]काशयै[5]रपरामृष्टः[6] पुरुषविशेष ईश्वरः। तत्र[7] निरतिशयं सर्वज्ञबीजम्। स [8]पूर्वेषामपि गुरुः, कालेनानविच्छेदादिति च।"

और सर्वज्ञताका वीज ईश्वर संसारके समस्त पुरुषोंसे ज्येष्ठ है, समर्थ है और अतिशयोंकी परम प्रकर्षता से निष्क्रान्त (रहित) है। तथा वह ईश्वर क्लेश, कर्म, विपाक और आशयसे अपरामृष्ट अर्थात् रहित है, और उसके अनादिभूत अविनश्वर ज्ञान पाया जाता है।

यही पतञ्जलिने भी कहा है—क्लेश, कर्म, विपाक और आशयसे रहित पुरुष-विशेष ईश्वर है, वह निरतिशय सर्वज्ञ-बीज है, हरि-हर हिरण्य-गर्भादि पूर्व पुरुषोंका भी गुरु है, और कालकी अपेक्षा उसका कभी विच्छेद नहीं होता अर्थात् वह अनादिनिधन है।

विशेषार्थ—क्लेश नाम अविद्या, अस्मिता, राग, द्वेष और अभिनिवेश-

---

१. पातञ्जलयोगसूत्रे। २. अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः। तत्र विपरीता ख्यातिरविद्या। अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। नित्यादिचतुष्टयेऽनित्यादिचतुष्टयबुद्धिः पापादौ पुण्यादिबुद्धिरपि विवक्षिता, तासामपि संसारहेतुत्वाविद्यात्वात्। अहो अहमस्मीत्यभिमानोऽस्मिता। दृग्दर्शनशक्त्योरेकात्मता अस्मिता। रागद्वेषौ सुखदुःखतत्साधनविषयौ प्रसिद्धौ। सुखानुशयी रागः। सुखतत्साधन-मात्रविषयकः क्लेशो रागः। दुःखानुशयी द्वेषः। आत्मेश्वरभङ्गभीतिरभिनिवेशः। स्वर-सवाही विदुषोऽपि तथारूढोऽभिनिवेशः। स्वस्य रसेन संस्कारेणैव वहतीति स्वरसवाही। अपिशब्दादविद्वानपि परिगृह्यते। रूढः प्रसिद्धः। तथा च यथाऽविदुषस्तथा विदुषोऽपि स्वरसवाहित्वहेतुना यज्जातीयो यत्क्लेशो भयाख्यः प्रसिद्धोऽस्ति, सोऽभिनिवेश इत्यर्थः। ३. कर्म धर्माधर्मौ, अश्वमेधब्रह्महत्यादिकं कर्म। ४. विपाकाः कर्मफलानि। जन्मायु-र्भोगाः। जात्यायुर्भोगा विपाकाः। तत्र जातिर्देवत्व-मनुष्यत्वादिः। प्राणाख्यस्य वायोः [illegible] आयुः। स्वसमवेतसुखदुःखसाक्षात्कारो भोगः। ५. आशयो [illegible]। संस्कारवासितचित्तपरिणाम आशयः। आनिष्पत्तेरात्मनि शेते इत्याशयो धर्माधर्म[illegible]। ६. एतैः कालत्रयेऽप्यपरामृष्टः सर्वथा सर्वदाऽसंस्पृष्ट इत्यर्थः। ७. सर्वज्ञानुमापकं [illegible] सातिशयत्वं तच्चेश्वरे निरतिशयं विश्रान्तमित्यर्थः। यथा च निरतिशयज्ञान ईश्वर इति लक्षणम्। तस्मिन् भगवति सर्वज्ञस्य यद्बीजं [illegible] सातिशयं बीजम्, निरतिशयं काष्ठां प्राप्तम्। ८. स एव ईश्वरः पूर्वेषां हिरण्य-गर्भादीनामपि [illegible] गुरुः। [illegible] भवति तथा च श्रुतिः—"[illegible]" इति।

ऐश्वर्यमप्रतिहतं सहजो[1] विरागस्तृप्तिर्निसर्गजनिता[2] वशितेन्द्रियेषु।
[3]आत्यन्तिकं सुखमनावरणा च शक्तिर्ज्ञानं च सर्वविषयं भगवंस्तवैव॥१०॥

इत्यवधूत[4]वचनाच्च।

न चात्र[5] कार्यत्व[6]मसिद्धम्, [7]सावयवत्वेन कार्यत्वसिद्धेः। नापि विरुद्धम्, विपक्षे[8]

का है। किसी पदार्थको विपरीत जानना अविद्या है। अर्थात् अनित्य, अशुचि और दुःखरूप वस्तुओंमें नित्य, शुचि और सुखकी कल्पना करनेको अविद्या कहते हैं। 'मैं भी कोई हूँ' इस प्रकारके अहङ्कारको अस्मिता कहते हैं। सुख और उसके कारणोंमें प्रीतिको राग कहते हैं। दुःख और उसके कारणोंमें अप्रीतिको द्वेष कहते हैं। आप्त और ईश्वरके भङ्गका भय और दुराग्रहका नाम अभिनिवेश है। इन सभीको क्लेश कहते हैं। कर्म नाम पुण्य-पापका है। यज्ञादि पुण्य कर्म हैं और ब्रह्महत्यादि पापकर्म हैं। कर्मके फलरूप जाति, आयु और भोगको विपाक कहते हैं। जाति नाम देवत्व, मनुष्यत्व आदिका है। नियत कालतक प्राणोंके साथ सम्बन्ध बने रहनेको आयु कहते हैं। सुख-दुःखके भोगनेका नाम भोग है। सांसारिक वासनासे वासित चित्तकी परिणतिको आशय कहते हैं। वह जगद्-व्यापी अनादि-निधन और सर्वका गुरु ईश्वर इन सबसे रहित है।

तथा संन्यासियोंके गुरु अवधूतके भी वचन उसके विषयमें इस प्रकार हैं—

"हे भगवन्! आपका ऐश्वर्य अप्रतिहत है, वैराग्य स्वाभाविक है, तृप्ति नैसर्गिक है, इन्द्रियोंमें वशिता है अर्थात् आप जितेन्द्रिय हैं, आपका सुख आत्यन्तिक अर्थात् चरम सीमाको प्राप्त है, शक्ति आवरण-रहित है और सर्व विषयोंको साक्षात् करनेवाला ज्ञान भी आपका ही है" ॥१०॥

इस प्रकार ईश्वर यतः सर्वसे ज्येष्ठ और अनादिनिधन है, अतः उसके द्वारा उर्वी-पर्वतादि कार्योंके किये जानेपर अनवस्था दोष नहीं प्राप्त होता है।

---

१. स्वाभाविकः। २. स्वाधीनता। ३. विनाशरहितम्। ४. संन्यासिना मतम्। ५. तन्वादौ। ६. क्षित्यादिकं समवाय्यसमवायनिमित्तकारणत्रयप्रभवं कार्यत्वाद्घटादिवत्। तत्र समवायिकारणं चतुर्विधाः परमाणवः, असमवायिकारणं परमाणुसंयोगः, निमित्तकारणमीश्वराकाशकालाः अनादिनिधनत्वादाद्यन्तरहितत्वादित्यनुमाने कार्यत्वमसिद्धं न भवति। ७. तथाहि—क्षित्यादिकं कार्यं सावयवत्वात्। यत्सावयवं तत्कार्यं यथा प्रासादादि। सावयवं चेदं तस्मात् कार्यं भवति। ८. अबुद्धिमद्धेतुके नित्ये परमाण्वादौ।

त्त्यभावात् । नाप्यनैकान्तिकम्; विपक्षे परमाण्वादावप्रवृत्तेः । प्रतिपक्षसिद्धिनिबन्धनस्य साधनान्तरस्याभावान्न प्रकरणसमम् । [1]अथ 'तन्वादिकं बुद्धिमद्धेतुकं न भवति, दृष्टकर्तृक-[2]प्रासादादिविलक्षणत्वादाकाशवत्' इत्यस्त्येव प्रतिपक्षसाधनमिति । नैतद्युक्तम्; हेतोरसिद्ध-त्वात्, [3]सन्निवेशविशिष्टत्वेन प्रासादादिसमानजातीयत्वेन तन्वादीनामुपलम्भात् । अथ

और, ईश्वरके सद्भावको सिद्ध करनेके लिए हमने जो कार्यत्व हेतु दिया है, वह असिद्ध भी नहीं है; क्योंकि सावयव होनेसे कार्यत्व हेतु सिद्ध है।

विशेषार्थ—यौग लोग पृथ्वी आदिक कार्योंको समवायिकारण, असमवायिकारण और निमित्तकारण इन तीन कारणोंसे उत्पन्न हुआ मानते हैं और उसे सिद्ध करनेके लिए उन्होंने कार्यत्व हेतु दिया है। उनमेसे वे पृथ्वी जलादि रूप चार प्रकारके परमाणुओंको कार्यका समवायिकारण कहते है, परमाणुओंका संयोग असमवायिकारण है और ईश्वर, आकाश, कालादि निमित्तकारण हैं, क्योंकि ये अनादिनिधन है। उक्त अनुमानमे प्रयुक्त कार्यत्व हेतु असिद्ध नहीं है, इस बातके सिद्ध करनेके लिए उन्होने सावयवत्व हेतुका प्रयोग किया है यथा—पृथ्वी आदिक कार्य है, क्योंकि वे अवयवसहित है। जो जो पदार्थ अवयव-सहित होते है, वे वे कार्य होते हैं। जैसे प्रासाद (भवन) आदि। पृथ्वी आदिक सावयव है अतः वे कार्य हैं। इस प्रकार वे पृथ्वी आदिके कार्यत्वकी सिद्धि सावयवत्व हेतुसे करते हैं। अतः कार्यत्व हेतु असिद्ध नहीं है।

और उनका कहना है कि हमारा यह कार्यत्व हेतु विरुद्ध भी नहीं है; क्योंकि साध्य जो बुद्धिमन्निमित्तकत्व, उसका विपक्ष अबुद्धिमन्निमित्तक नित्य परमाणु आदिक उनमें कार्यत्व हेतु नहीं रहता है। और इसी कारण अनैकान्तिक भी नहीं है; क्योंकि वह विपक्षभूत परमाणु आदिकमें नहीं रहता। प्रतिपक्षकी सिद्धि करनेवाले अन्य साधनका अभाव होनेसे प्रकरणसम भी नहीं है। यदि कहा जाय कि "तनु-करण-भुवनादिक बुद्धिमद्धेतुक नहीं हैं; क्योंकि जिन कार्योंके कर्ता दिखाई देते हैं, ऐसे प्रासाद आदिसे वे विलक्षण हैं, जैसे कि आकाश।" यह प्रतिपक्षका साधक अनुमान पाया जाता है, सो यह कहना ठीक नहीं है; क्योंकि इस अनुमानमें प्रयुक्त हेतु असिद्ध है—क्योंकि तनु-करण-भुवनादिकके सन्निवेश (रचना-आकार) विशि-

१. [illegible] । २. [illegible] । ३. रचनाविशेष ।

गादृशः प्रासादादौ सन्निवेशविशेषो दृष्टो न तादृशस्तन्वादाविति चेन्न[१]; सर्वात्मना[२] सदृशस्य[३] कस्यचिदप्यभावात्। सातिशयसन्निवेशो हि सातिशयं कर्त्तारं गमयति, प्रासादादिवत्। न च दृष्टकर्तृकत्वा[४]दृष्टकर्तृकत्वाभ्यां बुद्धिमन्निमित्तेतरत्व[५]सिद्धिः, [६]कृत्रिमैर्मणि[७]मुक्ताफलादिभिर्व्यभिचारात्। [८]एतेनाचेतनो[९]पादानत्वादिकमपि समर्थितमिति सूक्तं बुद्धिमद्धेतुकत्वम्, [१०]ततश्च सर्ववेदित्वमिति।

तदेतत्सर्वमनुमानमुद्रा[११]द्रविणदरिद्रवचनमेव, कार्यत्वादेरसम्यग्घेतुत्वेन तज्जनित[१२]

पत्यसे प्रासादादिके समानजातीयता पाई जाती है। यदि कहा जाय कि जैसा सन्निवेश-वैशिष्ट्य प्रासाद आदिमें देखा जाता है, वैसा तनु-करण-भुवनादिकमें नहीं पाया जाता, सो भी कहना ठीक नहीं है, क्योंकि सम्पूर्ण-रूपसे सदृशता तो किसी भी पदार्थमें नहीं पाई जाती है। यदि दृष्टान्तके सभी धर्म दार्ष्टान्तमें पाये जावें तो वह दृष्टान्त ही नहीं रहेगा, प्रत्युत दार्ष्टान्त हो जायगा। अतिशय-युक्त सन्निवेश तो सातिशय कर्ताका ज्ञान कराता है, जैसे सुन्दर कलापूर्ण प्रासाद सातिशय कलाकार (कारीगर) का ज्ञान कराता है। यदि कहा जाय कि जिनके कर्ता दिखाई देते है, वे कार्य बुद्धि-मान्के निमित्तसे बने है और जिनके कर्त्ता दिखाई नहीं देते है, वे कार्य अबुद्धिमान्के निमित्तसे बने हैं, सो ऐसा कहना भी ठीक नहीं; अन्यथा ... (नकली) मणि-मुक्ताफलादिसे व्यभिचार आता है; क्योंकि वे भी चतुर स्वर्णकार आदिके निमित्तसे बने हैं। इस प्रकार इस कार्यत्व हेतुके समर्थनसे अचेतनोपादानत्व और सन्निवेशविशिष्टत्व इन शेष दोनों हेतुओंका भी समर्थन किया हुआ जानना चाहिए। अतः यह बहुत सुन्दर कहा है कि उर्वी, पर्वत, तरु और तनु आदिक बुद्धिमद्धेतुक हैं और इसीसे सर्ववेदित्व (सर्वज्ञत्व) भी सिद्ध होजाता है।

समाधान—अब आचार्य ईश्वर-सिद्धिके पूर्व पक्षका निराकरण और स्वपक्षका स्थापन करते हुए कहते हैं कि आप लोगोंका यह सर्व कथन अनु-मान-मुद्रा (सिक्का) रूप धनसे रहित दरिद्र पुरुषके वचनके समान है; क्योंकि कार्यत्व आदिक असम्यक् हेतु हैं, अतः उनसे जनित ज्ञान भी मिथ्यारूप ही

---

१. यौगः। २. सर्वरूपेण। ३. सर्वो दृष्टान्तधर्मो दार्ष्टान्तिके प्रवर्तते चेद् दृष्टान्त एव न स्यात्। ४. यद्दृष्टकर्तृकं तद्बुद्धिमन्निमित्तं यददृष्टकर्तृकं तदबुद्धिमन्निमित्तम्। ५. अबुद्धिमन्निमित्तत्व-। ६. अन्यथा। ७. अत्रापि चतुरस्वर्णकारादयो निमित्तम्। ८. कार्यत्वहेतुसमर्थनपरेण न्यायेन। ९. परमाण्वादि। १०. सर्वतन्वादिकार्याणां बुद्धि-मद्धेतुकत्वतो निमित्तकारणत्वात्। ११. अनुमानमुद्रां कर्तुमशक्यः। १२. कार्यत्वाद-सद्धेतूत्पन्नज्ञानस्य।

ज्ञानस्य मिथ्यारूपत्वात्। तथाहि[1]—कार्यत्वं [2]स्वकारणसत्ता[3]समवायः[4] स्यात्, अभूत्वाभावित्वम्, अक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वम्, कारण[5]व्यापारानुविधायित्वं वा स्यात्, गत्यन्तराभावात्।

है। आगे उसीको स्पष्ट करते हैं—हम आपसे पूछते हैं कि कार्यत्व हेतुसे आपका क्या अभिप्राय है? स्वकारणसत्तासमवायको कार्यत्व कहते हैं, या अभूत्वाभावित्वको, या अक्रियादर्शीके कृतबुद्ध्युत्पादकत्वको अथवा कारणव्यापारानुविधायित्वको कार्यत्व कहते हैं? क्योंकि इनके अतिरिक्त अन्य गति (विकल्प)का अभाव है अर्थात् अन्यको कार्यत्व बतलाना आपके लिए सम्भव नहीं है।

विशेषार्थ—कार्यत्व क्या वस्तु है, इसके सम्बन्धमें आचार्यने जो चार विकल्प उठाये है उनका खुलासा अर्थ जाननेके लिए नैयायिक-वैशेषिक मतकी तत्त्वव्यवस्थाका कुछ मूलरूप जान लेना आवश्यक है। इनके मतमें द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय और अभाव ये सात पदार्थ माने हैं। इनमेंसे द्रव्यके नौ भेद हैं—पृथ्वी, जल, तेज, वायु, आकाश, दिशा, काल, आत्मा और मन। गुणपदार्थके चौबीस भेद हैं—रूप, रस, गन्ध, स्पर्श, संख्या, परिमाण, पृथक्त्व, संयोग, विभाग, परत्व, अपरत्व, गुरुत्व, द्रवत्व, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म और संस्कार। कर्मपदार्थके पाँच भेद है—उत्क्षेपण, अवक्षेपण, आकुञ्चन, प्रसारण और गमन। सत्तारूप सामान्य पदार्थ एक है उसके परसामान्य और अपरसामान्य ये दो भेद हैं। नित्य द्रव्योंमें रहनेवाले विशेष अनन्त हैं। समवायका कोई भेद नहीं, वह एक ही है। इन छह पदार्थोंको वे सत्रूप मानते हैं और अभावको असत् रूप। अभावके चार भेद माने हैं—प्रागभाव, प्रध्वंसाभाव, इतरेतराभाव (अन्योन्याभाव) और अत्यन्ताभाव। यहाँ यह ज्ञातव्य है कि इनके मतमें द्रव्यसे गुणनामका पदार्थ सर्वथा भिन्न है और समवायनामक पदार्थके सम्बन्धसे द्रव्यमें गुणोंका सम्बन्ध होता है। सामान्यनामक पदार्थ अपने पूर्ववर्ती द्रव्य, गुण और कर्म इन तीन पदार्थोंमें रहता है। समवाय पदार्थ अपने पूर्ववर्ती पाँचों

१. विकल्पचतुष्कं कृत्वा वदति। २. स्वस्य निष्पाद्यवस्तुनः कारणानि, तेषां सत्ता तया समवायो मिलनमिह मृत्तिकायां घट इति मृत्तिकासत्तया घटो व्याप्यत इत्यर्थः। ३. स्वकारणसमवायः सत्तासमवायो वा। ४. अयुतसिद्धानामाधार्याधारभूतानामिहेदं-प्रत्ययलिङ्गो यः सम्बन्धः स समवायः ५. कारणानि परमाण्वादीनि।

अथाद्यः [1]पक्षस्तदा योगिनामशेषकर्मक्षये[2] पक्षान्तःपातिनि[3] हेतोः कार्यत्व[4]लक्षणस्याप्रवृत्तेर्भागासिद्धत्वम्[5]। न च तत्र[6] सत्तासमवायः[7] स्वकारणसमवायो[8] वा

पदार्थोंमें पाया जाता है। सामान्यका ही दूसरा नाम सत्ता है। उसे वे लोग नित्य, एक और अनेक पदार्थोंमें रहनेवाला मानते हैं। आत्मा और ज्ञान जैसे अभिन्न पदार्थोंमें—जिनमें कि आधार-आधेयका सम्बन्ध पाया जाता है, 'इहेदं'—इसमें यह है, इस प्रकारकी प्रतीति ही जिसका लिङ्ग (चिह्न) है, ऐसे पदार्थको समवाय कहते हैं। इतनी व्यवस्था जान लेनेके बाद अब उन चारों विकल्पोंका अर्थ कहते हैं—पहला विकल्प है--स्वकारणसत्ता-समवाय। विवक्षित कार्यके उत्पन्न करनेवाले जो कारण हैं, उनकी सत्ताके साथ कार्यके समवायसम्बन्धको स्वकारणसत्तासमवाय कहते हैं। जैसे इस मिट्टीमें घट है, यहाँपर मिट्टीकी सत्ताके साथ घटका समवायसम्बन्ध है, वह स्वकारणसत्तासमवाय है। जो पदार्थ पहले नहीं था, उसके अब उत्पन्न होनेको अभूत्वाभावित्व कहते हैं। जिसने कार्यके उत्पन्न होनेकी क्रियाको नहीं देखा है, ऐसे पुरुषके भी 'यह किसीने किया है' ऐसी बुद्धिके उत्पन्न होनेको कृतबुद्ध्युत्पादकत्व कहते हैं। कारणके व्यापारके अनुसार कार्यके होनेको कारणव्यापारानुविधायित्व कहते हैं। आचार्य पूर्वपक्षवादीसे उक्त चार विकल्प उठाकर पूछते हैं कि इनमेंसे किस जातिका कार्यत्व आपको विवक्षित या अभीष्ट है, क्योंकि इनके अतिरिक्त कार्यका और कोई अर्थ सम्भव नहीं है।

अब आचार्य उन चारों विकल्पोंमेंसे प्रथम विकल्पका खण्डन करते हुए कहते हैं—यदि आपको आद्य पक्ष अभीष्ट है अर्थात् कार्यत्वका अर्थ स्वकारणसत्तासमवाय लेते हैं, तो योगियोंके समस्त कर्मोंका क्षय भी तनु-करण-भुवनादिके समान पक्षके अन्तर्गत है, परन्तु उसमें कार्यत्व लक्षणवाले हेतुकी अप्रवृत्ति है; अतः आपका हेतु भागासिद्ध हो जाता है। जो हेतु पक्षके एक भाग (देश)में रहे और एक भागमें न रहे, उसे भागासिद्ध कहते

१. चेत्। २. सर्वकर्मप्रक्षये। ३. तनुकरणभुवनादिपक्षे पतिते पक्षान्तर्वर्तिनि सति। ४. योगिनामशेषकर्मक्षयस्य प्रध्वंसाभावरूपत्वान्नहि तत्र स्वकारण-सत्तासमवाय-लक्षणस्य कार्यत्वस्य हेतोः प्रवृत्तिर्युज्यते। ५. पक्षान्तःपातिनि भूधरादौ स्वकारणसत्ता-समवायस्य प्रवृत्तेरशेषकर्मक्षये चाप्रवृत्तेः स्वकारणसत्तासमवायलक्षणस्य हेतोः पक्षैकदेशा-सिद्धत्वमिति। कर्मप्रक्षयस्याभावात्, क्षित्यादेर्वर्तमानस्य वर्तित्वात्तस्मादत्र न प्रवर्तते। ६. कर्मक्षये कार्ये। ७. सत्तायाः सम्बन्धः। ८. स्वस्य कार्यस्य कर्मक्षयलक्षणस्य कारणे

संमस्ति; तत्प्रक्षयस्य प्रध्वंसरूपत्वेन सत्तासमवाययोरभावात्[1], सत्ताया द्रव्य[2] गुण[3]-क्रिया[4]ऽऽधारत्वाभ्यनुज्ञानात्[5], समवायस्य च [6]परैर्द्रव्यादि[7]पञ्चपदार्थवृत्तित्वाभ्युपगमात्।

[8]अथाभावपरित्यागेन [9]भावस्यैव विवादाध्यासितस्य [10]पक्षीकरणान्नायं दोषः प्रवेशभागिति चेत्तर्हि[11] मुक्त्यर्थिनां तदर्थमीश्वराराधनमनर्थकमेव स्यात्; तत्र[12] तस्या[13]-किञ्चित्करत्वात्। सत्तासमवायस्य विचारमधिरोहतः शतधा विशीर्यमाणत्वात् स्वरूपा[14]-

---

हैं। प्रकृतमें स्वकारणसत्तासमवायरूप कार्यत्वहेतु उर्वी-पर्वतादिकमें तो पाया जाता है और योगियोंके अशेषकर्मक्षयरूप कार्यमें नहीं पाया जाता है अतः वह भागासिद्ध है। कर्मक्षयरूप कार्यमें न तो सत्तासमवाय है और न स्वकारणसमवाय है। सत्ताके साथ वस्तुकी एकतारूप सम्बन्ध होनेको सत्तासमवाय कहते हैं और वस्तुके कारणोंके साथ एकत्वरूप सम्बन्ध होनेको स्वकारण समवाय कहते हैं। योगियोंका कर्मक्षय प्रध्वंसाभावरूप है, अतः उसके साथ सत्ता और समवाय दोनोंके सम्बन्धका अभाव है। आप लोगोंने सत्ताको द्रव्य, गुण और क्रिया (कर्म) इन तीन पदार्थोंमें रहनेवाला स्वीकार किया है, तथा समवायको द्रव्य, गुण, कर्म, सामान्य और विशेष इन पांच पदार्थोंमें रहनेवाला माना है।

यदि कहा जाय कि हम लोग कर्मक्षयरूप अभावका परित्याग कर विवादापन्न तनु-करण-भुवनादिरूप भावपक्षको यहां अङ्गीकार करते हैं, अतः हमारे कार्यत्व हेतुको भागासिद्ध नामका यह दोष प्राप्त नहीं होगा। तब तो मोक्षार्थियोंका मुक्तिके लिए ईश्वरका आराधन करना निरर्थक ही होगा; क्योंकि आपके कथनानुसार मोक्षार्थीके कर्मक्षयमें वह ईश्वराराधन अकिञ्चित्कर ही है, कुछ भी लाभकारक नहीं है। दूसरी बात यह है कि सत्तासमवायरूप कार्यत्व हेतुको विचारश्रेणीपर चढ़ानेसे वह शतधा विशीर्ण (छिन्न-

---

यमनियमादिलक्षणे समवायसम्बन्धः। १. अनेन हेतुना सत्तासमवायपक्ष एव दूष्यते, न स्वकारणसत्तासमवायपक्षः। २. पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनासीति द्रव्याणि। ३. रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धि-सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः। ४. उत्क्षेपणावक्षेपणाकुञ्चन-प्रसारणगमनानि पञ्च कर्माणि। ५. अङ्गीकरणात्। ६. यौगैः (नैयायिकवैशेषिकैः)। ७. द्रव्यगुणकर्मसामान्यविशेषाः। ८. यौगः प्राह। ९. तन्वादिकस्याभावव्यतिरिक्त-भावस्यैव। १०. अशेषकर्मप्रक्षयस्य प्रध्वंसाभावस्य परित्यागे शेषं कार्यं बुद्धिमद्धेतुकमिति पक्षीकरणात्। ११. भावस्यैव पक्षीकरणाद् बुद्धिमद्धेतुकत्वसाध्ये। १२. मुक्त्यर्थिनि अशेषकर्मप्रक्षये। १३. ईश्वराराधनस्य। १४. महीभूधरादौ सत्तासमवायस्यासम्भवा-त्स्वरूपासिद्धं कार्यत्वमिति।

सिद्धं च कार्यत्वम्। स[1] हि समुत्पन्नानां भवेदुत्पद्यमानानां वा? यद्युत्पन्नानाम्; सतामसतां [वा]? न तावदसताम्[2]; खरविषाणादेरपि तत्प्रसङ्गात्। सतां[3] चेत् सत्तासमवायात स्वतो वा? [4]न तावत्सत्तासमवायात्; [5]अनवस्थाप्रसङ्गात्, प्रागुक्तविकल्पद्वयाऽनतिवृत्तेः। स्वतः[7] सतां तु सत्तासमवायानर्थक्यम्[8]।

अथोत्पद्यमानानां सत्तासम्बन्ध-निष्ठा[9]सम्बन्धयोरेककालत्वाभ्युपगमादिति मतम्[10],

भिन्न) हो जाता है अतः कार्यत्व हेतु स्वरूपासिद्ध है; क्योंकि पृथ्वी-पर्वतादिकमें सत्ताका समवाय असम्भव है। हम पूछते हैं कि वह सत्तासमवाय उत्पन्न हुए पदार्थोंके है अथवा उत्पद्यमान पदार्थोंके है? यदि उत्पन्न हुए पदार्थोंके मानते हैं, तो वे उत्पन्न हुए पदार्थ सत् हैं, अथवा असत्। उत्पन्न हुए असत् पदार्थोंके तो सत्ता समवाय माना नही जा सकता, अन्यथा खरविषाण आदिके भी सत्ता समवायका प्रसङ्ग आयगा। यदि सत् पदार्थोंके सत्ता समवाय कहेंगे तो वह सत्तासमवाय अन्य सत्तासमवायसे है, या स्वतः है? अन्य सत्तासमवायसे तो कह नहीं सकते, क्योंकि उसके माननेपर तो अनवस्था दोषका प्रसङ्ग आता है, क्योंकि पहले कहे गये दोनों विकल्प यहाँ भी उठेंगे। स्वतः सतोंके माननेपर सत्ता-समवायकी कल्पना निरर्थक हो जाती है।

यदि आपका ऐसा मत हो कि सत्ता-सम्बन्ध और पदार्थोंकी उत्पत्तिरूप निष्ठा-सम्बन्ध इन दोनोंका एक काल माननेसे उत्पद्यमान पदार्थोंके

१. सत्तासमवायः। २. यदि समुत्पन्नानामसतां सत्तासमवायस्तदा खरविषाणादीनामपि सः स्यादसत्त्वाविशेषात्। ३. सतां सत्तासमवायश्चेत्सत्तासमवायात्सता सत्तासमवायः, स्वतो वा सतां सत्तासमवायः। ४. सत्तासमवायात्सता सत्तासम्बन्धस्तर्हि सोऽन्यः सत्तासम्बन्धः सतामसता वा? असता चेत्खरविषाणादीनामपि तत्प्रसङ्गात् इत्यसत्, तस्य पूर्वमुत्पन्नस्य पश्चादसदिति वक्तुमशक्यत्वात्। न हि पूर्वमुत्पन्नाः पश्चादसन्तः खरविषाणादयः प्रतीयन्ते व्यतिरेके घटादिवत्। यद्युत्पन्नाना सतामसतां वेति स्ववचनविरोधात्। ततः प्रध्वस्तघटादेरपि तत्प्रसङ्गादिति साधीय इत्यभणुः वादिराजाः। ५. सतां चेत्सत्तासम्बन्धात्सतां स्वतो वा सताम्? सत्तासम्बन्धात्सतां चेत्तर्हि सोऽप्यपरः सत्तासम्बन्धः सतामसतां वेति विकल्पानामनवस्थानादनवस्था स्यात्। ६. सतामसतां वेति। ७. स्वरूपेण। ८. सत्तासमवायःसता पदार्थानां सत्त्वमस्तित्वं सत्तासमवायात्स्वस्माद्वेति विकल्पद्वयम्। सत्तासमवायात्तया पदार्थानां सत्त्वं तस्य सत्तासमवायस्य सतोऽसतो वा सत्त्वम्? असतः सत्त्वे गगनकुसुमस्य सम्बन्धः स्यात्। सतः सत्त्वे सत्तासमवायान्तरात् स्वतो वा? तस्य सतोऽसतो वा? न सतः सत्त्वेऽनवस्था। असतः सत्त्वे पूर्वपदार्थानां सत्त्वं स्वतो भवतु, सत्तासमवायस्यानर्थक्यमिति। ९. उत्पत्ति-सत्तासमवाययोः। १०. यौगस्य।

तदा[1] सत्तासम्बन्ध उत्पादाद्भिन्नः किं वाऽभिन्न इति ? यदि भिन्नस्तदोत्पत्तेरसत्त्वाविशेषा-दुत्पत्त्यभावयोः किंकृतो[2] भेदः ? अथोत्पत्तिसमाक्रान्तवस्तुसत्त्वेनोत्पत्तिरपि तथा[3] व्यप-दिश्यत इति मतम्, तदपि अतिजाड्यवल्गितमेव; उत्पत्तिसत्त्वप्रतिविवादे[4] वस्तुसत्त्व-स्यातिदुर्घटत्वात्, [5]इतरेतराश्रयदोषश्चेति उत्पत्तिसत्त्वे[6] वस्तुनि तदेककालीनसत्तासम्बन्धा-वगमः, तदवगमे[7] च [8]तत्रत्यसत्त्वेनोत्पत्तिसत्त्वनिश्चय इति। अथैतं[9]द्दोषपरिजिहीर्षया [10]तयोरैक्य[11]मभ्यनुज्ञायते, तर्हि तत्सम्बन्ध[12] एव कार्यत्वमिति। [13]ततो बुद्धिमद्धेतुकत्वे[14] [15]गगनादिभिरनेकान्तः।

सत्ता-सम्बन्ध है तो हम पूछते हैं कि सत्तासम्बन्ध उत्पादसे भिन्न है कि अभिन्न ? यदि भिन्न है, तब उत्पत्तिसे असत्त्वमें कोई विशेषता नहीं रही, अतः उत्पत्ति और अभाव इन दोनोंमें क्या भेद रहा ? यदि कहें कि उत्पत्तिसे समाक्रान्त अर्थात् युक्त वस्तुके सत्त्वसे उत्पत्तिको भी सत्रूप व्यवहार कर दिया जाता है, तब तो आपका यह कहना अति जड़ पुरुषके बकवादके तुल्य है; क्योंकि जब उत्पत्तिके सत्त्वमें ही विवाद है, तब वस्तुका सत्त्व मानना अत्यन्त दुर्घट है, अशक्य है। और वैसा माननेपर इतरेतराश्रय दोष भी आता है कि उत्पत्ति-सत्त्वके सिद्ध होनेपर वस्तु-सत्त्वसिद्ध हो। अर्थात् उत्पत्तिके समय वस्तुओंमें सत्ताके सम्बन्धका ज्ञान हो। और जब वस्तु-सत्त्वका ज्ञान हो जाय, तब वस्तु-सत्त्वके द्वारा उत्पत्तिसत्त्वका निश्चय हो। यदि उपर्युक्त दोषका परिहार करनेकी इच्छासे आप उत्पत्ति और सत्तासम्बन्ध इन दोनोंमें एकता मानते हों, तो उस सत्ताका सम्बन्ध ही कार्यत्व सिद्ध हुआ। तब उस सत्तासम्बन्धरूप कार्यत्वसे बुद्धिमद्धेतुकत्व साध्यमें आकाशादिके द्वारा अनैकान्तिकदोष प्राप्त होता है; क्योंकि आकाशादिमें सत्ता-सम्बन्ध

१. जैनाः पृच्छन्ति तदा वस्तूत्पत्तिकाले। २. उत्पत्तौ सत्तासमवायो नास्ति, अभावेऽपि नास्ति; तर्हि तयोः को भेदः ? ३. सत्त्वरूपेण। ४. उत्पत्तिश्च सत्त्वं चेति तयोर्विवादे। उत्पत्तौ सत्त्व नास्तीति विवादः। ५. यथाकथञ्चिद्भवतु, तथापीतरेतराश्रयदूषणमापतितमिति। ६. उत्पत्तौ सत्त्वमुत्पत्तिसत्त्वं तस्मिन् सति। उत्पत्तिसमये वस्तुनि सद्रूपे निश्चिते सतीत्यर्थः। ७. वस्त्वेककालीनसत्तासम्बन्धावगमे। ८. वस्तुस्थसत्तासमवायेन। ९. उक्तदोष-। १०. उत्पत्तिसत्तासम्बन्धयोः। ११. अभिन्न इति द्वितीयभेदमङ्गीकृत्य दूषयति। १२. सत्तासम्बन्ध एव। १३. सत्तासम्बन्धरूपात्कार्यत्वात्। १४. साध्ये सति। १५ गगनादौ सत्तासम्बन्ध-रूपसाधनत्वमस्ति, बुद्धिमद्धेतुकत्व नास्ति। यतो गगनादौ सत्तासम्बन्धो वर्तते, तथापि कार्यो न भवतिः गगनादीनां बुद्धिमद्धेतुकत्वाभावे सत्तासम्बन्धस्य विद्यमानत्वात्। न तु खरविषाणादीनां तद्विद्यमानत्वम्। ततः साध्याभावे हेतुसद्भावादनेकान्तः।

एतेन[1] स्वकारण[2]सम्बन्धोऽपि चिन्तितः[3]। अथोभयसम्बन्धः[4] कार्यत्वमिति मतिः, सापि न युक्ता; [5]तत्सम्बन्धस्यापि [6]कादाचित्कत्वे समवायस्यानित्यत्वप्रसङ्गात्[7] घटादिवत्। अकादाचित्कत्वे [8]सर्वदोपलम्भप्रसङ्गः। [9]अथ [10]वस्तूत्पादककारणाना सन्निधानाभावान्न सर्वदोपलम्भप्रसङ्गः। ननु[11] वस्तूत्पत्यर्थं कारणानां व्यापारः, उत्पादश्च [12]स्वकारणसत्तासमवाय[13]:; स च सर्वदाऽप्यस्ति, इति तदर्थं[14] कारणोपादानमनर्थकमेव स्यात्।

तो है परन्तु बुद्धिमद्धेतुकता नहीं है। कहनेका भाव यह कि आकाशादिमें सत्ताका सम्बन्ध होनेपर भी वे किसीके द्वारा बनाये हुए नहीं हैं।

इस उपर्युक्त सत्ता-समवायसम्बन्धके निराकरणसे स्वकारणसमवाय सम्बन्धका भी विचार किया गया समझना चाहिए। यदि उभयसम्बन्धको अर्थात् स्वकारणसमवाय और सत्तासमवाय इन दोनोंके सम्बन्धको कार्यत्व कहते हों, तो यह मानना भी युक्त नहीं है; क्योंकि तनु-करण-भुवनादिकके उभयसम्बन्धको यदि कदाचित्क (कभी किसी कालमें होनेवाला) मानेंगे, तो घटादिकके समान समवायके अनित्यताका प्रसङ्ग आता है। यदि अकादाचित्क कहेंगे; अर्थात् सदा होनेवाला मानेगे, तो तनु-करणादि कार्योंके भी सर्वदा पाये जानेका प्रसङ्ग आता है। यदि कहें कि वस्तुके उत्पादक कारणोंके सन्निधान (सामीप्य) के अभावसे कार्योंके सर्वदा होनेका प्रसङ्ग नहीं आयगा। तो आचार्य कहते हैं कि वस्तुकी उत्पत्तिके लिए कारणोंका व्यापार होता है और उत्पाद स्वकारणसत्तासमवायरूप है, सो वह सर्वदा है ही। अतएव वस्तुकी उत्पत्तिके लिए कारणोंका उपादान (ग्रहण) करना अनर्थक ही होगा।

---

१. सत्तासमवायसम्बन्धनिराकरणेन। २. यतोऽस्य बुद्धिमद्धेतुक नास्ति। ३. स्वकारणसम्बन्धः (सत्तासमवायः) उत्पन्नानां स्यादुत्पद्यमानाना वा? यद्युत्पन्नाना तर्हि सतामसतां वा? न तावदसता खरविषाणादीनामपि तत्प्रसङ्गादित्यादिना निरस्तः। ४. स्वकारणसमवायः सत्तासमवायश्चेत्युभयसम्बन्धः। ५. तनुकरणादीनामुभयसम्बन्धस्यापि। ६. तत्सम्बन्धः कादाचित्कोऽकादाचित्को वेति विकल्पद्वयं मनसि कृत्वा दूषयति। ७. कदाचित् कार्योत्पत्तिरस्ति, कदाचिन्नास्तीति समवायोऽनित्यो भवितुमर्हति; कादाचित्कत्वाद्धटवदिति समायाति। ८. तनुकरणादिकार्याणाम्। ९. नैयायिकः प्राह। १०. कार्योत्पादक-। ११. जैनाः प्राहुः। १२. वस्तूत्पत्तिरेवोत्पादः, स च स्वकारणसत्तासमवाय एव, स च नित्यस्तत्रापि कारणाना वैय्यर्थ्यम् 'सदकारणवन्नित्यम्' इति वचनात्। १३. ऐक्याङ्गीकरणात्। समवायो नित्य इति यौगमतम्। १४. वस्तूत्पत्त्यर्थम्।

[1]अभिव्यक्त्यर्थं [2]तदुपादानमित्यपि [3]वार्त्तम्; [4]वस्तूत्पादापेक्षया[5] [6]अभिव्यक्तेरघटनात्[7]। वस्त्वपेक्षयाऽभिव्यक्तौ [8]कारणसम्पातात्प्रागपि कार्यं वस्तुसद्भावप्रसङ्गात्। उत्पादस्याप्यभिव्यक्तिरसम्भाव्या; स्वकारणसत्तासम्बन्धलक्षणस्योत्पाद[10]स्यापि कारणव्यापारात्प्राक् सद्भावे [11]वस्तुसद्भावप्रसङ्गात्; तल्लक्षणत्वाद्वस्तुसत्त्वस्य[12]। प्राक् सत[13] एव हि केनचित् तिरोहितस्याभिव्यञ्जकेनाभिव्यक्तिः, तमस्तिरोहितस्य घटस्येव प्रदीपादिनेति। तन्नाभिव्यक्त्यर्थं कारणोपादानं युक्तम्। तन्न स्वकारणसत्तासम्बन्धः कार्यत्वम्।

[14]नाप्यभूत्वाभावित्वम्, तस्यापि विचारासहत्वात्। [15]अभूत्वाभावित्वं हि

यदि कहें कि वस्तुके कारणोंका ग्रहण उत्पत्तिके लिए नहीं, किन्तु कार्यकी अभिव्यक्तिके लिए आवश्यक है; सो यह भी कथनमात्र ही है अर्थात् असत्य या व्यर्थ है; क्योकि वस्तुके उत्पादकी अपेक्षासे अभिव्यक्तिका कथन घटित नहीं होता। यदि वस्तुकी अपेक्षासे अभिव्यक्ति मानी जाय, तो कारणोके समागमसे पहले भी कार्यरूप वस्तुके सद्भावका प्रसङ्ग आता है। तथा उत्पादकी अभिव्यक्ति भी असम्भाव्य है; क्योंकि स्वकारणसत्तासम्बन्धलक्षणरूप उत्पादके भी कारण-व्यापारसे पूर्व सद्भाव माननेपर वस्तुके सद्भावका प्रसङ्ग आता है; कारण कि वस्तुके सत्त्वका लक्षण ही स्वकारणसत्तासम्बन्धरूप है। जो वस्तु पहले सत् रूप हो, पीछे किसीसे तिरोहित (आच्छादित) हो जाय, तो उसकी अभिव्यञ्जक कारणोंसे अभिव्यक्ति होती है। जैसे अन्धकारसे तिरोहित घटकी प्रदीप आदिके प्रकाशसे अभिव्यक्ति होती है। अतः अभिव्यक्तिके लिए कारणोंका उपादान करना युक्त नहीं है इस प्रकार स्वकारणसत्तासम्बन्धरूप कार्यत्व हेतु सिद्ध नहीं होता, यह निश्चित हुआ।

अब आचार्य दूसरे विकल्पमें दोष दिखलाते हैं—अभूत्वाभावित्वको भी कार्यत्व नहीं कह सकते, क्योकि वह भी विचारकी तर्कणाको सहन नहीं करता। जो कार्य पहले न होकर आगामी कालमें हो, उसे अभूत्वाभावित्व

---

१. वस्तूत्पादापेक्षयाऽभिव्यक्तिः वस्त्वपेक्षया वेति विकल्पद्वयं मनसि कृत्वा दूषयति। २. कारण-। ३. असत्यम्। ४. उत्पादाभिव्यक्तेरघटनात्तस्यानित्यत्वात्। ५. उत्पादस्वकारणसमवाययोरैक्यानित्यत्वं निष्ठासम्बन्धयोरेककालीनत्वाभ्युपगमादिनिमित्तम्। ६. कार्यस्यापि। पूर्वभावित्वं कारणत्वमिति नष्टं भवति। ७. उभयसम्बन्धरूपस्य वस्तूत्पादस्य नित्यत्वान्न तदपेक्षयाऽभिव्यक्तिः सम्भवति। ८. अन्यथासिद्धनियतपूर्वभावि कारणमिति मतं नश्यति। ९. पश्चाद्भावित्वं कार्यत्वमिति नष्टम्। १० कार्यस्यापि। ११. वस्तुनः कारणव्यापारात्पूर्वम्। १२. स्वकारणसत्तासम्बन्धलक्षणोत्पादस्वरूपत्वात्। १३. वस्तुनः।
१४. द्वितीयविकल्पं दूषयति। १५. नैयायिका ह्यसत्कार्यवादिनस्तेषां मते

भिन्नकालक्रियाद्वयाधिकरणभूते कर्त्तरि सिद्धे सिद्धिमध्यास्ते[१]; क्त्वान्तपदविशेषितवाक्यार्थत्वात् भुक्त्वा[२] व्रजतीत्यादिवाक्यार्थवत्[३]। न चात्र भवना[४]भवनयोराधारभूतस्य कर्तुरनुभवोऽस्ति[५]; अभवनाधारस्याविद्यमानत्वेन भवनाधारस्य च विद्यमानतया भावाभावयो[६]काश्रयविरोधात्[७]। अविरोधे[८] च तयोः 'पर्यायमात्रेणैव भेदो न वास्तव[९]' इति।

अस्तु वा यथाकथञ्चिदभूत्वाभावित्वम्, तथापि तन्वादौ सर्वत्रानभ्युपगमाभागासिद्धम्[१०]। न हि मही-महीधराकूपारारामादयः प्रागभूत्वा भवन्तोऽभ्युपगम्यन्ते परैः[११]

कहते हैं। सो यह अभूत्वाभावित्व भिन्नकालवर्ती दो क्रियाओंके अधिकरणभू कर्त्ताके सिद्ध हो जानेपर ही सिद्धिको प्राप्त हो सकता है; क्योंकि व अतीत कालवाचक 'क्त्वा' प्रत्यय जिसके अन्तमें है, ऐसे पदसे विशेषित वाक्यके अर्थ रूप हैं। जैसे कि 'भुक्त्वा व्रजति' अर्थात् भोजन करके जाता है, इत्यादि वाक्यका अर्थ है। कोई पुरुष भोजन करके जाता है, यहांपर भुक्त्वा रूप अर्थ तो भूत-कालिक है और 'व्रजति' रूप अर्थ वर्तमान-कालिक है, अथवा भोजनकाल की अपेक्षा भविष्यत्कालिक है। सो यहां भूत और भावी इन दोनों ही क्रियाओंका आधार एक ही पुरुष है। परन्तु अभूत्वाभावित्वरूप कार्यमें भवन (होना) और अभवन (नहीं होना) इन दोनों क्रियाओंके आधारभूत एक कर्त्ताका अनुभव नहीं है, अर्थात् प्रतीतिमें नहीं आरहा है; क्योंकि अभवनका आधार अविद्यमान होनेसे और भवनका आधार विद्यमान होनेसे भाव (सद्भाव) और अभाव (असद्भाव) का एक आश्रय माननेमें विरोध आता है, कारण कि कार्य तो भावरूप ही है, अभावरूप नहीं। यदि इतनेपर भी भाव और अभावमें अविरोध माना जाय, तो उन दोनोंमें नाम-मात्रका ही भेद रहा, वास्तविक नहीं।

अथवा किसी प्रकारसे अभूत्वाभावित्व मान भी लिया जाय, तो भी तनु-करण-भुवनादिक सभी पदार्थोंमें नहीं माननेसे आपका कार्यत्व हेतु भागासिद्ध हो जायगा; क्योंकि हम जैन लोग मही, महीधर, (पर्वत) समुद्र और

परमाण्वादिषु कारणेषु सर्वथाऽसन्त्येव द्व्यणुकादीनि कार्याणि समुत्पद्यन्ते। १. अधिरोहति। २. अत्र भोजनक्रिया अतीतरूपाऽस्ति। ३. यथाऽत्र भिन्नकालाधिकरणभूते कर्तरि देवदत्ते सत्येव भुक्त्वा व्रजतीति युज्यते, न तथाऽभवन-भवनक्रियाद्वयाधिकरणभूतस्य कर्तुरनुभवोऽस्ति। ४. विद्यमानाविद्यमानयोः। ५. उपपत्तिर्नास्ति। ६. तद्भाववादिनामेवायं दोषः, न तु स्याद्वादिनाम्; तेषामभावानामपि भावान्तररूपत्वात्, वस्तुनो भावाभावात्मकत्वाभ्युपगमात्। ७. एकाश्रये तयोरविरोधश्चेत्। ८. नाममात्रेण। ९. पारमार्थिकः। १०. प्रतिवाद्यपेक्षया कार्यत्वम्। ११. अस्माभिर्जैनैः।

तेषां तैः सर्वदाऽवस्थानाभ्युपगमात्[1]। अथ सावयवत्वेन[2] तेषामपि[3] सादित्वं[4] प्रसाध्यते, तदप्यशिक्षित[5]लक्षितम् [6]अवयवेषु वृत्तेरव[7]यवैरारभ्यत्वेन च सावयवत्वानुपपत्तेः। [8]प्रथमपक्षे [9]सावयवसामान्येनानेकान्तात्[10]। द्वितीयपक्षे साध्याविशिष्टत्वात्[11]।

वन-खण्डादिको पहले नहीं होकर होते हुए नहीं मानते हैं; किन्तु इनका हम सर्वदा ही अवस्थान मानते है। यदि कहें कि 'मही-महीधरादिक अनित्य है, क्योंकि वे अवयव-सहित है' इस प्रकार सावयवत्व हेतुसे उन मही-महीधरादिकके सादिपना सिद्ध करते हैं, तो आपका यह कहना भी अशिक्षित पुरुषके कथनके समान प्रतीत होता है; क्योंकि यहांपर दो विकल्प उत्पन्न होते हैं—अवयवोंमें अवयवी रहता है, इसलिए वह सावयव है, अथवा अवयवोंसे वह आरम्भ किया जाता है, इसलिए उसे सावयव कहते हैं। सो दोनों ही प्रकारोंसे सावयवता सिद्ध नहीं होती है। इनमेंसे प्रथम पक्षकें माननेपर तो सावयव सामान्यसे अनेकान्तदोप आता है।

भावार्थ—यद्यपि यौगमतानुसार सामान्य निरवयव, अमूर्त और नित्य है, तथापि व्यक्तिरूप अवयवोंमें रहनेसे उसे यहाँ सावयव कहा गया है। यतः सामान्यके सावयव होते हुए भी उसे सादि नहीं माना गया है, अत अवयवोंमें रहनेसे सादित्वका कथन करना व्यभिचरित हो जाता है।

यदि द्वितीयपक्ष माना जाय कि अवयवी अवयवोंसे आरम्भ किया जाता है, तो सावयव हेतुके साध्यसे कोई विशेपता नहीं रहती है, अतः वह साध्यसम हो जाता है, क्योंकि कार्यत्व और अवयवोंसे आरभ्यत्व इन दोनोंका अर्थ समान ही है।

---

१. कालः सर्वज्ञनाथश्च जीवो लोकस्तथाऽऽगमः। अनादिनिधना ह्येते द्रव्यरूपेण संस्थिताः ॥१॥ २. मही-मीहधरादयोऽनित्याः सावयवत्वात्। ३. मही-महीधरादीनाम्। ४. ननु सर्वदाऽनवस्थानरूपतया सादित्वं न साध्यते, कादाचित्कत्वादपि न साध्यते; किन्तु सावयवत्वेन साध्यते। ५. न समीचीनमित्यर्थः। ६. अवयविनः। ७. अवयवेषु वृत्तित्वं सावयवत्वं तैरारभ्यत्वं वा। ८. स्पर्शवत्कार्यं सावयवमित्यभिधानात् सामान्यस्य निर्गुणत्व नित्यत्वाभ्यां कार्यरूपस्पर्शवत्कार्यत्वयोरभावात्सामान्यस्य न सावयवत्वम्, यदवयवर्वृत्ति तत्सादीति वक्तुमशक्यत्वात्। ९. अवयवसामान्यं अवयवेषु वर्तते, परं कार्यं न भवति; कार्यत्वेऽनित्यत्वप्रसङ्गात्। अथवा अवयवसामान्यं सर्वेषु अवयवेषु वर्तमानमपि न सावयवम्; किन्तु निरवयवमेव, ततोऽकार्यम्। येषामवयवेषु वृत्तिस्तेषां सादित्व मित्युच्यते। १०. महीमहीधरादयः सादयोऽवयवेषु वृत्तेरित्युच्यमाने सामान्येन व्यभिचारः स्यात्; सामान्यं ह्यवयवेषु वर्तते, परन्तु तत्र सादित्वं नास्ति। ११. अवयवैरारभ्यत्व-कार्यत्वयोः समानार्थत्वात्साध्यसमो हेतुः।

अथ सन्निवेश एव सावयवत्वम्, तच्च घटादिवत् पृथिव्यादावुपलभ्यत इत्यभूत्वाभावित्वमभिधीयते। तदप्यपेशलम्; सन्निवेशस्यापि विचारासहत्वात्। स हि अवयवसम्बन्धो[1] भवेद् रचनाविशेषो वा? यद्यवयवसम्बन्धस्तदा गगनादिनाऽनेकान्तः; सकलमूर्त्तिमद्[2] द्रव्यसंयोगनिबन्धनप्रदेशनानात्वस्य सद्भावात्। अथोपचरिता एव तत्र[3] प्रदेशा इति चेत्तर्हि सकलमूर्त्तिमद् द्रव्य[4]सम्बन्धस्याप्युपचरितत्वात् [5]सर्वगतत्वमप्युपचरितं स्यात्; श्रोत्रस्यार्थक्रियाकारित्वं[6] च न स्यादुपचरितप्रदेशरूपत्वात्। [7]धर्मादिना संस्कारात्ततः[8] सेत्युक्तम्। उपचरितस्यासद्रूपस्य [10]तेनोपकारायोगात्, खरविषाणस्येव। [11]ततो न

यदि कहें कि यह सन्निवेश अर्थात् आकाररूप जो रचना विशेष है, वही सावयवपना है, और वह घटादिके समान पृथ्वी आदिकमें भी पाया जाता है, इस प्रकारसे हम अभूत्वाभावित्वरूप कार्यत्वको कहते हैं, सो यह कथन भी सुन्दर नहीं है क्योंकि सन्निवेशके भी विचारका असहपना है अर्थात् विचार करनेपर वह कोई वस्तु नहीं ठहरता। हम पूछते हैं कि अवयवोंके साथ सम्बन्ध होनेका नाम सन्निवेश है, अथवा रचनाविशेषका नाम सन्निवेश है? यदि अवयव-सम्बन्धका नाम सन्निवेश है, तो आकाश आदिसे अनेकान्तदोष आता है; क्योंकि समस्त मूर्तिमान द्रव्योंके संयोगका कारण प्रदेशोंका नानात्व आकाशादिमें पाया जाता है। यदि कहें कि आकाशादिमें तो प्रदेश उपचरित हैं, वास्तविक नहीं; तब तो समस्त मूर्तिक द्रव्योंका सम्बन्ध भी उपचरित हो जानेसे आकाशके भी सर्वव्यापकता उपचरित हो जायगी; और तब श्रोत्रके अर्थक्रियाकारिता भी न रहेगी अर्थात् कानसे शब्द नहीं सुना जा सकेगा; क्योंकि आकाशके प्रदेश उपचरित हैं।

यदि कहा जाय कि धर्म आदिके संस्कार द्वारा श्रोत्रसे वह अर्थक्रिया बन जायगी, सो उपचरित तो असद्-रूप होता है, उसका धर्मादिकसे कुछ भी उपकार या संस्कार नहीं किया जा सकता। जैसे गर्दभके सींगका किसी भी पदार्थ से कुछ भी उपकार नहीं किया जा सकता है। इसलिए अवयवोंके

१. अवयवैः सह सम्बन्धो यः सोऽवयवसम्बन्धः। २. इयत्तावद्द्रव्यपरिणामयोगित्वं मूर्त्तिमत्त्वम्। सकलमूर्त्तिमद् द्रव्यसंयोग एव निबन्धनं कारणं येषां प्रदेशानां तेषां नानात्वं तस्य सद्भावात्। ३. आकाशादौ। ४. आकाशस्य मूर्त्तिमद् द्रव्येण सह संयोग, एकदेशेन सर्वात्मना वा। एकदेशेन चेत्सावयवत्वं सर्वात्मना चेदव्यापकत्वम्। ५. व्यापकत्वम्। ६. शब्दग्राहकत्वम्। ७. पुण्यौषधादिना। आदिशब्देन सुखदुःखानुभवप्रापक- धर्माधर्मविशिष्टस्यैव नभोदेशस्य श्रोत्रत्वाभ्युपगमात्, अदृष्टबलादर्थक्रियाकारित्वात्। ८. श्रोत्रात्। ९. अर्थक्रिया। १०. धर्मादिना। ११. अवयवसम्बन्धात्।

किञ्चिदेतत्[1]। अथ रचनाविशेषस्तदा[2] [3]परम्प्रति भागासिद्धत्वं [4]तदवस्थमेवेति नाभूत्वाभावित्वं विचारं सहते।

[5]नाप्यक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वम्; तद्धि [6]कृतसमयस्यादकृतसमयस्य वा भवेत्? कृतसमयस्य चेद् गगनादेरपि बुद्धिमद्धेतुकत्वं स्यात्; [7]तत्रापि [8]खननोत्सेचनात् कृतमिति गृहीतसङ्केतस्य [9]कृतबुद्धिसम्भवात्। सा[10] मिथ्येति चेद्भवदीयापि[11] किं न स्यात्;

सम्बन्धरूप यह सन्निवेश कुछ भी वस्तु नहीं सिद्ध होता है। यदि रचना विशेषरूप द्वितीय पक्ष अङ्गीकार करें, तो जैनोंके प्रति भागासिद्धता तदवस्थ ही रहती है; क्योंकि जैन लोग मही-महीधर-आदिकको रचना-विशेषसे विशिष्ट नहीं मानते है। इस प्रकार अभूत्वाभावित्वरूप कार्यत्व विचार करने पर ठहरता नहीं है।

यदि कार्यत्वका अर्थ तीसरे विकल्परूप अक्रियादर्शीके कृतबुद्ध्युत्पाद-कत्व लेते है, तो यह भी पृथ्वी आदिके बुद्धिमद्धेतुकता सिद्ध करनेके लिए समर्थ नहीं है, क्योंकि हम पूछते हैं कि यह कृत-बुद्धि जिस पुरुषने सङ्केत ग्रहण कर रखा है, उसके उत्पन्न होगी, अथवा जिसने सङ्केत नहीं ग्रहण किया है, उसके होगी? यदि सङ्केत ग्रहण करनेवालेके मानेंगे, तो आकाशादिके भी बुद्धिमान्-द्वारा किये जानेका प्रसङ्ग प्राप्त होगा; क्योंकि आकाशमें भी मिट्टीके खोदने और निकालनेसे 'यह हमने गड्ढा बनाया' इस प्रकारके सङ्केत-को ग्रहण करनेवालेके कृतबुद्धिका होना सम्भव है।

भावार्थ—किसी मनुष्यने किसी स्थानपर पृथ्वीको खोदकर और मिट्टी बाहिर निकाल कर एक बड़ा गड्ढा बनाकर कहा कि देखो मैंने यह कितना बड़ा गड्ढेरूप आकाशका निर्माण किया है, तो इस प्रकार आकाशमें भी कृत-बुद्धि हो जाती है। तब क्या आप आकाशको भी किसी ईश्वरादिकके द्वारा बनाया हुआ मानेंगे? अर्थात् नहीं मानेंगे। अतः प्रथम पक्ष ठीक नहीं है।

यदि कहें कि गगनादिमें कृतबुद्धिका उत्पन्न होना तो मिथ्या है, तो

---

१. अवयव-सम्बन्धलक्षणं सन्निवेशविशिष्टत्वम्। २. महीमहीधरादयः सादयः सावयवत्वाद् घटवदित्यत्र सुखादि रचनाविशेषो नास्ति, ततो भागासिद्धत्वमिति। ३. जैनम्प्रति। न हि महीमहीधराकूपारारामादयो रचनाविशेषविशिष्टाः अभ्युपगम्यन्ते परैः। ४. भागासिद्धत्वं पूर्ववत्तदवस्थमेव। ५. न क्रिया पश्यतीत्यक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वलक्षणं कार्यत्वमपि क्षित्यादीनां बुद्धिमद्धेतुकत्वं साध्यं साधयितुं नालमित्यर्थः। ६. गृहीतसङ्केतस्य, कारणमिदं कार्यमिदमिति गृहीतसङ्केतपुरुषस्य। ७. तत्कथमिति चेत्। ८. मृत्तिकादिनिष्कासनं खननम्। ९. गर्तोऽयमिति। १०. गगनादौ या कृतबुद्धिः। ११. तन्वादौ या कृतबुद्धिः सापि।

बाधासद्भावस्य[1] प्रतिप्रमाणविरोधस्य चान्यत्रापि[2] समानत्वात्[3], प्रत्यक्षेणोभयत्रापि कर्तुरग्रहणात्। क्षित्यादिकं बुद्धिमद्धेतुकं न भवति; अस्मदाद्यनव[4]ग्राह्यपरिमाणा[5]धारत्वाद् गगनादिवदिति प्रमाणस्य[6] साधारणत्वात्[7]। [8]तन्न कृतसमयस्य कृतबुद्ध्युत्पादकत्वम्। नाप्यकृतसमयस्य[9]; असिद्धत्वादवि[10]प्रतिपत्तिप्रसङ्गाच्च[11]।

हम कहते हैं कि आपके भी जो तनु-करण-भुवनादिकमें कृतबुद्धि उत्पन्न हो रही है, वह भी क्यों न मिथ्या मानी जाय? क्योंकि बाधाका सद्भाव और प्रति प्रमाणका विरोध तो तनु-करणादिकमें भी समान है।

भावार्थ—जगत् को ईश्वर-कर्तृक माननेवाले यदि कहें कि गगनादिमें जो कृतबुद्धि उत्पन्न होती है, वह मिथ्या है, क्योंकि वहाँ कृतबुद्धिके माननेमें बाधक प्रमाणका सद्भाव देखा जाता है। हमारे आगममें उसे समवायके समान सत्, अकारणवान् और नित्य माना है। तो आचार्य कहते हैं कि तनु-करण-भुवनादिकके बुद्धिसन्निमित्तक माननेमें भी अनुमान-प्रमाणसे बाधाका सद्भाव देखा जाता है। इस प्रकार दोनोंमें आक्षेप और समाधान समान हैं।

तथा प्रत्यक्षसे कर्त्ताका अग्रहण तो दोनोंमें ही समान है। जैसे प्रत्यक्षसे आकाशका कर्त्ता नहीं दिखाई देता, वैसे ही तनु-करण-भुवनादिका भी कर्त्ता नहीं दिखाई देता है। तथा पृथ्वी आदिक बुद्धिमद्धेतुक नहीं है; क्योंकि हमारे जैसे लोगोंके द्वारा उसका परिमाण और आधार अग्राह्य (अपरिच्छेद्य) है; जैसे कि आकाश आदिका। इस प्रकारका अनुमान प्रमाण आकाश और पृथ्वी आदिकमें साधारण अर्थात् समान बलवाला पाया जाता है। इसलिए जिसने सङ्केत ग्रहण किया है, ऐसे पुरुषके कृतबुद्धिका उत्पादकपना नहीं बनता है। तथा जिसने सङ्केत ग्रहण नहीं किया है, ऐसे भी पुरुषके

---

१. नित्यमाकाशं सदकारणत्वात्समवायवदिति। २. तन्वादौ। ३. त्वमेव कथयिष्यसि यद् गगनादौ कृतबुद्ध्युत्पादकत्वस्य प्रतिबाधकं प्रमाणमस्ति; तर्ह्यन्यत्र तन्वादावपि बाधकप्रमाणमस्त्येव। ४. अपरिच्छेद्य-। ५. परिमाणाधारत्वादित्युक्ते घटगतपरिमाणादौ व्यभिचारस्तस्मादस्मदाद्यनवग्राह्येतिपदोपादानं कृतम्। ६. भूम्याकाशयोः। ७. समबलत्वात्। ८. तत्तस्मात्। ९. अक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वादिति हेतोरसिद्धत्वादित्यर्थः। अग्नेरनुष्णत्वं यथा। १०. अयं घटो न पट इति विप्रतिपत्तिरस्ति, परन्त्वगृहीतसङ्केतस्य तथा नास्ति। ११. निःसन्देहप्रसङ्गात्। यदि कृतसङ्केतस्य कृतबुद्धिसम्भवस्तथाऽकृतसङ्केतस्यापि यदि कृतबुद्धिसम्भवश्चेत्तदा माऽस्तु विप्रतिपत्तिः। अस्ति च विप्रतिपत्तिः। ततोऽविप्रतिपत्तिप्रसङ्गो दूपगमिति भावः।

कारणव्यापारानुविधायित्वं च कारणमात्रापेक्षया[1] यदीष्यते तदा विरुद्धं[2] साधनम्। कारणविशेषापेक्षया चेदितरेतराश्रयत्वम्—सिद्धे हि कारणविशेषे बुद्धिमति तदपेक्षया[3] कारणव्यापारानुविधायित्वं कार्यत्वम्; [4]ततस्तद्विशेषसिद्धिरिति[5]।

[6]सन्निवेशविशिष्टत्वमचेतनोपादानत्वं[7] चोक्तदोषदुष्टत्वान्न पृथक् चिन्त्यते; स्वरूपभागासिद्धत्वादेस्तत्रापि सुलभत्वात्।

कृतबुद्ध्युत्पादकत्व नही बनता है; क्योंकि विना सङ्केत किये कृतबुद्धिका उत्पन्न होना असिद्ध है। यदि फिर भी कृतबुद्धि सम्भव मानी जाय, तो सभीके अविप्रतिपत्तिका प्रसङ्ग आता है अर्थात् फिर किसीको भी विवाद नहीं होना चाहिए।

यदि कार्यत्वका अर्थ चौथे विकल्परूप कारणव्यापारानुविधायित्व मानते है अर्थात् जैसा कारणका व्यापार होता है, तदनुसार ही कार्य होता है, यह कार्यत्वका अर्थ किया जाय, तो इसमें दो विकल्प उत्पन्न होते हैं—कारणव्यापारानुविधायित्वसे आपका अभिप्राय कारणमात्र-व्यापारानुविधायित्वसे है, अथवा कारणविशेष व्यापारानुविधायित्वसे है? यदि कारणमात्रकी अपेक्षा कहते है, तो कार्यत्व हेतु विरुद्ध है; क्योंकि वह विपक्षभूत अबुद्धिमन्निमित्तक कार्योंमें भी पाया जाता है और आप लोगोंने ईश्वर नामके कारण-विशेषको माना है उसकी कारणसामान्यके व्यापारका अनुसरण करनेवाले कार्यत्व हेतुसे सिद्धि नही होती। यदि कारणविशेषकी अपेक्षा व्यापारानुविधायित्व कहें, तो इतरेतराश्रय दोप आता है—जब बुद्धिमान् कारण-विशेष सिद्ध हो जाय, तव उसकी अपेक्षासे कारणव्यापारानुविधायित्वरूप कार्यत्व हेतु सिद्ध हो, और जब कारणव्यापारानुविधायित्व सिद्ध हो जाय, तव उसकी अपेक्षासे कारणविशेषबुद्धिमद्धेतुकत्वकी सिद्धि हो। इसलिए कारणव्यापारानुविधायित्वरूप कार्यत्व भी सिद्ध नहीं होता।

सन्निवेशविशिष्टत्व और अचेतनोपादानत्व ये दोनों हेतु भी उपर्युक्त

---

१. कारणमात्रव्यापारानुविधायित्वं कारणविशेषव्यापारानुविधायित्वं वा। २. विपक्षीभूतेऽबुद्धिमद्धेतुके वस्तुनि वर्तमानत्वात्। ईश्वराख्यकारणविशेषस्येष्टस्यासिद्धेर्विरुद्धत्वम्। ३. कारणविशेषापेक्षया। ४. कारणव्यापारानुविधायित्वतः। ५. कारणविशेषबुद्धिमद्धेतुकत्वसिद्धिः। ६. सुखादिना भागासिद्धत्वं यतः सुखादौ रचनाविशेषत्वं नास्ति, कार्यत्वमस्ति। ७. बुद्धिमद्धेतुकत्वमपि 'अङ्कुरादिकं सकर्तृकं, अचेतनोपादानत्वात्' इत्यत्र चेतनोपादाने ज्ञानकार्येऽप्रवर्तमानत्वादचेतनोपादानत्वस्य हेतोर्भागासिद्धत्वम्। सुखचिज्ज्ञानलक्षणे कार्ये सचेतनोपादानत्वाद् भागासिद्धत्वम्।

'विरुद्धाश्चामी' हेतवो दृष्टान्तानुग्रहेण[3] सशरीरासर्वज्ञपूर्वकत्वसाधनात्। 'न धूमा'-

दोषोंसे दुष्ट हैं अतः उनपर पृथक् विचार नहीं करते हैं; क्योंकि उनमें भी भागासिद्धत्व आदि दोष सुलभ हैं अर्थात् सरलतासे पाये जाते हैं।

विशेषार्थ—पृथ्वी, पर्वत, तरु, तनु आदिकको बुद्धिमन्निमित्तक सिद्ध करनेके लिए जो तीन हेतु दिये थे, उनमेंसे कार्यत्व हेतुका विस्तार-पूर्वक विचार कर आचार्यने उसे अपने साध्यकी सिद्धि करनेके लिए आयोग्य सिद्ध कर दिया और शेष दोनों हेतुओंपर पृथक् विचार न करके इतना मात्र कह दिया कि इनमें भी प्रायः वे ही दोष आते हैं, जो कि कार्यत्व हेतुके खण्डनमें दिये गये हैं, फिर भी उनमें भागासिद्धत्व का जो सङ्केत किया है उसका स्पष्टीकरण इस प्रकार है—यदि सन्निवेश (रचना-आकार आदि) की विशेषता देखी जानेसे पृथ्वी पर्वतादिके बुद्धिमद्धेतुकता मानी जाय, तो यह हेतु भागासिद्ध है; क्योंकि सुखादिक कार्य तो हैं; पर उनमें रचनाविशेष नहीं पाई जाती है। इसी प्रकार ज्ञान कार्य तो है, पर उसमें अचेतनोपादानता नहीं पाई जाती है, अतः वह भी भागासिद्ध है।

तथा ये कार्यत्व आदि तीनों हेतु विरुद्ध भी हैं, क्योंकि पूर्वमें दिये गये घटादि दृष्टान्तके बलसे आपने अशरीरी और सर्वज्ञ ऐसे ईश्वरको सिद्ध किया है; किन्तु दृष्टान्त जो घट उसका कर्त्ता कुम्भकार तो सशरीरी और असर्वज्ञ है, अतः घट दृष्टान्तकी सामर्थ्यसे सशरीर और असर्वज्ञके निमित्तसे साध्य

१. तन्वादिकं बुद्धिमद्धेतुकं कार्यत्वाद् घटवदित्यत्र यथा घटो बुद्धिमत्कुम्भकारेण कृतः सोऽपि सशरीरी, असर्वज्ञश्च। तथापि सर्वं कार्यं तन्नियतकारणम्। तथा दृष्टान्तसामर्थ्यात्तन्वादिकार्यमपि सशरीरासर्वज्ञबुद्धिमन्निमित्तं स्यादितीष्ट विरुद्धसाधनाद्विरुद्धसाधनमिति। तथा विद्युदादिना व्यभिचारः। २. कार्यत्वसन्निवेशविशिष्टत्वाचेतनोपादानत्वरूपास्त्रयो हेतवः। ३. दृष्टान्तबलादस्य सशरीरासर्वज्ञत्वं साधितं तर्ह्यनुमानं मास्तु। ४. दृष्टान्तसामर्थ्याद्यदीश्वरस्य सशरीरासर्वज्ञत्वं साध्यते तथा सति सर्वानुमानोच्छेदः स्यात्। तथा हि—साग्निरयं पर्वतो धूमवत्त्वान्महानसवदित्यत्रापि पर्वतादौ महानसपरिदृष्टस्यैव खादिर-पलाशाद्यग्नेः सिद्धेरिष्टविरुद्धसाधनाद्विरुद्धं साधनमिति नैयायिकशङ्का परिहरति। ५. अत्र नैयायिकेनाऽऽशङ्क्यते यद्भवतोक्तं तन्न युक्तम्; उत्कर्षसमजातिरूपासदुत्तरत्वात्। तथा हि—दृष्टान्तधर्मं साध्ये समासञ्जयतो मतोत्कर्षसमा जातिरिति। प्रकृतेऽप्येवं दृष्टान्तधर्मयोरसर्वज्ञसशरीरत्वयोः साध्यधर्मिणि बुद्धिमति समारोपणादुत्कर्षसमा जातिः स्यादेवेति शङ्कां परिहरति। अथवा कस्याप्यनिष्टधर्मस्य वादिसाधनशक्तितः दृष्टान्तात् पक्ष उत्कर्षः, तदुत्कर्षसम उच्यते। उत्कर्षसमा जातिरिति चेन्नायं दोष इति निरस्यति।

त्पावकानुमानेऽप्ययं[1] दोषः, तत्र[2] तार्ण-पार्णादिविशेषा[3]धाराग्निमात्रव्याप्तधूमस्य[4] दर्शनात्। नैवमत्र[5] सर्वज्ञास[6]र्वज्ञकर्तृविशेषाधिकरणतत्सामान्येन कार्यत्वस्य व्याप्तिः, सर्वज्ञस्य[7] [8]कर्तुरतोऽनुमानात्प्रागसिद्धत्वात्[9]।

की सिद्धि करनेपर हेतु विरुद्ध हेत्वाभास हो जाता है। यदि कहें कि यह दोष तो धूमसे अग्निके अनुमानमें भी आयगा, सो नहीं कह सकते, क्योंकि धूमसे पावकके अनुमानमें तार्ण (तृण-सम्बन्धी) पार्ण (पत्तोंसे उत्पन्न हुई) आदि विशेष आधारोंमें रहनेवाली अग्नि मात्रसे व्याप्त धूमका वहां भी दर्शन होता है। उस प्रकारसे यहां सर्वज्ञ और असर्वज्ञरूप जो कर्त्ताका विशेष उसका आधार जो कर्तृत्व सामान्य उसके साथ कार्यत्व हेतुकी व्याप्ति नहीं है। तथा कर्त्तारूप सर्वज्ञ इस अनुमानसे पहले असिद्ध है।

भावार्थ—ईश्वर को जगत्कर्ता और सर्वज्ञ सिद्ध करनेवाला अनुमान यह है-तनु-करण-भुवनादिक बुद्धिसन्निमित्तक है, क्योंकि ये कार्य है। किन्तु यह कार्यत्व हेतु अभी विवाद ग्रस्त ही है, अतः उससे सर्वज्ञकी सिद्धि नहीं होती, क्योंकि सर्वज्ञ और असर्वज्ञरूप जो कर्ताके विशेष है उनका आधार कर्तृत्व सामान्य है उसके साथ कार्यत्व हेतुकी व्याप्ति नहीं है। पर्वतादिकमें भले ही रसोईघरको अग्निसे भिन्न तृण और पर्णसे उत्पन्न अग्नि हो, पर अग्नि-

---

१. विरुद्धरूपो दोषः। २. धूमात्पावकानुमाने। महानसे सामान्येन धूमाग्निसम्बन्ध दृष्ट्वा पर्वतेऽपि सामान्याग्निमनुमिनोति, तथा सति मम दोषो न, तवैव। ३. महानसे धूमाग्नयोर्व्याप्तिं गृहीत्वा पर्वतेऽग्निमनुमिनोति, तदा न तत्र तार्णाद्यग्निसद्भावात्तत्रोत्पन्नधूमस्य वैयर्थ्यं स्यात्, महानसधूमनिदर्शनस्य सद्भावात्। ४. पर्वतोऽयमग्निमान्। ५. क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वादित्यनुमाने। ६. यथाऽस्माकं जैनानां धूमात्पावकानुमाने तार्णादीनां विशेषाग्नीनामग्निमात्राधारग्रहणमस्ति, न तथा तव मते सर्वज्ञासर्वज्ञयोर्विशेषभूतयोस्तदाधारभूतस्य सामान्यपुरुषस्य ग्रहणमस्ति येन कार्यत्वस्य व्याप्तिः स्यात्। यतस्तव मते सर्वज्ञ एव बुद्धिमान्, न तु सामान्यः पुरुषः। ७. अनादिसर्वज्ञः, तस्य साधकं कार्यत्वं तस्मात्सर्वज्ञस्य प्रागसिद्धिः धर्मिणि विप्रतिपत्तिर्नास्ति, धर्मे विप्रतिपत्तिः। ८. ईश्वरस्य धर्मिणोऽसिद्धत्वात्, धर्मी प्रसिद्ध इति सर्वमते। अत्र धर्मी अप्रसिद्धो जातः, तस्माद्धेतोरसिद्धत्वं बुद्धिमतो भावे बुद्धिमद्धेतुकं कार्यत्वं साधयति: अतोऽसिद्धत्वम्। ९. भवतां मते हि सर्वज्ञसाधकं तन्वादयो बुद्धिमन्निमित्तकाः कार्यत्वादिदमेवानुमानं तच्च साम्प्रतं विवादापन्नमेवातो न तेन सर्वज्ञसिद्धिरिति सर्वज्ञासर्वज्ञविशेषाधिकरणतत्सामान्येन न कार्यत्वस्य हेतोर्व्याप्तिरस्ति। वह्निमान् धूमादित्यत्र तु तार्ण-पार्णादिविशेषाधारवह्निसामान्येन धूमस्य व्याप्तिरस्त्येवेति नात्र दोषः।

[1]व्यभिचारिणश्चामी हेतवो बुद्धिमत्कारणमन्तरेणापि विद्युदादीनां प्रादुर्भावसम्भवात्। सुप्ताद्यवस्थायामबुद्धिपूर्वकस्यापि कार्यस्य[2] दर्शनात्।

तदवश्यं [3]तत्रापि भर्गाख्यं[4] कारणमित्यतिमुग्धविलसितम्; [5]तद्-व्यापारस्याप्यसम्भवादशरीरत्वात्। ज्ञानमात्रेण[6] कार्यकारित्वाघटनात्, इच्छा[7]-प्रयत्नयोः शरीराभावेऽसम्भवात्। तदसम्भवश्च [8]पुरातनैर्विस्तरेणाभिहित आप्तपरीक्षादौ; अतः पुनरत्र नोच्यते। यच्च महेश्वरस्य क्लेशादिभिरपरामृष्टत्वं निरतिशयत्वमैश्वर्याद्युपेतत्वं तत्सर्वमपि गगनाब्जसौरभव्यावर्णनमिव [9]निर्विषयत्वादुपेक्षा[10]मर्हति। ततो न महेश्वरस्याशेषज्ञत्वम्।

सामान्यके साथ धूमरूप जो कार्य है, उसकी तो व्याप्ति पाई जाती है, इसलिए उसमें कोई दोष नहीं आता।

तथा ये कार्यत्व आदि हेतु व्यभिचारी भी हैं; क्योंकि बुद्धिमान् पुरुषरूप कारणके विना भी विजली आदिकी उत्पत्ति देखी जाती है। तथा सुप्त और उन्मत्त आदि दशाओंमें भी अबुद्धि पूर्वक कार्य देखा जाता है।

यदि कहें कि यतः सुप्त और उन्मत्त आदि अवस्थाओंमें उस पुरुषकी बुद्धिके विना ही कार्य होते देखे जाते हैं, अतः उनका भर्ग अर्थात् सदाशिव नामक कोई अदृश्य कारण अवश्य ही मानना चाहिए, सो आपका यह कहना भी अतिमुग्ध जनके विलासके समान है; क्योंकि अशरीर होनेसे उस सदाशिवका व्यापार सुप्त आदि अवस्थाओंमें भी असम्भव है। और ज्ञानमात्रसे कार्य-कारित्व घटित नहीं होता। यदि कहें कि ईश्वरकी इच्छा और प्रयत्नसे कार्यकारीपना बन जायगा, सो शरीरके अभावमें इच्छा और प्रयत्नका होना असम्भव है। इस असम्भवताका निरूपण विद्यानन्दी आदि पुरातन आचार्योंने आप्तपरीक्षा आदि ग्रन्थोंमें विस्तारसे किया ही है, अतः यहांपर उसे पुनः नहीं कहते हैं।

और आपने विविध आगम-प्रमाणोंके द्वारा महेश्वरके क्लेश, कर्म आदिसे अपरामृष्टत्व, निरतिशयत्व और ऐश्वर्य आदिसे युक्तत्वका निरूपण किया है, सो वह सभी गगनारविन्दके सौरभ (सुगन्ध) के वर्णनके समान निर्विषय होनेसे उपेक्षा। (अनादरणीयता) के योग्य है। इस प्रकार यह सिद्ध हुआ कि महेश्वरके सर्वज्ञता नहीं है।

१. यथा घट-पटकर्तारौ कुलालकुविन्दौ, न तथा विद्युत्कर्ता कश्चिदस्त्यतो विद्युति बुद्धिमत्कर्तुरभावात्कार्यत्वसद्भावाद् व्यभिचारित्वम्। २. हस्तपादादिसञ्चालनस्य कार्यस्य। ३. विद्युदादिष्वपि, सुप्ताद्यवस्थायां समुत्पन्नकार्ये च। ४. सदाशिवसंज्ञकम्। ५. सदाशिव-। ६. ईश्वरस्य। ७. चिकीर्षाक्रिययोः। ८. विद्यानन्द्यादिभिः। ९. ईश्वराभावात्। १०. अनादरणीयताम्।

नापि ब्रह्मणः;[1] तस्यापि [2]सद्भावावेदकप्रमाणाभावात् । न तावत्प्रत्यक्षं तदावेदकम्[3] अविप्रतिपत्तिप्रसङ्गात्[4] । न चानुमानम्; अविनाभाविलिङ्गाभावात् । [5]ननु प्रत्यक्षं [6]तद्-ग्राहकमस्त्येव; अक्षिविस्फालनानन्तरं निर्विकल्पकस्य[7] [8]सन्मात्रविधि[9]-[10]विषयतयोत्पत्तेः । [11]सत्तायाश्च परमब्रह्मरूपत्वात् । तथा चोक्तम्—

अस्ति ह्यालोचनाज्ञानं[12] प्रथमं निर्विकल्पकम् ।
[13]बाल[14]मूकादिविज्ञानसदृशं शुद्ध[15]वस्तुजम्[16] ॥११॥

ब्रह्मके भी सर्वज्ञपना नहीं है, क्योंकि उस ब्रह्मके सद्भावको सिद्ध करनेवाले प्रमाणका अभाव है। प्रत्यक्षको तो ब्रह्मके सद्भावका साधक माना नहीं जा सकता; अन्यथा सभीको ब्रह्मका दर्शन होना चाहिए और फिर ब्रह्मके विषयमें किसीको कोई विप्रतिपत्ति (विवाद) नहीं रहना चाहिए। अनुमान भी ब्रह्मके सद्भावका साधक नहीं है; क्योकि ब्रह्मके साथ अविनाभाव रखनेवाले लिङ्ग (साधन) का अभाव है।

यहाँपर ब्रह्मवादी कहते हैं—प्रत्यक्ष प्रमाण तो उस ब्रह्मका ग्राहक है ही; क्योंकि ऑख खोलनेके अनन्तर ही सर्वविकल्पोंसे रहित सत्तामात्र स्वरूपवाले विधि (ब्रह्म) को विषय करनेसे प्रत्यक्षकी उत्पत्ति होती है। अर्थात् ऑख खोलते ही सभी वस्तुएँ सत् रूपसे प्रतिभासित होती हुई प्रत्यक्ष प्रमाणसे प्रतीतिमें आती है। और यह निर्विकल्परूप सत्ता ही परमब्रह्मका स्वरूप है। जैसा कि कहा है—

प्रथम ही जो सत् सामान्यके अवलोकनरूप आलोचनाज्ञान उत्पन्न होता है, वह निर्विकल्पक है, बालक और मूक (गूंगा) आदिके ज्ञान-सदृश है, तथा सन्मात्ररूप शुद्ध वस्तु-जनित है ॥११॥

भावार्थ—सर्व विकल्पोंसे रहित शुद्ध सत्तामात्र ही परमब्रह्मका स्वरूप है।

---

१. सर्वज्ञत्वम् । २. अस्तित्वसाधक- । ३. सर्वेषामपि ब्रह्मदर्शनं स्यात् । ४. यदि प्रत्यक्षं तदावेदकं तर्हि सर्वेषामविप्रतिपत्तिरस्तु; अस्ति च विप्रतिपत्तिः । ५. ब्रह्माद्वैतवादिनः प्राहुः । ६. ब्रह्म- । ७. विकल्पज्ञानशून्यस्य प्रत्यक्षस्य । ८. अस्तित्वं ब्रह्मणः किमित्युक्ते आह । ९. ब्रह्म- । १०. वस्तुः । ११. सा (या) सत्ता महानात्मा सामाहुस्त्वतलादयः । १२. प्रथमावलोकनं विशिष्टव्यवहारानङ्गभूतं ज्ञानमालोचनाज्ञानम् । दर्शन मित्यर्थः । १३. तदर्हज्जातः । १४. बधिरत्व-वाक्त्वविकलो मूक इति व्यपदिश्यते । १५. सन्मात्र- । १६. परमार्थभूतमीदृग्विधिजन्यं प्रत्यक्षम् ।

[1]न च विधिवत्[2] परस्परव्यावृत्तिरप्यध्यक्षतः[3] प्रतीयत इति द्वैतसिद्धिः, तस्य[4] निषेधाविषयत्वात्। तथा चोक्तम्—

आहुर्विधातृ[5] प्रत्यक्षं न निषेधृ[7] विपश्चितः[8]।
नैकत्वे[9] आगम[10]स्तेन[11] प्रत्यक्षेण[12] प्रबाध्यते ॥१२॥

अनुमानादपि तत्सद्भावो विभाव्यत एव। तथा हि[13]—ग्रामारामादयः पदार्थाः प्रतिभासान्त[14]ः प्रविष्टाः, प्रतिभासमानत्वात्। यत्प्रतिभासते तत्प्रतिभासान्तःप्रविष्टम्;

यदि कहा जाय कि जिस प्रकार विधि (सत्ता) प्रत्यक्षका विषय है, उसी प्रकार परस्पर व्यावृत्ति (निषेध) भी प्रत्यक्षसे प्रतीत होती है, अतः विधिनिषेधरूप द्वैतसिद्धि हो जायगी, सो ऐसा नहीं कह सकते। क्योंकि प्रत्यक्षका विषय निषेध करना नहीं है। जैसा कि कहा है—

"विद्वान् लोग प्रत्यक्षको विधायक (विधिका विषय करनेवाला) कहते हैं, निषेधक (प्रतिषेधको विषय करनेवाला) नहीं। इसलिए एकत्वके विषयमें (समर्थनमें) जो आगम है, वह प्रत्यक्षसे बाधित नहीं होता है" ॥१२॥

भावार्थ—ब्रह्मवादियोंके यहाँ अद्वैतरूप ब्रह्मका प्रतिपादक आगम यह है—यह सर्व प्रतिभासमान चराचर जगत् ब्रह्म ही है, यहाँ नानारूपमें कुछ भी वस्तु नहीं है। लोग उसकी पर्यायोंको ही देखते है, पर उसे कोई भी नहीं देख सकता। यह आगम प्रत्यक्षसे बाधित नहीं है, ऐसा उनका कहना है।

ब्रह्मवादी कहते हैं कि अनुमानसे भी उस ब्रह्मका सद्भाव जाना ही जाता है। वह अनुमान इस प्रकार है—ग्राम और आराम (उद्यान) आदि सभी दिखलाई देनेवाले पदार्थ प्रतिभास (परम ब्रह्म) के अन्तः प्रविष्ट हैं; क्योंकि वे प्रतिभास मान होते हैं। जो प्रतिभासित होता है, वह सर्व प्रतिभासके अन्तः प्रविष्ट है, जैसे कि प्रतिभासका स्वरूप। विवादापन्न ग्राम और

---

१. यथा विधिः प्रत्यक्षस्य विषयस्तथा व्यावृत्तिरपि विषय इति जैनशङ्का निराकरोति। २. सत्तावत्। ३. प्रत्यक्षस्य विषया व्यावृत्तिर्नेति भावः। ४. प्रत्यक्षस्य। ५. घटे पटो नास्तीति।

६. विधिविषयम्। ७. निषेधविषयं न। ८. अभेदे सति भेदप्रतिपक्षे। ९. एकत्वे सन्मात्रे योऽसावागमः 'सर्वं वै खल्विदं ब्रह्म' इत्याद्यागमस्य बाधकं प्रत्यक्षं नेति। १०. ब्रह्मज्ञानिनाम्। ११. कारणेन। १२. प्रत्यक्षं साधकं न बाधकं परस्परव्यावृत्तिविषयतया। १३. उक्तार्थमेव विवृणोति। १४. तमेवमनुभापन्ति सर्वं, तस्य भासा सर्वमिदं विभाति।

यथा प्रतिभासस्वरूपम्[1] । प्रतिभासन्ते च विवादापन्ना[2] इति[3] । तदागमानामपि[4] "पुरुष[5] एवेदं यद् भूतं यच्च भाव्यमिति" बहुलमुपलम्भात् ।

सर्वं वै[6] खल्विदं ब्रह्म नेह नानास्ति किञ्चन ।

[7]आरामं तस्य[8] पश्यन्ति न तं पश्यति कश्चन ॥१३॥ इति [9]श्रुतेश्च ।

ननु[10] परमब्रह्मण एव परमार्थसत्त्वे कथं घटादिभेदोऽवभासत इति न चोद्यम्; सर्वस्यापि तद्विवर्त[11]तयाऽवभासनात् । न चाशेषभेदस्य[12] तद्विवर्तत्व[13]मसिद्धम्; प्रमाणप्रसिद्धत्वात् । तथा हि—विवादाध्यासितं विश्वमेककारणपूर्वकम्; एकरूपान्वितत्वात्[14] ।

आराम आदिक प्रतिभासित होते है । इसलिए वे सर्व परम ब्रह्मके ही स्वरूप है । तथा परम ब्रह्मके प्रतिपादन करनेवाले अनेक आगम भी पाये जाते हैं । यथा—जो भूतकालमें हो चुका है, तथा भविष्यकालमें होगा और जो वर्तमानमें विद्यमान है वह सर्व परमब्रह्मस्वरूप एक पुरुष ही है, इत्यादि ।

तथा उस परमब्रह्मका समर्थन करनेवाली श्रुति भी पाई जाती है—

यह सभी दृश्यमान पदार्थ निश्चयसे परमब्रह्म ही है उसके अतिरिक्त इस जगत् में नानारूप कुछ भी वस्तु नहीं है । हम सभी लोग उस ब्रह्मकी आराम अर्थात्-पर्यायोंको देखते हैं, किन्तु उसे कोई नहीं देख सकता ॥१३॥

शङ्का—परमब्रह्मको ही वास्तविक सत्त्वरूपसे मान लेनेपर 'यह घट है, यह पट है' इत्यादि रूपसे जो भेद प्रतिभासित होता है, वह कैसे बनेगा ?

समाधान—ऐसी शङ्का नहीं करना चाहिए; क्योकि सभी घट-पटादि वस्तुएँ उस परमब्रह्मके विवर्त (पर्याय) रूपसे अवभासित होती है ।

भावार्थ—एक वस्तुके अवास्तविक अनेक आकारोके प्रतिभासको विवर्त कहते हैं । जैसे दर्पणमें प्रतिबिम्बित होनेवाले पदार्थोंके आकार वास्तविक

---

१. ब्रह्मस्वरूपम् । २. ग्रामारामादयः । ३. अद्वैतवादिनामनुमानानङ्गीकाराद्भट्टमताश्रयः । ४. तदावेदकश्रुतीनां ब्रह्मवाचकानाम् । ५. परमब्रह्मैव । ६. सर्वं ब्रह्मेति प्रतिपादनार्थं वै ग्रहणम् । ७. विवर्तम् । ८. ब्रह्मणः । ९. श्रवणात् ।

१०. जैनाः प्राहुः । जैनोद्भावितमुद्घाटितदूषणमनूद्य दूषयति ब्रह्माद्वैतवादी । ११. पूर्वाकारापरित्यागादुत्तरः प्रतिभाति चेत् । विवर्तः स परिज्ञेयो दर्पणे प्रतिबिम्बवत् ॥१॥ एकस्याताात्त्विकानेकप्रतिपत्तिर्विवर्तः । पूर्वरूपापरित्यागेनासत्यनानाकारप्रतिभासः, पूर्वावस्थाऽपरित्यागेनावस्थान्तरापत्तिर्वा विवर्तः । उपादानविषमसत्ताकत्वे सत्यन्यथाभावो वा । १२. नानात्वस्य । १३. अनिर्वाच्याऽविद्याद्वितयसचिवस्य प्रभवतो विवर्ता यस्यैते वियदनिलतेजोऽवनयः, यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नाम तद्रूपापरिमितसुखज्ञानममृतम् । १४. सत्स्वरूपानुवृत्तिरूपत्वात् ।

घट घटी शरावोदञ्चनादीनां मृद्रूपान्वितानां यथा मृदेककारणपूर्वकत्वम्। सद्रूपेणान्वितं च निखिलं वस्त्विति। तथाऽऽगमोऽप्यस्ति—

ऊर्णनाभ[1] इवांशूनां चन्द्रकान्त इवाम्भसाम्।
प्ररोहाणामिव प्लक्ष[2]: स[3] हेतुः सर्वजन्मिनाम्॥१४॥ इति

तदेतन्मदिरारसास्वादगद्गदोदितमिव मदनकोद्रवाद्युपयोगजनितव्यामोहमुग्धविलसितमिव निखिलमवभासते; विचारासहत्वात्। तथा हि—यत्प्रत्यक्षसत्ता[4]विषयत्वम-

---

नहीं है—छायामात्र हैं। इसी प्रकार घट-पटादि रूपसे जो कुछ भी भेद प्रतिभासित होता है, वह सब भी वास्तविक नहीं है।

यदि कहा जाय कि घट-पटादि-गत जितने भी भेद हैं, उन सबका परमब्रह्मकी पर्याय होना असिद्ध है, सो यह कहना भी ठीक नहीं है; क्योंकि उनके परमब्रह्मकी विवर्तता अनुमानादि प्रमाणोंसे प्रसिद्ध है। उनमेसे अनुमान प्रमाण इस प्रकार है—यह विवादापन्न विश्व एक कारण-पूर्वक है, क्योंकि एक सत्-रूपसे अन्वित (संयुक्त) है। जिस प्रकार घट, घटी, सराव (सिकोरा) उदञ्चन (ढक्कन) आदि मृत्तिकारूपसे अन्वित पदार्थोंके एक मृत्तिकारूप कारण-पूर्वकता देखी जाती है। सत्-रूपसे अन्वित ये समस्त स्तु‍ हैं।

तथा आगम भी परमब्रह्मका आवेदक पाया जाता है—

जैसे ऊर्णनाभ (मकड़ा) अपने मुखसे निकलनेवाले जालारूप तन्तुओंका एक मात्र कारण है, अथवा जैसे चन्द्रकान्तमणि जलका कारण है, अथवा जैसे प्लक्ष (वटवृक्ष) अपनेसे निकलनेवाले प्ररोहों (नीचेको लटकनेवाली जटाओं) का कारण है, उसी प्रकार वह परम ब्रह्म सर्व प्राणियोंका एक मात्र कारण है॥१४॥

इस प्रकार ब्रह्मवादियोंने अपने पूर्व पक्षका स्थापन किया।

अब आचार्य उसका प्रतिवाद करते हुए कहते है कि आप लोगोंका यह सर्व कथन मदिरा-रसके आस्वादन (पान) करनेसे निकलनेवाले गद्गद वचनों के समान हैं, अथवा मदन-कोद्रव (मतौनिया कोदों) आदिके खानेसे उत्पन्न व्यामोहसे मत्त हुए मुग्ध पुरुषके वचन-विलासके समान प्रतिभासित होता है, क्योंकि विचार करनेपर उक्त सर्व कथन तर्ककी कसौटीपर खरा नहीं उतरता। आगे उसे स्पष्ट करते है—आपने जो कहा कि परम ब्रह्म प्रत्यक्षका

---

१. कौलुकं वालता माकडी। २. न्यग्रोधो वटवृक्षः। ३. ब्रह्म। ४. सतो भावः सत्ता, इति वचनात्सतं विहाय सत्ता न वर्तते।

भिहितम्, तत्र[1] किं निर्विशेष[2]सत्ताविषयत्वं सविशेष[3]सत्तावबोधकत्वम् वा? न तावत् पौरस्त्य[4]: पक्षः; सत्तायाः सामान्यरूपत्वात्, विशेषनिरपेक्षतयाऽनवभासनात्, शाबलेयादि-विशेषानवभासने गोत्वानवभासनवत्। 'निर्विशेषं हि सामान्यं भवेच्छशविषाणवत्[5]' इत्यभिधानात्। [6]सामान्यरूपत्वं च [7]सत्तायाः सत्सदित्यन्वय[8]बुद्धिविषयत्वेन सुप्रसिद्धमेव। अथ [9]पाश्चात्यः पक्षः कक्षीक्रियते[10], तदा[11] न[12] परमपुरुषसिद्धि[13]:; परस्पर व्यावृत्ताकार[14]विशेषाणामध्यक्षतोऽ[15]वभासनात्। यदपि साधनमभ्यधायि प्रतिभाससमानत्वं तदपि न साधु; विचारासहत्वात्। तथाहि—प्रतिभाससमानत्वं स्वतः परतो वा? न ताव-[16]त्स्वतोऽसिद्धत्वात्[17]। परतश्चेद्विरुद्धम्[18]। परतः प्रतिभाससमानत्वं हि परं विना

विषय है, सो इसमे दो विकल्प उत्पन्न होते हैं—इससे आपको निर्विशेष सत्ताका विषयपना अभीष्ट है अथवा सविशेष सत्ताका अवबोधकपना अभीष्ट है? प्रथम पक्ष तो बनता नहीं है; क्योंकि सत्ताका सामान्य रूप होता है, वह विशेषकी निरपेक्षतासे प्रतिभासित नहीं हो सकती। जैसे कि शाबलेय (चितकबरी) धवली आदि विशेषताओंसे रहित गोत्व-सामान्यका प्रतिभास नहीं होता। विशेष-रहित सामान्य शश-विषाण (खरगोशके सींग) के समान है, ऐसा कहा गया है। सत् सत् इस प्रकारकी अन्वय-बुद्धिका विषय होनेसे सत्ताका सामान्य रूप सुप्रसिद्ध ही है।

यदि पाश्चात्य (द्वितीय) पक्ष अङ्गीकार करते हैं, तब परम पुरुष परम ब्रह्मकी सिद्धि नहीं हो सकती, क्योंकि परस्पर पृथक् पृथक् आकारवाले विशेषों का प्रत्यक्षसे प्रतिभास होता है। और अनुमानसे परम ब्रह्मकी सिद्धि करनेके लिए आपने जो प्रतिभाससमानत्व साधन (हेतु) कहा है, सो वह भी ठीक नहीं है; क्योंकि वह तर्कणारूप विचारको सहन नहीं करता है। आगे इसीको स्पष्ट करते हुए आचार्य उनसे पूछते है कि यह प्रतिभाससमानपना स्वतः है, अथवा परतः। स्वतः तो कह नहीं सकते; क्योंकि हेतु असिद्ध है। अर्थात्

१. तस्मिन् वाक्ये। २. सामान्यसत्ताविषयत्वम्। ३. विशेषसहितसत्ताया परिच्छेदकत्वम्। ४. प्रथमः। ५. नास्ति यथा। ६. सत्तायाः सामान्यरूपत्वासिद्धत्वमेव दोष इत्याशंक्य निराकुर्वन्नाह। ७. जैनैः सत्तायाः सामान्यमापादितं भवति, तदनूद्य दूषयति। ८. सति सद्भावोऽन्वयः। ९. सविशेषसत्तावबोधकत्वमिति द्वितीयः पक्षः। १०. अङ्गीक्रियते। ११. सामान्यं नित्यमेकमनेकमवाचि दृग्गोचरं नेति तन्मतम्। १२. परब्रह्मणः। १३. कुतः? द्वैतापत्तेः। १४. अयमस्मा-द्भिन्नः, अयं श्यामः शबलो श्वेतादिपरस्परभिन्नाकारघटपटादिपदार्थानाम्। १५. प्रत्यक्षतो विशेषस्यावभासनं भवति। १६. घटादीनां स्वतः प्रतिभाससमानत्वा-भावात्। १७. पदार्थाना स्वयमेव प्रतिभासत्वं नैवोपलभ्यते प्रकाशनादेरपि स्वतः प्रतिभासत्वं भवतु। परन्तु तथा नास्ति। तस्मादेवासिद्धत्वम्। १८. परस्य-

नोपपद्यते। 'प्रतिभासनमात्रमपि न सिद्धिमधिवसति; तस्य तद्विशेषानन्तरीयकत्वात्[२]। तद्विशेषाभ्युपगमे[३] च द्वैतप्रसक्तिः[४]।

किञ्च—धर्मि-हेतु-दृष्टान्ता अनुमानोपायभूताः प्रतिभासन्ते न वेति? प्रथमपक्षे प्रतिभासान्तःप्रविष्टाः[५] प्रतिभासबहिर्भूता वा? यद्याद्यः पक्षस्तदा साध्यान्तःपातित्वान्न[६] ततोऽनुमानम्। [७]तद्बहिर्भावे तैरेव[८] हेतोर्व्यभिचारः। [९]अप्रतिभासमानत्वेऽपि तद्[१०] व्यवस्थाभावात्ततो नानुमानमिति।

पदार्थोंका यदि स्वयमेव प्रतिभास होना सम्भव होता, तो आँख खोलनेपर प्रकाशके अभावमें भी पदार्थोंका स्वतः प्रतिभास होना चाहिए? परन्तु होता नहीं है। इसलिए आपका प्रतिभासमानत्व हेतु असिद्ध है। यदि प्रतिभासमानपना परतः मानते है, तो आपका हेतु विरुद्ध है; क्योंकि परतः प्रतिभासमानपना परके विना बन नही सकता है और परके सद्भाव माननेपर द्वैतकी सिद्धि होती है। तथा प्रतिभासमात्र भी सिद्धिको प्राप्त नहीं होता है, क्योंकि उसका उसके विशेषोंके साथ अविनाभावी सम्बन्ध पाया जाता है। और प्रतिभासमानके विशेषोंके स्वीकार करनेपर द्वैतवादका प्रसङ्ग प्राप्त होता है।

पुनश्च—हम आपसे पूछते है कि अनुमानके उपायभूत धर्मी (पक्ष) हेतु, दृष्टान्त प्रतिभासित होते है, अथवा नहीं? प्रतिभासित होते हैं, इस प्रथम पक्षके माननेपर पुनः दो विकल्प उत्पन्न होते हैं कि वे प्रतिभासित होनेवाले धर्मी, हेतु, दृष्टान्त प्रतिभासके अन्तः प्रविष्ट होकर प्रतिभासित होते है, अथवा प्रतिभाससे बहिर्भूत रहकर प्रतिभासित होते हैं? इनमेसे यदि आद्य पक्ष मानते हैं, तो उनके साध्यान्तर्गत हो जानेसे फिर उनके द्वारा अनुमान नहीं हो सकता। यदि दूसरापक्ष माना जाय कि वे धर्मी, हेतु, दृष्टान्त प्रतिभाससे बहिर्भूत होकर प्रतिभासित होते है, सो उन्हींके द्वारा प्रतिभासमानत्व हेतुके व्यभिचार आता है। यदि कहें कि अनुमानके उपायभूत वे धर्मी, हेतु, दृष्टान्त प्रतिभासित ही नहीं होते, यह दूसरा पक्ष हम मानते है; तो उन धर्मी आदिकी व्यवस्थाका ही अभाव हो जायगा। फिर उनके विना अनुमान कैसे किया जा सकेगा?

विरोधिद्वैतप्रसाधकत्वाद्विरुद्धमिति। १. ज्ञानसामान्यमपि। २. विशेषाविनाभावित्वात्। ३. प्रतिभासमानविशेषाभ्युपगमे। ४. द्वैतवादप्रसङ्गः।

५. प्रतिभासन्ते। ६. प्रतिभासान्तःप्रविष्टत्वाद्धेतोः सिद्धसाध्यता समागता। ७. द्वितीयपक्षे। ८. सह। ९. न प्रतिभासन्त इति द्वितीयः पक्षः। १०. तेषां धर्मादीनाम्।

[1]अथानाद्यविद्या[2]विजृम्भितत्वात्[3] [4]सर्वमेतदसम्बद्धमित्यनल्पतमोविलसितम्; अविद्यायामप्युक्तदोषानुषङ्गात्[5]। सकलविकल्पविक[6]लत्वात्तस्या[7] नैष[8] दोष इत्यप्यतिमुग्धभाषितम्; केनापि रूपेण तस्याः प्रतिभासाभावे [9]तत्स्वरूपानवधारणात्[10]। अपरमप्यत्र[11] विस्तरेण **देवागमालङ्कारे**[12] चिन्तितमिति नेह प्रतन्यते[13]।

यदि ब्रह्माद्वैतवादी यह कहें कि अनादिकालसे लगी हुई अविद्याके प्रसारसे यह सब धर्मी, हेतु आदिककी प्रतीति होती है, वह वास्तविक नहीं है असम्बद्ध है; सो उनका यह कहना भी महान् अज्ञानान्धकारके विलासके समान है; क्योंकि अविद्याके माननेपर भी उसमें पूर्वोक्त सभी दोषोंका प्रसङ्ग आता है।

भावार्थ—यह अविद्या प्रतिभासित होती है कि नहीं? प्रतिभासित होती है, तो वह विद्या ही हुई। और यदि उससे बहिर्भूत है, तो उसीके द्वारा हेतुमें व्यभिचार आता है और अविद्या तथा विद्या इन दो के सद्भावसे द्वैतवादकी आपत्ति आती है। यदि वह अविद्या प्रतिभासित नहीं होती है, तो यह अविद्या है, इस प्रकारकी व्यवस्था नहीं हो सकेगी। इस प्रकारसे वे सभी दोप प्राप्त होते है जो कि अनुमानको लक्ष्यमें रखकर प्रतिपादन किये गये हैं।

यदि कहा जाय कि वह अविद्या समस्त विकल्पोंसे रहित है, इसलिए ये उपर्युक्त कोई दोप नही प्राप्त होते हैं, तो यह कहना भी अतिमुग्धपुरुषके वचनके समान है; क्योंकि किसी भी रूपसे उस अविद्याका प्रतिभास न होनेपर उसके स्वरूपका ही निश्चय नही हो सकेगा। इस विषयका और भी विस्तारसे विवेचन देवागमस्तोत्रके अलङ्कारभूत जो अष्टसहस्री ग्रन्थ है, उसमें किया गया है, इसलिए उसका यहांपर विस्तार नहीं करते हैं।

---

१. ब्रह्माद्वैतवादी भाट्टः प्राह। २. अविद्या स्वाश्रयव्यामोहकरी। ३. विडम्भितत्वाद् व्याप्तत्वात्। ४. पूर्वोक्तं धर्मि-हेतु-दृष्टान्तादिकं सर्वम्। ५. अविद्या प्रतिभासते न वा? प्रतिभासते चेत् प्रतिभासान्तःप्रविष्टा तद्बहिर्भूता वा। प्रतिभासान्तःप्रविष्टा चेद् विद्यैव स्यात्। तद्बहिर्भूता चेत्तयैव हेतोर्व्यभिचारो द्वैतापत्तिश्च। न प्रतिभासते चेत्तदाऽविद्येति व्यवस्था न स्यात्। ६. रहितत्वात्। ७. अविद्यायाः। ८. उक्तलक्षणः। ९. अविद्या-। १०. असती अविद्या कथं विकल्पमुत्पादयति? यथा काचकामलादिदोषसद्भावे मिथ्याज्ञानसद्भावस्तदभावे च यदभावस्तथा विकल्पाभावेऽविद्यास्वरूपाभावः। ११. अविद्यमानप्रयोगे। १२. अष्टसहस्याम्। १३. न विस्तीर्यते।

यच्च परमब्रह्मविवर्तत्वमखिलभेदानामित्युक्तम्; तत्राप्येकरूपेणान्वितत्वं[1] हेतुरन्वेत्रन्वीय[2]मानद्वयाविनाभावित्वेन पुरुषाद्वैतं[3] प्रतिबध्नातीति स्वेष्टविघातकारित्वाद्विरुद्धः। 'अन्वितत्वमेकहेतुके'[4] 'घटादौ, अनेकहेतुके स्तम्भ-कुम्भाम्भोरुहादावप्युपलभ्यत इत्यनैकान्तिकश्च'[7]।

किमर्थं चेदं[8] 'कार्यमसौ[9] विदधाति? अन्येन प्रयुक्तत्वात्, कृपावशात्, क्रीडावशात्, स्वभावाद्वा? अन्येन[11] प्रयुक्तत्वे स्वातन्त्र्यहानिर्द्वैतप्रसङ्गश्च। कृपावशादिति

जो आपने प्रतिभास होनेवाले समस्त भेदरूप पदार्थोंको परमब्रह्मका विवर्त्त होना कहा है; सो वहाँपर भी 'एक रूपसे अन्वित होना' यह हेतु है अतः अन्वेता (अन्वय सम्बन्ध करनेवाला) पुरुष और अन्वीयमान (जिनका अन्वय किया जाय ऐसे) पदार्थ इन दोनोंका अविनाभावी सम्बन्ध होनेसे वह पुरुषाद्वैतका प्रतिषेध करता है, इस प्रकार आपका इष्ट जो अद्वैत ब्रह्म उसका विघातकारी होनेसे 'एक रूपसे अन्वितत्व' हेतु विरुद्ध हेत्वाभास हो जाता है, तथा यह अन्वितपना मिट्टीरूप एक हेतुसे निर्मित घट, घटी सराव, उदञ्चनादिकमें, तथा अनेक हेतुओंसे निर्मित स्तम्भ, कुम्भ और अम्भोरुह (कमल) आदिमें भी पाया जाता है, अतः वह अनैकान्तिक हेत्वाभास भी है।

पुनश्च—हम आपसे पूछते हैं कि वह सदाशिव या ब्रह्मा विश्वरूप इस जगत्के कार्यको किस लिए बनाता है? क्या किसी अन्य पुरुषके द्वारा प्रेरित होनेसे, अथवा दयाके वशसे, अथवा क्रीडा (कौतुक)के वशसे, अथवा स्वभावसे वह जगत्के कार्यों को करता है? यदि प्रथमपक्ष मानें कि अन्यसे प्रेरित होकर कार्य करता है, तब तो उसकी स्वतन्त्रताकी हानि प्रसक्त होती है और द्वैतका भी प्रसङ्ग आता है; क्योंकि एक प्रेरणा करनेवाला और दूसरा ब्रह्मा ये दो स्वयं ही आपने स्वीकार कर लिए। यदि दूसरा पक्ष मानें कि वह

१. अन्वेतृ सामान्यमन्वीयमानो विशेषः। विवादाध्यासितं विश्वमेककारण-पूर्वकमेकरूपेणान्वितत्वात्सत्सदिति। २. अन्वेता पुमान्, अन्वीयमानः पदार्थः तयोर्द्वयमिति द्वैतापत्तिः। अन्वेतृ मृदादि, अन्वीयमानं घटादि; व्याप्य व्यापकं वा ... साधनं विचार्यते। तत्रानुमानदूषण ३. प्रतिषेधयति। ४. एकरूपेणान्वितत्वादिति ... मनैकान्तिकत्वमापतति। तदेव स्पष्टयति। ५. मृदेककारणके। ६. घटघटीशरावो-दञ्चनादौ। ७. विपक्षेऽनेकहेतुके स्तम्भ-कुम्भादावपि 'एकरूपान्वितत्वात्' इति हेतोः प्रवृत्तेरनेकान्तः। सव्यभिचारोऽनैकान्तिकः, विपक्षेऽप्यविरुद्धवृत्तिरनैकान्तिक इति वचनात्। ८. विश्वरूपम्। ९. जगत्कार्यम्। १०. ब्रह्मा। ११. प्रथमपक्षे।

नोत्तरम्[1]; कृपायां दुःखिनामकरणप्रसङ्गात् परोपकारकरणनिष्ठत्वात्[2] तस्याः[3]। सृष्टेः प्रागनुकम्पाविषयप्राणिनामभावाच्च न सा[4] युज्यते[5]; कृपापरस्य प्रलयविधानायोगाच्च। [6]अदृष्टवशात्तद्विधाने[7] स्वातन्त्र्यहानिः; कृपापरस्य पीडाकारणादृष्टव्यपेक्षायोगाच्च।

क्रीडावशात्प्रवृत्तौ न प्रभुत्वम्; [8]क्रीडोपायव्यपेक्षणाद् बालकवत्। क्रीडोपायस्य[9] [10]तत्साध्यस्य च युगपदुत्पत्तिप्रसङ्गश्च। सति समर्थे [11]कारणे [12]कार्यस्यावश्यम्भावात्; अन्यथा[13] क्रमेणापि सा[14] ततो[15] न स्यात्[16]। अथ स्वभावादसौ[17] जगन्निर्मिनोति; यथाऽग्निर्दहति, वायुर्वातीति मतम्; तदपि बालभाषितमेव, [18]पूर्वोक्तदोषानिवृत्तेः[19]।

ब्रह्मा दयाके वशसे जगत् को बनाता है, तो यह कोई उत्तर नहीं है; क्योंकि दयाके रहते हुए उसके द्वारा दुःखी प्राणियोंका निर्माण नहीं होना चाहिए; कारण कि दया तो एकमात्र परोपकार करनेमें ही तत्पर रहती है। दूसरे, सृष्टिसे पूर्व अनुकम्पा (दया) के विषयभूत प्राणियोंका अभाव होनेसे वह सम्भव ही नहीं है। तीसरे कृपामें तत्पर ऐसे कृपालु पुरुषके द्वारा जगत् का प्रलय करना भी सम्भव नहीं है। यदि कहा जाय कि वह प्राणियोंके अदृष्ट (पाप) के वश जगत्का प्रलय करता है, अथवा उनके पाप-पुण्यके निमित्तसे सुखी-दुःखी प्राणियोंका निर्माण करता है, तब प्रथम तो उस ब्रह्माके स्वातन्त्र्यकी हानि होती है,। दूसरे, कृपामें तत्पर उस ब्रह्माके पर-पीड़ाके कारणभूत अदृष्टकी अपेक्षा भी नहीं बनती है।

यदि तीसरा पक्ष मानें कि क्रीड़ाके वशसे वह जगत्के निर्माणमें प्रवृत्त होता है, तब उसके प्रभुता नहीं रहती; प्रत्युत क्रीड़ाके उपायों की अपेक्षा रखनेसे वह बालकके समान सिद्ध होता है। तथा क्रीड़ाका उपाय जो जगद्विधान, और उसके द्वारा साध्य जो सुख इन दोनोंके एक साथ उत्पन्न होनेका प्रसङ्ग भी आता है; क्योंकि ब्रह्मरूप समर्थ कारणके रहते हुए कार्यका होना अवश्यम्भावी है। अन्यथा क्रमसे भी कार्यकी उत्पत्ति

---

१. इत्युत्तरं नास्ति। २. तत्परत्वात्। ३. कृपायाः। ४ अनुकम्पा। ५. न सम्भवतीत्यर्थः। ६. पापवशात्। ७. प्रलयविधाने। जगद्विधाने वा। ८. कन्दुकादेः। ९. जगतः। १०. क्रीडासाध्यसुखस्य। ११. ब्रह्मरूपे। १२. प्रदीपवत्। यथा प्रदीपः कज्जलमोचनं तैलशोषणं वर्त्तिदहनं प्रकाशनञ्च करोति। १३. समर्थकारणाभावे। १४. उत्पत्तिः। १५. ब्रह्मणः कारणात्। १६. यदि युगपदुत्पादनशक्तिर्यस्य नास्ति, तत्कारणं क्रमेणापि नोत्पादयति, शक्तौ सामर्थ्याभावात्। उत्पादयति चेत्तत्रैव शक्तिः समर्थकारणम्। १७. ब्रह्मा। १८. जगतो युगपदुत्पत्त्यादि-। १९. प्रतिभासान्तःप्रविष्टः प्रतिभासस्तेन वा ? तदा स्वस्माद्वोत्पत्तिर्नास्तीत्यादि।

यच्च परमब्रह्मविवर्तत्वमखिलभेदानामित्युक्तम्; तत्राप्येकरूपेणान्वितत्वं[1] हेतुरन्वेत्रन्वीय[2]मानद्वयाविनाभावित्वेन पुरुषाद्वैतं[3] प्रतिबध्नातीति स्वेष्टविघातकारित्वाद्विरुद्धः। [4]अन्वितत्वमेकहेतुके[5] [6]घटादौ, अनेकहेतुके स्तम्भ-कुम्भाम्भोरुहादावप्युपलभ्यत इत्यनैकान्तिकश्च[7]।

किमर्थं चेदं[8] [9]कार्यमसौ[10] विदधाति? अन्येन प्रयुक्तत्वात्, कृपावशात्, क्रीडावशात्, स्वभावाद्वा? अन्येन[11] प्रयुक्तत्वे स्वातन्त्र्यहानिर्द्वैतप्रसङ्गश्च। कृपावशादिति

जो आपने प्रतिभास होनेवाले समस्त भेदरूप पदार्थोंको परमब्रह्मका विवर्त्त होना कहा है; सो वहाँपर भी 'एक रूपसे अन्वित होना' यह हेतु है, अतः अन्वेता (अन्वय सम्बन्ध करनेवाला) पुरुष और अन्वीयमान (जिनका अन्वय किया जाय ऐसे) पदार्थ इन दोनोंका अविनाभावी सम्बन्ध होनेसे वह पुरुषाद्वैतका प्रतिषेध करता है, इस प्रकार आपका इष्ट जो अद्वैत ब्रह्म उसका विघातकारी होनेसे 'एक रूपसे अन्वितत्व' हेतु विरुद्ध हेत्वाभास हो जाता है, तथा यह अन्वितपना मिट्टीरूप एक हेतुसे निर्मित घट, घटी, सराव, उदञ्चनादिकमें, तथा अनेक हेतुओंसे निर्मित स्तम्भ, कुम्भ और अम्भोरुह (कमल) आदिमें भी पाया जाता है, अतः वह अनैकान्तिक हेत्वाभास भी है।

पुनश्च—हम आपसे पूछते हैं कि वह सदाशिव या ब्रह्मा विश्वरूप इस जगत्के कार्यको किस लिए बनाता है? क्या किसी अन्य पुरुषके द्वारा प्रेरित होनेसे, अथवा दयाके वशसे, अथवा क्रीडा (कौतुक)के वशसे, अथवा स्वभावसे वह जगत्के कार्यो को करता है? यदि प्रथमपक्ष माने कि अन्यसे प्रेरित होकर कार्य करता है, तब तो उसकी स्वतन्त्रताकी हानि प्रसक्त होती है, और द्वैतका भी प्रसङ्ग आता है; क्योंकि एक प्रेरणा करनेवाला और दूसरा ब्रह्मा ये दो स्वयं ही आपने स्वीकार कर लिए। यदि दूसरा पक्ष माने कि वह

१. अन्वेतृ सामान्यमन्वीयमानो विशेषः। विवादाध्यासितं विश्वमेककारण-
पूर्वकमेकरूपेणान्वितत्वात्सत्सदिति। २. अन्वेता पुमान्, अन्वीयमानः पदार्थः।
तयोर्द्वयमिति द्वैतापत्तिः। अन्वेतृ मृदादि, अन्वीयमानं घटादि; व्याप्य व्यापकं वा।
३. प्रतिषेधयति। ४. एकरूपेणान्वितत्वादिति साधनं विचार्यते। तत्रानुमानदूषण-
मनैकान्तिकत्वमापतति। तदेव स्पष्टयति। ५. मृदेककारणके। ६. घटघटीशरावो-
दञ्चनादौ। ७. विपक्षेऽनेकहेतुके स्तम्भ-कुम्भादावपि 'एकरूपान्वितत्वात्' इति हेतोः
प्रवृत्तेरनेकान्तः। सव्यभिचारोऽनैकान्तिकः, विपक्षेऽप्यविरुद्धवृत्तिरनैकान्तिक इति
वचनात्। ८. विश्वरूपम्। ९. जगत्कार्यम्। १०. ब्रह्मा। ११. प्रथमपक्षे।

नोत्तरम्[1]; कृपायां दुःखिनामकरणप्रसङ्गात् परोपकारकरणनिष्ठत्वात्[2] तस्या[3]। सृष्टेः प्रागनुकम्पाविषयप्राणिनामभावाच्च न सा[4] युज्यते[5]; कृपापरस्य प्रलयविधानायोगाच्च। [6]अदृष्टवशात्तद्विधाने[7] स्वातन्त्र्यहानिः; कृपापरस्य पीडाकारणादृष्टव्यपेक्षायोगाच्च।

क्रीडावशात्प्रवृत्तौ न प्रभुत्वम्; [8]क्रीडोपायव्यपेक्षणाद् बालकवत्। क्रीडोपायस्य[9] [10]तत्साध्यस्य च युगपदुत्पत्तिप्रसङ्गश्च। सति समर्थे [11]कारणे [12]कार्यस्यावश्यम्भावात्; अन्यथा[13] क्रमेणापि सा[14] ततो[15] न स्यात्[16]। अथ स्वभावादसौ[17] जगन्निर्मिनोति; यथाऽग्निर्दहति, वायुर्वातीति मतम्; तदपि बालभाषितमेव, [18]पूर्वोक्तदोषानिवृत्तेः[19]।

ब्रह्मा दयाके वशसे जगत् को बनाता है, तो यह कोई उत्तर नहीं है; क्योंकि दयाके रहते हुए उसके द्वारा दुःखी प्राणियोंका निर्माण नहीं होना चाहिए; कारण कि दया तो एकमात्र परोपकार करनेमें ही तत्पर रहती है। दूसरे, सृष्टिसे पूर्व अनुकम्पा (दया) के विषयभूत प्राणियोंका अभाव होनेसे वह सम्भव ही नहीं है। तीसरे कृपामें तत्पर ऐसे कृपालु पुरुषके द्वारा जगत् का प्रलय करना भी सम्भव नहीं है। यदि कहा जाय कि वह प्राणियोंके अदृष्ट (पाप) के वश जगत्का प्रलय करता है, अथवा उनके पाप-पुण्यके निमित्तसे सुखी-दुःखी प्राणियोंका निर्माण करता है, तब प्रथम तो उस ब्रह्माके स्वातन्त्र्यकी हानि होती है,। दूसरे, कृपामें तत्पर उस ब्रह्माके पर-पीड़ाके कारणभूत अदृष्टकी अपेक्षा भी नहीं बनती है।

यदि तीसरा पक्ष मानें कि क्रीड़ाके वशसे वह जगत्के निर्माणमें प्रवृत्त होता है, तब उसके प्रभुता नहीं रहती; प्रत्युत क्रीड़ाके उपायों की अपेक्षा रखनेसे वह बालकके समान सिद्ध होता है। तथा क्रीड़ाका उपाय जो जगद्विधान, और उसके द्वारा साध्य जो सुख इन दोनोंके एक साथ उत्पन्न होनेका प्रसङ्ग भी आता है; क्योंकि ब्रह्मरूप समर्थ कारणके रहते हुए कार्यका होना अवश्यम्भावी है। अन्यथा क्रमसे भी कार्यकी उत्पत्ति

---

१. इत्युत्तरं नास्ति। २. तत्परत्वात्। ३. कृपायाः। ४ अनुकम्पा। ५. न सम्भवतीत्यर्थः। ६. पापवशात्। ७. प्रलयविधाने। जगद्विधाने वा। ८. कन्दुकादेः। ९. जगतः। १०. क्रीडासाध्यसुखस्य। ११. ब्रह्मरूपे। १२. प्रदीपवत्। यथा प्रदीपः कज्जलमोचनं तैलशोषणं वर्त्तिदहनं प्रकाशनञ्च करोति। १३. समर्थकारणाभावे। १४. उत्पत्तिः। १५. ब्रह्मणः कारणात्। १६. यदि युगपदुत्पादनशक्तिर्यस्य नास्ति, तत्कारणं क्रमेणापि नोत्पादयति, शक्तौ सामर्थ्याभावात्। उत्पादयति चेत्तत्रैव शक्तिः समर्थकारणम्। १७. ब्रह्मा। १८. जगतो युगपदुत्पत्त्यादि-। १९. प्रतिभासान्तःप्रविष्टः प्रतिभासस्तेन वा ? तदा स्वस्माद्वोत्पत्तिर्नास्तीत्यादि।

तथाहि[1]—क्रमवर्तिविवर्तजात[2]मखिलमपि युगपदुत्पद्येत[3]; अपेक्षणीयस्य[4] सहकारिणोऽपि तत्साध्यत्वेन[5] यौगपद्यसम्भवात्। 'उदाहरणवैषम्यं च; वन्ह्यादेः[6] कादाचित्कस्व[7]-हेतुजनितस्य 'नियतशक्त्यात्मकत्वोपपत्तेरन्यत्र[8] नित्य-व्यापि-समर्थैकस्वभावकारणजन्यत्वेन देशकालप्रतिनियमस्य [10]कार्ये दुरुपपादात्[11]।

उस ब्रह्मरूप कारणसे नहीं होना चाहिए। यदि चौथा पक्ष अङ्गीकार करते हैं कि स्वभावसे वह ब्रह्मा जगत्का निर्माण करता है, जैसे कि अग्नि स्वभावसे जलती है और वायु स्वभावसे बहता है। ऐसा मत आपका हो, तो यह कहना भी बाल-भाषितके समान है, क्योंकि पूर्वमें कहे हुए किसी भी दोष की निवृत्ति नहीं होती है। आगे आचार्य इसे ही स्पष्ट करते हैं—समस्त ही कर्मवर्ती विवर्तोका समूह युगपत् ही उत्पन्न होना चाहिए; क्योंकि अपेक्षणीय सहकारी कारण भी तत्साध्य है, अर्थात् ब्रह्माके द्वारा ही करने योग्य है; अतः सर्व विवर्तोका युगपत् होना सम्भव है।

भावार्थ—जब सर्व कार्योंका मुख्य कारण परमब्रह्म विद्यमान है, तब उनकी एक साथ उत्पत्ति भी हो जाना चाहिए। यदि कहा जाय कि प्रत्येक कार्यका प्रतिनियत सहकारी कारण भिन्न-भिन्न होता है, अतः जब तक उसका संयोग नहीं होगा, तब तक उस-उस कार्यकी उत्पत्ति नहीं हो सकती है। सो यह कहना भी ठीक नहीं है; क्योंकि उन-उन प्रतिनियत सहकारी कारणों का निर्माण भी तो उस परमब्रह्मके ही अधीन है, अतः उनको भी एक साथ ही उत्पन्न कर लेना चाहिए।

और जो आपने 'अग्नि स्वभावसे जलती है' इत्यादि उदाहरण दिये हैं वे भी विषम है; क्योंकि अग्नि आदिक कादाचित्क स्वहेतु जनित हैं—जब काष्ठ आदिका संयोग मिल जाय तब अग्नि जलने लगे, जब न मिले तो न जले। तथा उनकी दहनादिकी शक्ति प्रतिनियत है जिस देश और कालमें हों, वहीं तक अपने कार्यको करती है अतः मर्यादित शक्तिवाली हैं। किन्तु अन्यत्र अर्थात् परमब्रह्ममें नित्यपना, सर्वव्यापकपना और सर्व कार्यों के करनेमें समर्थ एक स्वभावरूप कारणसे उत्पन्न करनेकी योग्यता सर्वत्र

१. पूर्वोक्तदोषं समुद्भावयति। २. समूहम्। ३. उत्पन्नं भूयात्। ४. परब्रह्मणि मुख्यकारणे सति किमर्थं कार्याणां युगपदुत्पत्तिर्नास्ति? यदि तत्र तन्नियतकारणस्य संयोगाभावान्नोत्पद्यते तर्हि तन्नियतकारणस्य संयोगस्य सहकारिकारणस्यापि ब्रह्मकरणीयत्वेन यौगपद्यसम्भवोऽस्तु। ५. ब्रह्मकरणीयत्वेन। ६. अग्निर्दहतीत्यादि। ७. काष्ठादि। ८. मर्यादीभूतदहनशक्तिस्वरूपोपपत्तेः। ९. ब्रह्मणि। १०. सृष्टौ। ११. अघटनात्।

तदेवं ब्रह्मणोऽसिद्धौ वेदानां 'तत्सुप्त-प्रबुद्धावस्थात्वप्रतिपादनं'[2] परमपुरुषाख्यमहाभूतनिःश्वसिताभिधानं च गगनारविन्दमकरन्दव्यावर्णनवदनवधेयार्थविषयत्वादुपेक्षा[3][4] मर्हति। यच्चागमः 'सर्वं वै खल्विदं ब्रह्मेत्यादि' 'ऊर्णनाभ इत्यादि' च; तत्सर्वमुक्त[5]-विधिनाऽद्वैतविरोधीति नावकाशं[6] लभते। न चापौरुषेय आगमोऽस्तीत्यग्रे प्रपञ्चयिष्यते। तस्मान्न पुरुषोत्तमोऽपि विचारणां प्राञ्चति।

सर्वदा पाई जाती है, अतः देश-कालका प्रतिनियम सृष्टिरूप कार्यमें घटित नहीं होता।

इस प्रकार ब्रह्मकी सिद्धि न होनेपर वेदोंका उसकी सुप्त-प्रबुद्ध अवस्थाका प्रतिपादन करना और परम-पुरुष-संज्ञक उस ब्रह्म-स्वरूप महाभूतके निःश्वासका कथन करना गगनारविन्दके मकरन्दकी सुगन्धके वर्णन करनेके समान अग्राह्य-विषय होनेसे उपेक्षाके योग्य है।

भावार्थ—ईश्वर या परमब्रह्मको जगत्कर्त्ता माननेवालोंकी ऐसी मान्यता है कि परम पुरुषकी सुप्त-अवस्था प्रलय है, प्रबुद्ध-अवस्था सृष्टि है, निःश्वास वेद हैं, आंखोंसे देखना ही पंचभूत हैं, और उसका स्मित (मुस्कराहट) चर-अचर जगत् है। यहां आचार्य कहते हैं कि जब परम ब्रह्म ही सिद्ध नहीं होता, तो उसके अभावमें उसका यह सब स्वरूप-वर्णन आकाश-कमलकी सुगन्धिके वर्णनके समान है, जो कि प्रेक्षा-पूर्वक कार्य करनेवाले विज्ञजनोंके लिए किसी भी प्रकारसे आदरणीय नहीं हो सकता।

और जो अपने उस परमपुरुषकी सिद्धिके लिए 'सर्वं वै खल्विदं ब्रह्म' 'ऊर्णनाभ इवांशूनाम्' इत्यादि आगम-प्रमाण उपस्थित किये है, वे सब उपर्युक्त विधिसे अद्वैतके विरोधी हैं, अतः वे अपने मतकी सिद्धि करनेके लिए अवकाशको नहीं पाते है। अर्थात् अपना मत सिद्ध करनेमें समर्थ नहीं है और उनका आगमको अपौरुषेय मानना बनता नहीं, यह बात आगे विस्तारसे कही जायगी। इसलिए परम पुरुषरूप वह पुरुषोत्तम भी तर्क की विचारणा पर नहीं ठहरता है।

---

१. परब्रह्म-। २. सुप्तिः प्रलयः, प्रबुद्धावस्था सृष्टिः, एतस्य महतो भूतस्य निःश्वसितमेव ऋग्वेदो यजुर्वेदश्च। "निःश्वसितं तस्य वेदा वीक्षितमेतस्य पञ्चभूतानि। स्मितमेतस्य चरमचरमस्य सुप्तं महाप्रलयः" ॥१॥ इति भामती। ३. अग्राह्यार्थविषयत्वाद् ब्रह्मभावात्। ४. माध्यस्थ्यम्। ५. प्रतिपाद्यप्रतिपादकभावेन। ६. मतस्थापने।

प्रत्यक्षेतरभेदभिन्नममलं मानं द्विधैवोदितम् ।
[1]देवैर्दीप्त[2]गुणैर्विचार्य [3]विधिवत्सङ्ख्याततेः [4]सङ्ग्रहात् ।
मानानामिति[5] [6]तद्दिगप्यभिहितं[7] श्रीरत्ननन्द्याह्वयै[8]—
स्त[9]द्व्याख्यानमदो[10] विशुद्धधिषणै[11]र्बोध्यमव्याहतम्[12] ॥७॥
मुख्य-संव्यवहाराभ्यां प्रत्यक्षमुपदर्शितम् ।
देवोक्तमुपजीवद्भिः[13] [14]सूरिभिर्ज्ञापितं[15] मया[16] ॥८॥

इति परीक्षामुखस्य लघुवृत्तौ द्वितीयः समुद्देशः ॥२॥

इस प्रकार मुख्य प्रत्यक्षका वर्णन किया। उसके प्रसंगसे सर्वज्ञकी सिद्धि और जगत्कर्त्ता ईश्वरका परिहार भी किया।

सम्यग्दर्शनादि गुणोंसे देदीप्यमान श्री अकलङ्कदेवने विधिवत् विचार करके प्रमाणोंकी सर्व संख्याओंका संग्रहकर प्रत्यक्ष और परोक्षके भेदसे दो भेदरूप निर्मल निर्दोष प्रमाणका वर्णन (अपने महान् ग्रन्थोंमें) किया है। उसी प्रमाणका दिङ्मात्र संक्षिप्त वर्णन श्री माणिक्यनन्दी आचार्यने अपने परीक्षामुख-नामक ग्रन्थमें किया। उसका यह बाधा-रहित व्याख्यान मैंने (अनन्तवीर्यने) अपनी इस लघुवृत्तिमें किया है। सो विशुद्ध बुद्धिवाले सज्जनोंको निर्दोष रूपसे जानना चाहिए अर्थात् इस व्याख्यामें मेरी कहीं चूक हुई हो, या दोष रह गया हो, तो वे सज्जन पुरुष उसे शोध करके ग्रहण करें ॥ ७ ॥

मुख्य और सांव्यवहारिकके भेदसे प्रत्यक्ष प्रमाणका वर्णन श्री अकलङ्कदेवने किया। उसीको स्वीकार करते हुए श्री माणिक्यनन्दीने भी उसका वर्णन किया और उसीको मैंने (अनन्तवीर्यने) व्याख्यान किया है ॥ ८ ॥

इस श्लोक-द्वारा वृत्तिकार श्री अनन्तवीर्यने अपनी स्वच्छन्दताका परिहार कर यह बतलाया कि मैंने जो कुछ भी कहा है, वह सब आचार्य-परम्पराके अनुरूप ही कहा है।

इस प्रकार परीक्षामुखकी लघुवृत्तिमें प्रत्यक्ष-प्रमाणका वर्णन करनेवाला
दूसरा समुद्देश समाप्त हुआ।

---

१. अकलङ्कदेवैः। २. दर्शनविशुद्धयादिगुणैः। ३. यथोक्तप्रकारेण। ४. संक्षेपात्संग्रहमाश्रित्येत्यर्थः। ५. हेतोः। ६. तेषां मानाना दिक् तद्दिक्। ७. दिङ्मात्रस्योपदेशः कृत इत्यर्थः। ८. श्रीमाणिक्यनन्दिभिः। ९. मया क्रियमाणम्। १०. एतत्। ११. ज्ञातव्यम्। १२. निर्दोषम्। १३. अभ्युपगच्छद्भिः। १४. माणिक्यनन्दिभिः। १५. ख्यापितं व्याख्यातम्। १६. मया अनन्तवीर्यदेवेन।

तृतीयः समुद्देशः

अथेदानीमुद्दिष्टे[1] प्रत्येक्षेतरभेदेन प्रमाणद्वित्वे प्रथमभेदं व्याख्याय इतरद्[2] व्याचष्टे—

परोक्षमितरत् ॥१॥

उक्तप्रतिपक्षमितरच्छब्दो ब्रूते। ततः प्रत्यक्षादिति लभ्यते, तच्च परोक्षमिति।

तस्य च [3]सामग्री-स्वरूपे[4] निरूपयन्नाह—

प्रत्यक्षादिनिमित्तं[5] स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदम् ॥२॥

प्रत्यक्षादिनिमित्तमित्यत्रादिशब्देन [6]परोक्षमपि गृह्यते। तच्[7] यथावसरं निरूप-

---

अब आचार्य, प्रत्यक्ष और परोक्षके भेदसे प्रमाणके जो दो भेद पहले निर्दिष्ट किये गये है, उनमेंसे प्रथम भेद प्रत्यक्षका व्याख्यान करके दूसरा भेद जो परोक्ष है उसको कहते है—

सूत्रार्थ—जो प्रत्यक्षसे इतर अर्थात् भिन्न है, वह परोक्ष है ॥ १ ॥

इतर शब्द पूर्वमे कहे हुए प्रमाणके प्रतिपक्षको कहता है। अतः उस प्रत्यक्षसे भिन्न अविशदस्वरूपवाला जो ज्ञान है, वह परोक्ष है, ऐसा अर्थ लेना चाहिए।

अब आचार्य उस परोक्षकी सामग्री और स्वरूपका निरूपण करते हुए उत्तर सूत्र कहते है—

सूत्रार्थ—प्रत्यक्ष आदि जिसके निमित्त है, वह परोक्षप्रमाण है। इसके पॉच भेद हैं—स्मृति, प्रत्यभिज्ञान, तर्क, अनुमान और आगम ॥ २ ॥

'प्रत्यक्षादिनिमित्तं' इस पदमे प्रयुक्त आदि पदसे परोक्षका भी ग्रहण करना चाहिए। यह प्रत्यक्ष और परोक्षकी निमित्तता आगे यथावसर निरूपण की जायगी। प्रत्यक्ष आदि है निमित्त जिसके ऐसा विग्रह है और स्मृति आदि पदोंमें द्वन्द्व समास है। वे स्मृति आदिक हैं भेद जिसके वह परोक्ष-प्रमाण है, ऐसा विग्रह करके सूत्रका अर्थ ग्रहण करना चाहिए।

---

१. नाममात्रेणार्थानामभिधानमुद्देशः। २. परोक्षप्रमाणम्। ३. उत्पत्तिकारणम्। ४. अविशदस्वरूपम्। ५. स्मृतिः प्रत्यक्षपूर्विका, प्रत्यभिज्ञानं प्रत्यक्ष-स्मरणपूर्वकम्, प्रत्यक्ष स्मरण-प्रत्यभिज्ञानपूर्वकस्तर्कः, अनुमानं प्रत्यक्षस्मरणप्रत्यभिज्ञानतर्कपूर्वकम्, आगमः श्रावणाध्यक्षस्मृतिसङ्केतपूर्वकमिति। ६. व्याप्तिस्मरणम्। ७. प्रत्यक्षपरोक्षनिमित्तम्।

यिष्यते[1]। प्रत्यक्षादिनिमित्तं यस्येति विग्रहः। स्मृत्यादिषु द्वन्द्वः। ते भेदा यस्य इति विग्रहः।

तत्र स्मृतिं क्रमप्राप्तां दर्शयन्नाह—

विशेषार्थ—अविशद या अस्पष्ट ज्ञानको परोक्ष कहते हैं। उसके पाँच भेद सूत्रमें बतलाये हैं और उन्हें प्रत्यक्षादि-निमित्तक कहा है। इसका खुलासा यह है कि पहले अनुभव किये हुए पदार्थके स्मरण करनेको स्मृति कहते हैं। इसका अर्थ यह हुआ कि स्मृतिज्ञानके लिए पूर्व अनुभवरूप धारणा-प्रत्यक्ष निमित्त है। इसी प्रकार प्रत्यभिज्ञानमें स्मृति और प्रत्यक्ष दोनों निमित्त होते हैं; क्योंकि जिस पदार्थको पहले देखा था, उसीको पुनः देखनेपर 'यह वही है, जिसे मैंने पहले देखा था, ऐसा जो ज्ञान होता है, उसे ही प्रत्यभिज्ञान कहते हैं। इसमें पूर्वस्मरण और वर्तमानमें पुनः दर्शनरूप प्रत्यक्ष ये दोनों निमित्त होते हैं। साध्य-साधनके अविनाभावरूप व्याप्तिके ज्ञानको तर्क कहते हैं। इसकी उत्पत्तिमें प्रत्यक्ष, स्मरण और प्रत्यभिज्ञान ये तीनों निमित्त हैं; क्योंकि जिसने अपने रसोईघरमें अग्निसे उत्पन्न हुए धूमको प्रत्यक्ष देखा है, वही व्यक्ति अन्यत्र कहींसे निकलते हुए धूमको देखकर अग्नि स्मरण करता है और विचारता है कि यह धूम भी रसोईघरके धूमके सदृश है, ऐसा उसे सादृश्य प्रत्यभिज्ञान होता है। पुनः वह निश्चय करता है कि जहाँ जहाँ धूम होगा, वहाँ वहाँ अग्नि अवश्य होगी। और जहाँ अग्नि नहीं होगी, वहाँ धूमभी नहीं, होगा। इस प्रकार अग्नि और धूमके अविनाभावरूप व्याप्तिके ज्ञानका नाम तर्क है। इसकी उत्पत्तिमें प्रत्यक्ष, स्मरण और प्रत्यभिज्ञान ये तीनों ही निमित्त हैं। इसके पश्चात् वह किसी पर्वत आदिसे धूमको निकलते हुए देखकर निश्चय करता है कि यह पर्वत अग्नि-वाला है, क्योंकि इससे धूम निकल रहा है। इस प्रकार धूमरूप साधनसे अग्निरूप साध्यके ज्ञानको ही अनुमान कहते हैं। इस अनुमानमें इससे पूर्व होनेवाले प्रत्यक्ष, स्मरण, प्रत्यभिज्ञान और तर्क ये चारों ही ज्ञान निमित्त हैं। आप्तपुरुषोंके वचनादिका निमित्त पाकर जो पदार्थका ज्ञान होता है, उसे आगम कहते हैं। इस आगमप्रमाणमें 'इस शब्दसे यह अर्थ ग्रहण करना चाहिए' इस प्रकारका सङ्केत और उसका स्मरण ये दोनों निमित्त होते हैं। इस प्रकार इन सभी ज्ञानोंके उत्पन्न होने में दूसरे ज्ञान निमित्त होते हैं, अतः उन्हें परोक्ष कहा गया है।

१. कथयिष्यते।

[1]संस्कारोद्बोधनिबन्धना तदित्याकारा स्मृतिः ॥३॥

संस्कारस्योद्बोधः प्राकट्यं स निबन्धनं[2] यस्याः सा यथोक्ता। तदित्याकारा तदित्युल्लेखिनी। एवम्भूता स्मृतिर्भवतीति शेषः। उदाहरणमाह—

स देवदत्तो यथा ॥४॥

प्रत्यभिज्ञानं प्राप्तकालमाह—

दर्शनस्मरणकारणकं[3] सङ्कलनं[4] प्रत्यभिज्ञानम्।
तदेवेदं तत्सदृशं तद्विलक्षणं [5]तत्प्रतियोगीत्यादि ॥५॥

अब क्रम-प्राप्त स्मृतिका स्वरूप दिखलाते हुए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—धारणारूप संस्कारकी प्रकटताके निमित्तसे होनेवाले और 'तत्' (वह) इस प्रकारके आकारवाले ज्ञानको स्मृति कहते हैं ॥३॥

संस्कारका उद्बोध अर्थात् प्रकटपना वह है निबन्धन (कारण) जिसका वह स्मृति कही जाती है। वह 'तत्' इस आकार अर्थात् उल्लेखवाली है। इस प्रकारके स्वरूपवाली स्मृति होती है। यहाँ पर 'भवति' पद शेष है, जिसे ऊपरसे अध्याहार करना चाहिए।

अब आचार्य उसका उदाहरण कहते हैं—

सूत्रार्थ—जैसे कि वह देवदत्त ॥ ४ ॥

भावार्थ—किसी व्यक्तिने पहले कभी देवदत्त नामक पुरुषको देखा और उसकी धारणा करली। पीछे वह धारणारूप संस्कार प्रकट हुआ और उसे याद आया कि वह देवदत्त। इस प्रकार उसके स्मरणरूप ज्ञानको स्मृति कहते हैं।

अब अवसर-प्राप्त प्रत्यभिज्ञानका स्वरूप कहते हैं—

सूत्रार्थ—वर्तमानमें पदार्थका दर्शन और पूर्वमें देखे हुएका स्मरण ये दोनों हैं कारण जिसके ऐसे सङ्कलन अर्थात् अनुसन्धानरूप ज्ञानको प्रत्यभिज्ञान कहते हैं। जैसे यह वही है, यह एकत्वप्रत्यभिज्ञान है। यह उसके सदृश है, यह सादृश्य प्रत्यभिज्ञान है। यह उससे विलक्षण है, यह वैलक्षण्य प्रत्यभिज्ञान है। यह उसका प्रतियोगी है, यह प्रातियोगिक प्रत्यभिज्ञान है, इत्यादि ॥ ५ ॥

---

१. धारणाज्ञानम्। २. कारणम्। ३. निमित्तकम्। ४. अनुभूतार्थस्य विवक्षित-धर्मसम्बन्धित्वेऽनुसन्धानं सङ्कलनम्; एकत्व-सादृश्यादिधर्मयुक्तत्वेन पुनर्ग्रहणमिति वा। ५. यन्निरूपणाधीनं निरूपणं यस्य तत्तत्प्रतियोगी।

अत्र दर्शनस्मरणकारणकत्वात् [1]सादृश्यादिविषयस्यापि प्रत्यभिज्ञानत्वमुक्तम्। येषां[2] तु सादृश्यविषयमुपमानाख्यं[3] प्रमाणान्तरं तेषां वैलक्षण्यादिविषयं[4] प्रमाणान्तरमनुषज्येत[5]। तथा चोक्तम्—

> [6]उपमानं प्रसिद्धार्थसाधर्म्यात्[7] [8]साध्यसाधनम्।
> तद्वैधर्म्यात्प्रमाणं [9]किं स्यात् [10]सञ्ज्ञिप्रतिपादनम्[11] ॥१५॥

यहाँपर दर्शन और स्मरणके निमित्तसे उत्पन्न होनेके कारण सादृश्य, आदिके विषय करनेवाले ज्ञानको भी प्रत्यभिज्ञानपना कहा है। जिन नैयायिक आदिके यहाँ सादृश्यको विषय करनेवाला ज्ञान उपमान नामसे एक भिन्न प्रमाण माना गया है, उनके वैलक्षण्य आदिको विषय करनेवाला एक और भी प्रमाण माननेका प्रसङ्ग प्राप्त होता है। जैसा कि कहा है—

यदि प्रसिद्ध पदार्थकी समानतासे साध्यके साधनको अर्थात् ज्ञानको उपमान प्रमाण कहते है, तो उसके वैधर्म्यसे (विलक्षणतासे) होनेवाले साध्यके साधनरूप प्रमाणका क्या नाम होगा? तथा नामादिरूप संज्ञावाले संज्ञी पदार्थके प्रतिपादन करनेको कौन-सा प्रमाण कहेंगे? इसी प्रकार यह

---

१. सङ्कलनस्येति शेषः। २. नैयायिकादीनाम्। ३. दृश्यमानाद्यदन्यत्र विज्ञानमुपजायते। सादृश्योपाधिवत्तज्ज्ञैरुपमानमिति स्मृतम् ॥१॥ तस्माद्यत् स्मर्यते ...सादृश्येन विशेषितम्। प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥२॥ प्रत्यक्षेणावबुद्धेऽपि सादृश्ये गवि च स्मृते। विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता ॥३॥ प्रत्यक्षेऽपि यथा देशे स्मर्यमाणे च पावके। विशिष्टविषयत्वेन नानुमानप्रमाणता ॥४॥ न चैतस्यानुमानत्वं पक्षधर्माद्यसम्भवात्। प्राक् प्रमेयस्य सादृश्यधर्मत्वेन न गृह्यते ॥५॥ गवये गृह्यमाणे च न गवार्थानुमापकम्। प्रतिज्ञार्थैकदेशत्वाद् गोगतस्य न लिङ्गता ॥६॥ गवयस्यापि सम्बन्धान्न गोलिङ्गत्वमृच्छति। सादृश्य न च सर्वेण पूर्वदृष्ट तदन्वयि ॥७॥ एकस्मिन्नपि दृष्टेऽर्थे द्वितीयं पश्यतो वने। सादृश्येन सहैवास्मिं- स्तदैवोत्पद्यते मतिः ॥८॥ सामान्यवच्च सादृश्यमेकैकत्र समाप्यते। प्रतियोगिन्यदृष्टेऽपि तत्तस्मादुपलभ्यते ॥९॥

४. गोविलक्षणो महिष इत्यत्र प्रमाणान्तरेण भवितव्यम्। ५. सम्पद्येत। ६. गोलक्षणम्। ७. सादृश्यात्। ८. गवयादि। ९. इति प्रश्ने। १०. संज्ञिनो वाच्यस्य प्रतिपादनं विवक्षितसंज्ञाविषयत्वेन सङ्कलनम्; यथा वृक्षोऽयमित्यादि। ११. प्रत्यभिज्ञानविषयः। वाच्यप्रतिपादनम्।

[1]इदमल्पं महद् दूरमासन्नं प्रांशु[2] नेति वा[3]।
व्यपेक्षातः[4] समक्षेऽर्थे[5] [6]विकल्पः [7]साधनान्तरम्[8] ॥१६॥

[9]एषां क्रमेणोदाहरणं दर्शयन्नाह—

यथा स एवायं देवदत्तः[10], गोसदृशो गवयः[11], गोविलक्षणो महिषः[12], इदमस्माद् दूरम्[13], [14]वृक्षोऽयमित्यादि ॥६॥

आदिशब्देन—

इससे अल्प है, यह इससे महान् है; यह इससे दूर है, यह इससे आसन्न (समीप) है, यह इससे उन्नत (ऊंचा) है, यह इससे अवनत (नीचा) है। तथा इनके निषेधरूप यह इससे अल्प नहीं, यह इससे महान् नहीं; इत्यादिरूप जो प्रत्यक्ष-गोचर पदार्थमें परस्परकी अपेक्षासे अन्य भावका विकल्प (निश्चय) रूप ज्ञान होता है सो इन सबको भी पृथक् प्रमाणपना प्राप्त होता है और इस कारण आप लोगोंके द्वारा स्वीकृत प्रमाण-संख्याका विघटन हो जाता है। अतः उपमानप्रमाणको पृथक् प्रमाण मानना ठीक नहीं है, उसे सादृश्यप्रत्यभिज्ञानके ही अन्तर्गत जानना चाहिए। ॥१५-१६॥

अब आचार्य उक्त प्रत्यभिज्ञानोंके क्रमसे उदाहरण दिखलाते हुए उत्तर सूत्र कहते हैं—

सूत्रार्थ—जैसे यह वही देवदत्त है, यह एकत्वप्रत्यभिज्ञानका उदाहरण है। यह गवय (नीलगाय, रोझ) गौके सदृश है, यह सादृश्यप्रत्यभिज्ञान का उदाहरण है। यह महिष (भैंसा) उस गौसे विलक्षण है, यह वैलक्षण्यप्रत्यभिज्ञानका उदाहरण है। यह इससे दूर है, यह तत्प्रातियोगिक प्रत्यभिज्ञानका उदाहरण है। यह वृक्ष है, यह सामान्य प्रत्यभिज्ञानका उदाहरण है, इत्यादि ॥ ६ ॥

---

१. शब्दरूपेण परामर्शोल्लेखः। २. उन्नतम्। ३. अथवा 'इदमस्मान्न महत्' इत्यादिना शब्देनोक्तं भवति। ४. परस्परापेक्षया, प्रतिपक्षाकाङ्क्षया। ५. प्रसिद्धे। ६. निश्चयः। ७. तदा प्रमाणसङ्ख्याविघटनम्। ८. प्रमाणान्तरं सम्पद्येत। ९. प्रत्यभिज्ञानभेदानाम्। १०. एकत्वप्रत्यभिज्ञानम्। ११. सादृश्यप्रत्यभिज्ञानम्। १२. वैलक्षण्यप्रत्यभिज्ञानम्। १३. तत्प्रतियोगिप्रत्यभिज्ञानम्। १४. वृक्षसामान्यस्मृतिरूपप्रत्यभिज्ञानम्।

पयोऽम्बुभेदी हंसः स्यात् षट्पादैर्भ्रमरः स्मृतः ।
सप्तपर्णस्तु तत्त्वज्ञैर्विज्ञेया विषमच्छदः ॥ १७ ॥
पञ्चवर्णं भवेद् रत्नं मेचकाख्यं पृथुस्तनी ।
युवतिश्चैकशृङ्गोऽपि गण्डकः परिकीर्तितः ॥ १८ ॥
शरभोऽप्यष्टभिः पादैः सिंहश्चारुसटान्वितः ॥ १९ ॥

इत्येवमादिशब्दश्रवणात् तथाविधानेव [3]मरालादीनवलोक्य तथा सत्यापयति[4] यदा तदा [5]तत्सङ्कलनमपि प्रत्यभिज्ञानमुक्तम्; दर्शनस्मरणकारणत्वाविशेषात् । परेषां तु [6]तत्प्रमाणान्तरमेवोपपद्यते; उपमानादौ तस्यान्तर्भावाभावात् ।

अथोहोऽवसरप्राप्त इत्याह—

उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः ॥ ७ ॥
[7]इदमस्मिन् सत्येव[8] भवत्यसति[9] न भवत्येवेति च ॥ ८ ॥

सूत्रके अन्तमें जो आदिशब्द दिया है, उससे—

दुग्ध और जलका भेद करनेवाला हंस होता है, छह पादका भ्रमर होता है, सात पत्तोंवाला विषमच्छद नामका वृक्ष तत्त्वज्ञोंको जानना चाहिए। पाँच वर्णवाला मेचक रत्न होता है। विशाल स्तनवाली युवती होती है। एक सींगवाला गेंडा कहा जाता है, आठ पादवाला जानवर शरभ (अष्टापद) कहलाता है। सुन्दर सटा (केशोंकी लटें) वाला सिंह होता है ॥ १७-१९ ॥

इत्यादिक शब्दोंको सुनकर पीछे इसी प्रकारके हंस आदिको देखकर जब कोई व्यक्ति विचार करता है कि यह वही मिले हुए जल और दुग्धका भेद करनेवाला हंस है, तब यह सङ्कलनरूप अनुसन्धानात्मक ज्ञान प्रत्यभिज्ञान कहा जाता है। इसी प्रकार अन्य उदाहरणोंमें भी जानना चाहिए। क्योंकि इन सभी उदाहरणोंमें वस्तुका वर्तमानमें दर्शन और पूर्व धारणाका स्मरणरूप दोनों कारण समान है। किन्तु नैयायिकादि अन्य मतावलम्बियोंको तो इन्हें भिन्न भिन्न ही प्रमाण मानना पड़ेगा, क्योंकि उनके द्वारा स्वीकृत उपमान आदि प्रमाणोंमें इनका अन्तर्भाव नहीं होता है।

अब अवसर-प्राप्त ऊह अर्थात् तर्क प्रमाणका स्वरूप कहते हैं—

सूत्रार्थ—उपलम्भ (अन्वय) और अनुपलम्भ (व्यतिरेक) के निमित्तसे जो व्याप्तिका ज्ञान होता है, उसे ऊह अर्थात् तर्कप्रमाण कहते हैं। जैसे-यह साधनरूप वस्तु इस साध्यरूप वस्तुके होनेपर ही होती है और साध्यरूप वस्तुके नहीं होनेपर नहीं होती है ॥७-८॥

---

१. हंसो भवति पयोऽम्बुभेदकृत् । २. भीमसेनीकर्पूरोत्पादककेलिः । ३. हंसादीन् । ४. सत्यङ्करोति । ५. स एवायं हंसः पयोऽम्बुभेदीति यज्ज्ञानं तत्सङ्कलनम् । ६. सङ्कलनज्ञानम् । ७. साधनत्वेनाभिप्रेतं वस्तु । ८. अन्वये । ९. व्यतिरेके ।

उपलम्भः [1]प्रमाणमात्रमत्र गृह्यते। यदि [2]प्रत्यक्षमेवोपलम्भशब्देनोच्यते तदा[3] साधनेषु[4] [5]अनुमेयेषु व्याप्तिज्ञानं न स्यात्। अथ व्याप्तिः सर्वोपसंहारेण[6] प्रतीयते, सा कथमतीन्द्रियस्य[7] साधनस्यातीन्द्रियेण साध्येन[8] भवेदिति? नैवम्; प्रत्यक्षविषयेष्विवानुमानविषयेष्वपि व्याप्तेरविरोधात्, [9]तज्ज्ञानस्याप्रत्यक्षत्वाभ्युपगमात्।

यहाँपर उपलम्भसे प्रमाणसामान्यका ग्रहण करना चाहिए। यदि प्रत्यक्षको ही उपलम्भशब्दसे ग्रहण किया जाय तो अनुमान के विषयभूत साधनोमें व्याप्तिका ज्ञान नही हो सकेगा। यदि कहा जाय कि व्याप्ति तो सर्व देश और सर्व कालके उपसंहारसे प्रतीतिमें आती है, तो जब अतीन्द्रिय ही साधन हो और अतीन्द्रिय ही साध्य हो, तब वह व्याप्ति कैसे जानी जायगी? सो ऐसा नहीं कहना चाहिए; क्योंकि प्रत्यक्षके विषयभूत साध्य-साधनोंके समान अनुमानके विषयभूत साध्य और साधनोंमें भी व्याप्ति के होनेमें कोई विरोध नहीं है, कारण कि उस अनियत दिग्देशकालवाली व्याप्तिके ज्ञानको परोक्ष माना गया है।

भावार्थ—नैयायिकादि दूसरे वादियोंका ऐसा मत है कि प्रत्यक्षके विषयभूत साध्य-साधनोंमें ही व्याप्ति सम्भव है। जो पदार्थ प्रत्यक्ष नहीं है, अनुमान या आगमप्रमाणके विषय हैं, उनमें व्याप्ति कैसे सम्भव है? इसका उत्तर आचार्यने यह दिया है कि अनुमान या आगमके विषयभूत पदार्थोंके साध्य-साधनोंमें भी व्याप्ति संभव है। जैसे अत्यन्त दूरवर्ती होनेसे सूर्यकी गति परोक्ष है, फिर भी उसकी गतिका अनुमान करते हैं—सूर्य गमनशक्ति युक्त है, क्योंकि गतिमान् है। इस अनुमान के विषयभूत साध्य-साधनकी व्याप्ति इस प्रकार है—जो जो पदार्थ गतिमान् होते हैं, वे वे गमनशक्ति युक्त देखे जाते हैं, जैसे कि बाण। तथा सूर्य गतिमान् है, क्योंकि वह पूर्वदेशका त्याग-

१. प्रमाणसामान्यम्। २. नैयायिकानामभिप्रायमनूद्य दूषयति, तेषामभिप्रायस्तु प्रत्यक्षविषयवस्तुनि व्याप्तिर्न तु अनुमानगोचरे। ३. असिद्धो हेतुरपि साध्यो यदा भवतीत्यर्थः। तत्कथम्। अर्हन् सर्वज्ञो भवितुमर्हति प्रमाणवाक्त्वात्। असिद्धोऽयं हेतुरसिद्धो न भवति प्रमाणवाक्त्वम्। कुतः! दृष्टेष्टाविरुद्धवक्तृत्वात्। ४. नास्त्यत्र देहिनि सुखं हृदयशल्यात्। ५. आदित्यो गमनशक्तियुक्तो गतिमत्त्वात्। यो यो गतिमान स स गमनशक्तियुक्तो दृष्टः, यथा शरः। गतिमांश्चायम्, तस्माद् गमनशक्तियुक्तः। आदित्यो गतिमान् भवति, पूर्वदेशत्यागेन देशान्तरसमुपलभ्यमानत्वात्, देवदत्तवत्। इत्यत्र सूर्यगतिमत्त्वादिषु धर्मादिषु गत्यादिष्वनुमेयेष्वत्यन्तपरोक्षेषु आगमगम्येषु। ६. सर्वदेशे सर्वकाले सर्वात्मना गृह्यते। ७. परोक्षस्य। ८. सह। ९. अनियतदिग्देशव्याप्तिज्ञानस्य।

उदाहरणमाह[1]—

यथाग्नावेव धूमस्तदभावे न भवत्येवेति च[2] ॥ ९ ॥

इदानीमनुमानं क्रमायातमिति तल्लक्षणमाह—

[3]साधनात्साध्यविज्ञानमनुमानम् ॥ १० ॥

साधनस्य लक्षणमाह—

साध्याविनाभावित्वेन निश्चितो हेतुः ॥ ११ ॥

कर पश्चिमादि देशोंमें जाता हुआ देखा जाता है। जो जो गतिमान होते हैं, वे देशसे देशान्तरको जाते हुए देखे जाते है, जैसे कि देवदत्त। यहाँ प्रथम अनुमानसे सूर्यमें गमनशक्ति सिद्ध की गई है और दूसरे अनुमानसे सूर्यमें गतिमत्त्व सिद्ध किया गया है। प्रथम अनुमानमे साध्य और साधन दोनों परोक्ष है और दूसरे अनुमानमें केवल साध्य परोक्ष है। इस प्रकार अनुमानके विषयभूत परोक्ष साध्य और साधनोंमें भी व्याप्ति बराबर देखनेमे आती है, अतः वह प्रत्यक्षके विपयभूत साध्य-साधनोंमें ही होती है, यह कहना ठीक नहीं है।

अब आचार्य व्याप्तिके ज्ञानरूप तर्कका उदाहरण कहते हैं—

सूत्रार्थ—जैसे अग्निके होनेपर ही धूम होता है और अग्निके अभावमें नहीं होता है ॥९॥

अब अनुमान क्रम-प्राप्त है, अतः आचार्य उसका लक्षण कहते हैं—

त्रार्थसू—साधनसे साध्यके ज्ञानको अनुमान कहते है ॥१०॥

विशेषार्थ—इस सूत्रके प्रत्येक पदकी सार्थकता इस प्रकार है—यदि अनुमानका लक्षण यह किया जाता कि प्रमाणसे जो विज्ञान होता है, वह अनुमान है, तो आगम आदिसे व्यभिचार आता है, अतः उसके निवारण के लिए साध्यके ज्ञानको अनुमान कहा। फिर भी प्रत्यक्षसे व्यभिचार आता, अतः उसके निवारणार्थ 'साधनसे' यह पद दिया है। इस प्रकार साधनरूप लिङ्गसे साध्यरूप लिङ्गीका जो ज्ञान होता है, उसे अनुमान प्रमाण कहते हैं। जैसे धूम देखकर अग्निका ज्ञान करना।

अब साधन (हेतु) का लक्षण कहते है—

सूत्रार्थ—साध्यके साथ जिसका अविनाभाव निश्चित हो, अर्थात् जो साध्यके विना न हो, उसे हेतु (साधन) कहते हैं ॥११॥

---

१. व्याप्तिज्ञानरूपतर्कस्योदाहरणमाह। २ परमाणुप्रत्यक्षेऽव्याप्तिर्वर्तते, यथात्र प्रत्यक्षे वर्तते। अस्ति च परमाणुरागमोक्तत्वात्, पुण्यपापवत्। ३. प्रमाणाद्विज्ञानमनुमानमेतावन्मात्रे लक्षणेऽनुमेयाऽऽगमादिभिर्व्यभिचारः, अतस्तद्वारणाय साध्यविज्ञानमनुमानमित्युक्तम्। तथापि प्रत्यक्षेण व्यभिचारः, अतस्तद्वारणाय साधनात्साध्यविज्ञानमनुमानमित्युक्तम्।

'ननु त्रैरूप्यमेव[1] हेतोर्लक्षणम्; तस्मिन्[3] सत्येव हेतोरसिद्धादि[4]दोषपरिहारोपपत्तेः। तथा हि—[5]पक्षधर्मत्वमसिद्धत्वव्यवच्छेदार्थमभिधीयते। सपक्षे सत्त्वं तु [6]विरुद्धत्वापनोदार्थम्। विपक्षे चासत्त्वमेवानैकान्तिक[7]-व्युदासार्थमिति। तदुक्तम्[8]—

शङ्का—बौद्धोंका कहना है कि हेतुका यह लक्षण ठीक नहीं, किन्तु पक्षधर्मत्व, सपक्षसत्त्व और विपक्षाद्-व्यावृत्तिरूप त्रैरूप्यको ही हेतुका लक्षण मानना चाहिए, क्योंकि त्रैरूप्यके होनेपर ही असिद्ध आदि दोषोंका परिहार सम्भव है। उनके अनुसार पक्षधर्मत्व असिद्ध हेत्वाभासके व्यवच्छेदके लिए, सपक्षसत्त्व विरुद्ध हेत्वाभासके निराकरणके लिए और विपक्षाद्-व्यावृत्ति अनैकान्तिक हेत्वाभासके निषेधके लिए कहे गये हैं।

विशेषार्थ—उक्त कथनका स्पष्टीकरण यह है—जैसे 'शब्द नित्य है, क्योंकि वह चाक्षुष है अर्थात् नेत्रोंसे जाना जाता है। इस अनुमानमें चाक्षुपत्व हेतु अपने पक्षभूत शब्दमें नहीं रहता है, अतः वह असिद्ध हेत्वाभास है। इस प्रकारके दोष-परिहारके लिए पक्षधर्मत्वको हेतुका लक्षण मानना आवश्यक है। इसी प्रकार 'शब्द नित्य है, क्योंकि वह कृतक है अर्थात् अपनी उत्पत्तिमें अन्यके व्यापारकी अपेक्षा रखता है। इस अनुमानमे कृतकत्व हेतु सपक्षमें नहीं रहता है, क्योंकि कृतकपनेको नित्यत्वके विरोधी अनित्यत्वके साथ व्याप्ति है। अतः साध्य विरोधी पदार्थके साथ रहनेसे यह हेतु विरुद्ध हेत्वाभास है। इस दोषके परिहारार्थ हेतुका सपक्षमें रहना यह दूसरा रूप भी आवश्यक है। तथा अनैकान्तिक दोषके परिहारके लिए हेतुको विपक्षसे व्यावृत्त होना चाहिए। जैसे शब्द नित्य है, क्योंकि वह प्रमेय अर्थात् प्रमाणका विषय है। यहाँपर प्रमेयत्व हेतु पक्षभूत शब्दमें और सपक्षभूत आकाशमें रहते हुए भी नित्यत्वके विरोधी अनित्य घट आदिमें भी पाये जानेसे अनैकान्तिक

१. बौद्धः प्राह। २. पक्षधर्मत्व सपक्षसत्त्व-विपक्षाद्व्यावृत्तित्रयमिति। ३. त्रैरूप्ये। ४. आदिपदेन विरुद्धानैकान्तिकदोषौ। ५. शब्दोऽनित्यः, चाक्षुषत्वादित्यत्रापक्षधर्मत्वमस्ति; चाक्षुषत्वादिति हेतोः पक्षभूते शब्देऽवर्तमानत्वात्तस्मादसिद्धोऽयं हेतुरतस्तद्वारणाय पक्षे सत्त्वमिति। ६. नित्यः शब्दः कृतकत्वादित्यत्र सपक्षेऽसत्त्वमस्ति, कृतकत्वस्य हि नित्यत्वविरोधिनाऽनित्यत्वेन व्याप्तत्वात्। तस्माद्धेतोः साध्याभाववद् वृत्तित्वाद्विरुद्धत्वमिति। अतो विरुद्धदोषपरिहारार्थं सपक्षे सत्त्वमिति। ७. शब्दो नित्यः प्रमेयत्वादित्यत्र विपक्षादव्यावृत्तिरस्ति. प्रमेयत्वस्य हेतोः पक्षभूते शब्दे तथा सपक्षरूपाकाशादौ वर्तमानेऽपि नित्यत्वविरोधिनो घटादेरव्यावृत्तित्वात्। तस्माद्धेतोः पक्षसत्त्व सपक्षसत्त्वेऽपि विपक्षादव्यावृत्तित्वादनैकान्तिकमिति। अतस्तत्परिहारार्थं विपक्षाद् व्यावृत्तिरिति। ८. दिग्नागाचार्येण (धर्मकीर्त्तिना)।

हेतोस्त्रिष्वपि रूपेषु निर्णयस्तेन वर्णितः।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः[१] ॥२०॥

तदयुक्तम्[२]; अविनाभावनियमनिश्चयादेव दोषत्रयपरिहारोपपत्तेः। अविनाभावो ह्यन्यथानुपपन्नत्वम्। [३]तच्चासिद्धस्य न सम्भवत्येव, 'अन्यथानुपपन्नत्वमसिद्धस्य न सिद्ध्यति' इत्यभिधानात्। नापि विरुद्धस्य [४]तल्लक्षणत्वोपपत्तिर्विपरीतनिश्चिताविनाभाविनि[५] [६]यथोक्तसाध्याविनाभावनियमलक्षणस्यानुपपत्तेर्विरोधात्। व्यभिचारिण्यपि न प्रकृतलक्षणावकाशस्तत[७] एव '[८]ततोऽ[९]न्यथानुपपत्तिरेव श्रेयसी, न त्रिरूपता;

है। इस दोषके दूर करनेके लिए विपक्षाद्-व्यावृत्तिरूप तीसरे रूपको भी मानना चाहिए। जैसा कि कहा गया है—

हेतुके लक्षणका उपर्युक्त तीन रूपोंमें ही निर्णय वर्णन किया गया है, क्योंकि पहला पक्षधर्मत्व असिद्ध दोपका प्रतिपक्षी है, दूसरा सपक्षसत्त्व विरुद्ध दोषका प्रतिपक्षी है और तीसरा विपक्षव्यावृत्ति व्यभिचारी जो अनैकान्तिक दोष उसका प्रतिपक्षी है ॥२०॥

इसलिए असिद्धादि तीनों दोषोंके परिहारार्थ त्रैरूप्यको ही हेतुका लक्षण मानना चाहिए।

समाधान—आपका यह कहना अयुक्त है; क्योंकि, अविनाभावरूप नियमके निश्चयसे ही असिद्धादि तीनों दोषोंका परिहार हो जाता है। अविनाभाव नाम अन्यथानुपपत्तिका है। साध्यके विना साधनके नहीं होनेको अन्यथानुपपत्ति कहते है। यह अन्यथानुपपत्ति असिद्ध हेतुमें सम्भव नहीं है; क्योंकि "अन्यथानुपपन्नत्व असिद्धहेतुके सिद्ध नहीं होता है" ऐसा कहा गया है। विरुद्धहेतुके भी अन्यथानुपपत्ति रूप हेतुका लक्षण सम्भव नहीं है; क्योंकि साध्यसे विपरीत पदार्थके साथ निश्चित अविनाभावी हेतुमें यथोक्त साध्याविनाभावी निश्चित लक्षणके पाये जानेका विरोध है। व्यभिचारी हेतुमें भी अन्यथानुपपत्तिरूप प्रकृत लक्षणके रहनेका अवकाश नहीं है, क्योंकि

१. एत एव विपक्षास्तेभ्यः। २. असिद्धादिदोषपरिहारार्थं हेतोस्त्रैरूप्यवर्णनम्। ३. अन्यथानुपपन्नत्वम्। ४. अन्यथानुपपन्नत्व-। ५. साधने। अनित्यः शब्दः, नित्यधर्मरहितत्वात्। नित्यः शब्दः, प्रत्यभिज्ञायमानत्वात्। ६. अनुपपत्तिः कुत इत्यत आह। ७. विरोधादेव। यथोक्तसाध्याविनाभावनियमलक्षणस्यानुपपत्तेरेव। ८. दोषत्रयपरिहारात्। अन्यथानुपपत्तिबलेनैवासिद्धादिदोषपरिहारो भवति यतः। ९. अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्। नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ॥ १ ॥

तस्यां[1] सत्यामपि यथोक्तलक्षणाभावे[2] हेतोर्गमकत्वादर्शनात्[3]। तथा हि—स, [4]श्यामस्तत्पुत्रत्वादितरतत्पुत्रवत्' इत्यत्र त्रैरूप्यसम्भवेऽ[5]प्यगमकत्वमुपलक्ष्यते।

अथ[6] विपक्षाद् व्यावृत्तिर्नियमवती तत्र[7] न दृश्यते, ततो न [8]गमकत्वमिति। तदपि मुग्धविलसितमेव; तस्या[9] एवाविनाभावरूपत्वात्। [10]इतररूपसद्भावेऽपि तदभावे[11]

साध्याविनाभावी हेतुका व्यभिचारी होनेमें विरोध है, अर्थात् व्यभिचारी हेतुमें साध्याविनाभावित्व सम्भव ही नहीं है। इसलिए अन्यथानुपपत्ति ही हेतुका श्रेष्ठ लक्षण है, त्रिरूपता नहीं; क्योंकि उस त्रिरूपताके होनेपर भी यथोक्त अन्यथानुपपत्तिरूप लक्षणके अभावमें हेतुके गमकपना नहीं देखा जाता है। जैसे—वह श्याम (सांवला) है, क्योंकि 'वह अमुक व्यक्तिका पुत्र है, अन्य पुत्रोंके समान'। इस अनुमानमें प्रयुक्त तत्पुत्रत्व हेतुके त्रैरूप्य सम्भव होते हुए भी गमकपना नहीं देखा जाता है।

भावार्थ—किसी व्यक्तिके अनेक पुत्रोंको सांवला देखकर अनुमान किया कि उस व्यक्तिकी स्त्रीके गर्भमें जो पुत्र है, वह भी सांवला ही होगा, क्योंकि वह अमुक व्यक्तिका पुत्र होनेवाला है। जो उसका पुत्र है वह सांवला है, जैसे कि विवक्षित अमुक पुत्र। जो सांवला नहीं, वह उसका पुत्र नहीं; जैसे कि अमुक व्यक्तिका गोरा पुत्र। इस प्रकारके अनुमानमें तत्पुत्रत्वरूप हेतुके त्रैरूप्यपना है अर्थात् वह पक्षरूप गर्भस्थ पुत्रमें पाया जाता है, सपक्षभूत अन्य पुत्रोंमें भी रहता है और विपक्षभूत अन्यके पुत्रोंमें नहीं पाया जाता। फिर भी यह हेतु अपने साध्यका गमक नहीं है, क्योंकि गर्भस्थ पुत्रके गौर वर्ण होनेकी सम्भावना है। अतः त्रैरूप्यको हेतुका लक्षण न मानकर अन्यथानुपपत्तिको ही हेतुका लक्षण मानना चाहिए।

यदि कहा जाय कि 'स श्यामस्तत्पुत्रत्वात्' इस अनुमानमें विपक्षसे व्यावृत्ति नियमवाली नही दिखाई देती है, इसलिए तत्पुत्रत्वरूप हेतु गमक नहीं है, सो आपका यह कथन भी अतिमुग्ध पुरुषके विलास समान ही है,

---

१. त्रिरूपतायाम्। २. अविनाभावाभावे। साध्याविनाभावित्वेन निश्चितो हेतुरिति। ३. साधकत्वाप्रतीतेः। ४. श्यामत्वस्यान्यत्र दर्शनात्। ५. गर्भस्थो मैत्रतनयः श्यामस्तत्पुत्रत्वादितरपुत्रवत्, इत्यत्र तत्पुत्रत्वस्य हेतोः पक्षभूतगर्भस्थे सपक्षभूतेतरतत्पुत्रे च वर्तमानस्य साध्याभाववद्गौरादिना व्यावृत्तौ सत्यामपि गर्भस्थमैत्रतनयस्य गौरत्वेनापि सन्देहसम्भवात्सन्दिग्धानैकान्तिकत्वं स्यादिति। ६. सौगतः प्राह। ७. स श्यामस्तत्पुत्रत्वादित्यनुमाने। ८. प्रकृतसाध्यज्ञापनशक्तिकत्वम्। ९. विपक्षाद् व्यावृत्ते। १०. पक्षसत्त्वसपक्षसत्त्वरूपद्वयसद्भावेऽपि। ११. विपक्षाद् व्यावृत्त्यभावे।

हेतोः स्वसाध्यसिद्धिं प्रति गमकत्वानिष्टौ[1] सैव[2] प्रधानं लक्षणमक्षूण[3]मुपलक्षणीयमिति[4]। तत्सद्भावे चेतररूपद्वयनिरपेक्षतया [5]गमकत्वोपपत्तेश्च।

यथा सन्त्यद्वैतवादिनोऽपि [6]प्रमाणानीष्टानिष्टसाधनदूषणान्यथानुपपत्तेः। न चात्र[7] पक्षधर्मत्वं सपक्षान्वयो वास्ति; केवलमविनाभावमात्रेण गमकत्वप्रतीतेः। यदप्युक्तं परै[8]:—

क्योंकि उस विपक्ष-व्यावृत्तिका नाम ही अविनाभावरूपता है। इतर रूपोंके सद्भाव होनेपर भी अर्थात् पक्षधर्मत्व और सपक्षसत्त्व इन दो रूपोंके पाये जानेपर भी उस विपक्षाद्-व्यावृत्तिके अभाव होनेपर हेतुके अपने साध्यकी सिद्धिके प्रति गमकपना नहीं है, अतः साध्यके साथ अविनाभाववाली उस विपक्षव्यावृत्तिको ही हेतुका निर्दोष लक्षण प्रतिपादन करना चाहिए, क्योंकि उसके सद्भावमें अन्य दो रूपोंकी निरपेक्षतासे भी हेतुके साध्यके प्रति गमकता बन जाती है।

भावार्थ—जैसे माता-पिताके ब्राह्मण होनेसे पुत्रके भी ब्राह्मणत्वका अनुमान किया जाता है। अथवा नदीमें नीचेकी ओर जलका पूर दिखाई देनेसे ऊपरकी ओर जलवर्षाका अनुमान किया जाता है। इन दोनों ही उदाहरणोंमें न पक्षधर्मत्व है और न सपक्षसत्त्व है, फिर भी माता-पिताकी ब्राह्मणता और अधोदेशमें नदीके पूरका दर्शन ये दोनों ही हेतु पुत्रकी ब्राह्मणता और ऊपरी प्रदेशमें हुई जलवृष्टिरूप साध्यके गमक हैं ही।

आचार्य अद्वैतवादियोंका उदाहरण देते हुए कहते हैं कि यद्यपि वे परम ब्रह्मके सिवाय दूसरा कोई पदार्थ नहीं मानते हैं, तथापि इष्टका साधन और अनिष्टका दूषण अन्यथा बन नहीं सकता, इस अन्यथानुपपत्तिके बलसे उनके भी प्रमाण नामक पदार्थकी मान्यता प्राप्त होती ही है। यथा 'अद्वैतवादीके प्रमाण हैं, अन्यथा इष्टका साधन और अनिष्टका दूषण बन नहीं सकता' इस अनुमानमें न पक्षधर्मत्व है और न सपक्षसत्त्व है; केवल अविनाभावमात्रसे हेतुका गमकपना प्रतीतिमें आरहा है। तथा बौद्धादिकोंने

१. उदाहरणं हि यदि साध्यविशिष्टधर्मिणि साध्यसाधने सन्देहवती न करोति चेत् । २. उदाहरणस्य । ३. किमर्थम् । ४. निमित्तात्, कारणात् ।

५. यौगः प्राह । ६. निःसंशय । ७. संशयो न भविष्यति । ८. आदिपदेनोपनयनिगमने । ९. साध्यसंवित्तिः ।

[1]किञ्चाभिधायापि[2] दृष्टान्तादिकं [3]समर्थनमवश्यं वक्तव्यम्; असमर्थितस्याहेतुत्वादिति। तदेव[4] वरं हेतुरूपमनुमानावयवो वाऽस्तु; साध्यसिद्धौ [5]तस्यैवोपयोगात्। नोदाहरणादिकम्। एतदेवाऽऽह—

समर्थनं [6]वा वरं [7]हेतुरूपमनुमानावयवो वाऽस्तु; साध्ये तदुपयोगात्।

प्रथमो वाशब्द एवकारार्थे। द्वितीयस्तु पक्षान्तरसूचने। शेषं सुगमम्।

ननु दृष्टान्तादिक[8]मन्तरेण मन्दधियामवबोधयितुमशक्यत्वात् कथं पक्षहेतुप्रयोगमात्रेण[9] तेषां साध्यप्रतिपत्तिरिति? तत्राह—

बालव्युत्पत्त्यर्थं तत्त्रयोपगमे[10] शास्त्र एवासौ,
न[11] वादेऽनुपयोगात्[12] ॥४२॥

दूसरी बात यह है कि दृष्टान्त आदिकको कह करके भी आपकी मान्यताके अनुसार समर्थन अवश्य ही कहना चाहिए; क्योंकि जिस हेतुका समर्थन न हुआ हो, वह हेतु ही नहीं हो सकता। इसलिए वह समर्थन ही हेतुका उत्तम रूप है और उसे ही अनुमानका अवयव मानना चाहिए; क्योंकि साध्यकी सिद्धिमें उसका ही उपयोग है। उदाहरण आदिको नहीं कहना चाहिए। आचार्य इसी बातको दिखलाते हैं—

सूत्रार्थ—समर्थन ही हेतुका वास्तविक रूप है, अतः वही अनुमानका अवयव माना जाय; क्योंकि साध्यकी सिद्धिमें उसीका उपयोग होता है ॥४१॥

सूत्र-पठित प्रथम 'वा' शब्द एवकारके अर्थमें है और द्वितीय 'वा' शब्द अन्य पक्षकी सूचना करता है। शेष सूत्रार्थ सुगम है।

यहाँ कोई शङ्काकार कहता है कि दृष्टान्तादिकके विना मन्दबुद्धि जनोंको ज्ञान कराना अशक्य है; अतः पक्ष और हेतुके प्रयोगमात्रसे उन्हें साध्यका ज्ञान कैसे हो जायगा? आचार्य इसका उत्तर देते है—

सूत्रार्थ—मन्द बुद्धिवाले बालकोंकी व्युत्पत्तिके लिए उन उदाहरणादि तीन अवयवोंके मान लेनेपर भी शास्त्रमें ही उनकी स्वीकारता है, वादमें नहीं; क्योंकि वाद (शास्त्रार्थ) में उनका उपयोग नहीं है ॥४२॥

---

१. सङ्ख्याविघटनदूषणमस्ति। २. कथयित्वा। ३. विपक्षे बाधकप्रमाणसमर्थनम्। ४. समर्थनमेव। ५. समर्थनस्य हेतुरूपस्य। ६ दर्शनमेव समर्थनमेव, न पक्षधर्मत्वादि। ७. हेतुरूपमेवावयवो भवतु। हेतुलक्षणं कीदृशम्? दृष्टान्तोपनयनिगमनलक्षणत्रिरूपत्वप्रदर्शनस्वरूपम्। ८. आदिपदेनोपनयनिगमनग्रहणम्। ९. दृष्टान्तोपनयनिगमनाभावे मात्रग्रहणम्।

१०. दृष्टान्तोपनयनिगमनत्रयाभ्युपगमे। ११. उपगमः। १२. अप्रयोजनात्।

बालानामल्पप्रज्ञानां व्युत्पत्त्यर्थं तेषामुदाहरणादीनां त्रयोपगमे शास्त्र एवासौ तस्योपगमो न वादे[1]। न हि वादकाले शिष्या व्युत्पाद्याः, व्युत्पन्नानामेव तत्राधिकारादिति।

बालव्युत्पत्यर्थं तत्त्रयोपगम इत्यादिना शास्त्रेऽभ्युपगतमेवोदाहरणादित्रयमुपदर्शयति—

दृष्टान्तो द्वेधा—[2]अन्वय-[3]व्यतिरेकभेदात् ॥४३॥

दृष्टौ अन्तौ[4] साध्यसाधनलक्षणौ [5]धर्मौ [6]अन्वयमुखेन व्यतिरेकद्वारेण वा यत्र[7] स दृष्टान्त इत्यन्वर्थसञ्ज्ञाकरणात्। स द्वेधैवोपपद्यते।

तत्रान्वयदृष्टान्तं दर्शयन्नाह—

[8]साध्यव्याप्तं साधनं यत्र प्रदर्श्यते सोऽन्वयदृष्टान्तः[9] ॥४४॥

अल्प बुद्धिवाले बालकोंके ज्ञान करानेके लिए उन उदाहरण, उपनय और निगमन इन तीन अवयवोंके स्वीकार कर लेनेपर भी शास्त्रके पठन-पाठनकालमें ही उनका उपयोग है, वादमें नहीं। वादके समय शिष्योंको समझाया नही जाता; क्योंकि वादमें तो व्युत्पन्न पुरुषोंका ही अधिकार होता है।

बाल-व्युत्पत्तिके लिए उन तीनोंको स्वीकार किया गया है, अतः शास्त्रमें स्वीकृत उन उदाहरणादिक तीनों अवयवोंका स्वरूप बतलाते हैं—

सूत्रार्थ—दृष्टान्त दो प्रकारका है—अन्वयदृष्टान्त और व्यतिरेकदृष्टान्त ॥४३॥

जहाँपर साध्य और साधन लक्षणवाले दोनों धर्म अन्वयमुखसे अथवा व्यतिरेकरूपसे देखे जावें, वह दृष्टान्त कहलाता है, दृष्टान्तकी ऐसी अन्वर्थ संज्ञा जानना चाहिए। वह दृष्टान्त दो प्रकारका ही सम्भव है।

उनमें से अन्वय दृष्टान्तको दिखलाते हुए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—जहाँपर साध्यके साथ साधनकी व्याप्ति दिखलाई जावे, वह अन्वयदृष्टान्त है ॥४४॥

---

१. वादे। २. हेतुसत्त्वे साध्यसत्त्वमन्वयः। ३. साध्याभावे हेत्वभावो व्यतिरेकः। ४. अन्तः पदार्थसामीप्यधर्मसत्यव्यतीतिषु इति धनञ्जयः। ५. धर्मः पुण्यं यमन्यायस्वभावाचारसोमपाः। ६. न तत्रोपलब्धिहेतोर्विवक्षा। ७. वस्तुनि। ८. सामान्यतः स्वरूपं दृष्टान्तेनोक्तम्, विशेषतस्तु तत्स्वरूपं साध्यव्याप्तमित्यादिना दर्शयति। ९. यथाऽग्नौ साध्ये महानसादिः।

[1]साध्येन व्याप्तं नियतं[2] साधन हेतुर्यत्र दर्श्यते [3]व्याप्तिपूर्वकतयेति भावः[4]।

द्वितीयभेदमुपदर्शयति—

साध्याभावे साधनाभावो यत्र कथ्यते स व्यतिरेकदृष्टान्तः[5] ॥४५॥

[6]असति असद्भावो[7] व्यतिरेकः। तत्प्रधानो दृष्टान्तो व्यतिरेकदृष्टान्तः[8]। साध्याभावे साधनस्याभाव एवेति [9]सावधारणं द्रष्टव्यम्।

क्रमप्राप्तमुपनयस्वरूपं निरूपयति—

हेतोरुपसंहार उपनयः[10] ॥४६॥

पक्षे इत्यध्याहारः। तेनायमर्थः—हेतोः पक्षधर्मतयोपसंहार उपनय इति।

निगमनस्वरूपमुपदर्शयति—

साध्यके साथ निश्चयसे व्याप्ति रखनेवाला साधन जहाँपर दिखलाया जावे वह अन्वयदृष्टान्त है। जैसे—जहाँ-जहाँ धूम होता है, वहाँ-वहाँ अग्नि होती है, जैसे रसोईघर।

अब दृष्टान्तके दूसरे भेदको बतलाते हैं

सूत्रार्थ—जहाँपर साध्यके अभावमें साधनका अभाव कहा जावे, वह व्यतिरेक दृष्टान्त है ॥४५॥

साध्यके अभावमें साधनका अभाव होना व्यतिरेक कहलाता है। व्यतिरेकप्रधान दृष्टान्तको व्यतिरेक दृष्टान्त कहते हैं। जैसे जहाँ अग्नि नहीं, वहाँ धूम भी नहीं होता, यथा जलाशय। इस प्रकार साध्यके अभावमें साधनका अभाव हो ही, ऐसा अवधारणरूप एवकार यहाँपर जानना चाहिए।

अब क्रम-प्राप्त उपनयका स्वरूप-निरूपण करते हैं—

सूत्रार्थ—हेतुके उपसंहारको उपनय कहते हैं ॥४६॥

यहाँपर पक्ष इस पदका अध्याहार करना चाहिए। तव यह अर्थ होता है कि हेतुका पक्षधर्मरूपसे उपसंहार करना अर्थात् 'उसी प्रकार यह धूमवाला है' इस प्रकारसे हेतुका दुहराना उपनय है।

अब आचार्य निगमनका स्वरूप दिखलाते हैं—

---

१. जन्यजनकादिभावेन। २. अविनाभावित्वेन निश्चितम्। ३. धूमजलयोर्व्याप्तिः स्यादिति शङ्कां परिहरति—न धूमजलयोर्व्याप्तिस्तत्र जन्यजनकत्वाभावात्। यो यज्जन्यस्तेन तस्य व्याप्तिरिति नियमात्। ४. अभिप्रायः। भावः पदार्थचेष्टात्मसत्ताभिप्रायजन्मसु। ५. यथाऽग्नौ साध्ये महाह्रदादिः। ६. साध्याभावे। ७. साधनाभावः। ८. मध्यमपदलोपी समासः। ९. एवकारः। सामान्यनियमं सावधारणम्। १०. साध्याविनाभावित्वेन विशिष्टे साध्यधर्मिणि उपनीयते पुनरुच्चार्यते हेतुर्येन स उपनयः।

प्रतिज्ञायास्तु निगमनम्[1] ॥४७॥

उपसंहार इति [अनु-] वर्तते। प्रतिज्ञाया उपसंहारः साध्यधर्मविशिष्टत्वेन प्रदर्शनं निगमनमित्यर्थः। ननु[2] शास्त्रे दृष्टान्तादयो वक्तव्या एवेति [3]नियमानभ्युपगमा-त्कथं[4] [5]तत्त्रयमिह सूरिभिः [6]प्रपञ्चितमिति न चोद्यम्; स्वयमनभ्युपगमेऽपि प्रतिपाद्या-नुरोधेन[7] जिनमतानुसारिभिः प्रयोगपरिपाट्याः[8] प्रतिपन्नत्वात्[9]। सा[10] चाज्ञात[11]तत्स्व-रूपैः[12] कर्तुं न शक्यत इति [13]तत्स्वरूपमपि शास्त्रेऽभिधातव्यमेवेति।

तदेवं मतभेदेन द्वि त्रि-चतुः-पञ्चावयवरूपमनुमानं द्विप्रकारमेवेति दर्शयन्नाह—

तदनुमानं द्वेधा ॥४८॥

सूत्रार्थ—प्रतिज्ञाके उपसंहारको निगम कहते हैं ॥४७॥

इस सूत्रमें उपसंहार पदकी अनुवृत्ति की गई है। प्रतिज्ञाका उपसंहार अर्थात् साध्य धर्म-विशिष्टताके साथ कि धूमवाला होनेसे यह अग्निवाला है, इस प्रकार प्रतिज्ञाका दुहराना निगमन है।

शङ्का—शास्त्रमें दृष्टान्त आदिक कहना ही चाहिए, ऐसा नियम नहीं माना गया है, फिर आचार्योंने यहांपर उन तीनोंका कथन क्यों किया है?

समाधान—ऐसी शङ्का नहीं करना चाहिए; क्योंकि स्वयं नहीं स्वीकार करके भी प्रतिपाद्य (शिष्य) के अनुरोधसे जिनमतका अनुसरण करनेवाले आचार्योंने प्रयोगकी परिपाटीको स्वीकार किया है। जिन्होंने इन उदाहर-णादिकोंका स्वरूप नहीं जाना है, वे लोग प्रयोग-परिपाटीको कर नहीं सकते हैं। अतः उनकी जानकारीके लिए उनका स्वरूप भी शास्त्रमें कहना ही चाहिए। इसलिए यहाँपर उदाहरणादिका स्वरूप आचार्यने कहा है।

इस प्रकार मत-भेदकी अपेक्षा दो, तीन, चार और पांच अवयवरूप जो अनुमान है वह दो प्रकारका ही है यह दिखलाते हुए आचार्य उत्तर सूत्र कहते है—

सूत्रार्थ—वह अनुमान दो प्रकारका है ॥४८॥

---

१. प्रतिज्ञाहेतूदाहरणोपनयाः साध्यलक्षणैकार्थतया निगम्यन्ते सम्बद्ध्यन्ते येन तन्निगमनमिति। २. साङ्ख्यादयः प्राहुः। ३. यदा शिष्यो व्युत्पन्नो भवति तदा शास्त्र-प्रतिपादनकाले दृष्टान्तादिकं प्रतिपाद्यं न भवति, प्रयोजनाभावात्। यदा तु शिष्योऽव्युत्पन्नो भवति तदा शास्त्रे तेभ्य उपदेशादिति। ४. भवतां जैनानाम्। ५. दृष्टान्तोपनयनिगमन-त्रयमिति। ६. विस्तारितम्। ७. शिष्यानुरोधेन। ८. अन्यथानुपपत्त्येकलक्षणं लिङ्ग-मङ्गयते। प्रयोगपरिपाटी तु प्रतिपाद्यानुरोधतः ॥ १ ॥ ९. अङ्गीकृतत्वात्। १०. प्रयोगपरिपाटी। ११. दृष्टान्तादीनाम्। १२. पुरुषैः। १३. अनुमानस्वरूपमपि।

तद्द्वैविध्यमेवाऽऽह—

स्वार्थपरार्थभेदात् ॥४९॥

स्वपरविप्रतिपत्तिनिरासफलत्वाद् द्विविधमेवेति भावः ।

स्वार्थानुमानभेदं दर्शयन्नाह—

स्वार्थमुक्तलक्षणम् ॥५०॥

साधनात्साध्यविज्ञानमनुमानमिति प्रागुक्तं लक्षणं यस्य तत्तथोक्तमित्यर्थः ।

द्वितीयमनुमानभेदं दर्शयन्नाह—

[1]परार्थं तु [2]तदर्थपरामर्शिवचनाज्जातम् ॥५१॥

अब आचार्य उन दोनों भेदोंको बतलाते हैं—

सूत्रार्थ—एक स्वार्थानुमान और दूसरा परार्थानुमान ॥४९॥

स्व और परके विवादको निराकरण करना ही दोनों प्रकारके अनुमानों का फल है, ऐसा अभिप्राय जानना चाहिए।

भावार्थ—स्व-विषयक विवादका निराकरण करना स्वार्थानुमानका फल है और परके विवादका निराकरण करना परार्थानुमानका फल है।

अब स्वार्थानुमानका स्वरूप बतलाते हुए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—स्वार्थानुमानका लक्षण कहा जा चुका है ॥५०॥

साधनसे साध्यके ज्ञानको अनुनान कहते हैं, ऐसा जो पहले अनुमानका लक्षण कह आये हैं, वही स्वार्थानुमानका स्वरूप जानना चाहिए।

भावार्थ—दूसरेके उपदेश विना स्वतः ही साधनसे साध्यका जो अपने लिए ज्ञान होता है, उसे स्वार्थानुमान कहते हैं।

अब अनुमानके दूसरे भेदका स्वरूप बतलानेके लिए उत्तर सूत्र कहते हैं—

सूत्रार्थ—उस स्वार्थानुमानके विषयभूत अर्थका परामर्श करनेवाले वचनोंसे जो ज्ञान उत्पन्न होता है, उसे परार्थानुमान कहते है ॥५१॥

---

१. साधनात्साध्यविज्ञानमनुमानमित्यनुमानसामान्यलक्षणस्य परार्थानुमानेऽपि सद्भावात् स्वार्थपरार्थानुमानयोः को भेद इति शङ्कायामाह । [अथवा] ननु परार्थमविशेषरूपं भवति विशेषे सामान्यं प्रवर्तनीयम्, प्रागुक्तं लक्षणमत्रापि वक्तव्यम्? सामान्यं विहाय विशेषस्तु प्रवर्तते एवं चेत् परार्थे सुनार्थानुमानं भवति, इति शङ्का सा परिहर्त्तव्या? वचनमपि साधन न भवति, अविनाभावप्रतिपादकत्वात् साधकत्व तत्सामान्यमागतम् । २. धूमाद्वह्निविज्ञानमनुमानमित्यर्थपरामर्शि यद्वचनं तस्माद्वचनरूपसाधनात्

तस्य स्वार्थानुमानस्यार्थः साध्यसाधनलक्षणः। तं[1] [2]परामृशतीत्येवं शीलं तदर्थ-परामर्शि। तच्च तद्वचनं च तस्माज्जातमुत्पन्नं विज्ञानं[3] परार्थानुमानमिति। ननु[4] वचनात्मकं[5] परार्थानुमानं प्रसिद्धम्। तत्कथ तदर्थप्रतिपादकवचनजनितविज्ञानस्य परार्थानुमानत्वमभिदधता[6] न संगृहीतमिति न वाच्यम्; [7]अचेतनस्य [8]साक्षात्प्रमितिहेतुत्वाभावेन [9]निरुपचरितप्रमाणभावाभावात्। [10]मुख्यानुमानहेतुत्वेन [11]तस्योपचरिता[12]नुमानव्यपदेशो[13] न वार्यत एव।

उस स्वार्थानुमानका अर्थ जो साध्य-साधन लक्षणवाला पदार्थ, उसे परामर्श अर्थात् विषय करना है स्वभाव जिसका उसे तदर्थ-परामर्शि कहते हैं। ऐसे तदर्थ-परामर्शि वचनोंसे जो विज्ञान उत्पन्न होता है, वह परार्थानुमान है, ऐसा जानना चाहिए।

भावार्थ—दूसरेके वचनोंके द्वारा साधनसे जो साध्यका ज्ञान होता है वह परार्थानुमान है और दूसरोंके वचनके विना हो स्वयं साधनसे जो साध्यका ज्ञान होता हैं, वह स्वार्थानुमान है, यही दोनामें भेद है।

शङ्का—नैयायिक कहते है कि वचनात्मक परार्थानुमान होता है यह वात प्रसिद्ध है, फिर अनुमानके विषयभूत अर्थके प्रतिपादक वचनोंसे उत्पन्न हुए विज्ञानको परार्थानुमान कहनेवाले आचार्यने उक्त लक्षणका संग्रह क्यों नहीं किया?

समाधान—ऐसा नहीं कहना चाहिए; क्योंकि अचेतन वचन साक्षात् प्रमिति अर्थात् अज्ञानकी निवृत्तिमें कारण नहीं हो सकते है, अतः उन वचनों के निरुपचरित (मुख्य) रूपसे प्रमाणताका अभाव है। हाँ, ज्ञानरूप मुख्य

(परोपदेशात्) यद्धूमाद्वन्हिविज्ञानं जायते तत्परार्थानुमानम्। वचनमन्तरेण यद्धूमादिसाधनादग्न्यादिसाध्यविज्ञानं भवति तत्स्वार्थानुमानमित्यनयोर्भेदः। १. तदर्थम्। २. द्योतयति विषयीकरोति। ३. पर्वतोऽयं वन्हिमान् धूमवत्वादिति वचनश्रवणादेव पूर्वं धूमज्ञानं भवति, पश्चात्ततो वन्हिविज्ञानमित्यभिप्रायः। न तु वचनस्य साक्षादनुमानत्वं वचनाज्जातस्य ज्ञानस्यानुमानत्व वचनस्योपचारत्वेनेति भावः। ४. नैयायिकः प्राह। ५. पञ्चावयवरूपम्। ६. कथयता जैनेन। ७. वचनस्य। ८. अज्ञाननिवृत्ति-। ९. मुख्य-। १०. ज्ञानरूपानुमानस्य। ११. वचनस्य। १२. यथा विषयिधर्मस्य विषय उपचारात्पदार्थस्यापि प्रत्यक्षता, कार्यस्य कारण उपचारादिन्द्रियस्यापि प्रत्यक्षता, यद्वा इन्द्रियार्थसम्बन्धस्यापि प्रत्यक्षेणोपचारित्वम्, अथवा घटस्यैवैकापेक्षया प्रत्यक्षत्वं तज्जन्यं भवति, तथापि तस्योपचारता, तथा वचनस्याप्युपचारनिमित्तं प्रतिपादकप्रतिपाद्यापेक्षयाऽनुमानकार्यकरणत्वमिति। १३. नाम।

[1]तदेवोपचरितं परार्थानुमानत्वं[2] तद्वचनस्या[3]ऽऽचार्यः प्राह—

[4]तद्वचनमपि तद्धेतुत्वात् ॥५२॥

उपचारो हि मुख्याभावे[5] सति [6]प्रयोजने निमित्ते[7] च प्रवर्तते[8]। [9]तत्र वचनस्य परार्थानुमानत्वे निमित्तं तद्धेतुत्वम्। तस्य [10]प्रतिपाद्यानुमानस्य [11]हेतुस्तद्धेतुः; तस्य भावस्तत्त्वम्। तस्मान्निमित्तात्तद्वचनमपि परार्थानुमानप्रतिपादकवचनमपि परार्थानुमानमिति सम्बन्धः; [12]कारणे कार्यस्योपचारात्। [13]अथवा तत्प्रतिपादकानुमान[14] हेतुर्यस्य[15] तत्तद्धेतुः;

अनुमानके हेतु होनेसे उन वचनोंकी उपचरित (गौण) अनुमानसंज्ञाको कोई रोक नहीं सकता है। अर्थात् वचनोंको गौणरूपसे परार्थानुमान कहा जा सकता है।

परार्थानुमानके प्रतिपादक वचनोंकी उपचारसे परार्थानुमानसंज्ञा है, यह बतलानेके लिए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—परार्थानुमानके कारण होनेसे परार्थानुमानके प्रतिपादक वचनोंको भी परार्थानुमान कहते हैं ॥५२॥

मुख्यका अभाव होनेपर, तथा प्रयोजन और निमित्तके होनेपर उपचारकी प्रवृत्ति होति है, ऐसा नियम है। यहाँ वचनका परार्थानुमानपनेमें कारणपना ही उपचारका निमित्त है। अतः प्रतिपाद्य जो शिष्य उसके लिए जो अनुमान सो परार्थानुमान, उसका प्रतिपादक वचन भी परार्थानुमान है, ऐसा सम्बन्ध करना चाहिए। यहाँ अनुमानके कारण वचनोंमें ज्ञानरूप कार्यका उपचार किया गया है। अथवा परार्थानुमानका प्रतिपादक जो वक्ता पुरुप उसका स्वार्थानुमान है कारण जिसके ऐसा जो परार्थानुमानका वचन

---

१. उक्तमेव। २. मुख्यप्रमाणता ज्ञानस्यैव। मुख्यानुमानहेतुत्वादिति चेति वा। ३. परार्थानुमानप्रतिपादकवचनस्य। ४. विज्ञानलक्षणपरार्थानुमानवचनमपि परार्थानुमानं तद्धेतुत्वात्। ५. वचने ज्ञानलक्षणमुख्यानुमानस्याभाव इति मुख्यार्थबाधः। [अयमर्थः-] मुख्याभाव-प्रयोजन-निमित्तेषु त्रिषु मध्ये वचनं ज्ञानं न भवति, इति मुख्यार्थबाधः वचनज्ञानस्य निमित्तम्। ६. वचनस्यानुमानत्वे प्रयोजनमनुमानावयवाः प्रतिज्ञादय इति शास्त्रे व्यवहार एव। तात्पर्यं फलमित्यर्थस्तत्रोपचारः प्रवर्तते। ७. हेतौ। वचनं ज्ञानस्य निमित्तमिति। ८. त्रयं विहाय न प्रवर्तते। ९. मुख्याभाव-प्रयोजन-निमित्तेषु। १०. परार्थानुमानस्य। ११. प्रतिपादकत्वाद्वचनं हेतुः, निमित्तकारणमित्यर्थः। १२. अग्नौ। वचनात्मके कारणे कार्यस्य विज्ञानलक्षणस्य परार्थानुमानस्योपचारात्। १३. प्रकारान्तरेणाह। १४. प्रतिपादकज्ञानलक्षणं स्वार्थानुमानम्। १५. वचनस्य।

तस्य भावस्तत्त्वम्। ततस्तद्वचनमपि[1] तथेति[2] सम्बन्धः। अस्मिन् पक्षे [3]कार्ये [4]कारणस्योपचार इति शेषः। [5]वचनस्यानुमानत्वे च प्रयोजनमनुमानावयवाः प्रतिज्ञादय इति शास्त्रे व्यवहार एव; [6]ज्ञानात्मन्यनंशे[7] [8]तद्-व्यवहारस्याशक्यकल्पनात्। तदेवं साधनात् साध्यविज्ञानमनुमानमित्यनुमानसामान्यलक्षणम्।

तदनुमानं द्वेधेत्यादिना [9]तत्प्रकारं च सप्रपञ्चमभिधाय साधनमुक्त[10]लक्षणापेक्षयैकमप्यतिसक्षेपेण भिद्यमानं द्विविधमित्युपदर्शयति—

स[11] हेतुर्द्वेधोपलब्ध्यनुपलब्धिभेदात् ॥५३॥

सुगममेतत्।

वह भी अनुमान है, ऐसा सम्बन्ध करना चाहिए। इस पक्षमें कार्यमें कारणका उपचार किया गया है, इतना अर्थ सूत्रमें शेष है। वचनको अनुमानपना कहनेमें प्रयोजन यह है कि प्रतिज्ञा, हेतु आदिक अनुमानके अवयव हैं, ऐसा शास्त्रमें व्यवहार है। ज्ञानात्मक और निरंश अर्थात् अवयव-रहित अनुमानमें प्रतिज्ञा, हेतु आदिके व्यवहारकी कल्पना करना अशक्य है। अतः वचनोंके द्वारा ही प्रतिज्ञादि अवयवोंके प्रयोगरूप व्यवहारकी प्रवृत्ति होती है, इससे उसके प्रतिपादक वचनोंको भी परार्थानुमान संज्ञा दी गई है। इस प्रकार साधनसे साध्यका जो ज्ञान होता है, वह अनुमान है, ऐसा अनुमानका सामान्य लक्षण जानना चाहिए।

वह अनुमान दो प्रकारका है, इत्यादि रूपसे उसके भेदोंको भी विस्तारसे कहकर ऊपर कहे गये लक्षणकी अपेक्षा यद्यपि वह साधन एक प्रकारका ही है, तथापि अतिसंक्षेपसे भेद करनेपर वह दो प्रकारका है, यह बात आचार्य उत्तर सूत्रके द्वारा दिखलाते हैं—

सूत्रार्थ—अविनाभावलक्षणवाला वह हेतु दो प्रकारका है—एक उपलब्धिरूपहेतु और दूसरा अनुपलब्धिरूप हेतु ॥ ५३ ॥

यह सूत्र सुगम है।

---

१. स्वार्थानुमानज्ञानस्यार्थपरामर्शि वचनमपि। २. स्वार्थानुमानमिति सम्बन्धः, कार्ये कारणस्योपचारात्। ३. स्वार्थानुमानवचनलक्षणे कार्ये। ४. स्वार्थानुमानविज्ञानलक्षणस्य कारणस्योपचारः। ५. ज्ञानस्य प्रतिज्ञाद्यवयवा भवन्तित्याशङ्कायामाह। ६. अनुमाने। ७. निरवयवे। ८. प्रतिज्ञादिव्यवहारस्य। ९. अनुमानभेदम्। १०. अन्यथानुपपन्नत्वलक्षणापेक्षया। ११. योऽधिकारापन्नोऽविनाभावलक्षणलक्षितः प्राक् प्रतिपादितः सः।

तत्रोपलब्धि[1]विधि[2]साधिकैव । अनुपलब्धिः[3] [4]प्रतिषेधसाधिकैवेति परस्य नियमं [5]विघटयन्नुपलब्धेरनुपलब्धेश्चाविशेषेण विधि-[6]प्रतिषेधसाधनत्वमाह—

[7]उपलब्धिर्विधिप्रतिषेधयोरनुपलब्धिश्च ॥५४॥

गतार्थमेतत् ।

इदानीमुपलब्धेरपि संक्षेपेण विरुद्धाविरुद्धभेदाद् द्वैविध्यमुपदर्शयन्नविरुद्धोपलब्धेर्विधौ साध्ये विस्तरतो भेदमाह—

इनमेंसे उपलब्धि नाम विद्यमानताका है, अतः बौद्ध लोग उपलब्धिरूप हेतुको विधि अर्थात् सद्भावका साधक मानते हैं। इसी प्रकार अनुपलब्धि नाम अविद्यमानताका है, अतः उसे वे लोग प्रतिषेध अर्थात् अभावका ही साधक मानते हैं। आचार्य दूसरे मतावलम्बियोंके उक्त नियमका निषेध करते हुए बतलाते हैं कि उपलब्धि और अनुपलब्धिरूप दोनों ही हेतु विधि और प्रतिषेध दोनोंके साधक हैं—

सूत्रार्थ—उपलब्धिरूप हेतु भी विधि और प्रतिषेध दोनोंका साधक है, तथा अनुपलब्धिरूप हेतु भी दोनोंका साधक है ॥ ५४ ॥

इस सूत्रका अर्थ कहा जा चुका है।

भावार्थ—उपलब्धिरूप हेतुके दो भेद हैं—अविरुद्धोपलब्धि और विरुद्धोपलब्धि। इनमे पहला विधिसाधक है और दूसरा प्रतिषेधसाधक। इसी प्रकार अनुपलब्धिरूपहेतुके भी दो भेद है—अविरुद्धानुपलब्धि और विरुद्धानुपलब्धि। इनमेंसे पहला निषेधसाधक है और दूसरा विधिसाधक। इस प्रकार उपलब्धि और अनुपलब्धिरूप दोनों हेतु विधि और निषेध दोनोंके साधक होते हैं।

अब आचार्य उपलब्धिरूप हेतुके भी संक्षेपसे विरुद्ध-अविरुद्धके भेदसे दो भेद बतलाते हुए अविरुद्धोपलब्धिके विधिको सिद्ध करनेमें विस्तारसे भेद बतलाते है—

---

१. प्राप्तिः। २. अस्तित्वम्। ३. निषेधः। ४. न त्वत्रान्वयव्यतिरेकदृष्टान्तयोर्विवक्षा, किन्तु हेतोरपेक्षा। ५. निषेधयन् आचार्यः। ६. उपलब्धिर्विधिं साधयति प्रतिषेधं च। तथाऽनुपलब्धिर्निषेधं साधयति विधिं च। तस्मादुभयोरपि विधिप्रतिषेधत्वं वर्तते। ततस्तयोर्विशेषाभावः इति दर्शयति। ७. अविनाभावनिमित्तो हि साध्यसाधनयोर्गम्यगमकभावः। यथा चोपलब्धेर्विधौ साध्येऽविनाभावाद्गमकत्वं तथोपलब्धेः प्रतिषेधेऽपि साध्येऽविनाभावाद् गमकत्वम्। अनुपलब्धेश्च यथा प्रतिषेधे साध्येऽविनाभावाद् गमकत्वं तथाऽनुपलब्धेर्विधावपि साध्येऽविनाभावाद् गमकत्वमिति।

अविरुद्धोपलब्धिर्विधौ[1] षोढा-[2]व्याप्यकार्यकारणपूर्वोत्तरसहचर-भेदात् ॥५५॥

पूर्वं च उत्तरं च सह चेति द्वन्द्वः । पूर्वोत्तरसह इत्येतेभ्यश्चर इत्यनुकरणनिर्देशः,[3] द्वन्द्वात् श्रूयमाणश्चरशब्दः प्रत्येकमभिसम्बध्यते । तेनायमर्थः—पूर्वचरोत्तरचरसहचरा इति । पश्चाद् व्याप्यादिभिः सह द्वन्द्वः ।

अत्राह सौगतः—विधिसाधनं[4] द्विविधमेव, [5]स्वभाव-[6]कार्यभेदात् । कारणस्य तु कार्याविनाभावाभावादलिङ्गत्वम्[7] । नावश्य कारणानि[8] कार्यवन्ति भवन्तीति वचनात् । अप्रतिबद्धसामर्थ्यस्य[9] कार्यम्प्रति गमकत्वमित्यपि नोत्तरम्; सामर्थ्यस्यातीन्द्रियतया[10] विद्यमानस्यापि निश्चेतुमशक्यत्वादिति । [11]तदसमीक्षिताभिधानमिति दर्शयितुमाह—

सूत्रार्थ—विधि-साधनकी दशामें अविरुद्धोपलब्धि छह प्रकारकी है—१. अविरुद्धव्याप्योपलब्धि, २. अविरुद्धकार्योपलब्धि, ३. अविरुद्धकारणोपलब्धि, ४. अविरुद्धपूर्वचरोपलब्धि, ५. अविरुद्धोत्तरचरोपलब्धि और ६. अविरुद्धसहचरोपलब्धि ॥५५॥

सूत्र पठित पूर्व, उत्तर और सह पदका द्वन्द्व समास करना, पश्चात् पूर्व, उत्तर और सह पदके साथ चर शब्दका अनुकरण निर्देश करना । इस प्रकार द्वन्द्व समाससे पीछे सुना गया चर शब्द प्रत्येकके साथ लगाना चाहिए । तदनुसार यह अर्थ होता है—पूर्वचर, उत्तरचर और सहचर । पश्चात् व्याप्य आदि पदोंके साथ द्वन्द्व समास करना चाहिए ।

यहाँपर बौद्ध कहते है कि स्वभावहेतु और कार्यहेतुके भेदसे विधि-साधक हेतु दो ही प्रकारका है; क्योकि कारणका कार्यके साथ अविनाभावका अभाव होनेसे उसे हेतु नहीं माना जा सकता । सभी कारण कार्यवाले अवश्य होते है, ऐसा कोई नियम नहीं है, ऐसा वचन है । यदि आप जैन लोग कहें कि मणि-मन्त्रादिसे जिसकी सामर्थ्य रोकी नहीं गई है, ऐसा कारण कार्यके प्रति गमक होता है, सो यह भी कोई उत्तर नहीं है; क्योंकि सामर्थ्य अतीन्द्रिय है अर्थात् इन्द्रिय-गोचर नहीं है, अतः विद्यमान रहते हुए भी उसका निश्चय नहीं किया जा सकता । इसलिए कारणरूप हेतुका मानना ठीक नहीं है । उनका यह कथन सम्यक् विचार किए विना है, यह दिखलाते हुए आचार्य उत्तर सूत्र कहते है—

१. अस्तित्वे साध्ये । २. शिंशपा-पलाशवृक्षस्य । ३. पश्चान्निर्देशः । ४. विधि-साधनहेतुः । ५. वृक्षत्वशिंशपात्वयोः । ६. धूमाग्न्योः । ७. असाधनत्वम् । ८. दण्डादीनि । ९. मणिमन्त्रादिनाऽप्रतिहतसामर्थ्यस्य । १०. अप्रत्यक्षतया । ११. पूर्वोक्तम् ।

[1]रसादेकसामग्र्यनुमानेन [2]रूपानुमानमिच्छद्भि[3]रिष्टमेव [4]किञ्चित्कारणं हेतुर्यत्र[5] सामर्थ्याप्रतिबन्ध[6]-कारणान्तरावैकल्ये[7] ॥५६॥

आस्वाद्यमानाद्धि रसात्तज्जनिका [8]सामग्र्यनुमीयते। ततो[9] रूपानुमानं भवति। [10]प्राक्तनो हि रूपक्षणः सजातीयं रूपक्षणान्तरं कार्यं कुर्वन्नेव विजातीयं रसलक्षण कार्यं करोतीति रूपानुमानमिच्छद्भिरिष्टमेव किञ्चित्कारणं[11] हेतुः प्राक्तनस्य रूपक्षणस्य सजातीयरूपक्षणान्तराव्यभिचारात्। [12]अन्यथा रससमानकालरूपप्रतिपत्तेरयोगात्[13]। न[14] ह्यनुकूल[15]-

सूत्रार्थ—रससे एक सामग्रीके अनुमान-द्वारा रूपका अनुमान स्वीकार करनेवाले बौद्धोंने कोई विशिष्ट कारणरूप हेतु माना ही है, जिसमें कि सामर्थ्यका प्रतिबन्ध नहीं है और दूसरे कारणोंकी विकलता नहीं है ॥५६॥

आस्वाद्यमान रससे उसकी उत्पादक सामग्रीका अनुमान किया जाता है कि इस रसकी उत्पादक सामग्री उत्पन्न हो चुकी है, अन्यथा इस समय रसका स्वाद न आता। तत्पश्चात् उससे रूपका अनुमान होता है। वह यह कि पूर्वकालीन रूपक्षण सजातीय अन्य रूपक्षणरूप कार्यको उत्पन्न करता हुआ ही विजातीय रस-लक्षण कार्यको करता है, इस प्रकारसे रूपका अनुमान स्वीकार करनेवाले बौद्धोंने कोई कारणरूप हेतु माना ही है; क्योंकि पूर्वकालवर्ती रूपक्षणका सजातीय उत्तरकालवर्ती अन्य रूपक्षणके साथ कोई व्यभिचार नहीं पाया जाता। अन्यथा (यदि व्यभिचार पाया जाता तो) रसके समकालमें ही रूपका ज्ञान नहीं हो सकता था। हम जैन लोग केवल

१. अन्धकारावगुण्ठिते प्रदेशे आस्वाद्यमानो रसः स्वसमानसमयकारणकार्यो भवति, एवंविधरसत्वात्, साम्प्रतिकरसवत्, इति रूप-रसयोः एकसामग्र्यनुमानम्। २. इदानीं रूपानुमानं विचारापन्ने मातुलिङ्गे रससमानकालीनं रूपमस्ति, एकसामग्र्यधीनत्वात् सम्प्रतिपन्नरसवत्। पूर्वरूपक्षणं सजातीयमुत्तररूपक्षणं जनयन्नेव विजातीयमुत्तररसक्षणं जनयति, कारणक्षणत्वाद् अनुभूतरसक्षणवत्। आस्वाद्यमानो रसः स्वसमानकालीनपूर्वरूपक्षणसहकृतसमनन्तररसक्षणजन्यः, कार्यक्षणत्वाद अनुभूयमानरसक्षणवत्। ३. सौगतैरिति शेषः। ४. विशिष्टम्; नानुकूलादिरूपम्। ५. कारणे। ६. मन्त्रौषधादिना प्रतिबन्धः। ७. पूर्वक्षणमुत्तरक्षणस्य कारणमन्त्यक्षणो यदान्यक्षणोत्पादको न भवति तदा वैकल्यं पूर्वक्षणापेक्षयाऽन्त्यक्षणः कारणान्तरं तदेव यदा विकलमिति। सहकारिणां क्षित्यादीनां वैकल्यमित्यर्थः। ८. रसादेकसामग्र्यनुमानेन रूपानुमानमिति योजना। ९. पश्चात्। १०. पूर्वरूपक्षणः सजातीयोत्तररूपक्षणं जनयन्नेव विजातीयोत्तररसक्षणं जनयति कारणक्षणत्वादनुभूतरसक्षणवदिति। ११. कारणं हेतुं साधनमङ्गीकर्तव्यम्। १२. व्यभिचरति चेत्। १३. रूपरसयोः समानकालीनप्रतिपत्तेरयोगात्। १४. बौद्धमतममूद्य जैनाः कथयन्ति। १५. दण्डादि।

[1]मात्रमन्त्यक्षणप्राप्तं[2] वा कारणं[3] लिङ्गमिष्यते; येन[4] मणिमन्त्रादिना सामर्थ्यप्रतिबन्धात्कारणान्तरवैकल्येन[5] वा कार्यव्यभिचारित्वं[6] स्यात्। [7]द्वितीयक्षणे कार्य[8]प्रत्यक्षीकरणेनानुमानानर्थक्यं[9] वा; कार्याविनाभावितया निश्चितस्य विशिष्टकारणस्य [10]छत्रादेर्लिङ्गत्वेनाङ्गीकरणात्[11]। यत्र सामर्थ्याप्रतिबन्धः कारणान्तरावैकल्यं निश्चियते, तस्यैव लिङ्गत्वं; नान्यस्येति नोक्तदोषप्रसङ्गः।

अनुकूल, अथवा अन्त्यक्षण-प्राप्त अर्थात् कार्य उत्पन्न होनेके अव्यवहित पूर्व-क्षणवाले कारणको लिङ्ग (हेतु) नहीं मानते, जिससे कि मणि-मन्त्रादिके द्वारा सामर्थ्यके प्रतिबन्धसे, अथवा अन्य सहकारी कारणोंकी विकलतासे वह कार्यके साथ व्यभिचारपनेको प्राप्त हो। अथवा द्वितीय क्षणमें कार्यके प्रत्यक्ष करनेसे अनुमानकी व्यर्थता हो; क्योंकि हमने कार्यके साथ अविनाभावरूपसे निश्चित विशिष्ट कारणरूप छत्रादिको लिङ्गरूपसे स्वीकार किया है। जिसमें सामर्थ्यका अप्रतिबन्ध और कारणान्तरोंकी अविकलता निश्चित की जाती है, उसके ही लिङ्गपना माना है, अन्यके नहीं; इस प्रकार उक्त दोषका प्रसङ्ग प्राप्त नहीं होता।

विशेषार्थ—यह पहले बतला चुके है कि बौद्ध लोग कारणरूप हेतुको नहीं मानते। आचार्यने उनकी मान्यताके अनुसार यह सिद्ध किया है, कि वे लोग भी कारणरूप हेतुको मानते ही है। उनकी मान्यता यह है कि वर्तमानकाल-वर्ती रससे उसकी एक सामग्री (उत्पादक सामग्री) का अनुमान होता है और एक सामग्रीके अनुमानसे रस-समान-कालवर्ती रूपका अनुमान होता है। उत्तर रसक्षण और उत्तर रूपक्षण दोनोंकी सामग्री एक ही है; क्योंकि दोनों ही पूर्वरसक्षण और पूर्वरूपक्षणसे उत्पन्न होते है। उत्तर-रूपक्षणकी उत्पत्तिमे पूर्वरूपक्षण उपादानकारण और पूर्वरसक्षण सहकारी

१. मात्रग्रहणेन कार्येण सह कारणस्याविनाभावनिराकरणत्वमिति। २. द्वितीयक्षणम्, कार्याव्यवहितपूर्वक्षणप्राप्तं तन्तुसंयोगरूपमिति। ३. यथा प्रदीपे क्षणा बहवो जायन्ते विनश्यन्ति च, तथापि प्रदीपस्य विनाशकाले योऽसावन्त्यक्षण उत्तरक्षणं न जनयति तादृग्विधस्याङ्गीकारो नास्ति। ४. कथम्? ५. यथा बीजं कारणान्तरविकलं क्षितिपवनसलिलातपयोगरहितमङ्कुरं न प्ररोहतीत्यर्थान्तरम्। ६. तदेव नाङ्गीक्रियतेऽन उक्तदूषण न। ७. बौद्धमतमनूद्य दूषयति। ८. कारणेन कार्यं प्रत्यक्षं भविष्यतीति। ९. किं कारणमवलम्ब्यानुमानानर्थक्यं ब्रूपे? तदेव कारणं नास्ति बौद्धेन त्वयाऽनुमानभङ्गात्कारणस्य लिङ्गत्वं नाङ्गीक्रियते, अस्ति चाङ्गीकारस्त्वन्मते. अनुमानस्य च नास्ति वैयर्थ्यमिति। १०. आदिपदेन चन्द्रवृद्धेः। ११. अनुमानं वर्तते, वैयर्थ्यं न।

इदानीं पूर्वोत्तरचरयोः स्वभावकार्यकारणेष्वनन्तर्भावाद्[1] भेदान्तरत्वमेवेति दर्शयति—

न च पूर्वोत्तरचारिणोस्तादात्म्यं[2][3] तदुत्पत्तिर्वा[4], काल[5]व्यवधाने[6] तदनुपलब्धेः[7] ॥५७॥

कारण है। इसी प्रकार उत्तररसक्षणकी उत्पत्तिमें पूर्वरसक्षण उपादान-कारण और पूर्वरूपक्षण सहकारीकारण है। आचार्य उनके द्वारा मानी गई इस व्यवस्थासे ही कारणहेतुको उनके द्वारा माना जाना सिद्ध करते हैं। वह इस प्रकार कि किसी व्यक्तिने गहन अन्धकारमें आमको चखा। वह उसके मीठे रसके स्वादसे विचारता है कि इसका रूप पीला होना चाहिए। यहाँ वर्तमान रसक्षण पूर्व रसक्षण रूप उपादान-कारणसे और पूर्वरूपक्षणरूप सहकारी कारणसे उत्पन्न हुआ है। यतः पूर्व रूपक्षण सजातीय उत्तररूपक्षणरूप कार्यको उत्पन्न करता हुआ ही विजातीय उत्तररसक्षण रूप कार्यकी उत्पत्तिमें सहकारी होता है, अतः कारणभूत पूर्व-रूपक्षणसे कार्यस्वरूप उत्तररूपक्षणका अनुमान किया जाता है। इस प्रकार बौद्ध रससे एक सामग्रीके अनुमान-द्वारा रूपका अनुमान करते हैं, इसलिए उन्हींकी मान्यतासे यह सिद्ध होता है कि उन्होंने भी कारणरूप हेतुको माना ही है। यहाँ यह ज्ञातव्य है कि बौद्धमतमें प्रत्येक पदार्थ प्रतिक्षण विनश्वर है, अतः वे प्रतिक्षणवर्ती वस्तुका 'क्षण' नामसे व्यवहार करते हैं।

इस प्रकार रससे तज्जनक सामग्रीका और कारणरूप सामग्रीसे रूपका अनुमान माननेवाले बौद्धोंने कारणरूप हेतु स्वयं माना ही है जहांपर कि कारणकी सामर्थ्य किसी मणि-मन्त्रादिसे रोकी न गई हो, अथवा अन्य किसी सहकारी कारणकी कमी न हो। जहाँ कारणकी शक्ति किसी मणि-मन्त्रादिसे रोक दी जायगी, अथवा किसी सहकारी कारणकी कमी होगी, वहाँ कारण कार्यका गमक नहीं होगा, अन्यथा अवश्य ही गमक होगा।

अब पूर्वचर और उत्तरचर हेतु भी भिन्न ही हैं; क्योंकि उनका स्वभाव हेतु, कार्य और कारणहेतुओंमेंसे भी अन्तर्भाव नहीं होता, यह बात आचार्य दिखलाते हैं—

सूत्रार्थ—पूर्वचर और उत्तरचर हेतुओंका साध्यके साथ तादात्म्य

---

१. अन्तर्भावाभावादिति वा पाठः। २. साध्यसाधनयोः। पूर्वोत्तरकालवर्त्तिनोरिति वा पाठान्तरम्। ३. तत्साधनमात्मा स्वरूपं यस्य साध्यस्यासौ तदात्मा, तस्य भावस्तादात्म्यमिति। ४. तस्मात्कारणादुत्पत्तिर्यस्य कार्यस्यासौ तदुत्पत्तिः। ५. साध्यसाधनयोः परस्परम्। ६. तादात्म्यतदुत्पत्त्योः। ७. तादात्म्यतदुत्पत्ती कृत्तिकोदयशकटोदययोर्न भवतः, शकटोदयकालेऽनन्तरं वा कृत्तिकोदयानुपलब्धेः। यद्यत्कालेऽनन्तरं वा नास्ति,

तादात्म्यसम्बन्धे साध्यसाधनयोः स्वभावहेतावन्तर्भावः, तदुत्पत्तिसम्बन्धे च कार्ये कारणे वाऽन्तर्भावो विभाव्यते। न च [1]तदुभयसम्भवः; कालव्यवधाने तदनुपलब्धेः। सहभाविनोरेव तादात्म्यसम्भवात्, [2]अनन्तरयोरेव पूर्वोत्तरक्षणयोर्हेतुफलभावस्य[3] दृष्टत्वात्; व्यवहितयोस्तदघटनात्[4]।

सम्बन्ध नहीं है, अतः स्वभावहेतुमें अन्तर्भाव नहीं होता। तथा तदुत्पत्ति-सम्बन्ध भी नहीं है, अतः कार्यहेतु और कारण हेतुमें भी अन्तर्भाव नहीं होता; क्योंकि ये दोनों सम्बन्ध कालके व्यवधान (अन्तराल) में नहीं होते हैं ॥५७॥

साध्य-साधनमें तादात्म्य सम्बन्धके होनेपर स्वभावहेतुमें अन्तर्भाव होता है और तदुत्पत्तिसम्बन्धके होनेपर कार्य या कारण हेतुमें अन्तर्भाव होता है। किन्तु पूर्वचरहेतु और उत्तरचरहेतुमें परस्पर न तादात्म्यसम्बन्ध है और न तदुत्पत्तिसम्बन्ध सम्भव है; क्योंकि कालके व्यवधान होनेपर ये दोनों सम्बन्ध नहीं पाये जाते हैं। साथ रहनेवाले दो अभिन्न पदार्थोंमें तादात्म्य सम्बन्ध होता है और कालके व्यवधानसे रहित पूर्वक्षण और उत्तर-क्षणमें कारण और कार्यपना देखा जाता है। किन्तु जिनमे कालका व्यवधान होता है, उनमें तादात्म्य और कार्य-कारण सम्बन्ध घटित नहीं होता है।

भावार्थ—ज्ञान और आत्मा जैसे दो अभिन्न पदार्थोंमे जो सम्बन्ध होता है, उसे तादात्म्यसम्बन्ध कहते हैं। एक पदार्थसे दूसरे पदार्थकी उत्पत्ति को तदुत्पत्तिसम्बन्ध कहते है। एक मुहूर्तके बाद रोहिणी नक्षत्रका उदय होगा; क्योंकि अभी कृत्तिका नक्षत्रका उदय हो रहा है, यह पूर्वचर हेतुका उदाहरण है। एक मुहूर्त्तके पूर्व ही भरणीका उदय हो चुका है, क्योंकि अभी कृतिका उदय हो रहा है, यह उत्तरचर हेतुका उदाहरण है। इन दोनों ही उदाहरणांमें एक नक्षत्रके उदयसे दूसरे नक्षत्रके उदयमे एक मुहूर्त्तकालका व्यवधान है, अतः इनमें न तो तादात्म्यसम्बन्ध सम्भव है कि जिससे उनका स्वभावहेतुमे अन्तर्भाव किया जा सके। और न तदुत्पत्तिसम्बन्ध ही सम्भव है कि जिससे उनका कार्यहेतु या कारणहेतुमें अन्तर्भाव किया जा सके। अतः पूर्वचर और उत्तरचर ये दोनों हेतु भिन्न ही है; यह सिद्ध हुआ।

न तस्य तेन तादात्म्यं तदुत्पत्तिर्वा। यथा भविष्यच्छकटचक्रवर्त्तिकाले गगनाद्यन्तादात्म्यतदुत्पत्त्यसतः। नास्ति च शकटोदयकालेऽनन्तरं वा कृत्तिकोदयादिकं तस्मात्तयोस्तादात्म्यतदुत्पत्ती न स्तः। १. तादात्म्यतदुत्पत्ति-। २. अव्यवहितयोः। ३. कारणकार्यभावस्य। ४. तादात्म्य-कार्यकारणभावयोरघटनात्।

[1]ननु कालव्यवधानेऽपि कार्यकारणभावो दृश्यत एव; यथा [2]जाग्रत्प्रबुद्धदशा[3]-भाविप्रबोधयोर्मरणारिष्टयोर्[4]वेति। [5]तत्परिहारार्थमाह—

[6]भाव्यतीतयोर्मरणजाग्रद्बोधयोरपि नारिष्टोद्बोधौ[7]प्रति[8]हेतुत्वम्[9] ॥५८॥

सुगममेतत्।

यहां बौद्धोंका कहना है कि कालके व्यवधानमें भी कार्य-कारणभाव देखा ही जाता है, जैसे कि जाग्रद्दशा और प्रबुद्धदशाभावी प्रबोध (ज्ञान) में, तथा मरण और अरिष्टमें कार्यकारणभाव देखा जाता है। आचार्य उनके इस कथनका परिहार करनेके लिए उत्तर सूत्र कहते हैं—

सूत्रार्थ—भावी मरण और अतीत जाग्रद्‌बोधके भी अरिष्ट और उद्‌बोधके प्रति कारणपना नहीं है ॥५८॥

यह सूत्र सुगम है।

भावार्थ—बौद्धोंका अभिप्राय यह है कि रात्रिमें सोते समयका ज्ञान प्रातःकालके ज्ञानमें कारण होता है और आगामीकालमें होनेवाला मरण इस समयमें होनेवाले अरिष्टों (अपशकुनों और उत्पातों) का कारण है, इससे सिद्ध है कि कालके व्यवधानमें भी कार्य-कारणभाव होता है। आचार्यने उनका परिहार करते हुए यह कहा है कि दोनोंमें जो आप कार्य कारण-भाव बतला रहे हैं, वह ठीक नहीं है; क्योंकि कार्य कारणभाव तभी सम्भव है जब कि कारणके सद्भावमें कार्य उत्पन्न हो। जब सोनेसे पूर्व समयका ज्ञान नष्ट ही होगया है, तब वह प्रातःकालके प्रबोधका कारण कैसे हो सकता है। इसी प्रकार आगामी कालमें होनेवाला मरण जब अभी हुआ ही नहीं है, तब वह इस समय होनेवाले अपशकुनादिका भी कारण कैसे हो सकता है; क्योंकि आपके द्वारा दिये गये दोनों उदाहरणोंमें कालका अन्तराल बीचमें पाया जाता है और जहाँ कालका अन्तराल पाया जाता है वहाँपर कार्य-कारणभाव हो नहीं सकता।

---

१. बौद्धः प्राह। २. निशि जाग्रदवस्थाया किमपि कार्यं विचारितं तत्कारणम्, पश्चात्प्रभाते प्रबुद्धावस्थायां तत्कार्यं करोति तत्कार्यम्; इति कालव्यवधानेऽपि कारणभावः कार्यभावश्च दृश्यते। पूर्वं जाग्रदवस्थायां ज्ञानं तदेव प्रबुद्धावस्थानन्तरज्ञानस्य कारणमिति भावः। स्वापात्पूर्वावस्था जाग्रदवस्था, स्वापात् पश्चादवस्था प्रबुद्धावस्था। ३. अवस्था। ४. मरणात्पूर्वमरिष्टं भवति, तत्र मरणं कारणं तस्मादरिष्टं कार्यं जातमत्रापि तथा। अरिष्टमुत्पात इत्यर्थः। ५. तस्य, व्यवहितयोः कार्यकारणभावदर्शनस्य। ६. भाविमरण-स्यातीतजाग्रदवस्थाबोधस्य च। ७. उद्बोधः प्रबुद्धावस्थाबोधः। ८. अरिष्टं प्रबुद्धावस्थाज्ञानं च प्रति न कारणत्वम्। ९. बौद्धस्य।

[1]अत्रैवोपपत्तिमाह—

[2]तद्व्यापाराश्रितं हि [3]तद्भावभावित्वम् ॥५९॥

हिशब्दो यस्मादर्थे। यस्मात्तस्य कारणस्य भावे कार्यस्य भावित्वं तद्भावभावित्वम्। तच्च तद्व्यापाराश्रितम्, तस्मान्न [4]प्रकृतयोः कार्यकारणभाव इत्यर्थः। अयमर्थः—अन्वय-व्यतिरेकसमधिगम्यो हि[5] [6]सर्वत्र कार्यकारणभावः। तौ च कार्यम्प्रति कारण-व्यापारसव्यपेक्षावेवोपपद्येते[7] कुलालस्येव[8] कलशम्प्रति। न चातिव्यवहितेषु[9] तद्व्यापारा-श्रितत्वमिति।

सहचरस्याप्युक्त[10]हेतुष्वनन्तर्भावं दर्शयति—

आचार्य इसी विषयमें युक्ति देते हैं—

सूत्रार्थ—कारणके व्यापारके आश्रित ही कार्यका व्यापार हुआ करता है ॥ ५९ ॥

सूत्रोक्त 'हि' शब्द 'यस्मात्' के अर्थमें है। यतः कारणके सद्भावमें कार्यके होनेको तद्भावभावित्व कहते है और कार्यका होना कारणके व्यापारके अधीन है, अतः प्रकृत जो अतीत जाग्रद्बोध और भावी उद्बोध, तथा भावी मरण और वर्तमान अरिष्ट इनमें कार्य-कारणभाव नही है। कहनेका आशय यह है कि सर्वत्र कार्य-कारणभाव अन्वय-व्यतिरेकसे जाना जाता है। सो ये दोना कार्यके प्रति कारणके व्यापारकी अपेक्षामें ही घटित होते है। जैसे कि कुलाल (कुम्भकार) का कलश (घट) के प्रति अन्वय-व्यतिरेक पाया जाता है, अर्थात् कुम्भकारके होनेपर ही कलशकी उत्पत्ति होती है और कुम्भकारके अभावमें कलशकी उत्पत्ति नहीं होती है किन्तु जिन पदार्थोमें कालका अति व्यवधान होता है, उनमें कारणके व्यापारका आश्रितपना नही होता है। इसलिए न तो सोते समयके ज्ञान और प्रातः-काल उठते समयके ज्ञानमें कार्यकारणभाव है और न मरण और अरिष्टमें ही; ऐसा जानना चाहिए।

अब सहचरहेतुका भी उक्त हेतुओंमें अन्तर्भाव नहीं है आचार्य यह दिखलाते है—

---

१. हेतुत्वाभावे। २. कारण-। ३. कार्य-। ४. पूर्वोत्तरप्रकरणयोर्मरणारिष्टयोर्जाग्रद्बोधभाविप्रबोधयोः, किन्त्वविनाभावमेवायातम्? ५. निश्चयेन। ६. बीजाङ्कुरादौ। ७. घटेते। ८. यथा कुलालस्य कलशं प्रत्यन्वयव्यतिरेकत्वं वर्तते, यतः सति कुलाले कलशस्योत्पत्तिर्जायते, अन्यथा न जायते। व्यापारसव्यपेक्षौ यथा। ९. पदार्थेषु। १०. स्वभाव-कार्यकारणेषु।

[१]सहचारिणोरपि [२]परस्परपरिहारेणावस्थानात्सहोत्पादाच्च[३] ॥६०॥

हेत्वन्तरत्वमिति शेषः । अयमभिप्रायः—परस्परपरिहारेणोपलम्भात्तादात्म्या[४]-सम्भवात्स्वभावहेतावनन्तर्भावः । [५]सहोत्पादाच्च न कार्ये कारणे वेति । न च समानसमयवर्तिनोः[६] कार्यकारणभावः, सव्येतरगोविषाणवत्[७] । कार्यकारणयोः[८] प्रतिनियमाभावप्रसङ्गाच्च । तस्माद्धेत्वन्तरत्वमेवेति[९] ।

सूत्रार्थ—सहचारी पदार्थ परस्परके परिहारसे रहते हैं, अतः सहचरहेतुका स्वभावहेतुमें अन्तर्भाव नहीं हो सकता । और वे एक साथ उत्पन्न होते हैं, अतः उसका कार्यहेतु और कारणहेतुमें अन्तर्भाव नहीं हो सकता है ॥ ६० ॥

सूत्रमें 'हेत्वन्तरत्व' यह पद शेष है अर्थात् सहचरहेतुको भिन्न ही हेतु मानना चाहिए । सूत्रका अभिप्राय यह है कि जिन दो पदार्थोकी परस्पर परिहाररूपसे विभिन्नता पाई जाती है, उनमे तादात्म्यसम्बन्ध असम्भव है, अतः उनका स्वभावहेतुमें अन्तर्भाव नहीं किया जा सकता । तथा सहचारी पदार्थोके एक साथ उत्पन्न होनेसे कार्यहेतु अथवा कारणहेतुमें भी अन्तर्भाव नहीं किया जा सकता है । जैसे गायके समान समयवर्ती अर्थात् एक कालमें होनेवाले सव्य (वाम) और इतर (दक्षिण) विषाण (सींग) में कार्य-कारणभाव नहीं माना जाता । इसी प्रकार फलादिकमें एक साथ उत्पन्न होनेवाले रूप और रसमें भी कार्य-कारणभाव नहीं माना जा सकता । यदि एक साथ उत्पन्न होनेवाले गायके दोनों सींगोंमें और रूप-रसमें कार्य-कारणभाव माना जावे, तो फिर कार्य-कारणके प्रतिनियमरूप व्यवस्थाके अभावका

---

१. सह युगपदेकस्मिन् काले चरतः प्रवर्तेत इत्येवंशीलौ प्रकरणाद् रूपरसौ, तयोः । २. सहभाविनोरेव तादात्म्यमिति नियमाद् रूपरसयोरपि तादात्म्यं ततश्च स्वभावहेतावन्तर्भावः स्यादिति शङ्कापरिहारार्थं परस्परपरिहारेणावस्थानादित्युक्तम् । रूपरसयोर्हि स्वरूपभेदपरस्परपरिहारेणावस्थानान्न तादात्म्यम्, तदभावे न स्वभावहेतावन्तर्भावः । ३. अनन्तरपूर्वोत्तरक्षणभाविकारणकार्ययोर्धूमधूमध्वजयोरनन्तर्भावार्थं सहोत्पादादिति पदोपादानमिति । ४. शिंशपा-वृक्षत्वयोरेककालीनत्वाद्यथा तादात्म्य न तथा रूपरसयोर्यतो वृक्षत्वपरिहारेण यथा शिंशपात्वस्यानुपलब्धिर्न तथा रूपरसयोरुपलब्धिर्भिन्नेन्द्रियग्राह्यत्वात्तयोः । रसनेन्द्रियग्राह्यो हि रसो रूपं तु चक्षुरिन्द्रियग्राह्यमिति । ५. एककालोत्पादात् । ६. रूपरसयोः । ७. समसमयभाविनोः सव्येतरगोविषाणयोर्नहि कार्यकारणभावत्वं विद्यते, तथा रूपरसयोरपि न सम्भवति । ८. कार्यं विहाय कारणं तिष्ठति, न च तथाऽत्र वर्तते, तत्सहचारिणोः कारणेऽनन्तर्भावः । ९. सहचारिणोः कारणान्तरत्वमिति ।

इदानीं व्याप्यहेतुं क्रमप्राप्तमुदाहरन्नुक्तान्वयव्यतिरेकपुरस्सरं [1]प्रतिपाद्याशयवशात्प्रतिपादितप्रतिज्ञाद्यवयवपञ्चकं प्रदर्शयति—

[2]परिणामी शब्दः[3]; कृतकत्वात्[4]। य एवं स एवं दृष्टो[5] यथा घटः[6]। कृतकश्चायम्[7], तस्मात्परिणामीति[8]। यस्तु न परिणामी, स न कृतको दृष्टो[9] यथा वन्ध्यास्तनन्धयः[10]। कृतकश्चायम्, तस्मात्परिणामी ॥६१॥

स्वोत्पत्तावपेक्षितव्यापारो हि भावः[11] कृतक[12] उच्यते। तच्च कृतकत्वं न[13] कूटस्थनित्यपक्षे[14], नापि [15]क्षणिकपक्षे। किन्तु परिणामित्वे सत्येवेत्यग्रे[16] वक्ष्यते।

प्रसङ्ग आयगा। अर्थात् उनमें, यह कार्य है और यह उसका कारण है, ऐसी व्यवस्थाका कोई नियम नहीं बन सकेगा। इसलिए सहचर हेतुको भिन्न ही हेतु मानना चाहिए।

अब आचार्य क्रम-प्राप्त अविरुद्धव्याप्योपलब्धिरूप व्याप्यहेतुका उदाहरण देते हुए उक्त अन्वय-व्यतिरेकपूर्वक शिष्यके आशय (अभिप्राय) के वशसे प्रतिज्ञा, हेतु आदिक पाँचों अवयवोंको दिखलाते है—

सूत्रार्थ—शब्द परिणामी है (प्रतिज्ञा), क्योंकि वह कृतक है (हेतु)। जो कृतक होता है, वह परिणामी देखा जाता है, जैसे घट (अन्वय-दृष्टान्त)। कृतक यह शब्द है (उपनय)। इसलिए परिणामी है (निगमन)। जो परिणामी नहीं होता, वह कृतक भी नहीं देखा जाता है, जैसे कि वन्ध्याका पुत्र (व्यतिरेकदृष्टान्त)। कृतक यह शब्द है (उपनय)। अतः वह परिणामी है (निगमन)॥ ६१ ॥

जो पदार्थ अपनी उत्पत्तिमें अन्यके व्यापारकी अपेक्षा रखता है, वह

---

१. शिष्याभिप्रायवशात्। २. पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणः परिणामः, सोऽस्यास्तीति स परिणामी। पूर्वावस्थामप्यजहन् संस्पृशन् धर्ममुत्तरम्। स्वस्मादप्रच्युतो धर्मी परिणामी स उच्यते ॥१॥ ३. पक्षः। ४. हेतुः। ५. अन्वयव्याप्तिः। ६. अन्वयदृष्टान्तः। ७. उपनयः। ८. निगमनम्। ९. व्यतिरेकव्याप्तिः। १०. व्यतिरेकदृष्टान्तः। ११. पदार्थः। १२. एतल्लक्षणप्रतिपादनेन कार्यत्वं स्वकारणसत्तासमवायः स्यादभूत्वाभावित्वं अक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वं कारणव्यापारानुविधायित्वं निरस्तं भवति। एवं कृतकत्वस्यार्थोऽत्र प्रतिपादितः सर्वत्र ज्ञातव्यः। १३. एकरूपतया तु यः कालव्यापी स कूटस्थ इत्यमरः। एकत्वभावरूपतया यो गलायदस्याराहित्येन भूतभविष्यद्वर्तमानकालव्यापी तस्याऽऽत्मादेः नाम कूटस्थ इति भावः। १४. एकस्वभावे नित्यपक्षे। १५. तदानीं नष्टत्वात् पूर्वाकारमरणाभावाच्च। प्रतिक्षणविनाशि क्षणिकमिति। १६. विषयपरिच्छेदे सामान्यविशेषात्मा तदर्थो विषय इत्यस्मिन् सूत्रव्याख्यानावसरे।

कार्यहेतुमाह—

अस्त्यत्र देहिनि बुद्धिर्व्याहारादेः[1][2] ॥६२॥

कारणहेतुमाह—

अस्त्यत्र च्छाया छत्रात्[3] ॥६३॥

कृतक कहलाता है। यह कृतकपना न तो कूटस्थ नित्यपक्षमें सम्भव है और न क्षणिक पक्षमें। किन्तु पदार्थको परिणामी माननेपर ही सम्भव है, यह बात आगे कहेंगे।

भावार्थ—ऊपर कृतकका जो स्वरूप कहा गया है, उसका परिणामित्वके साथ व्याप्य-व्यापकसम्बन्ध है जो अल्प देशमें रहे, उसे व्याप्य कहते हैं और जो बहुत देशमें रहे उसे व्यापक कहते हैं। कृतकत्व केवल पुद्गलद्रव्यमें रहनेसे व्याप्य है और परिणामित्व आकाशादि सभी द्रव्योंमें पाये जानेसे व्यापक है। जो प्रतिसमय परिणमनशील होकर भी अर्थात् पूर्व आकारका परित्याग कर और उत्तर आकारको धारण करते हुए भी दोनों अवस्थाओंमें अपने स्वत्वको कायम रखता है, उसे परिणामी कहते है। ऐसा परिणामीपना न तो सांख्याभिमत सर्वथा कूटस्थ नित्य रहनेवाले पदार्थोंमें सम्भव है और न बौद्धाभिमत सर्वथा क्षणिक पदार्थोंमें ही सम्भव है। किन्तु उत्पाद-व्ययके होते हुए भी ध्रुव (स्थिर) रहनेवाले जैनाभिमत पदार्थोंमें ही सम्भव है। प्रकृत सूत्रमें कृतकत्व हेतुके द्वारा शब्दके परिणामित्व सिद्ध किया गया है। यतः कृतकत्व व्याप्य है, अतः यह व्याप्यहेतु अपने व्यापक परिणामित्व-व्यको सिद्ध करता है।

अब आचार्य अविरुद्धकार्योपलब्धिरूप हेतुको कहते हैं—

सूत्रार्थ—इस देही (शरीर-धारक प्राणी) में बुद्धि है; क्योंकि बुद्धिके कार्य वचनादिक पाये जाते है। यहाँपर बुद्धि साध्य है और उसका अविरोधी कार्य वचनादिक हेतु है, वह अपने साध्यकी सिद्धि करता है यह अविरुद्धकार्योपलब्धिका उदाहरण है ॥ ६२ ॥

अब अविरुद्धकारणोपलब्धिरूप हेतुको कहते हैं—

सूत्रार्थ—यहाँ छाया है, क्योंकि छायाका अविरोधी कारण छत्र पाया जाता है। अतः यह अविरुद्धकारणोपलब्धिरूप हेतुका उदाहरण है ॥ ६३ ॥

---

१. बुद्धिपदेनाऽऽत्मा बोद्धव्यः। २. व्याहारो वचनम्, व्याहार उक्तिर्लपितं भाषितं वचनं वचः इत्यमरः। आदिशब्दात् व्यापाराकारविशेषादिपरिग्रहः। वचनचातुर्यादेव। ३. कारणकारणादेरत्रैवान्तर्भावस्तथाहि—महोऽन्नत्यानां कण्टविक्षेपकारी धूमवदग्नि-

अथ पूर्वचरहेतुमाह—

उदेष्यति शकटं[1] कृत्तिकोदयात्[2] ॥६४॥

मुहूर्त्तान्ते इति सम्बन्धः ।

अथोत्तरचरः—

उद्गाद्भरणिः प्राक्तत एव[3] ॥६५॥

अत्रापि मुहूर्तात्प्रागिति सम्बन्धनीयम्; तत एव कृत्तिकोदयादेवेत्यर्थः ।

सहचरलिङ्गमाह—

अब अविरुद्धपूर्वचरोपलब्धिरूप हेतुको कहते हैं—

सूत्रार्थ—यहाँ मुहूर्त्तान्त पदका अध्याहार करना चाहिए। शकट नाम रोहिणी नक्षत्रका है। अतः यह अर्थ हुआ कि एक मुहूर्तके पश्चात् रोहिणीका उदय होगा; क्योंकि अभी कृत्तिका नक्षत्रका उदय हो रहा है ॥ ६४ ॥

भावार्थ—प्रतिदिन क्रमसे एक-एक मुहूर्त्तके पश्चात् अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशिरा, आर्द्रा, पुनर्वसु, पुष्य आदि नक्षत्रोंका उदय होता है। जब जिसका उदय विवक्षित हो, तब उसके पूर्ववर्ती नक्षत्रको पूर्वचर और उत्तरवर्ती नक्षत्रको उत्तरचर जानना चाहिए। प्रकृतमें रोहिणीका उदय साध्य है, वह उसके पूर्वचर कृत्तिकाके उदयरूप हेतुसे सिद्ध किया जारहा है, अतः यह अविरुद्धपूर्वचरोपलब्धिहेतुका उदाहरण है।

अब अविरुद्धउत्तरचरोपलब्धि हेतुको कहते हैं—

सूत्रार्थ—भरणीका उदय एक मुहूर्तके पूर्व ही हो चुका है, क्योंकि कृत्तिकाका उदय पाया जाता है ॥ ६५ ॥

यहाँपर भी 'मुहूर्त्तात् प्राक्' पदका अध्याहार करना चाहिए। तथा 'तत एव' पदसे कृत्तिकोदयका अर्थ लेना चाहिए। तदनुसार यह अर्थ हुआ कि एक मुहूर्तके पूर्व ही भरणीका उदय हो चुका है; क्योंकि अभी कृत्तिकाका उदय हो रहा है। यतः भरणीसे कृत्तिका नक्षत्र उत्तरचर है, अतः यह अविरुद्धउत्तरचरोपलब्धिहेतुका उदाहरण है।

अब अविरुद्धसहचरोपलब्धि हेतुको कहते हैं—

मत्त्वात्। कण्ठादिविक्षेपस्य कारणं धूमस्तस्य कारणं वह्निरिति। १. रोहिणी। २. पूर्वपूर्वचराद्यनेनैव संगृहीतम्, तथाहि—उदेष्यति कृत्तिकाऽश्विन्युदयात्। कृत्तिकायाः पूर्वचरो भरण्युदयस्तत्पूर्वचरोऽश्विन्युदय इति। ३. उत्तरोत्तरचराद्यनेनैव संगृहीतम्, तथाहि—उदगाद्भरणिः शकटोदयात्। भरण्युत्तरचरः कृत्तिकोदयः, तदुत्तरचरः शकटोदय इति।

अस्त्यत्र मातुलिङ्गे रूपं रसात्[1] ॥६६॥

विरुद्धोपलब्धिमाह—

विरुद्धतदुपलब्धिः[2] प्रतिषेधे[3] तथा[4] ॥६७॥

प्रतिषेधे साध्ये प्रतिषेध्येन[5] विरुद्धानां[6] सम्बन्धिनस्ते व्याप्यादय[7]स्तेषामुपलब्धय इत्यर्थः। तथेति षोढेति भावः।

तत्र साध्यविरुद्धव्याप्योपलब्धिमाह—

नास्त्यत्र शीतस्पर्श औष्ण्यात् ॥६८॥

सूत्रार्थ—इस मातुलिङ्ग (बिजौरा) में रूप है; क्योंकि उसका अविरोधी सहचर रस पाया जा रहा है। अतः यह अविरुद्धसहचरोपलब्धिहेतुका उदाहरण है ॥ ६६ ॥

अब आचार्य विरुद्धोपलब्धिके भेद कहते है—

सूत्रार्थ—प्रतिषेध सिद्ध करनेवाली विरुद्धोपलब्धिके भी छह भेद हैं ॥ ६७ ॥

प्रतिषेध साध्य करनेपर प्रतिषेध्यसे विरुद्ध पदार्थोके सम्बन्धी जो व्याप्यादिक हैं, उनकी उपलब्धियाँ तथा अर्थात् छह प्रकारकी होती हैं, ऐसा सूत्रका भाव जानना चाहिए।

भावार्थ—अविरुद्धोपलब्धिके समान विरुद्धोलब्धिके भी छह भेद—१ विरुद्धव्याप्योपलब्धि, २ विरुद्धकार्योपलब्धि, ३ विरुद्धकारणोपलब्धि, . विरुद्धपूर्वचरोपलब्धि, ५. विरुद्धउत्तरचरोपलब्धि और ६. विरुद्धसहचरोपलब्धि। ये सभी हेतु प्रतिषेधके साधक है।

अब साध्यसे विरुद्धव्याप्योपलब्धि हेतुको कहते हैं—

सूत्रार्थ—यहाँपर शीतस्पर्श नहीं है; क्योकि उष्णता पाई जाती है ॥६८॥

---

१. साध्यसमकालस्य संयोगिन एकार्थसमवायिनश्चात्रैवान्तर्भावो भवति। संयोगि लिङ्गं यथाऽऽत्मनोऽत्रास्तित्व विशिष्टशरीरात्। आत्मनः संयुक्तं शरीर तदात्मनोऽस्तित्वं ज्ञापयति सयोगिलिङ्गस्य नैयायिकमतानुसरणे तु कार्यहेतावन्तर्भाव इति। २. प्रतिषेध्येन साध्येन यद्विरुद्धं तत्सम्बन्धिनां तेषां व्याप्यादीनामुपलब्धिरिति। ३. नास्तित्वे साध्ये। ४. षोढा, अविरुद्धोपलब्धिवत् षट्प्रकारा। ५. प्रतिषेद्धुं योग्यं वस्तु प्रतिषेध्यं तेन सह। ६. पदार्थानाम्। ७. आदिशब्देन कार्यकारणपूर्वोत्तरसहचराः परिगृह्यन्ते।

शीतस्पर्शप्रतिषेध्येन[1] हि विरुद्धोऽग्निः, तद्व्याप्य[2]मौष्ण्यमिति।

विरुद्धकार्योपलम्भमाह—

नास्त्यत्र शीतस्पर्शो धूमात् ॥६९॥

अत्रापि प्रतिषेध्यस्य साध्यस्य शीतस्पर्शस्य विरुद्धोऽग्निः, तस्य कार्यं धूम इति।

विरुद्धकारणोपलब्धिमाह—

नास्मिन् शरीरिणि सुखमस्ति हृदयशल्यात् ॥७०॥

सुखविरोधि दुःखम्, तस्य कारणं हृदयशल्य[3]मिति।

विरुद्धपूर्वचरमाह—

नोदेष्यति मुहूर्त्तान्ते शकट रेवत्युदयात् ॥७१॥

शकटोदयविरुद्धो ह्यश्विन्युदयः, तत्पूर्वचरो रेवत्युदय इति।

विरुद्धोत्तरचर लिङ्गमाह—

यहाँ शीतस्पर्श प्रतिषेध्य है, उसकी विरोधी अग्नि है उसकी व्याप्य उष्णता पाई जा रही है, अतः यह विरुद्धव्याप्योपलब्धि हेतुका उदाहरण है।

अब विरुद्धकार्योपलब्धिहेतुको कहते हैं—

सूत्रार्थ—यहाँपर शीतस्पर्श नहीं है; क्योंकि धूम है ॥६९॥

यहाँ भी प्रतिषेधके योग्य साध्य जो शीतस्पर्श उसकी विरुद्ध जो अग्नि उसका कार्य धूम पाया जाता है, अतः यह विरुद्धकार्योपलब्धिहेतुका उदाहरण है।

अब विरुद्धकारणोपलब्धिका उदाहरण कहते हैं—

सूत्रार्थ—इस प्राणीमें सुख नहीं है; क्योंकि हृदयमें शल्य पाई जाती है ॥७०॥

सुखका विरोधी दुःख है, उसका कारण हृदयकी शल्य पाये जानेसे यह विरुद्धकारणोपलब्धिहेतुका उदाहरण है।

अब विरुद्धपूर्वचरोपलब्धिहेतुको कहते हैं—

सूत्रार्थ—एक मुहूर्तके पश्चात् रोहिणीका उदय नहीं होगा; क्योंकि अभी रेवतीनक्षत्रका उदय हो रहा है ॥७१॥

यहाँपर शकट (रोहिणी) के उदयका विरोधी अश्विनीका उदय है, उसका पूर्वचर रेवतीनक्षत्र है उसका उदय पाये जानेसे यह विरुद्धपूर्वचरोपलब्धिहेतुका उदाहरण है।

अब विरुद्धोत्तरचरोपलब्धिहेतुको कहते हैं—

---

१. शीतस्पर्शसाध्येन सह। २. सहभावात्कारणे हेतौ कार्ये हेतौ वाऽनन्तर्भावाद् व्यतिरिक्तो व्याप्यहेतुरिति। ३. वाणफलकः।

नोदगाद्भरणिर्मुहूर्त्तात्पूर्वं पुष्योदयात्[1] ॥७२॥

भरण्युदयविरुद्धो हि पुनर्वसूदयः, तदुत्तरचरः पुष्योदय इति।

विरुद्धसहचरमाह—

नास्त्यत्र भित्तौ [2]परभागाभावोऽ[3]र्वाग्भागदर्शनात् ॥७३॥

परभागाभावस्य [4]विरुद्धस्तद्भावः[5], [6]तत्सहचरोऽर्वाग्भाग इति।

[7]अविरुद्धानुपलब्धिभेदमाह—

अविरुद्धानुपलब्धिः प्रतिषेधे[8] सप्तधा—स्वभावव्यापककार्यकारण-पूर्वोत्तरसहचरानुपलम्भभेदात् ॥७४॥

सूत्रार्थ—एक मुहूर्त्त पहले भरणीका उदय नहीं हुआ है; क्योंकि अभी पुष्य नक्षत्रका उदय पाया जा रहा है ॥७२॥

यहाँपर भरणीके उदयका विरोधी पुनर्वसुनक्षत्रका उदय है, उसका उत्तरचर पुष्यनक्षत्रका उदय पाये जानेसे यह विरुद्धोत्तरचरोपलब्धि हेतुका उदाहरण है।

अब विरुद्धसहचरोपलब्धि हेतुको कहते हैं—

सूत्रार्थ—इस भित्ति (दीवाल) में परभाग (उस ओरके भाग) का अभाव नहीं है; क्योंकि अर्वाग्भाग (इस ओरका भाग) दिखाई दे रहा है ॥७३॥

यहाँपर दीवालके परभागके अभावका विरोधी उसका सद्भाव है, उसका सहचारी इस ओरका भाग पाया जाता है, अतः यह विरुद्धसहचरोपलब्धिहेतुका उदाहरण है।

अब आचार्य अविरुद्धानुपलब्धिके भेद कहते हैं—

सूत्रार्थ—प्रतिषेध अर्थात् अभावको सिद्ध करनेवाली अविरुद्धानुपलब्धिके सात भेद हैं—१. अविरुद्धस्वभावानुपलब्धि, २. अविरुद्धव्यापकानुपलब्धि, ३. अविरुद्धकार्यानुपलब्धि, ४. अविरुद्धकारणानुपलब्धि, ५. अविरुद्धपूर्वचरानुपलब्धि, ६. अविरुद्धोत्तरचरानुपलब्धि और ७. अविरुद्धसहचरानुपलब्धि ॥७४॥

---

१. किन्तु यामात्पूर्वमुदगात्। २. द्वितीय-। ३. प्रथम-। ४. अभावस्तु निषेध्यस्तद्विरुद्धो भावः। ५. परभागसद्भावः। ६. अस्तित्व-। ७. प्रतिषेध्येन साध्येनाविरुद्धस्यानुपलब्धिः। प्रतिषेध्ये साध्येऽनुपलब्धिर्विरुद्धा न भवति। ८. अभावसाध्ये।

स्वभावादिपदानां द्वन्द्वः, तेषामनुपलम्भ इति पश्चाच्छष्ठीतत्पुरुषसमासः[1] ।

[2]स्वभावानुपलम्भोदाहरणमाह—

नास्त्यत्र भूतले [3]घटोऽनुपलब्धेः[4] ॥७५॥

अत्र पिशाच-[5]परमाण्वादिभिर्व्यभिचारपरिहारार्थमुपलब्धिलक्षणप्राप्तत्वे सतीति विशेषणमुन्नेयम्[6] ।

व्यापकानुपलब्धिमाह—

सूत्र-पठित स्वभाव, व्यापक आदि पदोंका पहले द्वन्द्व समास करना, पीछे उनका अनुपलम्भपदके साथ षष्ठीतत्पुरुष समास करना चाहिए ।

अब पहले अविरुद्धस्वभावानुपलब्धिहेतुका उदाहरण कहते हैं—

सूत्रार्थ—इस भूतलपर घट नहीं है; क्योंकि उपलब्धियोग्य स्वभावके होनेपर भी वह नहीं पाया जा रहा है ॥७५॥

यहाँपर पिशाच और परमाणु आदिकसे व्यभिचारके परिहारार्थ 'उपलब्धिलक्षण प्राप्तिके योग्य होनेपर भी' इतना विशेषण ऊपरसे लगाना चाहिए ।

भावार्थ—यदि कोई ऐसा कहे कि यहाँपर भूत-प्रेतादि नहीं हैं, अथवा परमाणु नहीं है; क्योंकि उनकी अनुपलब्धि है; तो यह अनुपलब्धिरूपहेतु व्यभिचारी है अर्थात् सन्दिग्धानैकान्तिक है । सम्भव है कि वे भूत-पिशाचादि या परमाणु आदि यहाँपर हों और उनका अदृश्य या सूक्ष्म स्वभाव होनेसे हमें उनकी उपलब्धि न हो रही हो । अतः इस प्रकारके व्यभिचारके दूर करनेके लिए आचार्यने उक्त विशेषण लगानेको कहा है । यतः घटका स्वभाव उपलब्धिके योग्य है, फिर भी वह घट यहाँ उपलब्ध नहीं हो रहा है, अतः यह अविरुद्धस्वभावानुपलब्धिरूप हेतुका उदाहरण है ।

अब अविरुद्धव्यापकानुपलब्धिहेतुको कहते हैं—

---

१. पश्चात्तास इति पाठान्तरम् । तत्रायमर्थः—'ता' इत्युक्ते षष्ठी 'स' इत्युक्ते समासः षष्ठीसमास इत्यभिप्रायः । ता इति षष्ठीविभक्तेः संज्ञा जैनेन्द्रे (व्याकरणे) स इति समासस्य च । २. केवलं घटरहितस्वभावभूतलं दृष्ट्वाऽनुमिनोतीति स्वभावानुपलब्धिः । ३. प्रतिषेध्यस्य घटस्याविरुद्धस्तत्स्वभावस्तस्यानुपलम्भात् । ४. दृश्यस्वभावत्वे सत्यनुपलब्धेरिति । ५. ये उपलब्धिलक्षणप्राप्तत्वे सति नोपलभ्यन्ते त एव निषेध्याः, न पुनः पिशाचादयस्तेषामुपलब्धिलक्षणप्राप्तित्वायोगात् । तथा सति प्रभाववता योगिना पिशाचादिना वा प्रतिबन्धाद् घटादेरनुपलब्धिर्न विरुध्यते । ६. निश्चेतव्यम् ।

नास्त्यत्र शिंशपा वृक्षानुपलब्धेः ॥७६॥

शिंशपात्वं हि वृक्षत्वेन व्याप्तम्; तदभावे तद्व्याप्यशिंशपाया अप्यभावः।

कार्यानुपलब्धिमाह—

नास्त्यत्राप्रतिबद्धसामर्थ्योऽग्निर्धूमानुपलब्धेः ॥७७॥ [1] [2] [3]

अप्रतिबद्धसामर्थ्यं[4] हि [5]कार्यम्प्रत्यनुपहत[6]शक्तिकत्वमुच्यते। तदभावश्च कार्यानुपलम्भादिति।

कारणानुपलब्धिमाह—

नास्त्यत्र धूमोऽनग्नेः ॥७८॥ [7]

पूर्वचरानुपलब्धिमाह—

सूत्रार्थ—यहाँपर शीशम नहीं है; क्योंकि वृक्ष नहीं पाया जा रहा है ॥७६॥

शिंशपात्व वृक्षत्वके साथ व्याप्त है अर्थात् शिंशपात्व व्याप्य है और वृक्षत्व व्यापक है। जब यहाँपर व्यापक वृक्षत्वका ही अभाव है, तो उसके व्याप्य शिंशपात्वका भी अभाव है। इस प्रकार शिंशपात्वके व्यापक वृक्षत्वके नहीं पाये जानेसे यह अविरुद्धव्यापकानुपलब्धि हेतुका उदाहरण है।

अविरुद्धकार्यानुपलब्धिहेतुको कहते हैं—

सूत्रार्थ—यहाँपर अप्रतिबद्ध सामर्थ्य वाली अग्नि नहीं है; क्योंकि धूम नहीं पाया जाता ॥७७॥

जिसकी सामर्थ्य अप्रतिबद्ध है, ऐसा कारण अपने कार्यके प्रति अनुपहत (अप्रतिहत) शक्तिवाला कहा जाता है, अर्थात् वह अपने कार्य करनेमें समर्थ समझा जाता है। यहाँपर अप्रतिहत शक्तिवाली अग्निका अभाव उसके अविरोधी कार्य धूमके नहीं पाये जानेसे सिद्ध है, अतः यह अविरुद्धकार्यानुपलब्धिहेतुका उदाहरण है।

अब अविरुद्धकारणानुपलब्धिहेतुको कहते हैं—

सूत्रार्थ—यहाँपर धूम नहीं है; क्योंकि धूमके अविरोधी कारण अग्निका अभाव है, अतः यह अविरुद्धकारणानुपलब्धिहेतुका उदाहरण है ॥७८॥

अब अविरुद्धपूर्वचरानुपलब्धिहेतुको कहते हैं—

---

१. आर्द्रेन्धनसंयोगे सति। २. अत्र धूमरूपकार्यकारित्वमेव सामर्थ्यम्। ३. आर्द्रेन्धनसंयोगे सत्यपि धूमस्यादर्शनात्। ४. यद्विशेषणम्। ५. धूमम्। ६. अग्नेः। ७. कुतः।

न भविष्यति[1] मुहूर्त्तान्ते शकटं कृत्तिकोदयानुपलब्धेः ॥७९॥

उत्तरचरानुपलब्धिमाह—

नोदगाद्भरणिर्मुहूर्त्तात्प्राक् तत एव ॥८०॥

तत एव कृत्तिकोदयानुपलब्धेरेवेत्यर्थः ।

सहचरानुपलब्धिः प्राप्तकालेत्याह—

नास्त्यत्र समतुलायामुन्नामो[2] नामानुपलब्धेः ॥८१॥

विरुद्धकार्याद्यनुपलब्धिर्विधौ सम्भवतीत्याचक्षाणस्तद्भेदास्त्रय एवेति तानेव प्रदर्शयितुमाह—

सूत्रार्थ—एक मुहूर्त्तके पश्चात् रोहिणीका उदय नहीं होगा; क्योंकि अभी कृत्तिकाका उदय नहीं पाया जाता। यहाँपर रोहिणीके उदयका अविरोधी पूर्वचर जो कृत्तिकाका उदय है, उसके नहीं पाये जानेसे यह अविरुद्धपूर्वचरानुपलब्धि हेतुका उदाहरण है ॥७९॥

अब अविरुद्धोत्तरचरानुपलब्धिहेतुका उदाहरण कहते हैं—

सूत्रार्थ—एक मुहूर्त्तसे पहले भरणीका उदय नहीं हुआ है; क्योंकि अभी उसके उदयके अविरोधी उत्तरचरकृत्तिका का उदय नहीं पाया जाता है। अतः यह अविरुद्धोत्तरचरानुपलब्धिहेतुका उदाहरण है ॥८०॥

यहाँ सूत्र-पठित 'तत एव' पदसे कृत्तिकाके उदयकी अनुपलब्धिका अर्थ लिया गया है।

अब अविरुद्धसहचरानुपलब्धिहेतुके कहनेका काल प्राप्त हुआ है अतः उसे कहते है—

सूत्रार्थ—इस समतुला अर्थात् समान (ठीक) तौलनेवाली ताखड़ी या तराजूमें उन्नाम (एक ओर ऊँचापन) नहीं है; क्योकि उन्नामका अविरोधी सहचर नाम (दूसरी ओर नीचापन) नही पाया जाता। अतः यह अविरुद्ध सहचरानुपलब्धिहेतुका उदाहरण है ॥८१॥

विरुद्धकार्यानुपलब्धि आदि हेतु विधिमें सम्भव है, अर्थात् सद्भावके साधक हैं, और उसके भेद तीन ही हैं, यह बतलानेके लिए आचार्य उत्तर सूत्र कहते हैं—

१, नोदेष्यतीति वा पाठः। २. उच्चत्वम्। ३. नम्रता। यदोन्नामस्तदाऽवनाम इति सहचरत्वम्।

[1]विरुद्धानुपलब्धिर्विधौ[2] त्रेधा-[3]विरुद्धकार्यकारणस्वभावानुपलब्धि-भेदात् ॥८२॥

[1]तत्र सन्मात्रदेहस्य[2] परमब्रह्मणो[3] [4]निरस्तत्वात्तदित[5]रद्विचार्यते। तत्र साङ्ख्यैः [6]प्रधानं सामान्यमुक्तम्—

[7]त्रिगुणमविवेकि[8] विषयः[9] [10]सामान्यमचेतनं[11] प्रसवधर्मि[12]।
व्यक्त तथा[13] प्रधानं [14]तद्विपरीतस्तथा[15] च पुमान्[16] ॥३२॥ इति वचनात्[17]

उपर्युक्त तीनों मतोंमेंसे सत्तामात्र ही जिसका देह अर्थात् स्वरूप है, ऐसे परम ब्रह्मका दूसरे समुद्देशमें निराकरण किया जा चुका है, अतः उससे भिन्न जो प्रकृतिरूप सामान्य है, उसका विचार किया जाता है। सांख्योंने प्रकृतिरूप प्रधानको सामान्य कहा है—

सांख्यमतानुसार प्रधान अर्थात् कारणभूत प्रकृति अव्यक्त है, किन्तु महान्-अहङ्कारादि कार्यरूप प्रकृति व्यक्त है। यह व्यक्त और अव्यक्त दोनों ही प्रकारका प्रधान त्रिगुणात्मक है, अर्थात् सत्त्व रज और तम इन तीन

---

१. त्रिषु मध्ये। २. सामान्यस्वरूपस्य। सा सत्ता सा महासत्ता यामाहुस्त्व-तलादयः। ३. ब्रह्माद्वैतस्य। ४. सावरणमित्यादिसूत्रव्याख्यानावसरे पूर्वमीमासकेन सह सर्वज्ञवादे ज्ञातव्यम्। ५. सन्मात्रस्वरूपपरमपुरुषातिरिक्तं सांख्याभिमतं प्रकृतिरूपम्। ६. सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रधानमित्यर्थः। ७. सुख-दुःख-मोहरूपाः सत्त्वरजस्तमोलक्षणास्त्रयो गुणा अस्येति त्रिगुणम्। एतेन सुखादिकानामात्मगुणत्वं निराकृतम्। ८. यथा प्रधानं न स्वतो विविच्यते एवं महदादयोऽपि न प्रधानाद्विविच्यन्ते, तदात्मकत्वात्। अथवा सम्भूयकारिताऽत्राविवेकिता, न हि किञ्चिदेकं पर्याप्तं स्वकार्ये; अपि तु सम्भूय। तत्र नैकस्माद्यस्य कस्यचित् केन-चित्सम्भवः। महदादेर्न विविच्यत इत्यविवेकि, अभिन्नमेकरूपं सामान्यविशेष-भिन्नाभिन्न-विचाररहितम्। ९. विषयः ग्राह्यः प्रमाणगोचरः, विज्ञानाद्बहिरिति यावत्। 'ज्ञानाद् ग्राह्यो बहिर्विषय' इति वचनात्। एतेन विज्ञानाद्वैतवादिना योगाचाराणा मतं निराकृतम्। १०. साधारणं घटादिवदनेकैः पुरुषैर्गृहीतमित्यर्थः। भोग्यत्वेन सर्वपुरुषान् प्रति साधारणम्। ११. सर्व एव प्रधानबुद्धयादयोऽचेतनाः, न तु विज्ञानवादिवच्चैतन्यं बुद्धेरित्यर्थः। १२. प्रसव आविर्भावः। प्रसवरूपो धर्मो यः सोऽस्यास्तीति प्रसवधर्मि। प्रसवधर्मेति वक्तव्ये मत्वर्थीयः प्रत्ययः प्रसवधर्मस्य नित्ययोगमाख्यातुम्। सरूप-विरूपपरिणामाभ्यां न कदा-चिदपि वियुज्यत इत्यर्थः। तत्त्वान्तरेण परिणामो विरूपपरिणामः, सत्त्वरजस्तमोरूपेण परिणामः सरूपपरिणामः। १३. महदादिकार्यम्, हेतुमन्नित्यमव्यापि महदादेर्लक्षणम्। व्यक्तवृत्तमव्यक्तेऽतिदिशति 'तथा प्रधानम्' इति। यथा व्यक्तं तथाऽव्यक्तमित्यर्थः। १४. त्रैगुण्यादिरहितः पुरुषः। १५. तथा व्यक्तं तेन प्रकारेण सर्वविषयः। यद्यप्यत्रैगुण्यादि वैधर्म्यमस्ति, तथाप्यहेतुमत्वानित्यत्वादिप्रधानसाधर्म्यं पुरुषस्यास्तीति द्योतनार्थं तथा चेति पाठः। १६. आत्मा। १७. व्यक्ताव्यक्तयोरेव विविधलक्षणत्वे सति।

कार[1]स्तस्माद्भिन्नोऽभिन्नो वा ? यदि भिन्नस्तदा तस्येति व्यपदेशाभावः[2] [3]सम्बन्धाभावात् तदभावश्च[4]; [5]समवायादेरनभ्युपगमात्[6]। [7]तादात्म्यं च [8]भेदविरोधीति। अथाभिन्न उपकार इति पक्ष आश्रीयते तदा प्रधानमेव तेन[9] कृतं स्यात्[10]। अथोपकारनिरपेक्षमेव[11] प्रधानं [12]प्रवर्तते, तर्हि मुक्तात्मानम्प्रत्यपि प्रवर्ततेताविशेषात्[13]। एतेन[14] [15]निरपेक्षप्रवृत्तिपक्षोऽपि प्रत्युक्तस्तत[16] एव। किञ्च सिद्धे प्रधाने सर्वमेतदुपपन्नं स्यात्। न च तत्सिद्धिः [17]कुतश्चिन्निश्चीयत इति।

उपकारको नहीं लेकर प्रवृत्ति करता है ? प्रथम पक्षके माननेपर वह उपकार प्रधानसे भिन्न है, या अभिन्न है ? यदि भिन्न है, तो यह उपकार प्रधानका है ऐसा व्यपदेश (कथन) नहीं हो सकेगा। यदि कहा जाय कि प्रधानका उपकारसे सम्बन्ध है, सो सांख्योंने समवाय, संयोग आदि किसी सम्बन्धको माना नहीं है, अतः सम्बन्धके अभाव होनेसे उपकारका अभाव रहेगा। यदि कहें कि प्रधान और उपकारमें तादात्म्यसम्बन्ध है सो वह भेदका विरोधी है, अतः प्रथम पक्ष ठीक नहीं है। और यदि प्रधानसे उपकार अभिन्न है यह दूसरा पक्ष आश्रय करते हैं, तब उसके अर्थात् पुरुषके द्वारा प्रधान ही किया गया ठहरता है, और ऐसी दशामें उसके नित्यपनेकी हानि होती है। यदि कहें कि पुरुषकृत उपकारकी अपेक्षाके विना ही प्रधान महत् आदि कार्योंके निष्पादनके लिए प्रवृत्ति करता है, तो फिर उस प्रधानको मुक्त-आत्माके प्रति भी प्रवृत्ति करना चाहिए; क्योंकि वहाँपर भी उपकार-निरपेक्षता समान ही है। इससे अर्थात् पुरुषकृत उपकारकी अपेक्षाके विना ही प्रधान प्रवृत्ति करता है, इस पक्षके निराकरणसे निरपेक्ष प्रवृत्तिरूप दूसरा पक्ष भी निराकृत कर दिया गया समझना चाहिए, क्योंकि उससे इसमें कोई विशेषता ही नहीं है। दूसरी बात यह भी है कि प्रधान नामक तत्त्वके सिद्ध होनेपर आपका यह सर्व कथन युक्ति-युक्त सिद्ध होसके। किन्तु उसकी सिद्धि किसी भी प्रमाणसे निश्चित नहीं है।

---

१. बहुधानकात्। २. तदा उपकारो बहुधानकस्येति व्यपदेशस्य कथनस्याभावः, प्रधानस्यायमुपकार इति वक्तुं न शक्यत इति भावः। ३. सम्बन्धाभावश्च कथं सिद्धयेदिति चेन्न, प्रमाणसिद्धत्वात्। ४. उपकाराभावश्च। ५. आदिपदेन संयोगादेः। ६. सांख्यैः। ७. तादात्म्यं चेत्। ८. तन्मते तादात्म्यरूपसम्बन्धः। अयमुपकार इदं प्रधानमिति भेदो न स्यात्। ९. पुरुषेण। १०. तदा नित्यत्वहानिरिति। ११. पुरुषकृतोपकारनिरपेक्षमेव। १२. महदादिकार्यनिष्पादनाय पुरुषार्थे। १३. उपकारनिरपेक्षत्वस्याविशेषात्। १४. पुरुषकृतोपकारनिरपेक्षमेव प्रधानं प्रवर्तते इत्यस्य निराकरणेन। १५. महदादिकार्यनिष्पादनाय निरपेक्ष्य वा प्रधानं प्रवर्तत इति द्वितीयविकल्पं दूषयति। १६. अविशेषादेव। १७. प्रमाणात्।

'तच्च केवलं[2] प्रधानं महदादिकार्यनिष्पादनाय प्रवर्तमानं किमप्यपेक्ष्य प्रवर्तते, निरपेक्ष्य वा। प्रथमपक्षे तन्निमित्तं[3] वाच्यम्, यदपेक्ष्य प्रवर्तते। ननु[4] पुरुषार्थ एव तत्र[5] कारणम्; पुरुषार्थेन हेतुना[6] प्रधानं[7] प्रवर्तते। पुरुषार्थश्च द्वेधा; 'शब्दाद्युपलब्धि-[8] गुणपुरुषान्तर[9][10]विवेकदर्शनं वा; इत्यभिधानादिति चेत्सत्यम्। तथा[11] प्रवर्तमानमपि [12]बहुधानकं पुरुषकृतं कञ्चिदुपकारं समासादयत्प्रवर्तेत, अनासादयद्वा? प्रथमपक्षे स उप-

---

'यह मै हूं, यह मेरी वस्तु है।' इस प्रकारकी अनुभूतिसे प्रत्येक शरीरमें पुरुष (आत्मा)की विभिन्नताओंकी सिद्धि सर्व-विदित है। जिस प्रकार रथके संचालनके लिए सारथी और गाड़ी चलानेके लिए गाड़ीवानका होना आवश्यक है, उसी प्रकार इस जड़ प्रकृतिके संचालनार्थ पुरुषका होना भी अत्यन्त आवश्यक है। इस प्रकार सांख्य लोग मूलमें दो ही तत्त्व मानते हैं—एक प्रकृति और दूसरा पुरुप। प्रकृतिको सामान्य तत्त्व भी कहते हैं। आगे आचार्य इसीका खण्डन कर रहे हैं।

सांख्यमतमें तत्त्वव्यस्था उक्त प्रकारकी है। जैन लोग उनसे पूछते है कि विना किसी दूसरेकी सहायताके वह केवल यानो अकेला प्रधान अर्थात् प्रकृतिरूप जड़ तत्त्व महत् आदि कार्योंके उत्पादनके लिए प्रवर्तमान होता हुआ क्या किसीकी अपेक्षा लेकर प्रवर्त्तित होता है, अथवा विना अपेक्षा ही प्रवर्त्तित होता है? प्रथम पक्षके माननेपर वह निमित्त कहना चाहिए कि जिसकी अपेक्षा लेकर वह महत् आदि कार्योंके उत्पादनके लिए प्रवर्तित होता है? इसके उत्तरमें सांख्योंका कहना है पुरुषार्थ अर्थात् पुरुप का प्रयोजन ही उक्त प्रवृत्तिमें कारण है; अतः पुरुपार्थरूप हेतुसे प्रधान अपने कार्यमें प्रवृत्त होता है। पुरुपार्थ दो प्रकारका होता है—एक तो शब्द, रूप आदि विपयोंको ग्रहण करना और दूसरा गुण और पुरुपान्तरके विवेकको देखना अर्थात् प्रकृति और पुरुषके पारस्परिक भेदका दर्शन करना, ऐसा हमारे आगमका वचन है। इसपर आचार्य कहते हैं कि आपका कहना सत्य है; किन्तु यह बतलाइए कि इस प्रकारसे अर्थात् दोनो प्रकारके पुरुपार्थोंकी अपेक्षा करके प्रवृत्ति करता हुआ भी वह बहुधानक (प्रधान) पुरुपकृत किसी उपकारको लेकरके प्रवृत्ति करता है कि पुरुपकृत किसी

---

१. जैनः प्राह। २. अद्वितीयम्। ३. यत्किञ्चिदपेक्ष्य प्रवर्तते तन्निमित्तं प्रतिपादनीयम्। ४. सांख्यः प्राह। ५. प्रवृत्तौ। ६. कारणेन। ७. महदादिकार्य-निष्पादनाय। ८. आदिशब्देन रूपरसगन्धस्पर्शाः। ९. प्रधान-। १०. प्रकृति-पुरुषयोर्भेदविज्ञानदर्शनम्। ११. पुरुपार्थद्वयमपेक्ष्य। १२. प्रकृतिः।

संसर्गादविभाग[1]श्चेदयोगोलकवह्निवत्[2] ।
भेदाभेदव्यवस्थैवमुच्छिन्ना[3] सर्ववस्तुषु ॥३३॥ इति

यदपि परिमाणाख्यं साधनम्, तदप्येकप्रकृतिकेषु[4] घटघटीशरावोदञ्चनादिष्वनेकप्रकृतिकेषु[5] पटकुटमकुटशकटादिषु [6]चोपलम्भादनैकान्तिकमिति[7] न तत[8]: [9]प्रकृतिसिद्धिः। तदेवं प्रधानग्रहणोपायासम्भवात्सम्भवे वा ततः[10] [11]कार्योदयायोगाच्च। यदुक्तं परेण[12]—

[13]प्रकृतेर्महान्[14] [15]ततोऽहङ्कार[16]स्तस्माद् गणश्च षोडशकः[17]।

यदि लोहेके गोला और अग्निके समान संसर्गसे प्रधान और आत्मामें अविभाग अर्थात् एकत्त्व माना जाय तो सर्व वस्तुओंमें भेद और अभेदकी व्यवस्था ही विनष्ट हो जायगी ॥ ३३ ॥

इस प्रकार तत्त्वोंकी संख्याका कोई नियम नहीं रहेगा।

और आपने प्रधानकी सिद्धिके लिए जो परिमाण नामक हेतु दिया है; वह मिट्टीरूप एक-प्रकृतिक घट, घटी, सरावा, उदञ्चन आदिकोंमें तथा अनेक-प्रकृतिक पट, कुट, मुकुट आदिकोंमें पाये जानेसे अनैकान्तिक है; अतः उससे प्रधानकी सिद्धि नहीं होती है। इस प्रकार प्रधानके ग्रहणका उपाय असम्भव है। अथवा किसी प्रकार सम्भव भी मान लिया जाय तो उस प्रधानसे महत आदि कार्योंकी उत्पत्ति नहीं हो सकती है। और जो सांख्योंने कहा है—

प्रकृति अर्थात् प्रधानसे महान् उत्पन्न होता है। (सृष्टिसे लेकर प्रलय-काल तक स्थिर रहनेवाली बुद्धिको महान् कहते हैं।) महानसे अहङ्कार

---

१. अभेदः। प्रधानात्मनोरेकत्वं भवतु। २. दाहस्फोटकाग्निवत्। ३. विनष्टा। ४. एककारणकेषु। ५. भिन्नकारणकेषु। ६. परिणामोपलम्भात्। ७. महदादिव्यक्तमेककारणकं परिणामोपलम्भादित्यनुमाने परिणामोपलम्भस्य हेतोरेककारणकेषु घटादिषु भिन्नभिन्नकारणकेषु पट-कुण्डलादिषूपलम्भाद् व्यभिचारि साधनम्। ८. परिणामोपलम्भसाधनात्। ९. प्रकृतेः प्रधानस्य। १०. प्रकृतेः। ११. घटादि-। १२. सांख्येन। १३. प्रधानस्य कार्याणि कानीत्युक्ते। प्रकृतिरव्यक्तम्, ततो महत्तत्त्वमुत्पद्यते। १४. आसर्गप्रलयस्थायिनी बुद्धिः महान्। अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्। सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ १ ॥ सर्वो व्यवहर्ता 'अहमत्राधिकृतः' इत्यध्यवस्यति। ततश्च प्रवर्तत इति लोकसिद्धम्। योऽयं कर्तव्यमिति विनिश्चयश्चितिसन्निधानादापन्नचैतन्याया बुद्धेः सोऽध्यवसायः बुद्धेरसाधारणो व्यापारस्तदभेदो बुद्धिः। स च बुद्धेर्लक्षणम्, समानासमानजातीयव्यवच्छेदकत्वात्। १५. बुद्धेः। १६. अभिमानोऽहङ्कारस्तस्माद्विविधः प्रवर्तते सर्गः। एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥ १ ॥ १७. अहङ्कारादेकादशेन्द्रियाणि तन्मात्राणि च पञ्च, सोऽयं षोडशसंख्यापरिमितो गणः षोडशकः।

[1]ननु [2]कार्याणामेकान्वय[3]दर्शनादेककारणप्रभवत्वं भेदाना[4] [5]परिमाणदर्शनाच्चेति। तदप्यचारुचर्वितम्; सुखदुःखमोहरूपतया[6] घटादेरन्वयाभावादन्तस्तत्त्वस्यैव[7] तथोपलम्भात्[8]। अथान्तस्तत्त्वस्य[9] न सुखादिपरिणामः, किन्तु तथापरिणममानप्रधानसंसर्गादात्मनोऽपि [10]तथा प्रतिभास इति। तदप्यनुपपन्नम्; अप्रतिभासमानस्यापि[11] संसर्गकल्पनायां[12] तत्त्वेयत्ताया[13] निश्चेतुमशक्तेः। तदुक्तम्—

सांख्य—कार्योंके एक रूप अन्वयके देखे जानेसे तथा महत् आदि भेदोंका परिमाण पाये जानेसे उनका एक कारणसे उत्पन्न होना सिद्ध है। अर्थात् जैसे घट, घटी, सरावा आदिके एक मिट्टीका अन्वयपना देखा जाता है और उनमें छोटा-बड़ा आदिके रूपसे परिमाण भी पाया जाता है; इसी प्रकार महत्-अहङ्कार आदि कार्योंके भी एक प्रकृतिका अन्वय देखे जानेसे, तथा भेदोंमें परिमाण पाये जानेसे प्रधानकी भी सिद्धि होती है।

जैन—आपका यह कथन सुन्दर नहीं है, क्योंकि सुख, दुःख और मोह रूपपनेसे घटादिके अन्वयका अभाव है अर्थात् घटादि जड़ पदार्थोंके सुख-दुःखादिकी प्रतीति नहीं होती है; किन्तु अन्तस्तत्त्वरूप आत्मा या चेतन पुरुषके ही सुख-दुःखादिकी उपलब्धि होती है। यदि कहें कि चेतनरूप जो अन्तस्तत्त्व है, उसके सुखादि परिणाम नहीं हैं, किन्तु सुख-दुःखादि रूपसे परिणमन करनेवाले प्रधानके संसर्गसे आत्माके भी तथा प्रतिभास होता है अर्थात् सुख-दुःखादिकी प्रतीति होती है, सो आपका यह कथन भी युक्ति-सङ्गत नहीं है; क्योंकि अप्रतिभासमान भी प्रधानकी आत्माके साथ संसर्गकी कल्पना करनेपर तत्त्वोंकी संख्याका निश्चय करना अशक्य हो जायगा। जैसा कि कहा है—

१. सांख्यः प्राह। २. महदादीनाम्। ३. एकानुगमदर्शनात्। भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च। कारणकार्यविभागादविभागाद्वैश्वरूपस्य ॥ १ ॥ महदादिव्यक्तमेककारणसम्भूतमेकान्वयदर्शनात्, घटघटीसरावोदञ्चनादिवत्। लघुमहदाद्युभयत्राप्ययं दृष्टान्तः। यथा घटघटीसरावोदञ्चनादिभेदपरिणामदर्शनं मृदेककारणप्रभवम्। प्रधानमस्ति कार्याणामेककारणप्रभवत्वात्, घटघटीसरावोदञ्चनानां मृत्पिण्डम्। ४. कार्याणाम्। ५. महदादिकमेककारणसम्भूतमेकरूपान्वितत्वात्। महदादिकव्यक्तमेककारणसम्भूतं परिमाणदर्शनात्, घटादिवत्। ६. सत्त्वरजस्तमसामुदयाज्जायमानाः परिणामाः सुखादयः प्रधानस्य। ७. चित्तस्याऽन्तरात्मन एव। ८. सुख-दुःख-मोहरूपतयोपलम्भात्। ९. चेतनस्य। १०. सुख-दुःखादिरूपतया। ११. प्रधानस्य। वस्तुनोऽपि तद्भावतः प्रतिभासभेदाभावात्। १२. आत्मना सह संसर्गकल्पनायामविभागो ज्ञान एवेति चेत्। १३. तत्त्वसङ्ख्यायाः।

इति सृष्टिक्रमः,

[1]मूलप्रकृतिरविकृति[2]र्महदाद्याः प्रकृतिविकृतयः[3] सप्त।
[4]षोडशकस्तु[5] विकारो[6] न प्रकृतिर्न विकृतिः पुरुषः ॥३५॥

इति स्वरूपाख्यानं च वन्ध्यासुतसौरूप्यवर्णनमिवास[7]द्विषयत्वादुपेक्षा[8]मर्हति;

मतावलम्बी मानते हैं। वे वस्तुतः किसी भी पदार्थकी उत्पत्ति या विनाश नहीं मानते, सबको नित्य मानते हैं। अतः उनके मतानुसार उत्पत्तिका नाम आविर्भाव और विनाशका नाम तिरोभाव है।

सांख्यमतानुसार जगतकी सृष्टिका यह उक्त क्रम है।

मूल प्रकृति विकृति-रहित है, महान् आदिक सात तत्त्व प्रकृति और विकृतिरूप है। सोलह गण विकृतिरूप हैं। पुरुष न प्रकृतिरूप है और न विकृतिरूप है ॥३५॥

विशेषार्थ—उपर्युक्त पच्चीस तत्त्वोंमेंसे मूल प्रकृति तो विकारसे रहित है और अकारणक है। अर्थात् इसकी उत्पत्तिका कोई कारण नहीं है, वह अनादि-निधन है। महान तत्त्व अहङ्कारकी प्रकृति है और मूल प्रकृतिकी विकृति है। अहङ्कारतत्त्व पञ्च तन्मात्राओं और इन्द्रियोंकी प्रकृति है और महान् तत्त्वकी विकृति है। इसी प्रकार पञ्च तन्मात्राएँ आकाश आदि पञ्च भूतोंकी प्रकृति हैं और अहङ्कारकी विकृति हैं। गणरूप सोलह तत्त्व विकृतिरूप ही है; क्योंकि ये सभी अहङ्कारके विकार हैं, अर्थात् अहङ्कारसे उत्पन्न होते हैं। पुरुष न किसीसे उत्पन्न होता है और न किसीको उत्पन्न करता है, अतः वह न प्रकृतिरूप ही है और न विकृतिरूप ही है।

सांख्योंके द्वारा पच्चीस तत्त्वोंके स्वरूपका यह वर्णन वन्ध्यापुत्रके सौन्दर्य-वर्णनके समान असत्को विषय करनेसे उपेक्षाके योग्य है; क्योंकि

---

१. मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः, विश्वस्य कार्यसङ्घातस्य सा मूलम्, समर्थं प्रधानम्; न त्वस्या मूलान्तरमस्ति, अनवस्थाप्रसङ्गात्। २. अविकार्यकारणञ्च। प्रकृतिरेवेत्यर्थः। ३. प्रधान्यस्य विकाराः। प्रकृतिश्च विकृतयश्चेति प्रकृतिविकृतयः सप्त। महत्तत्त्वमहङ्कारस्य प्रकृतिः, विकृतिश्च मूलप्रकृतेः। अहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणां च प्रकृतिः, विकृतिश्च महतः। एवं पञ्च तन्मात्राणि तत्त्वानि भूतानामाकाशादीनां प्रकृतयः, विकृतयश्चाहङ्कारस्येति। ४. एकादशेन्द्रियाणि, पञ्च महाभूतानि चेति षोडशको विकारो विकार एव। ५. 'तु' शब्दोऽवधारणे, भिन्नक्रमश्च। ६. कार्यम्। ७. प्रधानमेव विषयः प्रधानविषयाभावात्प्रधानमेव नास्ति। ८. माध्यस्थ्यम्।

'तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि' ॥३४॥

(अभिमान) उत्पन्न होता है। अहङ्कारसे सोलह गण पैदा होते हैं। (स्पर्शन, रसना, घ्राण, चक्षु और श्रोत्र ये पांच ज्ञानेन्द्रियां, वचन, हस्त, पाद, पायु (मल-द्वार) और उपस्थ (मूत्र-द्वार) ये पाँच कर्मेन्द्रियाँ, मन, तथा स्पर्श, रस, गन्ध, रूप और शब्द ये पाँच तन्मात्राएँ, ये सोलह गण कहलाते हैं।) इस सोलह गणके अन्तर्गत जो पञ्च तन्मात्राएँ, उनसे पञ्च भूत उत्पन्न होते हैं ॥३३॥

विशेषार्थ—सांख्योंने मूलमें दो तत्त्व माने हैं—एक प्रकृति और दूसरा पुरुष। प्रकृतिको वे अचेतन या जड़ मानते हैं और पुरुषको चेतन। पुनः प्रकृतिसे महान्, अहङ्कार और सोलह गण क्रमशः उत्पन्न होते हैं उन सोलह गणोंमेंसे भी शब्दतन्मात्रासे आकाश उत्पन्न होता है, अतः उसमें एक शब्द गुण पाया जाता है। शब्दतन्मात्रासहित स्पर्शतन्मात्रासे वायु उत्पन्न होती है, अतः उसमें शब्द और स्पर्श ये दो गुण पाये जाते हैं। शब्द और स्पर्शसहित रूपतन्मात्रासे तेज (अग्नि) उत्पन्न होता है, अतः उसमें शब्द, स्पर्श और रूप ये तीन गुण पाये जाते है। शब्द, स्पर्श और रूप तन्मात्रासहित रस-तन्मात्रासे अप् (जल) पैदा होता है, अतः उसमें शब्द, स्पर्श, रूप और रस ये चार गुण पाये जाते है। शब्द, स्पर्श, रूप और रससहित गन्ध तन्मात्रासे पृथिवी उत्पन्न होती है, अतः उसमें शब्द, स्पर्श, रूप, रस और गन्ध ये पांच गुण पाये जाते है। इस प्रकार एक प्रकृति अपरनाम प्रधानतत्त्वसे तेईस तत्त्व उत्पन्न होते है। प्रकृति-सहित ये चौबीस तत्त्व अचेतन हैं और पुरुष तत्त्व चेतन है। इस प्रकार अभेदरूपसे दो और भेदरूपसे पच्चीस तत्त्वोंको सांख्य

१. श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणलक्षणानि बुद्धीन्द्रियाणि पञ्च, पायूपस्थ (मलद्वार-योनि-लिङ्ग-) वचः पाणिपादाख्यानि पञ्च कर्मेन्द्रियाणि, मनोरूपरसगन्धस्पर्शशब्दाः पञ्च तन्मात्राणि। तदुक्तम्—बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि। वाक्पाणिपाद-पायूपस्थानि कर्मेन्द्रियाण्याहुः ॥ २ ॥ मनश्चेत्येकादशेन्द्रियाणि, शब्दस्पर्शरूपरसगन्धाः पञ्च तन्मात्राणि। तस्मादपि षोडशकादपकृष्टेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्च भूतानि। तत्र शब्दतन्मात्रादाकाशं शब्दगुणम्। शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्श-गुणः। शब्दस्पर्शसहिताद् रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणम्। शब्दस्पर्शसहिताद् रूपतन्मात्रसहिताद् रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः। शब्दस्पर्शरूपरसतन्मात्र-सहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा पृथिवी जायते। तदुक्तम्—रूपात्तेजो रसा-दापो गन्धाद् भूमिः स्वरान्नभः। स्पर्शाद्वायुस्तथैवं च पञ्चभ्यः पञ्चभूतकम् ॥ १ ॥ २. अचेतनान्येव।

'तथा विशेषा' एव तत्त्वम्[3]; तेषा[4]मसमानेतर[5]विशेषेभ्योऽशेषात्मना[6] [7]विश्लेषात्मकत्वात् सामान्यस्यैक[8]स्यानेकत्र[9] व्याप्त्या[10] वर्तमानस्य सम्भवाभावाच्च।

प्रयोग क्यों नहीं किया जाता? यदि कहा जाय कि कार्य और कारणमें आकार-गत भेद है अर्थात् दोनोंका आकार भिन्न-भिन्न है, तब तो यही मानना पड़ेगा कि कुम्भकारादि सहकारी कारणोंकी सहायतासे कारणरूप मिट्टीके लौंदेमें ऐसी कोई विशेषता उत्पन्न हो गई है, जो कि मृत्पिण्डरूप मूल कारणमें नहीं थी। यदि कहा जाय कि कारणके भीतर कार्य था तो पहलेसे ही विद्यमान, किन्तु वह आविर्भावरूपसे व्यक्त नहीं था, अपितु वह उसमें तिरोभावरूपसे अव्यक्त था। आचार्यका इसपर यह कहना है कि आविर्भाव और तिरोभावकी कल्पना इन्द्रजालियेके इन्द्रजालके समान सर्वथा मिथ्या है, क्योंकि मृत्पिण्डरूप कारण ही कुम्भकार आदिके सहयोगसे घटके आकारसे परिणत हो जाता है। ऐसा नहीं है कि मृत्पिण्डरूप कारणमें कहीं घटरूप कार्य छिपा हुआ बैठा था। किन्तु कुम्भकारके प्रयत्नसे वा चाक-दण्ड आदिके सहयोगसे वही मृत्पिण्ड अपनी उस पर्यायको छोड़कर घटरूप पर्यायसे परिणत होता है और मृत्तिकारूप द्रव्य दोनों ही अवस्थाओंमें ज्योंका त्यों बना रहता है। अतः वस्तुको उत्पाद-व्यय-ध्रौव्यात्मक ही मानना चाहिए। इसका विस्तार जाननेके लिए प्रमेयकमलमार्तण्डको देखना चाहिए।

इस प्रकार सांख्योंके द्वारा माने गये प्रकृतिरूप सामान्यतत्त्वका निराकरण किये जानेपर बौद्ध कहते है कि पृथक्-पृथक् परमाणुरूप विशेष ही तत्त्व हैं, जो कि प्रतिक्षण विनाशशील, अनित्य और निरंश है; वे विजातीय और सजातीय विशेषोंसे सामस्त्यरूपसे भिन्नस्वरूपवाले है; क्योंकि नैयायकादिकोंके द्वारा परिकल्पित अनेक व्यक्तियोंमें सर्वात्मरूपसे व्याप्त होकर

१. ननु सत्कार्यमपि तैरङ्गीकृतम्, तत् किमिति न निषिध्यत इत्याह—तथा इत्युक्तएवं सतीति कोऽर्थः? सामान्यनिराकरणे सति बौद्धो वदति—सांख्यादिपरिकल्पितप्रधानादिनिराकरणवत्। २. यथा सामान्यं सांख्यैस्तत्त्वं प्रतिपाद्यते, तथा विशेषा एव सौगतैः परमाणव एव पर्यायाः स्वीकृताः। प्रतिक्षणं विशरारवो रगरगायमाणाः अनित्याः निरंशाः परस्परासम्बन्धिनः परमाणवः। ३. वस्तुनः स्वरूपम्। ४. विशेषाणाम्। ५. असमानाकारैः समानाकारेभ्यः समस्तात्मना भिन्नात्मकत्वादिति बौद्धाः। विजातीय-सजातीयविशेषेभ्यो, यथा घटे घटान्तरं सजातीयम्, पटादि विजातीयम्। ६. सामस्त्येन। ७. भिन्नात्मकत्वात्। ८. नैयायिकाभिप्रायेण सामान्यमेकम्। ९. शाबलेयादिषु व्यक्तिषु। १०. परिसमाप्त्या, सर्वरूपेण।

अमूर्त्तस्याऽऽकाशस्य मूर्तस्य पृथिव्यादेश्चैक[1]कारणकत्वायोगाच्च। अन्यथा[2] अचेतनादपि पञ्चभूतकदम्बकाच्चैतन्यसिद्धेश्चार्वाकमतसिद्धिप्रसङ्गात् साङ्ख्यगन्ध एव न भवेत्। [3]सत्कार्यवाद[4]प्रतिषेधश्चान्यत्र[5] विस्तरेणोक्त इति नेहोच्यते; सङ्क्षेपस्वरूपादस्येति।

अमूर्त्त आकाश और मूर्त्त पृथिवी आदिका एक कारणसे उत्पन्न होना सम्भव नहीं है। यदि इतनेपर भी अमूर्त्त आकाश और मूर्त्त पृथिव्यादिकी एक कारणसे उत्पत्तिकी कल्पना की जायगी तो अचेतन भी पञ्चभूत-समूहसे चैतन्यकी सिद्धि मानना पड़ेगी, और तब चार्वाक मतकी सिद्धिका प्रसङ्ग प्राप्त होनेसे साख्यमतकी गन्ध भी नहीं रहेगी। सत्कार्यवादका प्रतिषेध अन्यत्र प्रमेयकमलमार्त्तण्ड आदिमें विस्तारसे किया गया है, इसलिए यहाँपर नहीं करते है; क्योंकि यह ग्रन्थ संक्षेप स्वरूपवाला है।

विशेषार्थ—कार्य-कारणके विषयमें सांख्योंकी एक विशिष्ट मान्यता है जो सत्कार्यवादके नामसे प्रसिद्ध है। उनका कहना है कि प्रत्येक कार्य अपने कारणमें सदा विद्यमान रहता है। इसके लिए उनकी युक्ति यह है कि असत् पदार्थकी उत्पत्ति नहीं होती है। यदि तिलोमें तेल न रहता होता, तो उन्हें कोल्हूमें पेरनेपर भी वह नहीं प्राप्त होता। जैसे कि वालूमें तेलका अभाव है, तो वालूके पेरनेपर भी तेल प्राप्त नहीं होता। यदि दूधमें दही, या दहीमें घीका सद्भाव न होता, तो दूधके जमानेपर भी दही और दहीके विलोनेपर भी घीकी प्राप्ति कदाचित् भी नहीं होती। अतः यही मानना चाहिए कि कारणमें कार्य सत्-रूपसे रहता है। इसप्रकारसे उनके इस कथनका नाम ही सत्कार्यवाद है। इसके निषेधमें जैनोंका यह कहना है कि यदि कारणके भीतर कार्य सत् अर्थात् विद्यमान होता, तो घड़ा बनानेके लिए कुम्भकार, उसके चाक और दंडा आदि किसीकी भी कोई आवश्यकता नहीं रहती। यदि मिट्टीके पिण्डमे सचमुच घड़ा विद्यमान है, तो फिर वह घड़ेके कार्य जल-आहरण, जल-धारण आदिको क्यो नहीं करता। दूसरे यदि कार्य कारणमें पहलेसे ही विद्यमान है, तो कार्य और कारणके भेदकी कल्पना करना भी व्यर्थ है। तब तो मिट्टी और घड़ा इन दोनोंके लिए एक ही नामका

---

१. प्रधान-। २. अमूर्त्तस्याकाशस्य मूर्त्तस्य पृथिव्यादेश्चैककारणकल्पनायां तु। ३. विद्यमानमेव दृश्यते, इति सांख्यो वदति। असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्। शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥ १॥ ४. न सदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्। शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥ २॥ इत्यादिना सत्कार्यवादस्य प्रतिषेधादिति। ५. प्रमेयकमलमार्तण्डे।

[1]ते च विशेषाः परस्परासम्बद्धा एव, [2]तत्सम्बन्धस्य विचार्यमाणस्यायोगात्। [3]एकदेशेन सम्बन्धे[4] अणुषट्केन युगपद् योगादणोः षडंशतापत्तेः। सर्वात्मनाभिसम्बन्धे[5] पिण्डस्याणुमात्रकत्वापत्तेः[6]। अवयविनिषेधाच्चासम्बद्धत्वमेषा[8]मुपपद्यत एव। [9]तन्निषेधश्च [10]वृत्तिविकल्पादिबाधनात्। तथाहि[11] [12]अवयवा अवयविनि वर्तन्त इति नाभ्युपगतम्[13]। अवयवी चावयवेषु वर्तमानः किमेकदेशेन वर्तते, सर्वात्मना वा? एकदेशेन [14]वृत्तावयवान्तरप्रसङ्गः[15]। [16]तत्राप्येक[17]देशान्तरेणावयविनो वृत्तावनवस्था[18]। सर्वात्मना

भिन्न अन्य कोई सामान्य नहीं है। कहनेका भाव यह कि बुद्धिमें अभेदकी कल्पना ही सामान्य है॥ ३६॥

पुनः बौद्ध कहते हैं कि वे विशेष परस्परमें सम्बन्धसे रहित ही हैं, क्योंकि उन विशेषोंका सम्बन्ध विचार किये जानेपर सिद्ध नहीं होता है। उन परमाणुरूप विशेषोंका परस्परमें सम्बन्ध एक देशसे माननेपर छहो दिशाओंमें स्थित छह परमाणुओंके साथ एक परमाणुका सम्बन्ध होनेसे उसके छह अंश होनेकी आपत्ति प्राप्त होती है। परन्तु परमाणुको निरंश माना गया है। और यदि विशेषोंका सर्वात्मरूपसे सम्बन्ध मानते हैं, तो उन परमाणुओंका परस्परमें प्रवेश हो जानेसे पिण्डके अणुमात्रपनेकी आपत्ति आती है। तथा अवयवीके निषेधसे उन विशेषोंके असम्बद्धपना भी प्राप्त होता है। और अवयवीका निषेध वृत्ति-विकल्प कहिए अवयवीका अवयवोंमें विचार करने और अनुमानसे बाधा आनेके कारण किया जाता है। आगे इसे ही स्पष्ट करते हैं—बौद्ध नैयायिकोंसे कहते हैं कि अवयव अवयवीमें रहते हैं, ऐसा तो आपलोगोंने माना नहीं है। और अवयवी अवयवोंमें रहता हुआ क्या एक देशसे रहता है, अथवा सम्पूर्णरूपसे रहता है? एक देशसे रहनेपर उसके दूसरे भी अवयव होनेका प्रसङ्ग आता है। उन दूसरे अवयवोंमें

१. नैयायिकमत दूषयति बौद्धः। २. विशेषाणां परस्परसम्बन्धस्य। ३. सम्बन्धश्चेदेकदेशेन सर्वात्मना वेति शङ्कायामाह। ४. सति। ५. एकाणुर्निरंशः। ६. परस्परानुप्रवेशात्। ७. एकाश्रितत्वात्। ८. विशेषाणाम्। ९. अवयविनिषेधश्च। १०. अवयवेषु अवयविनः प्रवर्तने तस्य वोचारः, आदिशब्देनानुमानग्रहण ताभ्यां वृत्तिविकल्पाभ्यामुत्तरग्रन्थे निषिद्ध्यमानत्वात्। ११. वृत्तिविकल्पादिबाधनं विवृणोति। १२. बौद्धो नैयायिकं प्राह। १३. नैयायिकेन त्वया न प्रतिज्ञातम्। १४. पटाभावेऽपि तन्तुसद्भावात्। १५. एकदेशस्य। १६. अवयवान्तरेषु। १७. अवयविन एकदेशत्वात्। १८. अवयवेष्ववयविन एकदेशेन वृत्तावयवान्तरप्रसङ्गोऽवयवान्तरेष्वेकदेशेन वृत्तावयवान्तरप्रसङ्गः, तत्राप्येकदेशेन वृत्तावयवान्तरप्रसङ्ग इत्यनवस्था।

[1]तस्यैकव्यक्तिनिष्ठस्य[2] सामस्त्येनोपलब्धस्य[3] तथैव[4] व्यक्त्यन्तरेऽनुपलम्भप्रसङ्गात्। [5]उपलम्भे वा [6]तन्नानात्वापत्ते[7]र्युगपद् भिन्नदेशतया[8] सामस्त्येनोपलब्धेस्तद्व्यक्तिवत्[9]; [10]अन्यथा व्यक्तयोऽपि [11]भिन्ना माभूवन्निति। [12]ततो बुद्ध्यभेद[13] एव सामान्यम्। तदुक्तम्—

एकत्र[14] दृष्टो भावो[15] हि क्वचिन्नान्यत्र[16] दृश्यते।
[17]तस्मान्न भिन्नमस्त्यन्यत्[18]सामान्यं बुद्ध्यभेदतः[19] ॥३६॥ इति[20]

वर्त्तमान ऐसे किसी एक सामान्यरूप तत्त्वका होना सम्भव नहीं है। अर्थात् जब कि सामान्य एक ही है, तब वह अनेक विशेषोंमें अपने पूरे स्वरूपके साथ कैसे रह सकता है? जिस समय वह सामान्य एक व्यक्ति-निष्ठ होकर सामस्त्यरूपसे उपलब्ध हो रहा है, उसी समय उसके उसी प्रकार ही सामास्त्यरूपसे व्यक्त्यन्तर अर्थात् अन्य व्यक्तिमें अनुपलम्भका प्रसङ्ग है, अर्थात् वह नहीं पाया जा सकता। और यदि पाया जाता है, तो उसके नानापनेकी आपत्ति प्राप्त होती है, क्योंकि वह एक साथ भिन्न-भिन्न देशवर्ती व्यक्तियोंमे सामस्त्यरूपसे पाया जाता है, जैसे कि खण्डी-मुण्डी आदि गायोंमे एक गोत्व पाया जाता है। अन्यथा अर्थात् एक साथ भिन्न-भिन्न देशवर्तीरूपसे पाये जानेपर भी व्यक्तियां भी भिन्न-भिन्न न होवें। इसलिए सर्वत्र गोव्यक्तियोंमें बुद्धिका अभेद ही सामान्य है, वास्तविक सामान्य कोई वस्तु नही है। जैसा कि कहा है—

एक स्थानपर देखा गया पदार्थ अन्यत्र कहीं नहीं दिखाई देता है, इसलिए अर्थात् दूसरे स्थानपर उसके दिखाई न देनेसे बुद्धिके अभेदसे

१. सामान्यस्य। २. पदार्थ-। ३. दृष्टस्य। सामस्त्येन। ४. तस्मिन्नेव क्षणे। एकस्मिन् क्षणे सामान्यस्य व्यक्त्यन्तरे। ५. सामान्यस्य। ६. सामान्यं नाना युगपद्भिन्नदेशतया सामस्त्येनोपलब्धेस्तद्व्यक्तिवदिति अनुमानेन साधितं बौद्धेन सामान्यम्। नानात्वं कुतः? ८. सामान्यस्य। ९. खण्डमुण्डादिषु गोत्ववत्, शाबलेयादिव्यक्तिवदिति। १०. नानात्वाभावे सामान्यस्य। युगपद्भिन्नदेशतयोपलब्धेऽपि तस्यैकत्वे। ११. एकस्य योगात्। १२. कल्पितविकल्पेनैव व्यक्त्यन्तरेऽभेदसामान्यस्य। १३. सर्वत्र गोव्यक्तिषु बुद्ध्यभेद एव सामान्यं न तु वास्तवम्। १४. एकस्थाने। १५. धर्मस्य भावः। १६. द्वितीयस्थाने। १७. एकत्र दृष्टस्य भावस्य तदैव द्वितीयस्थानेऽदर्शनात्। १८. स्वतन्त्रम्। १९. बुद्धिभेदं विहाय। अभेदे हेतुरयम्। २०. यो यत्रैव स तत्रैव यो यदैव तदैव सः। न देश-कालयोर्व्याप्तिर्भावानामिह गम्यते॥ इति प्रतिपादनात्। इति किल तवाभिमतमिति किल तत्सौगतमेवानुवदति। तादात्म्य-तदुत्पत्तिस्वरूपस्य।

वनमिति । [1]ततश्च निरंशा एवान्योन्यासंस्पर्शिणो रूपादिपरमाणवः, ते च एकक्षणस्थायिनो न नित्याः; विनाशं प्रत्यन्यानपेक्षणात्[2] । प्रयोगश्च[3]—यो यद्भावं[4] प्रत्यन्यानपेक्ष[5]: स तत्स्वभावनियतः[6]; यथाऽन्त्या[7] कारणसामग्री [8]स्वकार्ये । [9]नाशो हि मुद्गरादिना क्रियमाणास्ततो[10] भिन्नोऽभिन्नो वा क्रियते ? भिन्नस्य करणे घटस्य स्थितिरेव स्यात् । [11]अथ विनाशसम्बन्धान्नष्ट इति व्यपदेश इति चेद् भावाभावयोः[12] कः सम्बन्धः ? न तावत्तादात्म्यम्; [13]तयोर्भेदात् । नापि [14]तदुत्पत्तिरभावस्य कार्याधारत्वाघटनात्[15] ।

दोनों अनुमानोंसे यह सिद्ध हुआ कि रूपादि परमाणु निरंश और परस्परमें असंस्पर्शी (संस्पर्श या सम्बन्ध-रहित) ही हैं । और वे एकक्षणस्थायी हैं, नित्य नहीं हैं; क्योंकि वे अपने विनाशके प्रति किसी अन्यकी अपेक्षा नहीं रखते । इसका अनुमान-प्रयोग इस प्रकार है-(सर्व पदार्थ क्षणिक हैं; क्योंकि वे अपने विनाशशील स्वभावके प्रति अन्यकी अपेक्षासे रहित हैं।) जो जिस भावके प्रति अन्य कारणकी अपेक्षासे रहित है, वह तत्स्वभावनियत है, जैसे तन्तु- संयोगलक्षणवाली अन्तिम कारण-सामग्री अपने पटरूप कार्यकी उत्पत्तिमें किसी अन्यकी अपेक्षा नहीं रखती है ।

यहाँपर कोई शङ्का करता है कि हे, बौद्धो, देखो घटादिकके विनाशमें मुद्गरादिक अन्य पदार्थोंकी अपेक्षा पड़ती ही है, उसे लक्ष्य करके बौद्ध पूछते है कि मुद्गरादिकके द्वारा किया जानेवाला विनाश घटादिकसे भिन्न किया जाता है, अथवा अभिन्न किया जाता है ? विनाशके भिन्न करनेपर घटकी स्थिति ही रहेगी; क्योंकि वह भिन्न ही किया गया है । यदि कहा जाय कि विनाशके सम्बन्धसे 'घट नष्ट हुआ' ऐसा कहा जाता है, तो हम पूछते हैं कि पदार्थके सद्भाव और अभावमें क्या सम्बन्ध है ? तादात्म्यसम्बन्ध

१. प्रथमानुमानादवयवेष्ववयविनोऽभावः साधितः, इति अवयविनो निषेधात्तथा सम्बन्धनिषेधादिति हेतुद्वयाद् रूपादिपरमाणवो निरंशा एव । २. कारणनिरपेक्षात् । ३. सर्वे भावाः क्षणिकाः तत्स्वभावं प्रत्यन्यानपेक्षणात् । ४. विनाशभावम् । ५. कारणनिरपेक्षः । ६. स विनाशस्वभावनियतः । ७. अन्त्यतन्तुसंयोगलक्षणा अन्त्या कारणसामग्री । ८. पटोत्पत्तौ । ९. अत्रापरस्य शङ्का—भो बौद्ध, घटादौ नाशोऽस्त्येवान्यापेक्षा, अन्यत एव मुद्गरादेर्नाशो भवति, इत्याशङ्क्य बौद्धो विकल्पद्वयं कृत्वा दूषयति नैयायिकम् । अथवा नैयायिकोक्ततुच्छाभावमङ्गीकृत्य तं दूषयति—विनाशे घटादौ । अन्यानपेक्षत्वमसिद्धमिति चेदाह । १०. घटादेः स्वकार्यात् । ११. नैयायिकः—भिन्नो भवति, तथापि तेन सह घटस्य सम्बन्धात् घटोऽपि नष्ट इति व्यपदेशः । १२. घटविनाशयोः । १३. भावाभावयोः । १४. नाप्यभावस्य घटादुत्पत्तिर्येन कार्यकारणभावसम्बन्धः स्यात् । १५. यथा भावरूपस्य

वर्तमानोऽपि प्रत्यवयवं [1]स्वभावभेदेन वर्तेत, आहोस्विदेकरूपेणेति ? प्रथमपक्षे अवयविबहुत्वापत्तिः[2] । द्वितीयपक्षे तु अवयवानामेकरूपत्वापत्तिरिति[3] । प्रत्येकं[4] परिसमाप्त्या[5] वृत्तावप्यवयविबहुत्वमिति ।

तथा[6] यद्दृश्यं सन्नोपलभ्यते तन्नास्त्येव; यथा गगनेन्दीवरम् । नोपलभ्यते चावयवेष्ववयवीति । [7]तथा 'यदग्रहे यद्बुद्ध्यभावस्ततो नार्थान्तरम्[8], यथा वृक्षाग्रहे

भी अन्य एक देशसे अवयवीकी वृत्ति माननेपर अनवस्था दोष प्राप्त होता है। यदि कहें कि सम्पूर्णरूपसे अवयवी अवयवोंमें रहता है, ऐसा मानते है। तो हम पूछेंगे कि एक एक अवयवके प्रति स्वभावभेदसे अर्थात् अनेक स्वभावों से रहेगा; अथवा एकरूपसे रहेगा ? प्रथम पक्ष माननेपर अवयवियोंके बहुत होनेकी आपत्ति आती है। द्वितीय पक्ष माननेपर अवयवोंके एकरूप होनेकी आपत्ति आती है। पृथक्-पृथक् एक-एक अवयवके प्रति अवयवीके सम्पूर्ण-रूपसे वृत्ति माननेपर अवयवियोके बहुत होनेकी आपत्ति आती है। इस-प्रकार वृत्तिविकल्पसे अवयवीके माननेमे बाधा आती है।

अब अनुमानसे बाधा दिखलाते हैं—अवयवोंमें अवयवी पाया ही नहीं जाता है; क्योंकि देखने योग्य होनेपर भी वह उपलब्ध नहीं है। जो देखनेके योग्य होते हुए भी उपलब्ध नहीं होता है, वह है ही नहीं; जैसा आकाश-कमल। इसी प्रकार अवयवोंमें अवयवी नहीं पाया जाता है। (इस लिए वह है ही नहीं।) इस अनुमानसे यह सिद्ध किया कि अवयवोंमें अवयवी नही। अब दूसरे अनुमानसे यह सिद्ध करते है कि अवयवोंसे अवयवी का भेद भी नहीं है यथा—अवयवोंसे अवयवी भिन्न पदार्थ भी नही है; क्योंकि अवयवोंके ग्रहण न होनेपर 'यह अवयवी है' ऐसी बुद्धि नहीं उत्पन्न होती है। जिसके अग्रहणमें जिसकी बुद्धिका अभाव है, वह उससे भिन्न पदार्थ नहीं है। जैसे वृक्षोंके ग्रहण न होनेपर वनका अभाव है। इस लिए उक्त

१. अनेकस्वभावैः। २. प्रत्यवयवमवयविनो हि स्वभावभेदान्नानात्वं स्यादेवेति। ३. सर्वेष्वप्यवयवेष्वेकरूपेण वर्तनादवयवानामेकत्वं स्यादेव, स्वभावभेदाभावात्। सामान्यरूपता अङ्गुल्यादीनामस्तु। ४. अवयवमवयवं प्रति। स्वभावभेदेन वा, अभेदेन वा विकल्पौ माऽऽस्तां तथापि दूषयति। ५. साकल्येन।

६. अवयवेषु अवयवी नास्त्येव दृश्यत्वे सत्यनुपलभ्यमानत्वात्। एतावता ग्रन्थेन वृत्तिविकल्पन कृत तेन अवयविबाधनं जातं यथा तथा व्याप्तिपूर्वकेणानुमानेन बाधा चाभ्यते। ७. तथाऽनुमानं अवयवेभ्योऽवयवी नार्थान्तरं अवयवानामग्रहेऽवयविबुद्ध्यभावात्। ८. यस्याग्रहणे। ९. पूर्वानुमानेनावयवेष्ववयवी नास्तीत्यस्य सिद्धिः। अनेन त्ववयवेभ्योऽवयविनो भेदोऽपि नास्तीति वदति।

'अथवा सत्त्वमेव विपक्षे' बाधकप्रमाणबलेन[3] दृष्टान्तनिरपेक्षमशेषस्य वस्तुनः क्षणिकत्वमनुमापयति[4]। तथाहि[5]—सत्त्वमर्थक्रियया[6] व्याप्तम्, अर्थक्रिया च क्रम-यौगपद्याभ्याम्; [7]ते च नित्यान्निवर्त्तमाने स्वव्याप्यामर्थक्रियामादाय निवर्तेते। सापि स्वव्याप्यं [8]सत्त्वमिति नित्यस्य क्रम-यौगपद्याभ्यामर्थक्रियाविरोधात्[9] सत्त्वासम्भावनं विपक्षे बाधकप्रमाणमिति। न हि नित्यस्य[10] क्रमेण युगपद्वा सा[11] सम्भवति; नित्यस्यैकनैव[12]

(अब अन्तर्व्याप्तिरूप अनुमानसे उक्त अर्थकी सिद्धि करते हैं—) अथवा सत्त्वरूप हेतु ही विपक्षरूप नित्यमें बाधक-प्रमाणके बलसे दृष्टान्तके विना ही समस्त वस्तुओंके क्षणिकपनेका अनुमान कराता है।

भावार्थ—पदार्थ नित्य नहीं है; क्योंकि उसमें क्रमसे और युगपत् अर्थक्रियाकारिपनेका अभाव है, इस बाधक-प्रमाणके बलसे सत्त्व हेतु सर्व वस्तुओंको क्षणिक सिद्ध करता है।

आगे इसे ही स्पष्ट करते हैं—(जो वस्तु अर्थक्रियाकारी होती है वही परमार्थसत् है। नित्य पदार्थ अर्थक्रियाकारी नहीं है, इसलिए वह परमार्थसत् भी नहीं है।) इस नियमके अनुसार सत्त्व अर्थक्रियासे व्याप्त है, और अर्थक्रिया क्रम तथा यौगपद्यसे व्याप्त है। वे क्रम और यौगपद्य दोनों ही नित्य पदार्थसे निवृत्त होते हुए अपने साथ व्याप्त अर्थक्रियाको संग लेकर निवृत्त होते हैं। कहनेका सार यह कि नित्य पदार्थमें अर्थक्रिया नहीं बनती। वह अर्थक्रिया भी अपने व्याप्य सत्त्वको साथमें लेकर निवृत्तिरूप होती है। अर्थात् नित्यमें सत्त्व सम्भव नहीं है। इस प्रकार नित्य पदार्थके साथ क्रम और यौगपद्यसे अर्थक्रियाका विरोध है। इसलिए अर्थक्रियाके विना सत्त्वकी असम्भावना ही नित्यरूप विपक्षमें बाधक प्रमाण है।

---

१. बहिर्व्याप्तिमुखेनानुमानम्। २. नित्ये। ३. नित्यः पदार्थो नास्ति, क्रम-यौगपद्याभ्यामर्थक्रियाकारित्वाभावादिति विपक्षे बाधकप्रमाणबलेन। ४. साधयति। ५. अन्तर्व्याप्तिमुखेनानुमानं दर्शयति। ६. यदेवार्थक्रियाकारि तदेव परमार्थसत्। नित्यं नार्थक्रियाकारि तन्न तत् परमार्थसत् ॥ १ ॥ ७. क्रम-यौगपद्ये। ८. व्युत्पन्नं प्रतीदमनुमानम्। ९. नित्यः पदार्थो नास्ति, क्रम-यौगपद्याभ्यामर्थक्रियाकारित्वाभावात्, खरविषाणवत्। १०. नित्यमर्थक्रियाकारि न भवति, क्रम-यौगपद्यरहितत्वात्। ११. अर्थक्रिया। १२. एकस्वभावेनानेकस्वभावेन वेति विकल्पद्वयं मनसि कृत्वा क्रमेण तावदर्थ-क्रियां निराकुर्वन्नाह।

अभिन्नस्य[1] करणे घटादिरेव कृतः स्यात्। [2]तस्य च प्रागेव निष्पन्नत्वाद् व्यर्थं करणमित्यन्यानपेक्षत्वं सिद्धमिति विनाशस्वभावनियतत्वं[3] [4]साधयत्येव। सिद्धे चानित्यानां[5] [6]तत्स्वभावनियतत्वे तदितरेषामात्मादीनां [7]विमत्यधिकरणभावापन्नानां सत्त्वादिना साधनेन [8]तद्-दृष्टान्ताद्भवत्येव क्षणस्थितिस्वभावत्वम्। तथाहि—[9]यत्सत्तत्सर्वमेकक्षणस्थितिस्वभावम्; यथा घटः[10]। सन्तश्चामी भावा[11] इति।

तो कहा नहीं जा सकता; क्योंकि सद्भाव और अभावमें भेद है। तदुत्पत्ति-सम्बन्ध भी नहीं कह सकते, क्योंकि अभावके कार्यका आधारपना घटित नहीं होता। अर्थात् जैसे भावरूप घटकी मृत्पिण्डसे उत्पत्ति होती है, तो वह मृत्पिण्ड घटरूप कार्यका आधार यानी कारण कहलाता है। किन्तु अभाव तो अवस्तुरूप है; इसलिए वह किसी कार्यका आधार नहीं हो सकता। यदि कहें कि मुद्गरादिकसे घटका विनाश अभिन्न किया जाता है, तो उससे घटादिक ही किये गये सिद्ध होते हैं तब विनाश और घटमें भेद नहीं रहता। और घट तो पहले ही निष्पन्न हो चुका है, अतः उसका करना व्यर्थ है, इस प्रकार विनाशके अन्यकी अपेक्षा-रहितता सिद्ध हो जाती है, जो कि परमाणुरूप विशेषोंके विनाशस्वभावकी नियतताको साधन करती ही है। और अनित्य परमाणुओंके विनाशस्वभावनियतता सिद्ध होनेपर उनसे भिन्न विवादापन्न आत्मा आदिक पदार्थोंके सत्त्व आदि हेतुओंके द्वारा घटादि विशेषके दृष्टान्तसे एक क्षणस्थितिवाले स्वभावपनेकी सिद्धि होती ही है। आगे इसी बातको अनुमानसे सिद्ध करते हैं—(सर्व पदार्थ क्षणिक है, क्योंकि वे सत् है।) जो सत् है, वह सर्व एकक्षणस्थिति-स्वभावरूप है; जैसे कि घट। (वस्तुतः घट क्षणिक ही है, उसका पृथुबुध्नोदररूप कुछ काल तक स्थिर रहनेवाला जो आकार दिखलाई देता है और क्षणभंगुरताकी प्रतीति नहीं होती है, उसका कारण अविद्या-जनित भ्रान्ति ही है।) और ये परमाणुरूप पदार्थ सत् हैं, इसलिए वे क्षणिक हैं। यह बहिर्व्याप्तिरूप अनुमान है।

घटस्य मृत्पिण्डादुत्पत्तिरस्ति, तदा तस्य कार्याधारित्वम्। तथाऽभावस्त्ववस्तुरूपस्तस्मात्तस्य कार्याधारित्वाघटनात्। १. मुद्गरादिना घटादभिन्नस्याभावस्य करणे। २. घटस्य। ३. साधनम्। ४. तदन्यानपेक्षत्वं साधनं स्वयं सिद्धं सत् विनाशस्य स्वभावस्य नियतत्वे सति अनित्यत्वं साधयत्येव। ५. विशेषाणां परमाणूनाम्। ६. भिन्नानाम्। ७. विवादापन्नानाम्। ८. घटादिविशेषदृष्टान्तात्। ९. सर्वे भावाः क्षणिकाः सत्त्वात्। १०. परमार्थरूपेण घटः क्षणिक एव, पृथुबुध्नोदराकारेण दृश्यमानो घटः स्थिराकारस्तु यो, न स्वाशु विनश्यतीति भ्रान्तिरेवाविद्यावशादिति। ११. तस्मात् क्षणिकाः।

नित्यस्य [१]परापेक्षायोगात् । [२]तैः [३]सामर्थ्यकरणे[४] नित्यताहानिः । [५]तस्माद्भिन्नमेव सामर्थ्यं [६]तैर्विधीयत इति न नित्यताहानिरिति चेत्तर्हि नित्यमकिञ्चित्करमेव स्यात्, सहकारिजनितसामर्थ्यस्यैव कार्यकारित्वात् । [७]तत्सम्बन्धात्तस्यापि[८] कार्यकारित्वे [९]तत्सम्बन्धस्यैकस्वभावत्वे[१०] सामर्थ्यनानात्वाभावान्न कार्यभेदः । [११]अनेकस्वभावत्वेऽक्रमवत्त्वे[१२] च कार्यवत्तस्यापि[१३] साङ्कर्यमिति सर्वमावर्तत[१४] इति चक्रकप्रसङ्गः । तस्मान्न क्रमेण कार्यकारित्वं नित्यस्य ।

क्रमसे उत्पन्न होते हैं, अतः उपर्युक्त दोष प्राप्त नहीं होता; तो आपका यह कथन भी साधु सङ्गत नहीं है; क्योंकि समर्थ नित्य पदार्थको परकी अपेक्षा नहीं रहती। सहकारी कारणोके द्वारा नित्यके भी अभिन्न सामर्थ्यका करना माननेपर उसको नित्यताकी हानि प्राप्त होती है। यदि कहें कि नित्य पदार्थ से भिन्न ही सामर्थ्य सहकारी कारणोके द्वारा की जाती है, तो फिर नित्य पदार्थ अकिञ्चित्कर ही हो जायगा; क्योंकि वैसी दशामें सहकारी कारणोंसे उत्पन्न हुई सामर्थ्यके ही कार्यकारीपना ठहरता है। यदि कहा जाय कि सहकारी कारणोंसे उत्पन्न हुई सामर्थ्यके सम्बन्धसे उस नित्यके भी कार्यकारीपना बन जाता है, तो हम पूछते हैं कि वह सम्बन्ध एक स्वभाववाला है कि अनेक स्वभाववाला है? उस सम्बन्धको एक स्वभाववाला माननेपर सामर्थ्यके नानापनेका अभाव होनेसे कार्योंके भेद नहीं बन सकेगा। यदि इस दोषके भयसे सामर्थ्यके सम्बन्धको नानास्वभाववाला मानेंगे तो हम पूछते हैं कि वह नानास्वभाववाला सम्बन्ध नित्य पदार्थके साथ अक्रमरूपसे अर्थात् युगपत् सम्बद्ध होगा कि क्रमसे सम्बद्ध होगा? यदि अक्रमरूपसे सम्बद्ध होना मानेंगे तो घटादिकार्योंके समान उस सामर्थ्यके भी सङ्करपना प्राप्त होता है

---

१. निमित्तकारणापेक्षा। २. सहकारिभिः। ३. नित्येन सह सामर्थ्यमविनाभूतं तस्य कारणादेव तदपि क्रियते नित्यताहानिरिति चेन्नैयायिको वदति—तैः सहकारिभिर्नित्यसामर्थ्यं क्रियते, तर्हि तस्माद् भिन्नमभिन्नं वा? यद्यभिन्नं तदा नित्यताहानिः स्यात्। यदि भिन्नं तदा नित्यस्याकिञ्चित्करत्वं स्यात्। ४. नित्यवादिनि। ५. नित्यात्। ६. सहकारिभिः। ७. सहकारिजनितसामर्थ्यसम्बन्धात्। ८. नित्यस्यापि। ९. तेन सामर्थ्येन सह सम्बन्धो यस्य नित्यस्य स तथा, तस्य। १०. सहकारिभिः कृतं यत् सामर्थ्यं तन्नित्येनैकरूपेण सह सम्बद्ध्यते, अनेकरूपेण वा? यद्येकरूपेण सम्बन्धस्तदा सामर्थ्यनानात्वाभावात् कार्यभेदो न स्यात्। तद्दोषभिया सामर्थ्यसम्बन्धस्तु नानास्वभावः, स नानास्वभावसम्बन्धो यदि नित्येन सह सम्बद्ध्यते तदा युगपत् क्रमेण वा? यदि युगपत् तदा घटादिवत् सामर्थ्यस्यापि साङ्कर्यम्। ११. अनेकस्वभावोऽक्रमेण चेत्। १२. युगपत्त्वे। १३. सामर्थ्यस्यापि। १४. तस्मात् सम्बन्धस्य क्रमवत्त्वं स्वीकर्तव्यम्। क्रमवत्त्वे च तदुत्पत्तौ कारणं वाच्यमिति सम्बन्धः।

स्वभावेन पूर्वापरकालभाविकार्यद्वयं कुर्वतः कार्यभेदकत्वात् [1]तस्यैकस्वभावत्वात् [2]तथापि कार्यनानात्वेऽन्यत्र[3] [4]कार्यभेदात्कारणभेदकल्पना विफलैव स्यात् । [5]तादृशमेकमेव किञ्चित् कारणं कल्पनीयं येनैकस्वभावेनैकेनैव चराचरमुत्पद्यत इति ।

अथ[6] स्वभावनानात्वमेव तस्य[7] कार्यभेदादिष्यते[8] इति चेत्तर्हि ते स्वभावास्तस्य सर्वदा[9] सम्भविनस्तदा [10]कार्यसाङ्कर्यम्[11] । नो[12] चेत्[13] तदुत्पत्तिकारणं[14] वाच्यम् ? [15]तस्मादेव [16]तदुत्पत्तौ तत्स्वभावाना सदा सम्भवात्सैव कार्याणां युगपत्प्राप्तिः । [17]सहकारिक्रमापेक्षया तत्स्वभावाना क्रमेण भावान्नोक्त दोष इति चेत्तदपि न साधुसङ्गतम्; समर्थस्य

नित्य वस्तुके क्रमसे अथवा युगपत् वह अर्थक्रिया सम्भव नहीं है; क्योंकि नित्यके एक ही स्वभावसे पूर्वापरकालभावी दो कार्योंको करते हुए वह कार्य का भेदक नहीं हो सकता। इसका कारण यह है कि नित्य पदार्थ एक ही स्वभाववाला होता है। तथापि अर्थात् नित्यके एक स्वभाव वाला होने पर भी यदि कार्योंके नानापना मानेंगे, तो अन्यत्र अर्थात् अनित्य पदार्थमें कार्यके भेदसे कारणके भेदकी कल्पना करना विफल ही हो जायगी। इसलिए इस प्रकारके किसी एक ही कारणकी कल्पना करना चाहिए, जिससे कि एक स्वभाववाले एक ही पदार्थसे समस्त चराचर जगत् उत्पन्न हो जाय।

पुनः नैयायिक कहते है कि यदि नित्यपदार्थके स्वभावका नानापना ही कार्यके भेदसे मानते है, तो हम पूछते हैं कि वे स्वभाव उस नित्य पदार्थके सर्वदा सम्भव है, अथवा सर्वदा सम्भव नहीं है ? यदि सर्वदा सम्भव हैं, तो जीवादि द्रव्यसे उत्पन्न होनेवाले नर-नारकादि पर्यायोंकी एक साथ उत्पत्ति का प्रसङ्ग आनेसे कार्योंकी सङ्करता प्राप्त होती है। यदि वे स्वभाव सर्वदा सम्भव नही है, तो उन स्वभावोंकी उत्पत्तिका कारण कहना चाहिए ? उस नित्य पदार्थसे ही उन स्वभावोकी उत्पत्ति माननेपर उन स्वभावोके सदा सम्भव होनेसे वही कार्योंकी युगपत् प्राप्तिका प्रसङ्ग आता है। यदि कहें कि सहकारी कारणोके क्रम-क्रमसे मिलनेकी अपेक्षा नित्य पदार्थके स्वभाव क्रम-

---

१. नित्यस्य । २. नित्यस्यैकस्वभावत्वे सति । ३. एकत्र नामक्यनुमाने प्रतिपादितमस्ति कार्यभेदात् कारणभेद इति दूषणमुद्भावितम्, तस्य का गतिस्तदन्यत्रोद्भावनीयम् । अनित्यवस्तुनि । ४. कारणभेदात्कार्यभेदस्याङ्गीकारात् । ५. ततश्च । ६. न तु कारणभेदात् । ७. नित्यस्य । ८. यदि । ९. असम्भविनो चेत् विकल्पद्वयप्राप्तिः । १०. जीवादिद्रव्यादुत्पद्यमाननरनारकादिपर्यायाणां युगपदुत्पत्तिप्रसङ्गः । ११. सर्वथा युगपत्प्राप्तिः सङ्करः । तस्य भावः साङ्कर्यम् । १२. यदि कादाचित्कोऽनित्यश्चेत् । १३. ते स्वभावाः सर्वदा सम्भविनो नो चेत् । १४. स्वभावोत्पत्तिकारणम् । १५. नित्यादेव । १६. स्वभावानामुत्पत्तौ । १७. निमित्तकारण।

[1]अथानुभूयन्त[2] एव [3]प्रथमं [4]तथाभूताः क्षणाः[5], पश्चात्तु [6]विकल्पवासनाबलादान्तरा[7]दन्तराल[8]नुपलम्भलक्षणाद्[9] [10]बाह्याच्चाविद्यमानोऽपि [8]स्थूलाद्याकारो विकल्पबुद्धौ चकास्ति[11]। स[12] च [13]तदाकारेणानुरज्यमानः[14] स्वव्यापारं[15] तिरस्कृत्य[16] [17]प्रत्यक्षव्यापारपुरःसरत्वेन प्रवृत्तत्वात् प्रत्यक्षायत[18] इति। तदप्यतिबालविलसितम्; निर्विकल्पक[19]बोधस्यानुपलक्षणात्[20]। [21]गृहीते हि [22]निर्विकल्पकेतरयोर्भेदे [23]अन्याकारानुरागस्यान्यत्र[24] कल्पना[25] युक्ता स्फटिकजपाकुसुमयोरिव, [26]नान्यथेति।

इसपर बौद्ध कहते है कि इन्द्रिय और पदार्थका सम्बन्ध होनेपर सर्वप्रथम निरंश परमाणु ही प्रतिभासित होते हैं; किन्तु पीछे विकल्पकी वासनारूप अन्तरङ्ग कारणसे और बाहरी अन्तरालके नहीं पाये जानेरूप बहिरङ्ग कारणसे अविद्यमान भी स्थिर-स्थूल आदि आकार विकल्प-बुद्धिमें प्रतिभासित होते हैं। और वह विकल्प उस निर्विकल्प प्रत्यक्षके आकारसे अनुरंजित (सम्मिश्रित) होकर अपने विकल्परूप अस्पष्ट व्यापारको तिरस्कृत कर स्पष्टरूप प्रत्यक्ष-व्यापार-पूर्वक प्रवृत्त होनेसे प्रत्यक्षके समान प्रतिभासित होता है। आचार्य कहते हैं कि उनका यह कथन भी अतिबाल-विलासके समा[न] है; क्योंकि किसीको भी निर्विकल्पज्ञानका अनुभव नहीं होता है। निर्विकल[्प] और सविकल्पके भेद गृहीत होनेपर ही अन्य निर्विकल्पके आकारकी अन्य[त्र] (विकल्पमें) कल्पना करना युक्त है जैसे कि स्फटिक और जपाकुसुम[के] पृथक्-पृथक् गृहीत होनेपर ही स्फटिकमें जपाकुसुमकी कल्पना ठीक कह[ी] जाती है, अन्यथा नहीं।

---

१. बौद्धः प्राह। २. निर्विकल्पप्रत्यक्षबुद्धाविन्द्रियार्थसम्बन्धानन्तरं प्रतिभासन्त एव। ३. इन्द्रियार्थप्रत्यासत्त्यनन्तरम्। ४. निरंशाः। ५. परमाणवः। ६. स्वजनित-। ७. आभ्यन्तरात्। ८. मध्ये स्थिरस्थूलसाधारणाकारग्रहणमस्ति, तथा अन्यदपि सन्धानात्। ९. परमाणूनां स्फुटं परस्पर व्यवधानानुपलम्भलक्षणात्। अन्तराले ये क्षणाः नष्टास्तेषामनुपलम्भलक्षणात्। १०. अन्तरालाद् बाह्याच्चेति विशेषस्तथाविधानां स्वरूपज्ञानाभावात्। अर्थात्। ११. शोभते, आशुवृत्त्या अलातचक्रवत्। १२. स च सविकल्पकः। १३. निर्विकल्पप्रत्यक्षाकारेण। १४. आरोप्यमाणः, सम्मिश्रितः। १५. सविकल्पकस्य आत्मव्यापारमविशदमव्यक्तमस्पष्टम्। १६. त्यक्त्वा। १७. निर्विकल्पस्य व्यापारं विशदं स्पष्टम्। १८. इति बौद्धसिद्धान्तः। १९. ज्ञानस्य। २०. अनुपलम्भात्, अननुभवनात्। २१. बौद्धाभिप्रायमनूद्य दूषयति—बौद्धलोके एवं स्थितिः। २२. निर्विकल्प-सविकल्पकयोः। २३. प्रत्यक्षानुरागस्य। २४. विकल्पे। २५. पूर्वं स्फटिकवस्तुनि निश्चिते सति स्फटिके जपाकुसुमस्य कल्पना युक्ता। २६. निर्विकल्प-सविकल्पकयोर्भेदेऽगृहीते निर्विकल्पाकारस्य सविकल्पेऽनुरागता न युक्ता।

नापि युगपत्; अशेषकार्याणां युगपदुत्पत्तौ द्वितीयक्षणे कार्याकरणादनर्थक्रियाकारित्वेना-वस्तुत्वप्रसङ्गात्। इति नित्यस्य क्रमयौगपद्याभावः सिद्ध एवेति सौगताः प्रतिपेदिरे[1]।

तेऽपि न युक्तवादिनः; सजातीयेतरव्यावृत्तात्मना[2] [3]विशेषाणामनंशानां ग्राहकस्य प्रमाण-स्याभावात्। प्रत्यक्षस्य [4]स्थिरस्थूलसाधारणाकारवस्तुग्राहकत्वेन निरंशवस्तुग्रहणायोगात्। न हि परमाणवः परस्परासम्बद्धाश्चक्षुरादिबुद्धौ[5] प्रतिभान्ति, [6]तथा सत्यविवादप्रसङ्गात्[7]।

अर्थात् जड़ और चेतन सभी प्रकारके कार्योंके सामर्थ्यकी युगपत् प्राप्तिका प्रसङ्ग आता है। इस प्रकार पुनः पुनः सर्व दोषोंके आवर्तन होनेसे चक्रक-दोषका प्रसङ्ग उपस्थित होता है। इस कारण नित्यके क्रमसे कार्यकारीपना नहीं बनता है। और न युगपत् भी कार्योंका करना बनता है; क्योंकि समस्त कार्योंकी एक साथ उत्पत्ति होनेपर द्वितीय क्षणमें कार्यके न करनेसे अर्थक्रियाकारिताका अभाव हो जायेगा और वैसी दशामें उसके अवस्तुपनेका प्रसङ्ग आता है। इस प्रकार नित्यपदार्थके क्रमसे और युगपत् कार्यका अभाव सिद्ध ही है, ऐसा बौद्धमती प्रतिपादन करते है और कहते हैं कि विशेष ही वस्तुका स्वरूप है, सामान्य वस्तुका स्वरूप नहीं। और वे विशेष परस्परमें सम्बन्ध-रहित है, अवयवी नही है तथा एक क्षण-स्थायी है; नित्य नहीं है।

इस प्रकार बौद्धोंने सामान्य प्रमाणका विषय नहीं हो सकता, किन्तु विशेष ही प्रमाणका विषय है, यह सिद्ध किया। आचार्य कहते है कि ऐसा कहनेवाले बौद्ध भी युक्तिवादी नही है; क्योंकि सजातीय-विजातीय पृथक्-पृथक् स्वरूपवाले अंश-रहित विशेषोंके ग्राहक प्रमाणका अभाव है। प्रत्यक्ष प्रमाण तो स्थिर, स्थूल और साधारण आकारवाले पदार्थका ग्राहक है, अतः वह निरंश वस्तुको ग्रहण कर नही सकता। इसका कारण यह है कि परस्पर में सम्बन्ध-रहित परमाणु चक्षु आदि इन्द्रियोंकी बुद्धिमे प्रतिभासित नहीं होते है। यदि प्रतिभासित होते, तो फिर विवादका प्रसङ्ग ही नहीं आता, अर्थात् सभी वैसा ही मानते।

१. विशेषा एव वस्तुस्वरूपं न सामान्यम्। पुनर्विशेषाः परस्परासम्बन्धिन एकावयविनः नैवैकक्षणस्थायिनः। एवं सति सम्बन्धिनः अवयविनो नित्या नैवेति बौद्धाः स्वमतमाहुः। २. भिन्नस्वरूपाणाम्। ३. परमाणूनाम्। ४. क्षणिकत्वव्यव-च्छेदार्थं स्थिरपदम्, परमाणुत्वनिरासार्थं स्थूलपदम्, विशेषनिरासार्थं साधारणपदम्, आकारपदं तु प्रत्येकं परिसमाप्यते। ५. प्रत्यक्षज्ञाने। ६. प्रतिभासन्ते चेत्। ७. प्रत्यक्षतः परमाणूनां प्रतीतौ परस्परं सर्वेषां विवादप्रसङ्गो माऽस्तु।

विषविशेषावभासः। नाप्यनुमानबुद्धौ[2]; तदविनाभूतस्वभावकार्यलिङ्गाभावात्। [3]अनुपलम्भोऽसिद्ध एव; अनुवृत्ताकारस्य[4] स्थूलाकारस्य[5] [6]चोपलब्धेरुक्तत्वात्।

यदपि 'परमाणूनामेकदेशेन सर्वात्मना वा सम्बन्धो नोपपद्यत [7]इति' [8]तत्रानभ्युपगम[9] एव परिहारः; स्निग्धरूक्षाणां[10] सजातीयानां विजातीयानां च [11]द्व्यधिकगुणानां कथञ्चित्स्कन्धाकारपरिणामात्मकस्य सम्बन्धस्याभ्युपगमात्।

को ही विषय नहीं करनेवाला ऐसा कोई अन्य ज्ञान उन दोनोंके एकत्वका अध्यवसाय करनेमें समर्थ नहीं है; अन्यथा अतिप्रसङ्ग दोष आवेगा। अर्थात् फिर रसनेन्द्रियके द्वारा रूपके जाननेका भी प्रसङ्ग प्राप्त होगा। इसलिए यह मानना चाहिए कि प्रत्यक्ष-ज्ञानमें उस प्रकारके परस्पर असम्बद्ध परमाणुरूप विशेष प्रतिभासित नहीं होते। और, न अनुमान-ज्ञानमें भी उनका प्रतिभास होता है; क्योंकि परस्पर असम्बद्ध परमाणुओंके अविनाभावी स्वभावलिङ्ग और कार्यलिङ्गका अभाव है। तीसरा अनुपलम्भरूप हेतु तो असिद्ध ही है। अर्थात् यदि यह कहा जाय कि स्थिर-स्थूल-साधारणाकारवाले पदार्थके नहीं पाये जानेसे परमाणुरूप विशेष ही तत्त्व है, सो यह कथन भी असिद्ध है; क्योंकि अन्वयरूप अनुवृत्त आकारकी और स्थूल आकारकी उपलब्धि प्रत्यक्षसे होती है, यह कहा ही जा चुका है।

और भी जो बौद्धोंने कहा था कि परमाणुओंका एकदेशसे अथवा सर्वदेशसे सम्बन्ध नहीं बन सकता है, सो इस विषयमें वैसा नहीं मानना ही हमारा परिहार है; क्योंकि हम जैन लोग तो स्निग्ध-रूक्ष, सजातीय और विजातीय दो अधिक गुणवाले परमाणुओंका कथञ्चित् स्कन्धके आकारसे परिणत होनेरूप सम्बन्धको मानते हैं।

भावार्थ—परमाणुओंमें कुछ स्निग्ध गुणवाले परमाणु होते है और कुछ

१. परस्परासम्बद्धपरमाणूनामवभासः। २. परस्परासम्बद्धपरमाण्वविनाभूत-। ३. विशेषा एव तत्त्वं स्थिरस्थूलसाधारणाद्याकारानुपलब्धेः स्थिरादीनामनुपलब्धिरेवासिद्धा। ४. प्रत्यक्षाकारेण सामान्यादेः। ५. विशेषाकारस्य। ६. यद्यनुवृत्ताकारस्य स्थूलाकारस्यानुपलम्भबलेनानुपलब्धिः स्यात्तदा निरंशपरमाणूनां सिद्धिः स्यात् नान्यथा। प्रत्यक्षेण हि स्थूलाद्याकारस्य प्रतीतेः।

७. उक्तम्। ८. एकदेशेन सर्वात्मना वा परमाणूनां सम्बन्धानुपपद्यमाने। ९. जैनानामनङ्गीकार एव विकल्पद्वयस्य। स्याद्वादिनां तथा अभ्युपगमो नास्ति। १०. न जघन्यगुणानाम्। ११. णिद्धस्स णिद्धेण दुराहिएण लुक्खस्स लुक्खेण दुराहिएण। णिद्धस्स लुक्खेण हवेइ बंधो जहण्णवज्जे विसमे समे वा ॥१॥ स्निग्धमेकं रूक्षद्वयम्। एकस्य

एतेन[1] तयोर्युगपद्[2]-वृत्तेर्[3]लघुवृत्तेर्[4]वा[5] तदेक[6]त्वाध्यवसाय[7] इति निरस्तम्[8]; [9]तस्यापि कोशपानप्रत्येयत्वादिति । केन[10] वा [11]तयोरेकत्वाध्यवसायः[12] ? न तावद्विकल्पेन, [13]तस्याविकल्पवार्तानभिज्ञत्वात् । नाप्यनुभवेन[14]; तस्य [15]विकल्पागोचरत्वात् । न च [16]तदुभयाविषय[17] [18]तदेकत्वाध्यवसाये समर्थमतिप्रसङ्गात्[19] । [20]ततो न प्रत्यक्षबुद्धौ [21]तथा-

इसी उपर्युक्त कथनके द्वारा निर्विकल्प और सविकल्पमें युगपद्-वृत्तिसे अथवा लघु अर्थात् शीघ्र वृत्तिसे उस निर्विकल्प और सविकल्पकी एकताका निश्चय होता है, इस कथनका भी निराकरण कर दिया गया समझना चाहिए, क्योंकि उनका यह कथन सौगन्ध (शपथ) खानेके समान ही है।

भावार्थ—सविकल्प और निर्विकल्पमें एकत्वका अध्यवसाय यदि युगपद्-वृत्तिसे माना जाय तो मोटी तिलपापड़ी आदिके खाते समय रूपादि पाँचोंका ज्ञान युगपद् होनेसे उनमें भी अभेदका अध्यवसाय माना जाना चाहिए। और यदि निर्विकल्प और सविकल्पमें शीघ्र वृत्तिसे अभेदका अध्यवसाय माना जाय तो गधेके धीरे-धीरे रेंकने आदिके शब्दोंमें भी अभेदका अध्यवसाय माना जाना चाहिए। परन्तु ये दोनों ही ठीक नहीं है, अतः उनका उक्त कथन समीचीन नहीं है, किन्तु सौगन्ध खाकर जबरन विश्वास दिलाने जैसा है।

अथवा उस निर्विकल्प-सविकल्पके एकत्त्व-अध्यवसायका निश्चय किस ज्ञानसे होगा ? विकल्पज्ञानसे तो हो नहीं सकता; क्योंकि वह निर्विकल्पकी वार्तासे भी अनभिज्ञ (अनजान) है। तथा अनुभवरूप निर्विकल्प प्रत्यक्षसे भी उन दोनोंके एकत्वका अध्यवसाय किया नहीं जा सकता; क्योंकि अनुभव विकल्पके अगोचर है, अर्थात् उसका विषय नहीं है। और उन दोनों

---

१. सविकल्पे निर्विकल्पस्याकारनिराकरणेन । २. निर्विकल्प-सविकल्पकयोः । ३. युगपद्-वृत्तेस्तयोरेकत्वाध्यवसाय इति चेत्तर्हि दीर्घशष्कुलीभक्षणादौ रूपादिज्ञानपञ्चकस्याप्यभेदाध्यवसायः स्यात् । ४ क्रमवत्त्वेऽपि । ५. निर्विकल्प-सविकल्पयोः । ६. लघुवृत्तेश्चाभेदाध्यवसाये खररटितमित्यादावप्यभेदाध्यवसायः स्यादिति । ७. निश्चयः । ८. भो जैन, कथं निरस्तम् ? निर्विकल्पकादेव सविकल्पकं जायते, तस्मादेकत्वाध्यवसायः । भो बौद्ध, तदेकेन निश्चितं किमध्यवस्यति ? तदेव वक्तव्यम् । ९. युगपद्वृत्तेर्लघुवृत्तेर्वा तदेकत्वाध्यवसायस्यापि । १०. ज्ञानेन । ११. निर्विकल्प-सविकल्पकयोः । १२. निश्चयः । १३. विकल्पज्ञानस्य । १४. प्रत्यक्षेण निर्विकल्पज्ञानेन । १५ विकल्पागोचरत्वं यस्य स । १६. तदुभयमविषयो यस्य ज्ञानान्तरस्य । १७. ज्ञानान्तरं निर्विकल्पसविकल्पविषयकम् । १८. निर्विकल्प-सविकल्पयोः । १९. सर्वेन्द्रियस्य सकलप्रसङ्गः । २०. केनापि प्रमाणेन तदेकत्वाध्यवसायस्य ग्रहणं न भवति यतः । २१. परमताभ्युपगमप्रमाणेन ।

नुज्ञानरूपत्वात्[1] कथञ्चित्तादात्म्यरूपेण वृत्तिरित्यवसीयते; तत्र[2] [3]यथोक्तदोषाणामनवकाशात्। विरोधादिदोषश्चाग्रे प्रतिपेत्स्यत इति नेह प्रतन्यते।

यच्चैकक्षणस्थायित्वे[4] साधनम्[5]—'यो यद्भावं प्रतीत्याद्युक्तम्', तदप्यसाधनम्; असिद्धादिदोषदुष्टत्वात्। 'तत्रान्यानपेक्षत्वं तावदसिद्धम्,[7] घटाद्यभावस्य मुद्गरादिव्यापारान्वयव्यतिरेकानुविधायित्वात् तत्कारणत्वोपपत्तेः[8]। [9]कपालादिपर्यायान्तरभावो[10] हि घटादेरभावः;[11] तुच्छाभावस्य[12] सकलप्रमाणगोचरातिक्रान्तरूपत्वात्।

है, इसलिए कथञ्चित् तादात्म्यरूपसे अवयवीकी अवयवोंमें वृत्ति है, ऐसा निश्चय करनेमें आता है। और अवयवीके अवयवोंमें कथञ्चित् तादात्म्यरूपसे रहनेमें आपके द्वारा ऊपर कहे गये दोषोंको अवकाश भी नहीं है। और विरोधादि दोषोंकी जो सम्भावना की जाती है, उसका आगे निषेध किया जायगा; इसलिए उनका यहाँपर विस्तार नहीं करते हैं।

अब आचार्य सामान्यके दूसरे भेदको दृष्टान्तके साथ दिखलाते हैं—

---

१. सास्नादिमत्त्वेन। २. सामान्यं नित्यमेकमनेकसमवायीति तन्मतम्। ३. साकल्येन। ४. प्रत्येकं गोव्यक्तिषु खण्ड-मुण्डादिषु। ५. नित्यैकरूपस्य सामान्यस्य गोत्वादेः। ६. प्रत्येकगोव्यक्तिभिन्नं सदृशपरिणामात्मकं गोत्वाद्यनेकमिति।

अनुवृत्ताकारो हि गौर्गौरित्यादिप्रत्ययः। व्यावृत्ताकारः श्यामः शबल इत्यादिप्रत्ययः। तयोर्गोचरस्तस्य भावस्तत्त्वम्, तस्मात्। एतेन[1] तिर्यक्सामान्य[2]व्यतिरेकलक्षण[3]विशेषद्वयात्मकं वस्तु साधितम्। पूर्वोत्तराकारयोर्यथासङ्ख्येन परिहारावाप्ती,[4] ताभ्यां[5] स्थितिः सैव लक्षणं यस्य, स चासौ परिणामश्च, तेनार्थक्रियोपपत्तेश्चेत्यनेन तूर्ध्वतासामान्यपर्यायाख्यं विशेषद्वयरूप[7] वस्तु समर्थितं भवति।

अथ प्रथमोद्दिष्टसामान्यभेद दर्शयन्नाह—

पदार्थ सामान्य-विशेषात्मक, द्रव्य-पर्यायात्मक या अनेक धर्मात्मक है, इसे सिद्ध करनेके लिए आचार्यने इस सूत्रमें दो हेतु दिये हैं। उनमें पहला हेतु है कि पदार्थ-अनुवृत्त और व्यावृत्त प्रत्ययका विषय है। यह गौ है, यह भी गौ है, यह भी गौ है, इस प्रकारकी सदृश आकारवाली प्रतीतिको अनुवृत्तप्रत्यय कहते है। यह गाय काली है, यह चितकबरी है, इस प्रकारकी विशेष आकारवाली प्रतीतिको व्यावृत्तप्रत्यय कहते हैं। इन दोनों प्रकारके प्रत्ययोंका गोचर कहिये विषय होना, उसके भावको अनुवृत्त-व्यावृत्तप्रत्ययगोचरत्व कहते हैं। उससे पदार्थ अनेकान्तात्मक सिद्ध होता है। इस प्रथम हेतुके द्वारा तिर्यक्सामान्य और व्यतिरेकलक्षण विशेष इन दोनों धर्मवाली वस्तुकी सिद्धि की। (यहाँपर अनुवृत्तप्रत्ययसे तिर्यक्सामान्य और व्यावृत्तप्रत्ययसे व्यतिरेकविशेषका अभिप्राय है। इनका स्वरूप आचार्य स्वयं आगे कह रहे है।) पूर्वाकार और उत्तराकार इन दोनों पदोंका यथाक्रमसे परिहार और अवाप्ति इन दोनों पदोंके साथ सम्बन्ध करना चाहिए। अर्थात् पूर्व आकारके परिहारको व्यय कहते हैं और उत्तर आकारकी प्राप्तिको उत्पाद कहते हैं। इन दोनों उत्पाद और व्ययके साथ वस्तुकी जो स्थिति है उसे ध्रौव्य कहते है। वही है लक्षण जिसका ऐसा जो परिणाम है, उससे अर्थक्रिया वन जाती है। इस दूसरे हेतुके द्वारा ऊर्ध्वतासामान्य और पर्यायनामक विशेप इन दोनो धर्मवाली वस्तु है, यह समर्थन किया गया। (इस ऊर्ध्वतासामान्य और पर्यायविशेपका स्वरूप आगे कहा जा रहा है।)

अब प्रथम कहे गये सामान्यके भेद दिखलाते हुए आचार्य उत्तर सूत्र कहते है—

---

१. व्याख्यानेन। २. तिर्यक् सामान्यं च व्यतिरेकलक्षणविशेषश्च तयोर्द्वयोः। ३. खण्डमुण्डादिः विशेषः। ४. उत्पादव्ययध्रौव्यत्वं सूचितं वर्तते। ५. सह। ६. परिणामस्य। ७. सुख दुःखादि।

पर्यायव्यतिरेकभेदात् ॥ ७ ॥

तदेव[1] प्रतिपादयति—

प्रथमविशेषभेदमाह—

एकस्मिन् द्रव्ये क्रमभाविनः परिणामाः[2] पर्याया[3] आत्मनि हर्ष-विषादादिवत् ॥ ८ ॥

अत्रात्मद्रव्यं[4] स्वदेहप्रमितिमात्रमेव, न व्यापकम्, नापि[5] वटकणिकामात्रम्। न च कायाकारपरिणतभूतकदम्बकमिति[6]।

सूत्रार्थ—पर्याय और व्यतिरेकके भेदसे विशेष दो प्रकारका है ॥ ७ ॥

अब अचार्य विशेषके प्रथम भेदको कहते हैं—

सूत्रार्थ—एक द्रव्यमें क्रमसे होनेवाले परिणामोंको पर्याय कहते हैं। जैसे आत्मामें हर्ष-विषाद आदि परिणाम क्रमसे होते हैं, वे ही पर्याय हैं ॥८॥

यहाँपर आचार्य आत्मद्रव्यके विषयमें विशेष ऊहापोह करते हुए कहते हैं कि यह आत्मद्रव्य अपने शरीरके प्रमाणमात्र ही है; न व्यापक है, न वटकणिकामात्र भी है और न शरीराकारसे परिणत पृथिव्यादि भूतोंके समुदायरूप है।

भावार्थ—यौगादि कितने ही मतावलम्बी आत्माको सर्वव्यापक मानते हैं। कितने ही मतवाले आत्माको वट-बीजके समान अत्यन्त छोटा मानते है और नास्तिकमती चार्वाक आत्मद्रव्यका स्वतन्त्र अस्तित्व ही नहीं मानते हैं। उनका कहना है कि पृथ्वी, जल, अग्नि और वायु इन चार भूतोंके सम्मिलनसे एक चैतन्यशक्ति उत्पन्न हो जाती है और वह भूत-समुदायके विघट जानेपर विनष्ट हो जाती है, अतः आत्मा नामका कोई स्वतन्त्र पदार्थ नहीं है। आचार्य आगे इन ही तीनों मान्यताओंका क्रमसे खण्डन कर रहे हैं।

---

१. द्वैविध्यमेव। २. ज्ञानसुखवीर्यादयः। ३. ज्ञानसुखवीर्यदर्शनादय आत्मनः सहभावित्वाद् गुणाः स्युः, क्रमभावित्वाच्च ते पर्यायाश्च भवन्ति। कुतो वस्तुनोऽनेकधर्मात्मकत्वात्। ४. अहं सुखी, अहं दुःखी, घटादिकमहं वेद्मीत्यहमहमिकया स्वदेह एव सुखादिस्वभावतया आत्मा प्रतीयते, परसम्बन्धिनि देहान्तरेऽन्तराले वा न प्रतीयते। तथापि व्यापकत्वपरिकल्पनाया तस्य सर्वदर्शित्वं भोजनादिव्यवहारसङ्करश्च स्यात्, तस्य सर्वैरात्मभिः सम्बन्धादिति। ५. बौद्धः। सर्वशरीरे सुखादिप्रतीतेर्विरोधान्नापि वटकणिकामात्रमिति। ६. चार्वाकः पृथिव्यप्तेजोवायुरूपभूतकदम्बकमिति। अचेतनैः भूतकदम्बकैश्चेतनात्मन उत्पत्तिविरोधात्।

[1]परापरविवर्तव्यापि द्रव्यमूर्ध्वता मृदिव [2]स्थासादिषु[3]॥ ५ ॥

सामान्यमिति वर्तते। तेनायमर्थः—ऊर्ध्वतासामान्यं भवति। किं तत्? द्रव्यम्। तदेव विशिष्यते परापरविवर्त[4]व्यापीति पूर्वापरकालवर्ति [5]त्रिकालानुयायीत्यर्थः। चित्रज्ञानस्यैकस्य युगपद्भाव्यनेकस्वगतनीलाद्याकारव्याप्तिवदेकस्य[6] [7]क्रमभाविपरिणाम[8]-व्यापित्वमित्यर्थः[9]।

विशेषस्यापि द्वैविध्यमुपदर्शयति—

[10]विशेषश्च[11] ॥ ६ ॥

द्वेधेत्यधिक्रियमाणेनाभिसम्बन्धः।

सूत्रार्थ—पूर्व और उत्तर पर्यायोंमें रहनेवाले द्रव्यको ऊर्ध्वतासामान्य कहते हैं। जैसे स्थास, कोश, कुशूल आदि घटकी पर्यायोंमें मिट्टी रहती है ॥ ५ ॥

यहाँपर सामान्य पदकी अनुवृत्ति होती है। उससे यह अर्थ होता है कि यह ऊर्ध्वतासामान्य है। वह क्या वस्तु है? द्रव्य है। वह द्रव्य 'परापर-विवर्तव्यापि' इस विशेषणसे विशिष्ट है। परापर-विवर्त्तव्यापि इस पदका अर्थ है पूर्वापरकालवर्ती या त्रिकाल-अनुयायी। अर्थात् जो त्रिकालवर्ती समस्त पर्यायोंमें व्याप्त होकर साथ रहता है, ऐसे द्रव्यको ऊर्ध्वतासामान्य कहते हैं। जैसे एक चित्रज्ञान एक साथ होनेवाले अपने अन्तर्गत अनेक नील-पीतादि आकारोंमें व्याप्त रहता है, उसी प्रकार ऊर्ध्वतासामान्यरूप जो द्रव्य है, वह काल-क्रमसे होनेवाली पर्यायोंमें व्याप्त होकर रहता है।

अब आचार्य विशेषके भी दो भेद है, यह दिखलाते हैं—

सूत्रार्थ—विशेष भी दो प्रकारका है ॥ ६ ॥

यहाँपर 'द्वेधा' इस पदका अधिकारसे सम्बन्ध किया गया है। अब आचार्य उन दोनों भेदोंका प्रतिपादन करते हैं—

१. पर्यायरूपविशेषव्यापित्वाद् व्यक्तिनिष्ठत्वमूर्ध्वतासामान्यं सिद्धम्। २. पर्यायेषु। ३. तदेव जैनैरुपादानकारणं प्रोक्तं नैयायिकादिभिश्च समवायिकारणमुक्त-मित्यर्थः। ४. पर्याय-। ५. एकरूपम्। ६. द्रव्यस्य। ७. ऊर्ध्वताख्यं द्रव्यं क्रमभावा हर्षादिपरिणामाः पर्यायाः, तं तदात्मकं तिर्यग्रूपं सामान्यं विसदृशपरिणामरूप-विशेषस्तदात्मकं भेदाभेदात्मकं इत्येतस्य वाक्यस्य द्रव्य-पर्यायात्मकं सामान्य-विशेषात्मक-मिति वाक्यद्वय व्याख्यातम्। ८ यथैकं भिन्नदेशार्थान् कुर्याद् व्याप्नोति वा सकृद् (युगपत्)। तथैकं भिन्नकालार्थान् कुर्याद् व्याप्नोति वा क्रमात् ॥ इति भट्टाकलङ्क-देवैरलङ्कृतत्वात्। ९. चित्रज्ञानं युगपद् व्याप्नोति, ऊर्ध्वतासामान्यं क्रमेण व्याप्नो-तीति युगपद्भेदो नान्यः। १०. यथा द्वेधा सामान्यं तथा विशेषश्चेत्यभिसम्बन्धः। ११. चकारोऽपिशब्दार्थे।

तदपि न साधु साधनम्। अणुपरिमाणानधिकरणत्वमित्यत्र[1] किमयं नञर्थः पर्युदासः[2] प्रसज्यो[3] वा भवेत्? तत्राद्यपक्षे[4] अणुपरिमाणप्रतिषेधेन महापरिमाणमवान्तरपरिमाणं[5] परिमाणमात्रं वा[6]। महापरिमाणं चेत्साध्यसमो[7] हेतुः। अवान्तरपरिमाणं चेद् विरुद्धो[8] हेतुः, अवान्तरपरिमाणाधिकरणत्वं ह्यव्यापकत्वमेव[9] साधयतीति। परिमाण-

विशेषार्थ—इस अनुमानमें 'नित्य है' यदि इतना ही हेतु कहते, तो परमाणुओंके रूपादि गुणोंमें भी नित्यता पाई जाती है, अतः उनसे व्यभिचार दोष प्राप्त होता, उसके परिहारके लिए द्रव्य ऐसा कहा है। यदि 'द्रव्य इतना ही हेतु कहते, तो घट भी द्रव्य है, उससे व्यभिचार आता, अतः उसके परिहारके लिए नित्य विशेषण दिया है। यदि 'नित्य द्रव्य' ऐसा हेतु कहते तो मनसे व्यभिचार आता, अतः उसके परिहारके लिए अणुपरिमाणानधिकरणत्व ऐसा हेतुका विशेषण दिया है।

आचार्य कहते हैं कि आपका यह अनुमान भी साधु नहीं है; क्योंकि अणुपरिमाणानधिकरणत्व इस हेतुके विशेषणमें जो यह निषेधरूप नञर्थ है, वह पर्युदासरूप है कि प्रसज्यरूप है? उनमेंसे पर्युदासरूप आद्य पक्षके माननेपर अणुपरिमाणके प्रतिषेधसे महापरिमाण अभीष्ट है, अथवा अवान्तर अर्थात् मध्य परिमाण अभीष्ट है. अथवा परिमाणमात्र अभीष्ट है? यदि महापरिमाण कहें, तो हेतु साध्यसम है, क्योंकि महापरिमाण और व्यापकपनेमें कोई भेद नहीं है। यदि अवान्तरपरिमाण कहें, तो हेतु विरुद्ध हेत्वाभास हो जाता है; क्योंकि अवान्तर-परिमाणका अधि-

नित्यत्वमस्ति, व्यापकत्वं नास्ति। अणुपरिमाणाधिकरणादन्यत्वं वा, अणुपरिमाणाधिकरणाभावो वा इति। नित्यत्वादित्युक्ते परमाणुगतरूपेण व्यभिचारस्तत्परिहारार्थं द्रव्यत्वादिति। द्रव्यत्वादित्युक्ते घटादिभिर्व्यभिचारस्तत्परिहारार्थं नित्यमिति। तावत्युक्ते मनसाऽनेकान्तः व्यापकं मनो यतः, अत उक्तं अणुपरिमाणानधिकरणत्वे सतीति।

१. साधने। २. भावान्तरस्वभावः। ३. तुच्छाभावरूपो वा। तदुक्तम्—
पर्युदासः प्रसज्यश्च द्वौ नञौ गदिताविह। पर्युदासः सद्ग्राही प्रसज्यस्तु निषेधकः ॥१॥
४. पर्युदासपक्षे। ५. मध्यपरिमाणम्। ६. इति विकल्पत्रयम्। ७. महापरिमाणस्यार्थो हि व्यापकत्वं तर्हि आत्मा व्यापकः, व्यापकत्वादित्यायातमिति। यथाऽनित्यः शब्दोऽनित्यत्वे सति बाह्येन्द्रियप्रत्यक्षत्वादित्यत्र हेतोः साध्यसमत्वं तथा प्रकृतेऽपीति भावः। महापरिमाणव्यापकत्वयोः समानार्थत्वात्। ८. व्यापकत्वविरुद्धाव्यापकत्वेनावान्तरपरिमाणस्य हेतोर्व्याप्तत्वाद्विरुद्धत्वमणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वादिति हेतोः।
९. पटादिकम्।

तत्र[1] व्यापकत्वे [2]परेषामनुमानम्—आत्मा व्यापकः, [3]द्रव्यत्वे सत्यमूर्त्तत्वा[4]दाकाशवदिति। तत्र[5] यदि रूपादिलक्षणं [6]मूर्त्तत्वं तत्प्रतिषेधो[7]ऽमूर्त्तत्वम्; तदा [8]मनसाऽनेकान्तः। अथासर्वगत[9]द्रव्यपरिमाणं[10] मूर्त्तत्वम्, तन्निषेधस्तथा[11] चेत्परम्प्रति[12] साध्यसमो[13] हेतुः। यच्चापरमनुमानम्—आत्मा व्यापकः, अणुपरिमाणानधिकरणत्वे[14] सति नित्यद्रव्यत्वादाकाशवदिति।

इन तीनों मान्यताओंमेंसे पहली मान्यतावाले आत्माके व्यापक होनेमें इस प्रकार अनुमानका प्रयोग करते हैं—आत्मा व्यापक है; क्योंकि उसमें द्रव्यपना होते हुए अमूर्त्तपना पाया जाता है। जैसे आकाश द्रव्य होते हुए अमूर्त्त है अतः व्यापक है, उसी प्रकार आत्मा भी व्यापक है। आचार्य ऐसा अनुमान-प्रयोग करनेवालोंसे पूछते हैं कि यदि आप लोग रूपादि-लक्षणवाले मूर्त्तत्वके प्रतिषेधको अमूर्त्तत्व कहते हैं, तो आपके हेतुमें मनसे व्यभिचार आता है; क्योंकि आप लोगोने मनको द्रव्य मान करके भी अमूर्त्त माना है, परन्तु उसे व्यापक नहीं माना है। यदि कहें कि असर्वगत अर्थात् अव्यापक या सीमित द्रव्यपरिमाणका नाम मूर्त्तत्व है और उसके निषेधको अमूर्त्तत्व कहते है, तो आपका हेतु पर जो हम जैन है उनके प्रति साध्यसम हो जाता है। अर्थात् फिर व्यापकपनेमें और अमूर्त्तपनेमें कोई भेद नहीं रहता और जैसे साध्य असिद्ध होता है, उसी प्रकार आपका हेतु भी असिद्ध हो जाता है और असिद्ध हेतुसे साध्यकी सिद्धि होती नही है। आत्माको व्यापक सिद्ध करनेके लिए आपका दूसरा अनुमान यह है—आत्मा व्यापक है; क्योंकि वह अणुपरिमाण-अधिकरणवाला न होकर नित्य द्रव्य है; जैसे आकाश।

---

१. त्रिषु मध्ये। २. यौगानाम्। ३. हर्षविषादादिभावव्यवच्छेदार्थम्। ४ अमूर्त्तत्वादित्युक्ते क्रियासु व्यभिचारोऽत उक्तं द्रव्यत्वे सतीति। ५. द्रव्यत्वे सत्यमूर्त्तत्वादिति साधने। ६. रूपरसगन्धस्पर्शमयी मूर्त्तिः। इदं लक्षणं मूर्तस्य। ७. रूपादिलक्षणप्रतिषेधोऽमूर्तत्त्वम्। ८. मनसि द्रव्यत्वे सति रूपादिलक्षणप्रतिषेधरूपामूर्त्तत्वं वर्तते, परन्तु व्यापकत्वं नास्ति। तस्माद् द्रव्यत्वे सत्यमूर्त्तत्वादिति हेतोः पक्षसपक्षविपक्षवृत्तित्वादनैकान्तिकत्वमिति। ९. अव्यापकम्। १०. अवच्छिन्नपरिमाण मूर्त्तमिति जैनैरभ्युपगमात्। ११. अमूर्तत्वम्। १२. जैन प्रति। १३. यद्यसर्वगतद्रव्यपरिमाणनिषेधोऽमूर्तत्वं तर्हि व्यापकत्वामूर्तत्वयोर्न कश्चिद्विशेषः स्यात्। एवं सत्यात्मा व्यापको व्यापकत्वादित्यायातमिति साध्यसमोऽयं हेतुः। यथा साध्ये विवादस्तथा हेतावपीत्यर्थः। आत्मनो व्यापकत्वं साध्यते, अमूर्तत्वादस्यापि व्यापकत्वं जातम्। कुतोऽव्यापकद्रव्यपरिमाणं मूर्त्तत्वं। तन्निषेधोऽमूर्तत्व यतः। अप्रसिद्धत्वात् असर्वगतद्रव्यपरिमाणरहितत्वादित्यय हेतुः साध्यसमः। १४. परमाणुभिरनेकान्तपरिहारार्थमणुपरिमाणानधिकरणत्वे सतीति विशेषणं यतः परमाणु

विरोधादिति[1] । [2]प्रसज्यपक्षेऽपि तुच्छाभावस्य[3] ग्रहणोपायासम्भवात्[4] न विशेषणत्वम्[5] । न चागृहीतविशेषणं[6] नाम; 'न चागृहीतविशेषणा[7] विशेष्ये[8] बुद्धिः' इति वचनात् । न प्रत्यक्षं तद् ग्रहणोपायः, [9][10]सम्बन्धाभावात् । इन्द्रियार्थसन्निकर्षजं[11] हि प्रत्यक्षं तन्मते[12] प्रसिद्धम् । [13]विशेषण-विशेष्यभावकल्पनायामभावस्य नागृहीतस्य विशेषणत्वमिति तदेव[14] दूषणम् । [15]तस्मान्न [16]व्यापकमात्मद्रव्यम् ।

नित्य पदार्थके क्रम और अक्रमसे अर्थक्रिया होनेका विरोध है। इस प्रकार पर्युदासरूप प्रथम पक्ष तो ठीक नहीं है। दूसरे प्रसज्य पक्षको माननेपर भी तुच्छाभावके ग्रहण करनेका उपाय सम्भव न होनेसे विशेषणपना नहीं बन सकता है। क्योंकि जो अगृहीत है वह विशेषण नहीं हो सकता है। जैसे दण्डके ग्रहण नहीं करनेपर 'दण्डी' ऐसी विशेष्य बुद्धि नहीं उत्पन्न हो सकती है। विशेषणके नहीं ग्रहण करनेपर विशेष्यमें बुद्धि नहीं होती है, ऐसा न्याय-का वचन है। कहनेका भाव यह कि विशेषणके ग्रहण करनेपर ही यह विशेष्य है, ऐसी बुद्धि होती है। तथा, प्रत्यक्षप्रमाणसे उस तुच्छाभावके ग्रहण करनेका उपाय नहीं है; क्योंकि प्रत्यक्षके और तुच्छाभावके सम्बन्धका अभाव है। प्रत्यक्षज्ञान तो इन्द्रिय और पदार्थके सम्बन्धसे उत्पन्न होता है, ऐसा उन यौगोंके मतमें प्रसिद्ध है। यदि कहा जाय कि 'यह भूतल घटके अभाववाला है' इस प्रकारसे विशेषण-विशेष्यकी कल्पना करनेपर तुच्छाभावका ग्रहण किया जा सकता है, सो यह कहना भी ठीक नहीं है; क्योंकि अभाव जब तक ग्रहण न कर लिया जाय, तब तक उसके विशेषणपना नहीं हो सकता।

---

१. कार्यकर्तृत्वायोगात् । २. प्रसज्य एव तुच्छाभावः । ३. अत्यन्ताभावस्य । ४. सर्वथाऽभावस्य ग्राहकं प्रमाणं नास्तीति भावः । नैयायिकस्यैतन्मतम्—इह भूतले घटो नास्ति, तत्र घटस्य भूतलेऽत्यन्ताभावः । तत्प्रत्यक्षेऽपि विशेषणविशेष्यरूपसन्निकर्षः, तत्रापि जैनः प्राह—एतदयुक्तम्, न तत्र भूतलविशेषणं सद्रूपम् । अत्राणुपरमाणो-रत्यन्ताभावविशेषणं असद्रूपमिति हेतोः । ५. अणुपरिमाणानधिकरणत्वे सतीति हेतो-र्विशेषणं यदि तुच्छाभावरूपं तर्हि तद्ग्रहणोपायाभावाद्धेतोर्विशेषणासिद्धिर्नागृहीतविशेषणं नामेति नियमात् । तदसिद्धौ च नित्यद्रव्यत्वादिति विशेष्यासिद्धिश्च 'नागृहीतविशेषणा विशेष्ये बुद्धिः' इति नियमात् । न हि दण्डाग्रहणे दण्डिनि बुद्धिर्युज्यते । ६. अगृहीतं न भवतीति भावः । ७. अगृहीतं विशेषणं यथा सा । ८. दण्डिनि । ९. तुच्छाभाव- । १०. सम्बन्धाभावे प्रत्यक्षं कुतो न भवतीत्याह । ११. सम्बन्धजम् । १२. यौगमते । १३. विशेषण विशेष्यभावेन तुच्छाभावं गृह्णातीति चेत् । १४. पूर्वोक्तमेव । अभावरूपं विशेषणं केन प्रमाणेन गृहीतम् ? न केनापि गृह्यते । १५. आत्मनो व्यापककल्पनाया-मनेकदोषसम्भवात् । १६. सर्वथा ।

मात्र चेत् तत्परिमाणसामान्यमङ्गीकर्तव्यम् । तथा[1] चाणुपरिमाणप्रतिषेधेन परिमाणसामान्याधिकरणत्वमात्मन[2] इत्युक्तम्[3] । [4]तच्चानुपपन्नम् ;[5] [6]व्यधिकरणासिद्धिप्रसङ्गात् । न हि परिमाणसामान्यमात्मनि व्यवस्थितम्; किन्तु [7]परिमाणव्यक्तिष्वेवेति । [8]न चावान्तरमहापरिमाणद्वयाधारतयाऽऽत्मन्यप्रतिपन्ने परिमाणमात्राधिकरणता [9]तत्र निश्चेतुं शक्या[10] ।

दृष्टान्तश्च[11] साधनविकलः; आकाशस्य महापरिमाणाधिकरणस्य[12] परिमाणमात्राधिकरणत्वायोगात् । [13]नित्यद्रव्यत्वं च सर्वथाऽसिद्धम् ;[14] नित्यस्य क्रमाक्रमा[15]भ्यामर्थक्रिया-

---

करणपना तो अव्यापकपनेको ही सिद्ध करता है। यदि परिमाणमात्ररूप तीसरा विकल्प कहें, तो वह परिमाणसामान्य ही अङ्गीकार करना चाहिए। और इस प्रकारसे अणुपरिमाणके प्रतिषेध द्वारा आत्माके परिमाणसामान्यका अधिकरणपना है, ऐसा कहना सिद्ध होता है, सो ऐसा कहना ठीक नही है; क्योंकि वैसा माननेमे व्यधिकरणासिद्धिका प्रसङ्ग आता है। अर्थात् जैसे आप लोग द्रव्यत्वका द्रव्यमे ही समवाय मानते हैं और गुणत्वका गुणमे ही समवाय मानते है; उसी प्रकार परिमाणत्व-सामान्यका परिमाणमें ही समवाय होगा, न कि आत्मामें। इस प्रकारसे भिन्न अधिकरणताकी सिद्धि होती है। पर परिमाणसामान्य आत्मामें व्यवस्थित नहीं है; किन्तु परिमाणविशेषोंमे ही व्यवस्थित है; क्योंकि सामान्य अपने विशेषोंमें ही रहता है। और अवान्तर-परिमाण तथा महापरिमाण इन दोनोके आधाररूपसे आत्माके अनिश्चित रहनेपर परिमाणमात्रकी अधिकरणता भी आत्मामें निश्चित नही की जा सकती है।

तथा आपने उक्त अनुमानमे आकाशका जो दृष्टान्त दिया है, वह साधन-विकल है; क्योंकि आकाश तो महापरिमाणका अधिकरण है, इसलिए वह परिमाणमात्रका अधिकरण हो नहीं सकता। उसी अनुमानमें नित्य द्रव्यत्व-रूप जो विशेष्य पद दिया है सो वह नित्यद्रव्यत्व सर्वथा असिद्ध है; क्योंकि

---

१. परिमाणसामान्याङ्गीकारे। २. आत्मा व्यापकः परिमाणसामान्याधिकरणत्वादाकाशवत्। ३. भवतीति शेषः। ४. परिमाणसामान्याधिकरणम्। ५. आत्मनः। ६. यथा द्रव्यत्वस्य द्रव्य एव समवायः, गुणत्वस्य गुण एव, तथा परिमाणसामान्यस्य (परिमाणत्वस्य) परिमाण एव समवायः, नात्मनीति व्यधिकरणासिद्धिरिति। आत्मनः सामान्याधिकरणत्वे सति विशेषाधिकरणस्यासिद्धिप्रसङ्गो भवति। ७. विशेषेषु। ८. दूषणान्तर दीयते। ९. आत्मनि। १०. आत्मनि परिमाणविशेषाधिकरणासिद्धे न हि परिमाणसामान्याधिकरणकल्पना युज्यते, सामान्यस्याशेषविशेषनिष्ठत्वात्। ११. पूर्वमात्मन एव निश्चयात्। १२. प्रतिपन्नत्वात्। १३. हेतोर्विशेष्यासिद्धिमुद्भावयति। १४. आत्मनः। १५. युगपत्।

नापि पृथिव्यादिचतुष्टयात्मकत्वमात्मनः सम्भाव्यते; अचेतनेभ्यश्चैतन्योत्पत्त्ययोगात् [1]धारणेरण[2]द्रवो[3]ष्णता[4]लक्षणान्वयाभावाच्च[5]। [6]तदहर्जातबालकस्य स्तनादावभिलाषाभावप्रसङ्गाच्च[7]। अभिलाषो हि प्रत्यभिज्ञाने भवति, [8]तच्च स्मरणे, स्मरणं चानुभवे भवतीति पूर्वानुभवः[9] सिद्धः। [10]मध्यदशायां तथैव [11]व्याप्तेः। मृतानां रक्षोयक्षादिकुलेषु स्वयमुत्पन्नत्वेन कथयतां दर्शनात्, केषाञ्चिद्, भवस्मृतेरुपलम्भाच्चानादिश्चेतनः सिद्ध एव। तथा चोक्तम्—

का अनुभव माना जायगा, तो सुखको जो आप लोगोंने मानस प्रत्यक्षका विषय कहा है, वह नहीं बनेगा। अतः आत्मा वटकणिका मात्र है, यह मान्यता भी ठीक नहीं है।

अब आचार्य तीसरी मान्यताका निराकरण करते हैं—आत्माके पृथिवी आदि चार भूतोंसे उत्पन्न होनेकी सम्भावना भी नहीं है; क्योंकि अचेतन भूतोंसे चेतन आत्माकी उत्पत्ति नहीं हो सकती है। और भूत-चतुष्टय का जो क्रमशः धारण, ईरण, द्रव और उष्णता-लक्षण-स्वभाव है, उसका चैतन्यके अन्वय नहीं पाया जाता है।

भावार्थ—अन्य मतावलम्बियोंने पृथिवीका धारण, वायुका प्रेरण, जलका द्रवता और अग्निका उष्णता स्वभाव माना है। यदि आत्मा इन पृथिवी आदि चार भूतोंसे उत्पन्न होता है, तो उसमें उन चारों भूतोंके धारण आदि स्वभाव अवश्य पाये जाना चाहिए। पर पाये नहीं जाते, इससे ज्ञात होता है कि आत्मा पृथिवी आदि भूतचतुष्टयसे उत्पन्न नहीं होता।

और यदि आत्मा भूतचतुष्टयसे उत्पन्न होता, तो तत्काल उत्पन्न हुए बालकके स्तन-पानादिमें अभिलाषाके अभावका प्रसङ्ग आता है। अभिलाषा तो प्रत्यभिज्ञानके होनेपर होती है और प्रत्यभिज्ञान स्मरणके होनेपर होता है, तथा स्मरण धारणारूप अनुभवके होनेपर होता है। इस प्रकार पूर्वकालीन अनुभवका होना सिद्ध है। युवारूप मध्यवर्ती दशामे भी उसी प्रकारसे अभिलाषा आदिकी व्याप्ति सिद्ध है। तथा मरे हुए कितने ही जीव यक्ष-

---

१. धारणलक्षणा पृथिवी। २. ईरणलक्षणो वायुः। ३. द्रवलक्षण जलम्। ४. उष्णतालक्षणोऽग्निः। ५. यथा घटे मृदन्वयः मृद् घटे परिणता प्रत्यक्षेण दृश्यते, तथा नास्ति। ६. तत्कालीनसमुत्पन्नशिशोः। ७. अस्ति चाभिलाषा। ८. प्रत्यभिज्ञानं च। ९. पूर्वमनुभवनं चेदभिलाषः। इत्यनेनाऽऽत्मनोऽनादित्वं साधितम्। १०. तर्हि मध्यमदशायां (युवावस्थायां) कथमित्याशङ्कायामाह। ११. चैतन्यस्याभिलाषायाः कारणं प्रत्यभिज्ञानं तच्च सति स्मरणे, स्मरणं च सति पूर्वानुभवे, इति व्याप्तेः।

नापि वटकणिकामात्रम्; कमनीयकान्ताकुचजघनसंस्पर्शकाले [1]प्रतिलोमकूपमाल्हादनाकारस्य सुखस्यानुभवात्। अन्यथा[2] सर्वाङ्गीणरोमाञ्चादिकार्योदयायोगात्। [3]आशुवृत्त्याऽऽ[4]लातचक्रवत्क्रमेणैव तत्सुखमित्यनुपपन्नम्;[5] परापरान्तःकरणसम्बन्धस्य[6] तत्कारणस्य[7] परिकल्पनाया व्यवधानप्रसङ्गात्। अन्यथा[8] सुखस्य मानसप्रत्यक्षत्वायोगादिति।

इस प्रकार वे ही पूर्वोक्त दूषण यहांपर भी प्राप्त होते हैं। इसलिए आत्मा नामका द्रव्य व्यापक नहीं है, यह सिद्ध हुआ।

आत्मा वटकणिकामात्र भी नहीं है; क्योंकि सुन्दर स्त्रीके स्तन और जघनके स्पर्श करनेके समय रोम-रोममें अर्थात् सर्वाङ्गमें आल्हाद आकारवाले सुखका अनुभव होता है। अन्यथा अर्थात् यदि आत्मा वट-कणिका मात्र होता और सर्व शरीरमे व्याप्त न होता, तो स्त्रीके सुन्दर सर्व अवयवोंके स्पर्शकालमें पुरुषको सर्वाङ्गमें रोमाञ्च आदि कार्य नहीं उत्पन्न होना चाहिए। यदि कहें कि आत्मा तो वटकणिकामात्र ही है, किन्तु आशुवृत्ति अर्थात् शीघ्रतासे अलातचक्रके समान सर्वाङ्गमें परिभ्रमण करता है, अतः सर्वाङ्गमें रोमाञ्च आदि कार्य देखे जाते हैं, वस्तुतः तो क्रमसे ही उस सुखकी अनुभूति होती है, सो यह कहना भी ठीक नहीं है; क्योंकि सुखके कारणभूत अन्तःकरणके नये-नये सम्बन्धकी कल्पना करनेपर सुखके व्यवधानका प्रसङ्ग आता है। अन्थथा सुखके मानस-प्रत्यक्षता नहीं ठहरती है।

भावार्थ—यदि आत्माको वटबीजके समान मानकर शीघ्रतासे उसका सारे शरीरमें सञ्चार माना जाय, तब ऐसे माननेवालोंकी मान्यताके अनुसार मनके माध्यमसे सुखका अनुभव होगा। अतः शरीरके जिस-जिस प्रदेशमें आत्माका सञ्चार होगा, उस समय उस प्रदेशमें मनका नया-नया सम्बन्ध मानना पड़ेगा। तब ऐसी दशामें एक प्रदेशसे सम्बन्ध छूट कर नवीन प्रदेशके साथ सम्बन्ध होनेके अन्तरालमें सुखका विच्छेद भी होना चाहिए। पर ऐसा अनुभवमें नहीं आता। और यदि मनके सम्बन्धके विना ही सुख-

१. सर्वाङ्गीणम्। २ यदि कमनीयकान्ताकुचजघनसंस्पर्शकाले प्रतिलोमकूपमाल्हादनाकारं सुखं न भवति चेत्। ३. शीघ्रवृत्त्या। ४. काष्ठाग्निभ्रमणवत्।

५. प्रदेशं प्रति सुखमनुक्रमेण चेत्तर्हि तत्रानुक्रमेणान्तःकरणसम्बन्धः पृथगस्तु, तदाऽन्यत्र प्रदेशे सम्बन्धो व्यवहितो भवति, तदा युगपत्सम्बन्धाभावाद् दूषणम्। ६. अन्योन्यं परापरान्तःकरणेन सह सम्बन्धः आत्मनस्तस्य। ७. सुखादिकारणस्य। ८. तत्सुखं मानसं नेति शङ्कायामाह तत्सुखस्य मानसत्वाकल्पेन। अन्तःकारणसम्बन्धेन विना चेत्सुखं, व्यवधानदूषणभियाऽन्तःकारणसम्बन्धो माऽस्तु।

त्तथेति[१] । [२]तदसाधारणगुणा [३] ज्ञानदर्शनसुखवीर्यलक्षणास्ते[३] च सर्वाङ्गीणास्तत्रैव[४] चोपलभ्यन्ते ।

सुखमाल्हादनाकारं विज्ञानं मेयबोधनम् ।
शक्तिः क्रियानुमेया स्याद्यूनः कान्तासमागमे ॥४१॥

इति वचनात् । [५]तस्मादात्मा देहप्रमितिरेव स्थितः ।

द्वितीयं विशेषभेदमाह—

अर्थान्तरगतो[६] विसदृशपरिणामो[७] व्यतिरेको[८] गोमहिषादिवत्[९] ॥८॥

वह उसके देह-प्रमाण ही है। आत्माके ज्ञान, दर्शन, सुख, वीर्य लक्षणवाले असाधारण गुण हैं और वे आत्मामें ही सर्वाङ्ग व्याप्त पाये जाते हैं। यहाँ पर देहमें ही आत्मा है, ऐसा कहनेसे आत्माके व्यापकपनेका निषेध किया गया है और वह उसके सर्व प्रदेशोंमें व्याप्त है, ऐसा कहनेसे वटकणिकामात्र होनेका निषेध किया गया है, ऐसा विशेष जानना चाहिए।

युवा पुरुषके कान्ताके साथ समागम करनेपर आल्हाद या आनन्दरूप आकारवाले सुखका, ज्ञेय पदार्थोंके जाननेरूप विज्ञानका और रमणरूप क्रियासे शक्तिका अनुमान किया जाता है ॥ ४१ ॥ ऐसा वचन है।

भावार्थ— स्त्री समागमके समय आनन्द, विज्ञान और सामर्थ्य इन तीनों ही आत्मगुणोंकी प्रतीति होती है।

इसलिए आत्मा देह-प्रमाण ही है, यह स्थित हुआ।

अब आचार्य विशेषके दूसरे भेदको कहते हैं—

सूत्रार्थ—एक पदार्थकी अपेक्षा अन्य पदार्थमें रहनेवाले, विसदृश परिणामको व्यतिरेक कहते है। जैसे गाय-भैंस आदिमें विलक्षणपना पाया जाता है ॥८॥

वांश्च देवदत्तात्मा । १. तस्मात्तद्देह एव तत्र सर्वत्रैव च विद्यमानः । प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् । २. आत्माऽसाधारणगुणाः । ३. गुणाः । ४. आत्मन्येव । ५. अनुमानसामर्थ्यात् । ६. एकस्मादर्थात्सजातीयो विजातीयो वाऽर्थोऽर्थान्तरम् । तं गतोऽर्थान्तरगतः । ७. खण्डलक्षणाद्गोः सजातीयो मुण्डलक्षणो गौः, विजातीयो महिषः, खण्डापेक्षया मुण्डो विसदृशाकारो महिषापेक्षया च विसदृशाकार इत्यर्थः । ८. विशेष इति सम्बन्धः । ९. यथा गोषु खण्डमुण्डादिलक्षणो महिषेषु विशालविसंकटत्वलक्षणो गोमहिषेषु च परस्परमसाधारणस्वरूपलक्षणो विसदृशपरिणामोऽस्ति ।

तदहर्जस्तनेहातो रक्षोदृष्टेर्भवस्मृतेः ।
[1]भूतानन्वयनात्सिद्धः [2]प्रकृतिज्ञः सनातनः[3] ॥४०॥ इति

न च स्वदेहप्रमितिरात्मेत्यत्रापि प्रमाणाभावात् सर्वत्र[4] संशय इति वक्तव्यम्; [5]तत्रानुमानस्य सद्भावात् । तथाहि—देवदत्तात्मा तद्देह[6] एव; तत्र सर्वत्रैव च विद्यते, तत्रैव तत्र सर्वत्रैव च स्वासाधारणगुणाधारतयोपलम्भात् [7] । यो यत्रैव यत्र सर्वत्रैव च स्वासाधारणगुणाधारतयोपलभ्यते स तत्रैव तत्र सर्वत्रैव च विद्यते; यथा देवदत्तगृहे एव तत्र सर्वत्रैव चोपलभ्यमानः स्वासाधारणभासुरत्वादिगुणः प्रदीपः । तथा[8] चायम् । तस्मा-

---

राक्षस आदि व्यन्तरदेवोंके कुलोमें उत्पन्न होकर 'मै अमुक हूँ' इस प्रकारसे कहते हुए देखे जाते हैं, कितने ही जीवोंको पूर्व भवका स्मरण पाया जाता है, इन सब प्रमाणोंसे आत्मा एक अनादि-कालीन चेतन पदार्थ है, यह सिद्ध ही है । जैसा कि कहा है—

तत्काल जात बालकके स्तन-पानकी इच्छासे, व्यन्तरादिकके देखनेसे, पूर्वभवके स्मरणसे और पृथिवी आदि भूतचतुष्टयके गुण-धर्म-स्वभाव आदिका अन्वयपना नही पाये जानेसे स्वभावतः ज्ञाता द्रष्टा और सनातन अर्थात् द्रव्यरूपसे नित्य आत्मा स्वयं सिद्ध है ॥४०॥

आत्मा स्वदेह-प्रमाण है, इस विषयमें प्रमाणका अभाव होनेसे सर्वत्र संशय है, ऐसा नही कहना चाहिए; क्योंकि इस विषयमें अनुमानप्रमाणका सद्भाव है । आगे उसे ही कहते है—देवदत्तका आत्मा उसके देहमें ही है और उसके सर्व प्रदेशोंमें ही विद्यमान है; क्योंकि यह उसके शरीरमें और सर्व प्रदेशोंमे ही ज्ञान-दर्शनादि अपने असाधारण गुणोंके आधाररूपसे उपलब्ध होता है । जो जहाँपर और यत्र सर्वत्र ही अपने असाधारण गुणोंके आधार-रूपसे पाया जाता है, वह वहाँपर और वहाँके सर्व प्रदेशोंमे ही विद्यमान है । जैसे कि देवदत्तके घरमें और उसके सर्व भागमे अपने असाधारण भासुरत्व आदि गुणवाला प्रदीप पाया जाता है । उसी प्रकार देहमें और उसके सर्व प्रदेशोंमें अपने असाधारण गुणोंके आधारवाला देवदत्तका आत्मा है, इसलिए

---

१. भूतसंघातस्यान्वयाभावात् । २. स्वभावेन ज्ञाता । ३. द्रव्यरूपतया नित्यः । ४. स्वदेहप्रमितौ व्यापके वटकणिकामात्रे च । ५. आत्मा स्वदेहप्रमितिरित्यत्र ६. तद्देह एवेति व्यापकवादिन प्रति । ७. अस्मिन्ननुमाने साध्यसाधनयोरात्मनो वट-कणिकापरिमाणप्रतिषेधार्थं तत्र सर्वत्रैवेति पदं दत्तम् । व्यापकत्वनिरासार्थं तद्देह एवेति पदं दत्तमिति । सर्वत्र सर्वेषु प्रदेशेषु । ८. तत्रैव तत्र सर्वत्रैव च स्वासाधारणगुणाधार-

पञ्चमः समुद्देशः

अथेदानीं फलविप्रतिपत्तिनिरासार्थमाह—

अज्ञाननिवृत्तिर्हानोपादानोपेक्षा[1]श्च फलम् ॥१॥

द्विविधं हि फलं साक्षात्पारम्पर्येणेति । साक्षादज्ञाननिवृत्तिः[2] पारम्पर्येण हानादिकमिति; प्रमेयनिश्चयोत्तरकालभावित्वात्तस्येति ।

अब आचार्य प्रमाणके फलकी विप्रतिपत्तिके निराकरणके लिए उत्तर सूत्र कहते हैं—

सूत्रार्थ—अज्ञानकी निवृत्ति, हान, उपादान और उपेक्षा ये प्रमाणके फल हैं ॥ १ ॥

फल दो प्रकारका होता है—साक्षात्फल और पारम्पर्यफल । वस्तु-सम्बन्धी अज्ञानकी निवृत्ति होना यह प्रमाणका साक्षात्फल है । हान आदिक परम्पराफल है; क्योंकि वह प्रमेयके निश्चय करनेके उत्तरकालमें होता है ।

भावार्थ—वस्तुके जाननेके साथ ही तत्काल होनेवाले फलको साक्षात् फल कहते हैं । जब हम किसी अज्ञात वस्तुको प्रमाणसे जानते है, तब तत्सम्बन्धी अज्ञान तत्काल दूर हो जाता है । यही अज्ञानकी निवृत्ति प्रमाणका साक्षात्फल है । वस्तुके जाननेके पश्चात् परम्परासे प्राप्त होनेवाले फलको पारम्पर्यफल कहते है । वह हान, उपादान और उपेक्षाके भेदसे तीन प्रकारका है—जाननेके पश्चात् अनिष्ट या अहितकर वस्तुके परित्याग करनेको हान कहते हैं । इष्ट या हितकर वस्तुके ग्रहण करनेको उपादान कहते हैं । जब तक मनुष्यके राग-द्वेष लगा रहता है, तब तक वह पर पदार्थोंमें कभी इष्टकी और कभी अनिष्टकी कल्पना किया करता है । किन्तु जब वह राग-द्वेषसे रहित वीत-राग दशाको प्राप्त कर लेता है, तब उसके किसी भी पदार्थमें इष्ट-अनिष्टकी

---

१. उदासीनता । २. प्रमाणमेव प्रमेयनिश्चयकाले अज्ञाननिवृत्तिः । अज्ञानमज्ञप्तिः स्व-पररूपव्यामोहस्तस्य निवृत्तिर्यथावत्तद्रूपयोर्ज्ञप्तिः ।

[1]वैसादृश्यं हि [2]प्रतियोगिग्रहणे सत्येव भवति। न[3] चापेक्षिक[4]त्वाद[5]स्यावस्तुत्वम्; [6]अवस्तुन्यापेक्षिकत्वायोगात्। अपेक्षाया [7]वस्तु-निष्ठत्वात्।

[8]स्यात्कारलाञ्छितमबाध्यमनन्तधर्म—
सन्दोह[9]वर्मितमशेषमपि प्रमेयम्।
[10]देवैः प्रमाणबलतो निरचायि[11] यच्च[12]
संक्षिप्तमेव[13] मुनिभिर्विवृतं [14]मयैतत्॥१०॥

इति परीक्षामुखस्य लघुवृत्तौ विषयसमुद्देशश्चतुर्थः।

विसदृशता प्रतियोगी अर्थात् प्रतिपक्षीके ग्रहण करनेपर ही प्रतीत होती है। आपेक्षिक होनेसे इस विसदृशताको अवस्तु नहीं कहा जा सकता है; क्योंकि अवस्तुमें आपेक्षिकपना नहीं बन सकता है। किन्तु अपेक्षाके वस्तुनिष्ठपना है, अर्थात् अपेक्षा वस्तुमें ही पाई जाती है, अवस्तुमें अपेक्षा नहीं होती है।

इस प्रकार प्रमाणके विषयका निरूपण किया।

स्यात् पदसे लाञ्छित, अबाध्य, अनन्त धर्मोंके समूहसे संयुक्त ऐसे समस्त ही जिस प्रमेयतत्त्वको अकलङ्कदेवने प्रमाणके बलसे कहा, और जिसे माणिक्यनन्दिदेवने संक्षेपसे सूत्ररूपमें रचा, उसे ही मैंने (अनन्तवीर्यने) यहांपर वृत्तिरूपसे विवरण किया है॥१०॥

इस प्रकार परीक्षामुखकी लघुवृत्तिमें प्रमाणके विषयका प्रतिपादन करनेवाला
चतुर्थ समुद्देश समाप्त हुआ।

०

---

१. कुतः? २. प्रतिपक्षे। ३. अनेन बौद्धमतं निराकृतम्। ४. अपेक्षा अवस्तु न भवति, किन्तु सत्यं भवति। ५. वैसादृश्यस्य। ६. सर्वथाऽभावे। ७. द्रव्य-। ८. अप्रयुक्तो हि स्यात्कारोऽर्थात्सर्वत्र प्रतीयते। विधौ निषेधेऽप्यन्यत्र कुशलश्चेत्प्रयोजकः॥१॥ ९. संयुक्तम्। १०. अकलङ्कदेवैः। ११. विरचितम्। १२. प्रमेयम्। १३. माणिक्यनन्दिभिर्देवैः। १४. वृत्तिरूपेणाभ्यधायि। १५. अनन्तवीर्येण।

अयमर्थः—यस्यैवात्मनः प्रमाणाकारेण[1] परिणतिस्तस्यैव[2] फलरूपतया परिणाम इत्येक[3] प्रमात्रपेक्षया प्रमाणफलयोरभेदः। [4]करणक्रिया[5]परिणाम[6]भेदाद् भेद इत्यस्य[7] सामर्थ्यसिद्धत्वान्नोक्तम्[8]।

पारम्पर्येण साक्षाच्च फलं द्वेधाऽभिधायि यत्।
[9]देवैर्भिन्नमभिन्नं च प्रमाणात्तदिहोदितम्[10] ॥११॥

इति परीक्षामुखलघुवृत्तौ फलसमुद्देशः पञ्चमः।

इसका यह अर्थ (अभिप्राय) है कि जिस ही आत्माकी प्रमाणके आकारसे परिणत होती है, उसके ही फलरूपसे परिणाम देखा जाता है; इसलिए एक प्रमाताकी अपेक्षासे प्रमाण और फलमें अभेद है। प्रमाण करण-रूप परिणाम है और फल क्रियारूप परिणाम है; इस प्रकार करण और क्रियारूप परिणामके भेदसे प्रमाण और फलमें भेद है। यह भेदरूप कथन सामर्थ्यसे सिद्ध होनेके कारण सूत्रकारने पृथक् नहीं कहा है।

आचार्य अकलङ्कदेवने और माणिक्यनन्दिने प्रमाणके जिस फलको साक्षात् और पारम्पर्यके भेदसे दो प्रकारका कहा है, वह प्रमाणसे कथञ्चित् भिन्न भी है और अभिन्न भी है, वही यहाँपर मैंने कहा है॥ ११ ॥

इस प्रकार परीक्षामुखकी लघुवृत्तिमें प्रमाणके फलका वर्णन करनेवाला
पञ्चम समुद्देश समाप्त हुआ

---

१. करणाकारेण। २. प्रमितिरूपतया। ३. आत्मा। ४. प्रमाणम्। ५. जानाति। ६. आत्मा कर्ता करणेन ज्ञानेन जानाति इति सैव वा फलम्। ७. भेदस्य। ८. भेदरूपफलं सूत्रेण न निबद्धम्। ९. अकलङ्कदेवैर्माणिक्यनन्दिदेवैश्च। १०. अनन्तवीर्येण।

तद्द्विविधमपि फलं प्रमाणाद्भिन्नमेवेति यौगाः। अभिन्नमेवेति सौगताः। तन्मतद्वयनिरासेन स्वमतं व्यवस्थापयितुमाह—

प्रमाणादभिन्नं[1] भिन्नं[2] च[3] ॥५॥

कथञ्चिदभेदसमर्थनार्थं हेतुमाह—

यः[4] प्रमिमीते[5] स एव[6] निवृत्ताज्ञानो [7]जहात्यादत्त[8] उपेक्षते[9] चेति प्रतीतेः[10] ॥३॥

कल्पना नहीं रहती है। उस वीतराग दशामें किसी भी पदार्थको जाननेके पश्चात् उसमें हेय-उपादेयकी बुद्धि उत्पन्न नहीं होती, किन्तु उपेक्षा या उदासीनतारूप माध्यस्थ्य भाव पैदा होता है, यह भी प्रमाणका पारम्पर्यफल है। राग-द्वेष दूर होनेके पहले भी मनुष्य जिसे अपने लिए इष्ट-अनिष्ट नहीं समझता, ऐसे ज्ञेय पदार्थोंमें उपेक्षाभाव रखता है।

यह दोनों ही प्रकारका फल प्रमाणसे भिन्न ही है, ऐसा यौग लोग कहते हैं। प्रमाणसे फल अभिन्न ही है, ऐसा बौद्ध लोग कहते हैं। इन दोनों मतोंके निराकरणके साथ अपने मतकी व्यवस्था करनेके लिए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—वह फल प्रमाणसे कथञ्चित् अभिन्न है और कथञ्चित् भिन्न है ॥२॥

अब आचार्य कथञ्चित् अभेदके समर्थनके लिए हेतुरूप उत्तर सूत्र कहते हैं—

सूत्रार्थ—जो प्रमाणसे पदार्थको जानता है, उसीका अज्ञान निवृत्त होता है, वही अनिष्ट वस्तुका त्याग करता है, इष्ट वस्तुको ग्रहण करता है और जिसे अपने लिए इष्ट-अनिष्टरूप नहीं समझता है, उसकी उपेक्षा करता है। इस प्रकारकी प्रतीति होनेसे सिद्ध है कि प्रमाणसे फल अभिन्न है ॥ ३ ॥

---

१. अज्ञाननिवृत्तिः प्रमाणस्याभिन्नं फलम्। अत्र कथञ्चिदभेदो द्रष्टव्यः, कारणकार्यभेदादिति। २. हानोपादानोपेक्षाश्च प्रमाणस्य भिन्नं फलम्। अत्रापि कथञ्चिद्भेदो द्रष्टव्यौ, सर्वथा भेदे प्रमाणफलव्यवहारविरोधादिति। ३. भिन्नाभिन्नात्मकमित्यर्थः। ४. यः प्रतिपत्ता। ५. निश्चिनुते, स्वार्थग्रहणपरिणामेन परिणमते। ६. स्वविषये व्यामोहरहितः। ७. अभिप्रेतप्रयोजनाप्रसाधकमर्थं जहाति। ८. अभिप्रेतप्रयोजनप्रसाधकमर्थमादत्ते। ९. उभयप्रयोजनाप्रसाधकं तूपेक्षणीयमुपेक्षते। १०. प्रमाणफलयोः कथञ्चिद्भेदाभेदव्यवस्था प्रतिपत्तव्येति सम्बन्धः।

अस्वसंविदितञ्च गृहीतार्थश्च दर्शनञ्च संशय आदिर्येषां ते संशयादयश्चेति सर्वेषां द्वन्द्वः। आदिशब्देन विपर्ययानध्यवसाययोरपि ग्रहणम्।

तत्रास्वसंविदितं ज्ञानं ज्ञानान्तरप्रत्यक्षत्वादिति नैयायिकाः। तथाहि—ज्ञानं स्वव्यतिरिक्तवेदनवेद्यम्[1]; वेद्यत्वात्[2], घटवदिति। तदसङ्गतम्; धर्मिज्ञानस्य ज्ञानान्तरवेद्यत्वे साध्यान्तःपातित्वेन धर्मित्वायोगात्[3]। [4]स्वसंविदितत्वे तेनैव[5] [6]हेतोरनेकान्तात्[7]। महेश्वर-

सूत्र-पठित अस्वसंविदित, गृहीतार्थ, दर्शन और संशय हैं आदिमें जिनके ऐसे संशयादि इन सभी पदोंका द्वन्द्वसमास करना चाहिए। आदि शब्दसे विपर्यय और अनध्यवसायका भी ग्रहण करना चाहिए।

विशेषार्थ—सूत्रमें जिन अस्वसंविदित आदि ज्ञानोंको प्रमाणाभास कहा गया है, उनका खुलासा इस प्रकार है—जो ज्ञान अपने आपके द्वारा अपने स्वरूपको नहीं जानता है, उसे अस्वसंविदित ज्ञान कहते है। किसी यथार्थ ज्ञानके द्वारा पहले जाने हुए पदार्थके पुनः जाननेवाले ज्ञानको गृहीतार्थ ज्ञान कहते हैं। यह घट है, यह पट है, इत्यादि विकल्पसे रहित निर्विकल्परूप ज्ञानको दर्शन कहते हैं। परस्पर विरोधी दो पक्षोंके विषय करनेवाले ज्ञानको संशय कहते हैं। वस्तुके अन्यथा जाननेको विपर्यय कहते हैं। वस्तुका यथार्थ निश्चय न होकर कुछ है, इस प्रकारके अनिश्चित ज्ञानको अनध्यवसाय कहते हैं। ये सभी प्रमाणके स्वरूपाभास हैं, क्योंकि वे प्रमाणके यथार्थ स्वरूपसे रहित हैं।

नैयायिकोंका कहना है कि कोई भी ज्ञान अपने आपको नहीं जानता है, किन्तु अन्य ज्ञानसे ही उसका प्रत्यक्ष होता है। आगे इसी बातको वे स्पष्ट करते हैं—ज्ञान अपनेसे अतिरिक्त अन्य ज्ञानके द्वारा जाननेके योग्य है; क्योंकि वह ज्ञेय है; जैसे घट। आचार्य कहते हैं कि नैयायिकोंका यह कथन असङ्गत है; क्योंकि धर्मी अर्थात् पक्षरूपसे आपके द्वारा प्रतिपादित जो ज्ञान है, उसके अन्य ज्ञानसे वेद्यपना माननेपर उसके भी साध्यके अन्तर्गत हो जानेसे धर्मीपना नहीं रह सकेगा। कारण कि धर्मी तो प्रसिद्ध होता है और साध्य असिद्ध। अतः धर्मी ज्ञानके असिद्ध हो जानेसे वेद्यत्व हेतु आश्रयासिद्ध

१. ज्ञानान्तरवेद्यमित्यर्थः। २. प्रमेयत्वात्। ३. प्रत्यक्षादिप्रमाणप्रसिद्धो हि धर्मी भवति। न चात्रानुमाने धर्मिज्ञानं प्रमाणप्रसिद्धमस्ति। ततस्तस्य साध्यान्तःपातित्वेन धर्मित्वायोगात्, धर्मिणो ज्ञानस्यासिद्धेश्च वेद्यत्वादिति हेतुराश्रयासिद्ध इति भावः। ४. धर्मिज्ञानं स्वसंविदितं ततो न यथोक्तदोषानुषङ्ग इति शङ्कायामाह। ५. धर्मिज्ञानेनैव। ६. वेद्यत्वादिति हेतोः। ७. धर्मिज्ञाने हि वेद्यत्वमस्ति, परन्तु स्वव्यतिरिक्तवेदनवेद्यत्वं

षष्ठः समुद्देशः

अथेदानीमुक्त[1]प्रमाणस्वरूपादिचतुष्टयाभासमाह—

ततोऽन्यत्तदाभासम् ॥ १ ॥

तत उक्तात् प्रमाणस्वरूपसङ्ख्याविषयफलभेदादन्यद्विपरीतं तदाभासमिति ।

तत्र क्रमप्राप्तं स्वरूपाभासं दर्शयति—

[2]अस्वसंविदितगृहीतार्थ[3]दर्शनसंशयादयः[4] प्रमाणाभासाः ॥ २ ॥

अब आचार्य ऊपर कहे गये प्रमाणके स्वरूप, संख्या, विषय और फल इन चारोंके आभासोंको कहनेके लिए उत्तर सूत्र कहते हैं—

सूत्रार्थ—उनसे भिन्न तदाभास हैं ॥ १ ॥

उनसे अर्थात् ऊपर जिनका वर्णन किया गया है ऐसे प्रमाणके स्वरूप, संख्या, विषय और फलसे अन्य यानी विपरीत स्वरूप, संख्या, विषय और फलको तदाभास कहते हैं ।

भावार्थ—यथार्थ स्वरूपसे रहित होनेपर भी उन जैसे प्रतिभासित होनेवाले स्वरूपादिको तदाभास कहते हैं। प्रमाणके स्वरूपसे रहित विपरीत आभासको स्वरूपाभास कहते हैं। प्रमाणकी यथार्थ संख्यासे विपरीत अयथार्थ संख्याको संख्याभास कहते हैं। प्रमाणके वास्तविक विषयसे विपरीत विषयको विषयाभास कहते है और प्रमाणके वास्तविक फलसे रहित फलको फलाभास कहते हैं। इस समुद्देशमें आचार्य अपनी पूर्व प्रतिज्ञाके अनुसार इन ही चारों प्रकारके आभासोंका स्वरूप कहेंगे ।

अब आचार्य उनमेंसे क्रम-प्राप्त स्वरूपाभासको दिखलाते हैं—

सूत्रार्थ—अस्वसंविदित, गृहीतार्थ, दर्शन और संशयादिक प्रमाणाभास है ॥ २ ॥

---

१. प्रमाणशब्दः प्रत्येकं सम्बन्धनीयः । २. अस्वसंविदितस्य स्वग्राहकत्वाभावेनार्थप्रतिपत्त्ययोगात् प्रवृत्तिविषयोपदर्शकत्वाभावः । ३. निर्विकल्पकं दर्शनं तस्य प्रवृत्तिविषयोपदर्शकत्वाभावात्तज्जनितविकल्पस्यैव तदुपदर्शकत्वात् । ४. आदिशब्देन विपर्ययानध्यवसायौ ग्राह्यौ ।

[1]अनन्तरभाविज्ञानग्राह्यत्वे [2]तस्याप्यगृहीतस्य[3] [4]पराज्ञापकत्वात्तदनन्तरं[5] कल्पनीयम्। तत्रापि[6] तदनन्तरमित्यनवस्था। तस्मान्नायं पक्षः[7] श्रेयान्।

[8]एतेन [9]करणज्ञानस्य[10] परोक्षत्वेनास्वसंविदितत्वं ब्रुवन्नपि मीमांसकः[11] प्रत्युक्तः; [12]तस्यापि [13]ततोऽर्थप्रत्यक्षत्वायोगात्। [14]अथ [15]कर्मत्वेनाप्रतीयमानत्वादप्रत्यक्षत्वे[16] [17]तर्हि [18]फलज्ञानस्याप्रत्यक्षता तत[19] एव स्यात्। अथ[20] [21]फलत्वेन [22]प्रतिभासनात् नो चेत्

आदिके ज्ञान करानेवाले सिद्ध होते हैं। पर ऐसा होता नहीं है, अतः ज्ञानको स्व-पर-संवेदी मानना चाहिए।

यदि कहा जाय कि पूर्व ज्ञानके अनन्तर-भावी ज्ञानके द्वारा ग्राह्यता बन जाती है, तो उस अनन्तर-भावी अगृहीत ज्ञानके भी परकी अज्ञापकता रहनेसे तदनन्तर-भावी अन्य ज्ञानकी कल्पना करनी चाहिए और उसके लिए भी अन्य तदनन्तरभावी ज्ञानकी कल्पना करनी चाहिए, इस प्रकार अनवस्था दोष प्राप्त होता है। इसलिए ज्ञान अपने आपको नहीं जानता है, किन्तु अन्य ज्ञानसे जाना जाता है, यह नैयायिकका पक्ष ठीक नहीं है।

इसी कथनसे अर्थात् ज्ञानकी ज्ञानान्तरवेद्यताके निराकरणसे करण-ज्ञानको परोक्ष होनेसे अस्वसंविदितपना कहनेवाले मीमांसक भी निराकृत कर दिये गये; क्योंकि उनके भी उस करणज्ञानसे अर्थकी प्रत्यक्षता नहीं बनती है। यदि कहा जाय कि कर्मरूपसे प्रतीत न होनेके कारण करणज्ञानके अप्रत्यक्षता है, तो हम कहते हैं कि इसीलिए ही अर्थात् कर्मरूपसे प्रतीत न

---

१. प्रथमज्ञानस्य। एकात्मसमवेतानन्तरज्ञानग्राह्यमर्थज्ञानम्। तदपि ज्ञानान्तरेण गृहीत विलोक्यते। २. अनन्तरभाविज्ञानस्यापि। ३. अपरज्ञानेनागृहीतस्य पूर्वज्ञानेन गृहीतुं न पार्यते। ४. प्रथमज्ञानस्य। ५. ज्ञानान्तरम्। ६. तदनन्तरज्ञानेऽपि। ७. ज्ञानं ज्ञानान्तरवेद्यं प्रमेयत्वादिति पक्षः।

८. ज्ञानस्य ज्ञानान्तरवेद्यत्वनिराकरणेन। परिच्छित्तिसाधनं ज्ञानम्। ९. मीमासकेन करणज्ञानं ज्ञानान्तरेणानुमेयम्। १०. करणप्रमाणरूपस्य। ११. भाट्टः प्रभाकरश्च। भाट्टमते आत्मा प्रत्यक्षम्, प्रभाकरमते तु फलज्ञानं प्रत्यक्षम्। १२. मीमांसकस्यापि। करणज्ञानात् अगृहीताद् इति प्रतिपादनानन्तरम्। १३. करणज्ञानतः। १४. प्रभाकर आह। १५. करणज्ञानस्य। १६. यथा घटः कर्मत्वेन प्रतीयते तथा करणज्ञानं कर्मत्वेन न प्रतीयते। अतोऽप्रत्यक्षता करणज्ञानस्य। यत्कर्मत्वेन प्रतीयते तत्प्रत्यक्षम्। १७. यदि कर्मत्वेनाप्रतीयमानत्वात्करणज्ञानस्य परोक्षता, तर्हि। १८. प्रमितिक्रियायाः। १९. कर्मत्वेनाप्रतीयमानत्वादेव। २०. भाट्टस्य तु कर्मत्वेनाप्रतीयमानत्वादात्मनोऽप्यप्रत्यक्षता स्यादिति। २१. क्रियात्वेन फलज्ञानस्य। २२. अतः परोक्षता नो चेदिति सम्बन्धः।

[1]ज्ञानेन च व्यभिचाराद्[2], [3]व्याप्तिज्ञानेनाप्यनेकान्तादर्थप्रतिपत्त्ययोगाच्च[4]। न हि [5]ज्ञापक-मप्रत्यक्षं ज्ञाप्यं[6] गमयति[7]; [8]शब्दलिङ्गा[9]दीनामपि तथैव[10] गमकत्वप्रसङ्गात्।

हो जाता है। यदि धर्मी जो ज्ञान है, उसके स्वसंविदितपना कहें, अर्थात् अपने आपको जाननेवाला मानें, तो उस धर्मी ज्ञानके द्वारा ही वेद्यत्व हेतुके अनेकान्तपना प्राप्त होता है; क्योंकि धर्मी ज्ञानमें वेद्यत्व तो है, परन्तु स्वव्य-तिरिक्तवेदनवेद्यत्व नहीं है, इसलिए साध्यके अभाववाले विपक्षमें भी हेतुके सद्भावसे व्यभिचार दोष आता है। तथा महेश्वरके ज्ञानसे भी व्यभिचार आता है। आप लोग महेश्वरके ज्ञानको अस्वसंविदित कहेंगे तो अपने आपको न जान-नेसे उसके सर्वज्ञता नहीं रहती है। और यदि उसके ज्ञानको स्वसंविदित कहेंगे, तो प्रथम तो आपके मतकी हानि होती है। दूसरे महेश्वरज्ञानमें ज्ञानान्तर-वेद्यत्व तो नहीं है, किन्तु वेद्यत्व पाया जाता है, इसलिए उससे व्यभिचार आता है। तथा व्याप्तिके ज्ञानसे भी व्यभिचार आता है; क्योंकि व्याप्ति-ज्ञानमें अन्य ज्ञानसे व्यवधान नही है। तथा अस्वसंविदित ज्ञानसे पदार्थकी प्रतिपत्ति अर्थात् जानकारी भी नहीं हो सकती है; क्योंकि ज्ञापक अर्थात् जानकारी करानेवाला ज्ञान ही यदि अप्रत्यक्ष हो—अपने आपको न जाने—तो वह जनानेके योग्य जो ज्ञाप्य वस्तु है, उसे नहीं जना सकता है; अन्यथा शब्द और लिङ्ग आदिके भी तथैव अर्थात् स्वयं अप्रत्यक्ष रहते हुए भी गमक-पनेका प्रसङ्ग आता है।

भावार्थ—यदि यह माना जाय कि ज्ञान स्वयं अप्रत्यक्ष रहते हुए भी ज्ञेयका ज्ञान कराता है, तो शब्द कानसे सुने विना ही अर्थका ज्ञान कराने-वाला ठहरता है, तथा धूमादिक लिङ्ग (हेतु) आँखोंसे देखे विना ही अग्नि

नास्ति। ततः साध्याभाववति विपक्षेऽपि हेतोः सद्भावाद् व्यभिचारित्वमिति। यद्वेद्यं तद्वेदनान्तरवेद्यमिति व्याप्तिस्तेन व्यभिचारः। १. महेश्वरज्ञानं अस्वसंविदितं तत्सर्वज्ञता-रूपं न भवति। स्वसंविदितं चेन्मतहानिः। २. महेश्वरज्ञाने ज्ञानान्तरवेद्यत्व नास्ति, वेद्यत्वमस्ति, ततस्तेन व्यभिचारः। ३. ज्ञानान्तरेण व्याप्तिज्ञाने व्यवधानाभावात्। ४. ज्ञानं स्वपरप्रकाशकं ज्ञानत्वान्महेश्वरज्ञानवत्, अव्यवधानेनार्थप्रकाशकत्वाद्वाऽर्थग्रहणात्म-कत्वाद्वा महेश्वरज्ञानवत्। यत्पुनः स्वपरप्रकाशकं न भवति न तज्ज्ञानव्यवधानेनार्थप्रकाशकं अर्थग्रहणात्मकं वा, यथा चक्षुरादिः। ५. ज्ञानम्। ६. ज्ञेयमर्थम्। ७. यथा अप्रत्यक्षं ज्ञानं न गमयति, इत्युक्तम्। त्वया गमयति इत्युच्यते चेत् अश्रवणप्रत्यक्षः शब्दोऽर्थं गमयतु दृष्टेरप्रत्यक्षो धूमोऽग्निं गमयेत्। ८. अन्यथा। ९. यत्र धूमस्तत्राग्निः। १०. स्वयमप्रत्यक्षत्वेनैव।

[1]प्रदीपप्रत्यक्षत्वविरोधवदिति।

[2]गृहीतग्राहिधारावाहि[3] ज्ञानं गृहीतार्थम्, [4]दर्शनं सौगताभिमतं निर्विकल्पकम्; तच्च[5] [6]स्वविषयानुपदर्शकत्वादप्रमाणम्; [7]व्यवसायस्यैव [8]तज्जनितस्य तदुपदर्शकत्वात्[9]।

रूप एकान्तका विरोध है; जैसे प्रकाशात्मकताके अप्रत्यक्ष रहनेपर प्रदीपकी प्रत्यक्षताका विरोध है।

विशेषार्थ—किसी भी पदार्थके जाननेके समय कर्त्ता, कर्म, करण और क्रियाकी प्रतीति होती है, यह वात आचार्य प्रथम समुद्देशमें बतला आये है। इनके विषयमें जो विवाद है, उसकी चर्चा भी वहीं की जा चुकी है। प्रकृतमें मीमांसकोंका यह कहना है कि 'मै घटको आंखसे देखता हूँ' इस प्रतीतिमें कर्मरूप घट तो प्रत्यक्ष है, देखनेरूप जो क्रिया है और जिसे कि फलज्ञान कहते हैं, वह भी प्रत्यक्ष है। किन्तु आँख जो करण है, अर्थात् देखनेमें साधकतम कारण है, उसका ज्ञान प्रत्यक्ष नहीं है; क्योंकि कोई भी आँख अपने आपको नहीं देख सकती है, अतः करणज्ञान परोक्ष है। इस विषयमें उत्पन्न होनेवाली शङ्काओंका समाधान और आक्षेपोंका उत्तर देते हुए आचार्यने अन्तमें यह बतलाया है कि करण दो प्रकारके होते हैं— १ भिन्नकर्तृक और २ अभिन्नकर्तृक। देवदत्त फरसेसे काठ काटता है, यह भिन्नकर्तृक करणका उदाहरण है और अग्नि अपनी उष्णतासे काठको जलाती है, यह अभिन्नकर्तृक करणका उदाहरण है। प्रकृतमें अभिन्नकर्तृक करण विवक्षित है, इसलिए मीमांसकोंने जो व्यभिचार दोष दिया है, वह लागू नहीं होता। जैसे दीपक अपने भासुराकार प्रकाशसे पदार्थोंको प्रकाशित करता है, यहाँ पर करण जो भासुराकार प्रकाश है, वह परोक्ष नहीं, अपि तु प्रत्यक्ष ही है। यदि उसे भी परोक्ष माना जायगा, तो फिर दीपककी प्रत्यक्षता भी नहीं बन सकेगी, अर्थात् उसे भी परोक्ष ही मानना पड़ेगा।

गृहीतग्राही धारावाहिक ज्ञान गृहीतार्थप्रमाणाभास है; क्योंकि इसमें अज्ञानकी निवृत्तिरूप कोई फल नहीं पाया जाता। बौद्धोंके द्वारा माना गया

---

१. करणज्ञानं प्रत्यक्षं अभिन्नकर्तृके सति प्रत्यक्षकार्यकरणत्वात् प्रदीपभासुराकारवत्। २. गृहीतगृहीतमिति गृह्णाति। ३. तदपि न प्रमाणम्। कुतः? अज्ञाननिवृत्तिलक्षणफलाभावात्। यत्प्रमाणं तत्फलवदिति वचनात्। ४. प्रत्यक्षम्। ५. दर्शनम्। ६. स्वविषयानुपदर्शकत्वात् प्रवर्तकाप्रवर्तकत्वादविसंवादकमिति तन्मतम्। निर्विकल्पकप्रत्यक्षस्य अनिश्चायकत्वादिति। ७. सविकल्पकज्ञानस्य। ८. दर्शन-। ९. प्रत्यक्षविषयोपदर्शकत्वात्।

[1]करणज्ञानस्यापि[2] करणत्वेनावभासनात् प्रत्यक्षत्वमस्तु। [3]तस्मादर्थप्रति[4]पत्त्यन्यथाऽनुपपत्तेः[5] [6]करणज्ञानकल्पनावदर्थप्रत्यक्षत्वान्यथाऽ[7]नुपपत्तेर्ज्ञानस्यापि प्रत्यक्षत्वमस्तु[8]। अथ करणस्य[9] चक्षुरादेरप्रत्यक्षत्वेऽपि रूपप्राकट्याद् व्यभिचार[10] इति चेन्न, भिन्नकर्तृकरणस्यैव[11] [12]तद्व्यभिचारात्। अभिन्नकर्तृके[13]करणे सति [14]कर्तृप्रत्यक्षताया तदभिन्नस्यापि[15] करणस्य कथञ्चित्[16] प्रत्यक्षत्वेनाप्रत्यक्षतैकान्तविरोधात्, [17]प्रकाशात्मनोऽ[18]प्रत्यक्षत्वे[19]

होनेके कारण ही फलज्ञानके भी अप्रत्यक्षता मानी जाय। यदि कहा जाय कि फलरूपसे प्रतिभासित होनेके कारण फलज्ञानके परोक्षता नहीं है, किन्तु प्रत्यक्षता है, तो हम भी कहते हैं कि करणज्ञानके भी करणरूपसे प्रतिभासित होनेके कारण प्रत्यक्षता मानी जाय। इसलिए अर्थका ज्ञान अन्यथा नहीं हो सकनेसे जैसे करणज्ञानकी कल्पना की जाती है, उसीके समान अर्थकी प्रत्यक्षता अन्यथा नहीं हो सकनेसे ज्ञानके भी प्रत्यक्षता रही आवे, अर्थात् ज्ञानके भी प्रत्यक्षता मानी जाय। यदि कहा जाय कि करण चक्षु आदि इन्द्रियके अप्रत्यक्षपना होनेपर भी रूपकी प्रकटतासे व्यभिचार आता है, सो भी कहना ठीक नहीं है; क्योंकि भिन्न कर्त्तावाले करणके ही वह व्यभिचार दोष प्राप्त होता है। किन्तु अभिन्नकर्त्तावाले करणके होनेपर कर्त्ताके प्रत्यक्ष होनेकी दशामें उससे अभिन्न करणके भी कथञ्चित् प्रत्यक्ष होनेसे अप्रत्यक्षता

१. तर्हि। २. करणज्ञानमस्ति यथा तथा करणज्ञानस्यापि प्रत्यक्षता साध्यते। ३. अनेन हेतुना अस्तित्वकल्पना करणज्ञानस्य तथा प्रत्यक्षम्। ४. समः समाधिः प्रदर्श्यते— अर्थप्रत्यक्षत्वात् अन्यथानुपपत्तेर्ज्ञानस्यापि प्रत्यक्षत्वमस्तु। ५. स्वसंविदितमन्तरेण। ६. मयि करणज्ञानमस्ति, अर्थप्रतिपत्त्यन्यथानुपपत्तेरित्यनुमानेन वेद्यत्वादप्रत्यक्षत्वमिति चेत्। ७. स्वसंविदितमन्तरेण। ८. करणज्ञानं प्रत्यक्षं भवितुमर्हति, अर्थप्रत्यक्षत्वान्यथानुपपत्तेः। करणज्ञानमस्ति, अर्थप्रतिपत्त्यन्यथानुपपत्तेरिति चेत् करणज्ञानं प्रत्यक्षमर्थप्रत्यक्षत्वान्यथानुपपत्तेरित्यपि भवत्विति भावः। ९. इन्द्रियस्य। १०. करणभूते चक्षुरादौ रूपादिप्राकट्यमस्ति, प्रत्यक्षत्वं नास्ति। ततः साध्याभाववति हेतोः सद्भावाद् व्यभिचार इति। ११. करणं द्वेधा विभक्ताविभक्तकर्तृकभेदात्। कर्तुरन्यद्विभक्तकर्तृककरणम्, यथा परशुना छिनत्ति देवदत्तः। कर्तुरनन्यदविभक्तकम्, यथाऽग्निर्दहत्यौष्ण्येनेति। इह त्वविभक्तकर्तृककरणं विवक्षितं तस्माद्विभक्तकर्तृककरणेन व्यभिचारोऽपि न [illegible] भावः। १२. हेतोः। १३. लब्ध्युपयोगे भावेन्द्रिये। १४. तन्मते आत्मा प्रत्यक्षः। १५. कर्तुर[illegible]भिन्नस्यापि। १६. आत्मापेक्षया। १७. प्रकाशरूपस्य। १८. [illegible] प्रभाकरं प्रतीदम्। १९. प्राभाकरमतानुसारेणोक्तं सर्वमिदम्।

परामर्शः[1] । विपर्ययः पुनरतस्मिंस्तदिति विकल्पः[2] । [3]विशेषानवधारणमनध्यवसायः ।

कथमेषामस्वसंविदितादीनां तदाभासतेत्यत्राऽऽह—

स्वविषयोपदर्शकत्वाभावात्[4] ॥ ३ ॥

गतार्थमेतत् ।

अत्र दृष्टान्तं यथाक्रममाह—

पुरुषान्तरपूर्वार्थगच्छत्तृणस्पर्शस्थाणुपुरुषादिज्ञानवत्[5] ॥ ४ ॥

इस प्रकार उभय कोटिके स्पर्श करनेवाले परामर्शको संशय कहते हैं । अन्य वस्तुमें किसी अन्य वस्तुका विकल्प करना विपर्यय है । जैसे सीपको चाँदी समझ लेना । नाम, जाति आदि विशेषके निश्चय नहीं होनेको अनध्यवसाय कहते हैं । ये तीनों ही प्रमाणाभास हैं; क्योंकि इनसे यथार्थ अर्थका निश्चय नहीं होता ।

इन उपर्युक्त अस्वसंविदित ज्ञानादिकके प्रमाणाभासता क्यों है; इस प्रश्नका उत्तर देते हुए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—क्योंकि वे अपने विषयका निश्चय नहीं कराते हैं ॥ ३ ॥

इस सूत्रका अर्थ ऊपर ही कहा जा चुका है ।

अब आचार्य ऊपर कहे हुए प्रमाणाभासोंके यथाक्रमसे दृष्टान्त कहते हैं—

सूत्रार्थ—अस्वसंविदित ज्ञान प्रमाण नहीं है; क्योंकि वह अपने विषयका निश्चय नहीं करता है, जैसे दूसरे पुरुषका ज्ञान । गृहीतार्थ ज्ञान प्रमाण नहीं है; क्योंकि वह भी अपने विषय-विशेषका ज्ञान नहीं कराता; जैसे पूर्वमें जाने हुए पदार्थका ज्ञान । निर्विकल्पक दर्शन प्रमाण नहीं है; क्योंकि वह भी अपने विषयका निश्चय नहीं करता; जैसे चलते हुए पुरुषके तृणस्पर्शादिका ज्ञान । और संशयादिक भी प्रमाण नहीं हैं; क्योंकि वे भी अपने विषयका निश्चय नहीं कराते; जैसे कि यह स्थाणु है, या पुरुष है, इत्यादिक ज्ञान ॥ ४ ॥

---

१. विचारः । २. भेदः । ३. नामजातियोजनाद्यनवधारणम् । ४. प्रवृत्ति विषयोपदर्शकत्वाभावात् । ५. अस्वसंविदितं ज्ञानं प्रमाणं न भवति, स्वविषयोपदर्शकत्वाभावात् पुरुषान्तज्ञानवत् । गृहीतार्थज्ञानं प्रमाणं न भवति, स्वविषयोपदर्शकत्वाभावात्, पूर्वार्थज्ञान वत् । निर्विकल्पकं ज्ञानं प्रमाणं न भवति, स्वविषयोपदर्शकत्वाभावात्, गच्छत्तृणस्पर्शज्ञानवत् । संशयादिज्ञानं प्रमाणं न भवति, स्वविषयोपदर्शकत्वाभावात्, स्थाणु-पुरुषादिज्ञानवत् ।

अथ व्यवसायस्य[1] प्रत्यक्षाकारेणानुरक्तत्वात्[2] ततः प्रत्यक्षस्यैव प्रामाण्यम्; व्यवसायस्तु [3]गृहीतग्राहित्वादप्रमाणमिति। तन्न सुभाषितम्; दर्शनस्याविकल्प[4]कस्यानुपलक्षणात्[5] तत्सद्भावायोगात्। [6]सद्भावे वा नीलादाविव क्षणक्षयादावपि तदुपदर्शकत्वप्रसङ्गात्[7]। तत्र[8] विपरीतसमारोपान्नेति चेत्तर्हि सिद्धं नीलादौ समारोपविरोधिग्रहणलक्षणो निश्चय[10] इति तदात्मकमेव[11] प्रमाणम्[12], [13]इतरत्तदाभासमिति।

संशयादयश्च प्रसिद्धा[14] एव। तत्र संशय उभयकोटिसंस्पर्शी स्थाणुर्वा पुरुषो वेति

जो निर्विकल्पक प्रत्यक्ष प्रमाण है, वह दर्शननामका प्रमाणभास है, वह भी अपने विषयका उपदर्शक अर्थात् निश्चय करनेवाला न होनेसे अप्रमाण है; किन्तु निर्विकल्पक प्रत्यक्षके पश्चात् अपने विषयभूत पदार्थसे उत्पन्न हुआ व्यवसाय (निश्चय) रूप जो सविकल्पक ज्ञान है, वही अपने विषयका उपदर्शक है, अतः उसीके प्रमाणता है। यहाँपर बौद्ध कहते हैं कि व्यवसाय-रूप सविकल्पक ज्ञान वास्तविक प्रत्यक्ष नहीं है; क्योंकि वह प्रत्यक्षके आकार से अनुरक्त है अर्थात् प्रत्यक्ष जैसा प्रतीत होता है। इसलिए निर्विकल्प प्रत्यक्षके ही प्रमाणता है। व्यवसायरूप ज्ञान तो गृहीतग्राही होनेसे अप्रमाण है। आचार्य कहते हैं कि उनका यह कथन भी सुभाषित नहीं है; क्योंकि विकल्प-रहित दर्शनकी उपलब्धि न होनेसे उसका सद्भाव नहीं माना जा सकता। अथवा किसी प्रकार यदि उसका सद्भाव मान भी लिया जाय, तो नील आदिके समान क्षणक्षयादिमें भी उसके उपदर्शकपनेका प्रसङ्ग आता है। यदि कहा जाय कि क्षणक्षयादिमें क्षणिकसे विपरीत अक्षणिकका संशयादिरूप समारोप हो जानेसे वह उसका उपदर्शक नहीं हो सकता। इस पर आचार्य कहते हैं कि तब तो आपके द्वारा नीलादिमें समारोपके विरोधी ग्रहण लक्षणवाला निश्चय स्वीकार कर लेनेसे यह सिद्ध हुआ कि तदात्मक अर्थात् पदार्थका निश्चय करनेवाला ज्ञान ही प्रमाण है और जो निश्चयात्मक नहीं, ऐसा निर्विकल्परूप दर्शन प्रमाणाभास है।

संशयादिक प्रमाणाभास प्रसिद्ध ही हैं। यह स्थाणु है, या पुरुष है;

१. सविकल्पज्ञानस्य। २. साक्षात्प्रत्यक्षप्रमाणत्वाभावादित्यर्थः। ३. प्रत्यक्षगृहीत-विषयस्यैव ग्राहकत्वाद् व्यवसायस्येति भावः। ४. ज्ञानरूपस्य। ५. अनुपलम्भात्। ६. किञ्च। ७. अक्षणिकत्वात्। ८. क्षणक्षयादौ। ९. न क्षणिकं नित्यमिति विपरीत-समारोपात्, संशयावतारात्। १०. ज्ञानम्। ११. निश्चयात्मकमेव। सविकल्पास्तित्वं निर्विकल्पकस्य नास्तित्वमिति। १२. व्यवसायात्मकं दर्शनम्। १३. निर्विकल्पात्मकम्। १४. तदाभासाः।

अथ चक्षुः प्राप्तार्थपरिच्छेदकम्[१], व्यवहितार्थाप्रकाशकत्वात् प्रदीपवदिति 'तत्सिद्धि-रिति मतम्, तदपि न साधीयः; काचाभ्रपटलादिव्यवहितार्थानामपि चक्षुषा प्रतिभास-नाद्धेतोरसिद्धेः। शाखाचन्द्रमसोरेककालदर्शनानुपपत्तिप्रसक्तेश्च। न च [३]तत्र क्रमेऽपि यौगपद्याभिमान इति वक्तव्यम्; [४]कालव्यवधानानुपलब्धेः। किञ्च—क्रमप्रतिपत्तिः प्राति-

यिकलोग सन्निकर्षके छह भेद मानते हैं—संयोग, संयुक्तसमवाय, संयुक्त-समवेतसमवाय, समवाय, समवेतसमवाय और विशेषणविशेष्यभाव। आँखसे घड़ेको जानना संयोग सन्निकर्ष है। घड़ेके रूपको जानना संयुक्तसमवाय-सन्निकर्ष है; क्योंकि आँखके साथ घड़ेका संयोगसम्बन्ध है और घड़ेके साथ रूपका समवायसम्बन्ध है। प्रकृतमें इसीसे प्रयोजन है। आचार्य कहते हैं कि जैसे घड़े और रूपका समवायसम्बन्ध है, उसीप्रकार रसका भी समवाय-सम्बन्ध है इसलिए जैसे आँखसे घड़ेके रूपका ज्ञान होता है, उसी प्रकार उसमें समवायसम्बन्धसे रहनेवाले रसका भी आँखसे ज्ञान होना चाहिए। परन्तु होता नहीं है। इसलिए प्रमितिके अभावमें भी लक्षणके पाये जानेसे अति-व्याप्ति दोप आता है। इसी प्रकार इन्द्रियपदार्थके सम्बन्धरूप सन्निकर्षको प्रमाण माननेपर अव्याप्तिदोप भी आता है; क्योंकि शेष इन्द्रियोंके साथ सम्बन्ध होने पर भी आँखके साथ पदार्थका सम्बन्ध नहीं है, फिर भी उसे प्रमाण माना गया है। और आँख पदार्थके साथ स्पृष्ट होकर अर्थात् उससे भिड़कर पदार्थको नहीं जानती है, मनके समान उससे अस्पृष्ट रहकर ही अपने विषयको ग्रहण करती है, इसलिए चक्षुरिन्द्रियजनित प्रत्यक्षमें सन्निकर्षलक्षणके सम्भव न होनेसे असम्भव दोष भी आता है। अतएव सन्निकर्षको प्रमाण नहीं माना जा सकता, किन्तु वह प्रमाणाभास ही है।

यदि कहा जाय कि चक्षु प्राप्त अर्थको जाननेवाली है, किन्तु बीचमें अन्य पदार्थके व्यवधान आनेसे वह अपने विषयभूत अर्थकी अप्रकाशक रहती है। जैसे दीपक भीति आदिसे व्यवधानको प्राप्त पदार्थका प्रकाशक नहीं होता। इसलिए चक्षुरिन्द्रियके प्राप्तार्थ प्रकाशकता सिद्ध है। आचार्य कहते हैं कि ऐसा भी आपका मत समीचीन नहीं है; क्योंकि काच और अभ्रकपटल आदिसे व्यवधानको प्राप्त भी पदार्थोंका चक्षुरिन्द्रियसे परिज्ञान होता है, इसलिए आपका हेतु असिद्ध है। यदि आँखसे व्यवहित पदार्थका ज्ञान न माना जावे, तो वृक्षकी शाखा और चन्द्रमाके एक ही समयमें दर्शन नहीं होनेका प्रसङ्ग आता है। यदि कहें कि वृक्षकी शाखा और चन्द्रमा इन

कारि चक्षुः स्पृष्टानवग्रहात्। यदि प्राप्यकारि चक्षुः, त्वगिन्द्रियवत्स्पृष्टमञ्जनं गृह्णीयात्। न च गृह्णाति, अतो मनोवदप्राप्यकारीत्यवसेयम्। १. निश्चायकम्। २. चक्षुषि सन्नि-कर्षादिसिद्धिः, प्राप्तार्थपरिच्छेदकत्वसिद्धिरिति। ३. शाखाचन्द्रमसोरेककालग्रहणे। ४. शाखाचन्द्रमसोरेककालग्रहणे कालव्यवधानो नोपलभ्यत इति भावः।

पुरुषान्तरञ्च पूर्वार्थश्च गच्छत्तृणस्पर्शश्च स्थाणुपुरुषादिश्च तेषां ज्ञानम्, तद्वत्।

अपरं च सन्निकर्षवादिनं प्रति दृष्टान्तमाह—

'चक्षूरसयोर्द्रव्ये संयुक्तसमवायवच्च' ॥ ५ ॥

अयमर्थो यथा चक्षूरसयोः संयुक्तसमवायः सन्नपि न प्रमाणम्[2], तथा चक्षूरूपयोरपि[4]। तस्मादयमपि प्रमाणाभास एवेति। [5]उपलक्षणमेतत् [6]अतिव्याप्तिकथनमव्याप्तिश्च[7]; सन्निकर्षप्रत्यक्षवादिनां चक्षुषि सन्निकर्षस्याभावात्[8]।

सूत्रोक्त पुरुषान्तर, पूर्वार्थ, गच्छत्तृणस्पर्श और स्थाणुपुरुषादि इन पदोंका पहले द्वन्द्व समास करना चाहिए। पीछे ज्ञानपदके साथ उनका षष्ठी तत्पुरुषसमास करना चाहिए।

अब आचार्य सन्निकर्षको प्रमाण माननेवाले नैयायिकादिके प्रति दृष्टान्त कहते हैं—

सूत्रार्थ—द्रव्यमें चक्षु और रसके संयुक्तसमवायके समान ॥ ५ ॥

सूत्रका यह अर्थ है कि जिस प्रकार द्रव्यमें चक्षु और रसका संयुक्त समवाय होता हुआ भी प्रमाण नहीं है, क्योंकि वह ज्ञानरूप फलको उत्पन्न नहीं करता। उसी प्रकार द्रव्यमें चक्षु और रूपका संयुक्तसमवाय भी प्रमाण नहीं है; क्योंकि वह भी ज्ञानरूप फलको पैदा नहीं करता इसलिए यह सन्निकर्ष भी प्रमाणाभास ही है। यह अतिव्याप्तिका कथन उपलक्षणरूप है, अतः इससे अव्याप्तिदोषका भी ग्रहण करना चाहिए। क्योंकि सन्निकर्षको प्रत्यक्ष-प्रमाण कहनेवाले यौगोंके मतसे आँखमें सन्निकर्षका अभाव है।

विशेषार्थ—इन्द्रिय और पदार्थके संयोगको सन्निकर्ष कहते हैं। नैया-

---

१. चक्षुषा सह रूपं संयुक्तम्, संयुक्तेन रूपेण सह रसस्य समवायः। रसेन सह सन्निकर्षत्वादतिव्याप्तिः, रूपयुक्तस्य चक्षुषो लक्ष्यरूपस्य स्वरूपपरिज्ञानाभावादव्याप्तिः। २. सन्निकर्षज्ञानं प्रमाणं न भवति, स्वविषयोपदर्शकत्वाभावात्, चक्षूरसयोर्द्रव्ये संयुक्तसमवायवत्। ३. सन्निकर्षः। ४. सयुक्तसमवायः प्रमाणं न भवति। ५. कदाचित् असम्बद्धमुपलक्षणं काकोपलक्षितगृहवत्। ६. सन्निकर्षः प्रमाणमिति लक्षणे सति चक्षूरसयोः संयुक्तसमवायसन्निकर्षोऽस्ति, परन्तु तत्र चक्षुषा रसप्रतिपत्तिर्नास्ति। तस्मात्प्रमित्यभावेऽपि लक्षणसद्भावादतिव्याप्तिरिति। ७. चक्षुर्मनसोः प्रमित्युत्पादकत्वमस्ति, सन्निकर्षत्वं नास्ति। तस्माल्लक्ष्यमात्राव्याप्तत्वाल्लक्षणस्याव्याप्तिरिति। अयमाशयः—यदा सन्निकर्षस्य प्रमाणत्वं क्रियते तदा चक्षूरसयोर्द्रव्ये संयुक्तसमवायस्यापि प्रमाणत्वप्रसङ्गो भवतु, इत्यतिव्याप्तिः। लक्ष्यालक्ष्यवृत्तिरतिव्याप्तिः। चक्षुर्विना इतरेन्द्रियाणां सन्निकर्षसम्बन्धोऽस्ति, तस्मादव्याप्तिः। लक्ष्यैकदेशवृत्तिरव्याप्तिरिति। ८. अनेनासम्भवितत्वदूषणं च दर्शितम्। अप्राप्य-

[1]कत्वान्न प्रमाणत्वम्; [2]करणज्ञानेन [3]व्यवधानाच्चेति।

[4]प्रत्यक्षाभासमाह—

[5]**अवैशद्ये प्रत्यक्षं तदाभासं बौद्धस्याकस्माद्[6] [7]धूमदर्शनाद्वह्नि-विज्ञानवत्[8] ॥ ६ ॥**

परोक्षाभासमाह—

वैशद्येऽपि परोक्षं तदाभासं[9] मीमांसकस्य [10]करणज्ञानवत् ॥ ७ ॥

करणज्ञानसे व्यवधान भी है। अर्थात् इन्द्रियका पदार्थके साथ सन्निकर्ष होनेपर भी जाननेमें साधकतम कारण तो इन्द्रियज्ञान ही है; सन्निकर्ष नहीं। अतः सन्निकर्ष प्रमाणाभास ही हैं।

इस प्रकार सामान्यसे प्रमाणाभासका स्वरूप कहकर अब आचार्य प्रमाणके भेदोंके आभास कहते हुए पहले प्रत्यक्षाभासको कहते हैं—

सूत्रार्थ—बौद्धका अविशदरूप निर्विल्पक ज्ञानको प्रत्यक्ष मानना प्रत्यक्षाभास है, जैसे क अकस्मात् धूमके देखनेसे उत्पन्न हुआ अग्निका ज्ञान अनुमानाभास है; क्योंकि ये दोनों ही अपने विषयभूत पदार्थका निश्चय नहीं कराते हैं ॥६॥

अब परोक्षाभासको कहते हैं—

सूत्रार्थ—विशद ज्ञानको भी परोक्ष मानना परोक्षाभास है। जैसे मीमांसक करणज्ञानको परोक्ष मानते हैं। उनका ऐसा मानना परोक्षाभास है ॥७॥

प्रकाशकत्वात्तेजः कार्यत्वं द्रव्य तर्हि पृथिव्याः समवायिरूपप्रकाशकत्वात् पृथिव्याः कार्यत्व-प्रसङ्ग इत्याह—तैजसत्वं हि तेजोद्रव्यनिर्वर्त्यत्वं तस्य च तेजोद्रव्यं समवायिरूप-प्रकाशकत्वेन सिद्धौ पृथिव्यपद्रव्यरूपव्यञ्जकत्वेन पृथिव्यप् द्रव्यनिर्वर्त्यत्वं चक्षुषः सिद्धये-दित्यर्थः। चक्षुषस्तेजोरूपाभिव्यञ्जकत्वात्तेजः कार्यत्ववत् पृथिव्यप्कार्यत्वप्रसङ्ग इति भावः।
१. यतश्चक्षुर्मनसश्चाप्राप्तमर्थमुपलभ्यते। २. तथाहि—अर्थसंवेदनं भावेन्द्रियकारकं तदसन्निधाने कारकान्तरसन्निधानेऽपि अर्थसंवेदनाभावात्। अतिशायितं साधकं प्रकृष्टं कारणं करणमित्यर्थः। ३. प्रमाणोत्पत्तौ सन्निकर्षस्य करणज्ञानेन व्यवधानमस्ति, 'साधकतमं करणं, इति नियमात्तत्र साधकतमं करणं ज्ञानमेव, न सन्निकर्ष इति भावः। ४. एतावत्पर्यन्तं प्रमाणसामान्याभासं प्रतिपाद्य विशेषप्रमाणाभासं प्रतिपादयति। ५. यथा बौद्धपरिकल्पितं निर्विकल्पप्रत्यक्षं अविशदं वर्तते तथापि बौद्धः विशदं भाषते। ६. व्याप्तिस्मरणादिकं विना। ७. अकस्माद् धूमदर्शनाद् यथा वह्निविज्ञानं न भवति। ८. यथा धूमवाष्पादिविवेकनिश्चयाभावाद् व्याप्तिग्रहणाभावादकस्माद्धूमाज्जातं यद्वह्निविज्ञानं तत्तदाभासं भवति कस्मादनिश्चयात्। तथा बौद्धपरिकल्पितं यन्निर्विकल्पकप्रत्यक्षं तत्प्रत्यक्षाभासं कस्मादनिश्चयात्। ९. परोक्षाभासम्। १०. मीमांसकमते

निश्चये[1] सति भवति। न च क्रमप्राप्तौ प्रमाणान्तरमस्ति। [2]तैजसत्वमस्तीति चेन्न; [3]तस्यासिद्धेः। अथ चक्षुस्तैजसम्; रूपादीनां[4] मध्ये [5]रूपस्यैव प्रकाशकत्वात्, प्रदीपवदिति। तदप्यपर्यालोचिताभिधानम्; मण्यञ्जनादेः पार्थिवत्वेऽपि [6]रूपप्रकाशकत्वदर्शनात्। पृथिव्यादिरूपप्रकाशकत्वे [7]पृथिव्याद्यारब्धत्वप्रसङ्गाच्च। तस्मात्सन्निकर्षस्याव्याप-

दोनोंके दर्शनमें क्रम होनेपर भी पुरुषको यौगपद्यका अभिमान होता है कि मैं शाखा और चन्द्रमाको एक साथ देख रहा हूँ, सो ऐसा भी नहीं कहना चाहिए; क्योंकि शाखा और चन्द्रमाके एक साथ देखनेमें कालका व्यवधान नहीं पाया जाता। दूसरी बात यह है कि क्रमका ज्ञान तो क्रमकी प्राप्तिका निश्चय होनेपर ही हो सकता है। किन्तु क्रमकी प्राप्तिमें कोई अन्य प्रमाण नहीं पाया जाता है। यदि कहें कि तैजसत्व प्रमाण है, अर्थात् चक्षु क्रमसे प्राप्त अर्थकी प्रकाशक है, क्योंकि उसमें तैजसपना पाया जाता है। चक्षुके तेजोद्रव्य होनेसे शाखा और चन्द्रमाकी क्रमशः प्राप्ति सिद्ध है। सो आपका यह कहना भी ठीक नहीं है; क्योंकि आँखके तैजसपना असिद्ध है, अर्थात् आँखके तेजोद्रव्यके समान भासुरपना नहीं पाया जाता। यदि कहें कि चक्षु तैजस है; क्योंकि वह रूप-रसादिके मध्यमेंसे केवल रूपकी ही प्रकाशक है; जैसे दीपक घट-पटादि पदार्थोंमें रूप-रसादिके रहनेपर भी केवल रूपका ही प्रकाशक है। आचार्य कहते हैं कि आपका यह अनुमान-प्रयोग भी विना विचारे कहा हुआ है; क्योंकि मणि और अञ्जन आदिके पार्थिवपना होनेपर भी रूपका प्रकाशकपना देखा जाता है, इसलिए आपका हेतु व्यभिचारी है। यदि तेजोद्रव्यके रूपको प्रकाशित करनेसे चक्षुके तैजसपना माना जाय, तो पृथिवी आदिके रूपका प्रकाशक होनेपर उसके पृथिवी आदिसे आरब्ध होने अर्थात् रचे जानेका भी प्रसङ्ग आता है, तब चक्षुको भी पार्थिव मानना पड़ेगा। इसलिए सन्निकर्षके अव्यापकता होनेसे प्रमाणता नहीं है। दूसरे,

१. क्रमस्योपलब्धिनिश्चये। २. क्रमप्राप्तिनिश्चये तैजसत्वं प्रमाणमस्ति, चक्षुः प्राप्तार्थप्रकाशकं तैजसत्वात्। चक्षुषः तेजोद्रव्यत्वात्क्रमेणैव शाखाचन्द्रमसोः प्राप्तिरिति भावः। ३. अतैजसं चक्षुर्भासुरत्वानुपलब्धेरित्यनेन चक्षुषः तैजसत्वमसिद्धमिति। ४. आदिपदेन रसगन्धस्पर्शाश्च गृह्यन्ते। ५. चक्षुस्तैजसं रूपस्यैव प्रकाशकत्वादित्युच्यमाने येनेन्द्रियेण यद् गृह्यते तेनैव तज्जातिस्तदभावश्च गृह्यते, इति नियमाद्धेतुः स्वरूपासिद्धः स्यादतस्तद्वारणाय 'रूपादीनां मध्ये' इति विशेषणं दत्तमिति। प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽतिव्याप्तिवारणाय परकीयरसाद्यव्यञ्जकत्व इति विशेषणम् तथा घटादेः स्वीयरूपव्यञ्जकत्वाद् व्यभिचारवारणाय परकीयरूपव्यञ्जकत्वादिति विशेष्यम्, चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्, तथा सति चक्षुस्तैजसं द्रव्यत्वे सति परकीयरसाद्यव्यञ्जकत्वे सति च परकीयरूपव्यञ्जकत्वात् प्रदीपवदित्यनुमानं भवति। ६. मण्यञ्जनादौ तैजसत्वं नास्ति, रूपस्य प्रकाशकत्वमस्ति, तस्मात्साध्याभाववति मण्यञ्जनादौ हेतोः सद्भावाद् व्यभिचारित्वं तस्येति भावः। ७. यदि चक्षुषस्तेजोरूप-

तर्काभासमाह—

'असम्बद्धे तज्ज्ञानं' तर्काभासम् ॥ १० ॥

यावाँस्तत्पुत्रः स श्याम इति यथा। तज्ज्ञानमिति व्याप्तिलक्षणसम्बन्धज्ञानमित्यर्थः।

इदानीमनुमानाभासमाह—

इदमनुमानाभासम् ॥ ११ ॥

इदं वक्ष्यमाणमिति भावः।

तत्र तदवयवाभासोपदर्शनेन समुदायरूपानुमानाभासमुपदर्शयितुकामः प्रथमावयवाभासमाह—

'तत्रानिष्टादिः' पक्षाभासः' ॥ १२ ॥

इष्टमबाधितमित्यादि तल्लक्षणमुक्तम्। इदानीं तद्विपरीतं तदाभासमिति कथयति—

अब तर्काभासका स्वरूप कहते हैं—

सूत्रार्थ—अविनाभाव-सम्बन्धसे रहित पदार्थमें अविनाभाव-सम्बन्धका ज्ञान करना तर्काभास है ॥१०॥

जैसे किसी पुरुषविशेषके पुत्रोंकी श्यामपनेके साथ व्याप्ति नहीं है, फिर भी कहना कि जो भी उसका पुत्र होगा, वह श्याम होगा। सूत्रोक्त तज्ज्ञान इस पदका अर्थ व्याप्ति लक्षणवाले अविनाभाव-सम्बन्धका ज्ञान है।

अब अनुमानाभासका स्वरूप कहते हैं—

सूत्रार्थ—यह अनुमानाभास है जो आगे कहा जा रहा है ॥११॥

इदं अर्थात् वक्ष्यमाण पक्षाभासादि अनुमानाभासके ही अन्तर्गत हैं, यह भाव समझना चाहिए।

उस अनुमानाभासके अवयवाभासोंको बतलानेसे ही समुदायरूप अनुमानाभासका ज्ञान हो जाता है, यह दिखलाते हुए आचार्य पहले उसके प्रथम अवयवभूत पक्षाभासको कहते हैं—

सूत्रार्थ—उनमें अनिष्ट, बाधित और सिद्धको पक्ष कहना पक्षाभास है ॥१२॥

पहले पक्ष या साध्यका लक्षण इष्ट, अबाधित और असिद्ध कह आये है। उनसे विपरीतको पक्षाभास कहते हैं।

अब आचार्य उन विपरीतस्वरूपवाले तदाभासोंको कहते हैं—

---

१. अविनाभावरहितेऽव्याप्तौ। २. व्याप्तिज्ञानम्। ३. अनुमानाभासे। ४. वादिनोऽनभिप्रेतादिः। ५. धर्मधर्मिसमुदायः पक्षः। पक्षवचनं प्रतिज्ञा। एतल्लक्षणरहितः पक्षाभासः।

प्राक् प्रपञ्चितमेतत् ।

परोक्षभेदाभासमुपदर्शयन् प्रथमं क्रमप्राप्तं स्मरणाभासमाह—

अतस्मिंस्तदिति ज्ञानं स्मरणाभासं जिनदत्ते स देवदत्तो यथा ॥८॥

अतस्मिन्ननुभूत इत्यर्थः । शेषं सुगमम् ।

प्रत्यभिज्ञानाभासमाह—

'सदृशे तदेवेदं[2] तस्मिन्नेव[3] तेन सदृशं[4] [5]यमलकवदित्यादि प्रत्यभिज्ञानाभासम् ॥ ९ ॥

द्विविधं प्रत्यभिज्ञानाभासमुपदर्शितम्—एकत्वनिबन्धनं सादृश्यनिबन्धनं चेति । तत्रैकत्वे सादृश्यावभासः सादृश्ये चैकत्वावभासस्तदाभासमिति[6] ।

करणज्ञानका पहले विस्तारसे विवेचन किया जा चुका है ।

अब आचार्य परोक्ष प्रमाणके भेदोंके आभास बतलाते हुए पहले क्रम-प्राप्त स्मरणाभासको कहते हैं—

सूत्रार्थ—जिसका पहले कभी धारणारूपसे अनुभव नहीं किया, उसमें 'वह है' इस प्रकारके ज्ञानको स्मरणाभास कहते हैं । जैसे जिनदत्तमें वह देवदत्त है, ऐसा स्मरण करना ॥८॥

अतस्मिन् अर्थात् पहले अनुभव नहीं किये गये पदार्थमें । शेष शब्दों का अर्थ सुगम है ।

अब प्रत्यभिज्ञानाभासका स्वरूप कहते हैं—

सूत्रार्थ—सदृश पदार्थमें 'यह वही है' ऐसा कहना, उसी पदार्थमें 'यह उसके सदृश है' ऐसा कहना । जैसे एक साथ जन्मे हुए दो बालकोंमें विपरीत ज्ञान हो जाता है, इत्यादि प्रकारके अन्यथा प्रत्यभिज्ञानको प्रत्यभिज्ञानाभास कहते है ॥९॥

सूत्रमें दो प्रकारके प्रत्यभिज्ञानाभासको बतलाया गया है—पहला एकत्वनिमित्तक और दूसरा सादृशनिमित्तक । एकत्वमें सादृश्यका ज्ञान होना और सादृश्यमें एकत्वका ज्ञान होना ही प्रत्यभिज्ञानाभास है ।

करणज्ञानं ज्ञानान्तरवेद्यमिति । परन्तु न हि करणज्ञानेऽव्यवधानेन, प्रतिभासलक्षणं वैशद्य-मसिद्धं स्वार्थयोः प्रतीत्यन्तरनिरपेक्षतया तत्र प्रतिभासनादिति । १. देवदत्तसदृशो देवदत्त एव । २. एकत्वप्रत्यभिज्ञानाभासम् । ३. देवदत्ते देवदत्तसदृशो यमलकवद् दृश्यते । ४. सादृश्यप्रत्यभिज्ञानाभासम् । स्वयं स्वेन सदृशमित्यर्थः । ५. युगलोत्प-न्नवत् । ६. प्रत्यभिज्ञानाभासम् ।

[1]अपरिणामी शब्दः कृतकत्वाद् घटवत् ॥ १७ ॥

अत्र पक्षोऽपरिणामी शब्दः कृतकत्वादित्यनेन[2] बाध्यते ।

आगमबाधितमाह—

[3]प्रेत्यासुखप्रदो धर्मः पुरुषाश्रितत्वादधर्मवत् ॥ १८ ॥

आगमे हि पुरुषाश्रितत्वाविशेषेऽपि परलोके धर्मस्य सुखहेतुत्वमुक्तम् ।

लोकबाधितमाह—

शुचि नरशिरःकपालं [4]प्राण्यङ्गत्वाच्छंखशुक्तिवत्[5] ॥ १९ ॥

लोके हि प्राण्यङ्गत्वेऽपि कस्यचिच्छुचित्वमशुचित्वं च । तत्र नरकपालादीनामशुचित्वमेवेति लोकबाधितत्वम् ।

सूत्रार्थ—शब्द अपरिणामी है; क्योंकि वह कृतक है । जो दूसरेके द्वारा किया जाता है, वह अपरिणामी होता है; जैसे घट ॥१७॥

यहाँपर 'शब्द अपरिणामी है' यह पक्ष कृतक इस हेतुसे बाधित है; क्योंकि कृतक हेतुसे तो परिणामीपनेकी ही सिद्धि होती है ।

अब आगमबाधित पक्षाभासका उदाहरण कहते है—

सूत्रार्थ—धर्म परलोकमें दुःखका देनेवाला है; क्योंकि वह पुरुषके आश्रित है । जो पुरुषके आश्रयसे होता है, वह दुःखदायी होता है, जैसे अधर्म ॥१८॥

पुरुषका आश्रितपना समान होनेपर भी आगममें धर्मको परलोकमें सुखका कारण कहा गया है, अतः यह आगमबाधितपक्षाभासका उदाहरण है ।

अब लोकबाधितपक्षाभासका उदाहरण कहते है—

सूत्रार्थ—मनुष्यके शिरका कपाल पवित्र है; क्योंकि वह प्राणीका अङ्ग है । जो प्राणीका अङ्ग होता है, वह पवित्र होता है जैसे शंख-सीप आदिक ॥१९॥

लोकमें प्राणीका अङ्ग समान होनेपर भी किसी वस्तुको पवित्र माना गया है और किसीको अपवित्र । किन्तु नर-कपाल आदिको तो अपवित्र ही माना गया है, अतः यह लोकबाधितपक्षाभासका उदाहरण है ।

---

१. नित्यः । २. परिणामी शब्दोऽर्थक्रियाकारित्वात् कृतकत्वाद् घटवदित्यनुमानेनापरिणामी शब्दः इति पक्षो बाध्यते । ३. परलोके । ४. यथा गोपिण्डत्वाविशेषेऽपि किञ्चिद् दुग्धादि शुद्धं न गोमासमिति । तथा प्राण्यङ्गत्वाविशेषेऽपि नरशिरःकपालस्याशुचित्व शङ्ख-शुक्त्यादेः शुचित्वमिति । ५. मृगमद-मौक्तिक-रोचन चमरीरुह-शङ्ख-पिच्छ-कौशेयाः । श्लाध्याः गुणाश्रयत्वान्नोत्पत्तिर्गण्यते तज्ज्ञैः ॥ १ ॥

अनिष्टो मीमांसकस्यानित्यः[1] शब्दः ॥ १३ ॥

असिद्धाद्विपरीतं तदाभासमाह—

सिद्धः[2] श्रावणः शब्द[3] इति ॥ १४ ॥

अबाधिताद्विपरीतं [4]तदाभासमावेदयन् स[5] च प्रत्यक्षादिबाधित एवेति दर्शयन्नाह—

बाधितः प्रत्यक्षानुमानागमलोकस्ववचनैः ॥ १५ ॥

[6]एतेषां क्रमेणोदाहरणमाह—

तत्र प्रत्यक्षबाधितो यथा—अनुष्णोऽग्निर्द्रव्यत्वाज्जलवत् ॥ १६ ॥

स्पार्शनप्रत्यक्षेण ह्युष्णस्पर्शात्मकोऽग्निरनुभूयते ।

अनुमानबाधितमाह—

सूत्रार्थ-- मीमांसकका ऐसा कहना कि शब्द अनित्य है अनिष्ट पक्षाभास है; क्योंकि उसके मतानुसार शब्द नित्य है ॥१३॥

अब असिद्धसे विपरीत सिद्ध पक्षाभासको कहते हैं—

सूत्रार्थ—शब्द श्रावण है अर्थात् श्रवणेन्द्रियसे सुना जाता है, यह सिद्धपक्षाभास है; क्योंकि जब शब्द कानसे सुना ही जाता है, तब सिद्ध वस्तुको साधन करना व्यर्थ ही है ॥१४॥

अब अबाधितसे विपरीत बाधिताभासको दिखलाते हुए आचार्य वह बाधिताभास प्रत्यक्ष-बाधित आदिके भेदसे अनेक प्रकारका है यह बतलाते हैं--

सूत्रार्थ--बाधित पक्षाभास प्रत्यक्ष, अनुमान, आगम, लोक और स्ववचनोंसे बाधित होनेके कारण पांच प्रकारका है ॥१५॥

अब आचार्य इनके क्रमसे उदाहरण कहते हैं—

सूत्रार्थ—उनमेंसे प्रत्यक्षबाधित पक्षाभासका उदाहरण—जैसे अग्नि उष्णता-रहित अर्थात् शीतल है; क्योंकि वह द्रव्य है। जो द्रव्य होता है, वह शीतल होता है, जैसे जल ॥१६॥

किन्तु स्पार्शन-प्रत्यक्षसे अग्नि उष्णस्पर्शवाली ही अनुभव की जाती है, अतः यह प्रत्यक्षबाधितपक्षाभासका उदाहरण है।

अब अनुमानबाधित पक्षाभास कहते हैं—

---

१. स हि प्रतिवादि-सभ्य-सभापतिदर्शनात् कदाचिदाकुलितबुद्धिः स्वाभिप्रेतं 'नित्यः शब्दः' इति पक्षं विस्मरन्ननभिप्रेतमपि पक्षं स्वीकरोति। २. पक्षाभासः। ३. वादिप्रतिवादिनोः सिद्धेऽर्थेऽविप्रतिपत्तेः। ४. बाधिताभासम्। ५. बाधितपक्षाभासः। ६. प्रत्यक्षादिबाधितपक्षाभासानाम्।

[1]अविद्यमानसत्ताकः परिणामी शब्दश्चाक्षुषत्वात् ॥२३॥

कथमस्यासिद्धत्वमित्याह—

[2]स्वरूपेणासत्त्वात् ॥२४॥

द्वितीयासिद्धभेदमुपदर्शयति—

अविद्यमाननिश्चयो मुग्धबुद्धिं प्रत्यग्निरत्र धूमात् ॥२५॥

सूत्रार्थ—शब्द परिणामी है; क्योंकि वह चाक्षुष है, अर्थात् चक्षुसे जाना जाता है, यह अविद्यमान सत्तावाले स्वरूपासिद्ध-हेत्वाभासका उदाहरण है ॥२३॥

उक्त हेतुके असिद्धता कैसे है ? आचार्य इस प्रश्नका उत्तर देते हैं—

सूत्रार्थ—क्योंकि शब्दके चाक्षुषपना स्वरूपसे ही असिद्ध है ॥२४॥

भावार्थ—शब्द स्वरूपसे श्रावण है अर्थात् कर्णेन्द्रियसे सुना जाता है, उसे चाक्षुष कहना स्वरूपसे ही असिद्ध है, अतः यह स्वरूपासिद्धका उदाहरण है।

अब आचार्य असिद्ध हेत्वाभासके दूसरे भेदको बतलाते है—

सूत्रार्थ—मुग्धबुद्धि पुरुषके प्रति कहना कि यहाँ अग्नि है; क्योंकि धूम है, यह अविद्यमान निश्चयवाले सन्दिग्धासिद्ध हेत्वाभासका उदाहरण है ॥२५॥

---

१. अविद्यमाना साध्येन असाध्येन (दृष्टान्तेन) उभयेन वाऽविनाभाविनी सत्ता यस्यासावसिद्धः। २. चाक्षुषत्वस्वरूपेण। चक्षुर्ज्ञानग्राह्यत्वं हि चाक्षुषत्वम्, तच्च शब्दे स्वरूपेणैवासत्त्वात्स्वरूपासिद्धम्। ये च विशेष्यासिद्धादयोऽसिद्धप्रकाराः परैर्नैयायिकादिभिरिष्टास्तेऽसत्सत्ताकत्वलक्षणासिद्धप्रकारान्नार्थान्तरं तल्लक्षणभेदाभावात्। तत्र विशेष्यासिद्धो यथा—अनित्यः शब्दः सामान्यवत्वे सति चाक्षुषत्वात्। विशेषणासिद्धो यथा—अनित्यः शब्दश्चाक्षुषत्वे सति सामान्यवत्त्वात्। आश्रयासिद्धो यथा—अस्ति प्रधानं विश्वपरिणामित्वात्। वस्तुतः प्रधानं नास्तीति भावः। आश्रयैकदेशासिद्धो यथा—नित्याः परमाणुप्रधानात्मेश्वराः अकृतकत्वात्। व्यर्थविशेष्यासिद्धो यथा—अनित्याः परमाणवः कृतकत्वे सति सामान्यवत्वात्। व्यर्थविशेषणासिद्धो यथा—अनित्याः परमाणवः सामान्यवत्त्वे सति कृतकत्वात्। व्यधिकरणासिद्धो यथा—अनित्यः शब्दः परस्य कृतकत्वात्। भागासिद्धो तथा—नित्यः शब्दः प्रयत्नानन्तरीयकत्वात्। व्यधिकरणासिद्धत्वं च परप्रक्रियाप्रदर्शनमात्रं न वस्तुतो हेतुदोषो व्यधिकरणस्यापि 'उदेष्यति शकटं कृतिकोदयात्' इत्यादेर्गमकत्वप्रतीतेः। भागासिद्धस्यापि अविनाभावसद्भावाद् गमकत्वमेव। न खलु प्रयत्नानन्तरीयकत्वमनित्यत्वमन्तरेण क्वापि दृश्यते, यावति शब्दे तत्प्रवर्तते तावतः शब्दस्यानित्यत्वं ततः सिद्ध्यति, अन्यस्य त्वन्यतः कृतकत्वादेः।

स्ववचनबाधितमाह—

माता मे वन्ध्या पुरुषसंयोगेऽप्यगर्भत्वात्प्रसिद्धवन्ध्यावत् ॥२०॥

इदानीं हेत्वाभासान् क्रमापन्नानाह—

हेत्वाभासा असिद्धविरुद्धानैकान्तिकाकिञ्चित्कराः ॥२१॥

एषां यथाक्रमं लक्षणं सोदाहरणमाह—

असत्सत्तानिश्चयोऽसिद्धः ॥२२॥

सत्ता च निश्चयश्च सत्तानिश्चयौ । असन्तौ सत्तानिश्चयौ यस्य स भवत्यसत्सत्तानिश्चयः ।

तत्र प्रथमभेदमाह—

अब स्ववचनबाधितपक्षाभासका उदाहरण कहते हैं—

सूत्रार्थ—मेरी माता वन्ध्या है, क्योंकि पुरुषका संयोग होनेपर भी उसके गर्भ नहीं रहता है। जिसके पुरुषका संयोग होनेपर भी गर्भ नहीं रहता, वह वन्ध्या कहलाती है, जैसे कि प्रसिद्ध वन्ध्या स्त्री। यह स्ववचनबाधित पक्षाभासका उदाहरण है, क्योंकि उसका कथन उसीके वचनोंसे बाधित है ॥२०॥

अब आचार्य क्रम-प्राप्त हेत्वाभासोंको कहते हैं—

सूत्रार्थ—असिद्ध, विरुद्ध, अनैकान्तिक और अकिञ्चित्कर ये चार हेत्वाभासके भेद हैं ॥२१॥

आचार्य इन हेत्वाभासोंका यथाक्रमसे लक्षण उदाहरण-सहित कहते हैं—

सूत्रार्थ—जिस हेतुकी सत्ताका अभाव हो, अथवा निश्चय न हो, उसे असिद्ध-हेत्वाभास कहते हैं ॥२२॥

सत्ता और निश्चयका द्वन्द्व समास करनेपर 'सत्तानिश्चयौ' यह पद बना। नहीं है सत्तानिश्चय जिसके, ऐसा बहुव्रीहि समास करनेपर असत्सत्तानिश्चय यह पद सिद्ध हुआ।

भावार्थ—असिद्ध हेत्वाभासके दो भेद है—स्वरूपासिद्ध और सन्दिग्धासिद्ध। जिस हेतुका स्वरूपसे ही अभाव हो, उसे स्वरूपासिद्ध कहते हैं और जिस हेतुके रहनेका निश्चय न हो—सन्देह हो—उसे सन्दिग्धासिद्ध कहते है। सूत्रकारने इस एक ही सूत्रमें दोनोंका स्वरूप कहा है।

अब असिद्धहेत्वाभासके प्रथम भेद स्वरूपासिद्धको कहते हैं—

रिति । अस्याप्यनिश्चयादसिद्धत्वमित्यर्थः ।

विरुद्धं हेत्वाभासमुपदर्शयन्नाह—

विपरीतनिश्चिताविनाभावो[1] विरुद्धोऽपरिणामी[2] शब्दः कृतकत्वात्[3] ॥२९॥

कृतकत्वं ह्यपरिणामविरोधिना परिणामेन व्याप्तमिति ।

अनैकान्तिकं हेत्वाभासमाह—

तिरोभाव ही प्रसिद्ध हैं, उत्पत्ति आदिक नहीं; क्योंकि वह नित्यैकान्तवादी है। इसलिए सांख्यको किसी पदार्थके किसीके द्वारा उत्पन्न किये जानेका निश्चय ही नहीं है, उसे कृतकता सर्वथा अज्ञात है, अतः उसे हेतुरूपसे उसके लिए प्रयुक्त करना भी असिद्ध हेत्वाभास है।

अब विरुद्ध हेत्वाभासको बतलाते हुए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—साध्यसे विपरीत पदार्थके साथ जिसका अविनाभाव निश्चित हो, उसे विरुद्ध हेत्वाभास कहते हैं। जैसे शब्द अपरिणामी है; क्योंकि वह कृतक है ॥२९॥

इस अनुमानमें कृतकत्व हेतु अपरिणामके विरोधी परिणामके साथ व्याप्त है, इसलिए यह विरुद्ध हेत्वाभास है।

अब अनैकान्तिक हेत्वाभासको कहते हैं—

---

१. विपरीतेन सह निश्चितोऽविनाभावो यस्य । साध्यस्वरूपाद्विपरीतेन निश्चितोऽविनाभावो यस्यासौ विरुद्धः । २. एकस्वभावी अक्षणिकलक्षणो नित्यैकलक्षणः । ३. ये चाष्टौ विरुद्धभेदाः परैरिष्टास्तेऽप्येतल्लक्षणलक्षितत्वाविशेषतोऽत्रैवान्तर्भवन्ति । सति सपक्षे चत्वारो विरुद्धाः । पक्षविपक्षव्यापकः सपक्षावृत्तिर्यथा-नित्यः शब्दः उत्पत्तिधर्मकत्वात् । विपक्षैकदेशवृत्तिः पक्षव्यापकः सपक्षावृत्तिश्च यथा—नित्यः शब्दः सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रिय प्रत्यक्षत्वात् । पक्षविपक्षैकदेशवृत्तिः सपक्षावृत्तिश्च यथा—सामान्यविशेषवती अस्मदादिबाह्यकरणप्रत्यक्षे वाग्मनसी नित्यत्वात् । पक्षैकदेशवृत्तिः सपक्षावृत्तिर्विपक्षव्यापको यथा—नित्ये वाग्मनसे उत्पत्ति धर्मकत्वात् । तथाऽसति सपक्षे चत्वारो विरुद्धाः । पक्षविपक्षव्यापकोऽविद्यमानसपक्षो यथा—आकाशविशेषगुणः शब्दः प्रमेयत्वात् । पक्षविपक्षैकदेशवृत्तिरविद्यमानसपक्षो यथा—सत्तासम्बन्धिनः षट् पदार्थाः उत्पत्तिमत्वात् । पक्षव्यापको विपक्षैकदेशवृत्तिरविद्यमानसपक्षो यथा—आकाशविशेषगुणः शब्दो बाह्येन्द्रियग्राह्यत्वात् । पक्षैकदेशवृत्तिर्विपक्षव्यापकोऽविद्यमानसपक्षो यथा—नित्ये वाङ्मनसी कार्यत्वात् ।

अस्याप्यसिद्धता कथमित्याशंकायामाह—

तस्य वाष्पादिभावेन ¹भूतसंघाते सन्देहात्² ॥२६॥

तस्येति मुग्धबुद्धिं प्रतीत्यर्थः ।

अपरमसिद्धभेदमाह—

सांख्यम्प्रति परिणामी³ शब्दः कृतकत्वात् ॥२७॥

अस्यासिद्धताया कारणमाह—

तेनाज्ञातत्वात्⁴ ॥२८॥

तेन साङ्ख्येनाज्ञातत्वात् । तन्मते ह्याविर्भाव⁵तिरोभावावेव प्रसिद्धौ, नोत्पत्त्यादि-

---

इस हेतुके भी असिद्धता कैसे है, ऐसी शङ्का होनेपर आचार्य उत्तर देते हैं—

सूत्रार्थ—क्योंकि उसे भूतसंघातमें वाष्प आदिके रूपसे सन्देह हो सकता है ॥२६॥

उसे अर्थात् मुग्ध बुद्धि पुरुषको । जिसने अग्नि और धूमके सम्बन्धको यथावत् जाना ही नहीं है, ऐसे भोले-भाले व्यक्तिको भूतसंघातसे निकलती हुई भापको देखकर वहाँपर भी अग्निके होनेका सन्देह हो सकता है । यहाँ भूतसंघातसे अभिप्राय चूल्हेसे तत्काल उतारे हुए दाल-भात आदिके पात्रसे है, जिसमेंसे कि भाप निकल रही हो ।

आगे आचार्य असिद्ध हेत्वाभासके और भी भेद कहते हैं—

सूत्रार्थ—सांख्यके प्रति कहना कि शब्द परिणामी है; क्योंकि वह कृतक है । यह हेतु सांख्यके लिए असिद्ध है ॥२७॥

आचार्य इस हेतुकी असिद्धतामें कारण बतलाते हैं—

सूत्रार्थ—क्योंकि उसने कृतकपना जाना ही नहीं है ॥२८॥

उसने अर्थात् सांख्यने । सांख्यके मतमें पदार्थोंका आविर्भाव और

---

१. पृथिव्यादिलक्षणाना भूतानां सङ्घातो धूमः, तस्मिन् धूमे । २. मुग्धबुद्धिर्विद्यमाने धूमेऽपि वाष्पादित्वेन सन्देहं करोति, निश्चेतुं शक्याभावात् । ३. अनित्यः । ४. सांख्यस्य मते शब्दस्य कृतकत्वमस्ति वा नवेति परिज्ञानाभावात् । किञ्च—सन्दिग्धविशेष्यादयोऽप्यविद्यमाननिश्चयतालक्षणातिक्रमाभावान्नार्थान्तरम् । तत्र सन्दिग्धविशेष्यासिद्धो यथा—अद्यापि रागादियुक्तः कपिलमुनिः पुरुषत्वे सत्यप्यस्यानुत्पन्नतत्त्वज्ञानत्वात् । सन्दिग्धविशेषणासिद्धो यथा—अद्यापि रागादियुक्तः कपिलमुनिः सर्वदा तत्त्वज्ञानरहितत्वे सति पुरुषत्वात् । ५. साख्यमते शब्दस्य व्यञ्जनत्वमाविर्भावः प्रकटितमिति यावत् । आच्छादनत्वं तिरोभाव इति । इति द्वावेव प्रसिद्धौ ।

कथमस्य[1] विपक्षे[2] निश्चिता वृत्तिरित्याशङ्कयाऽऽह—

आकाशे नित्येऽप्यस्य[3] निश्चयात् ॥३२॥

शङ्कितवृत्तिमुदाहरति—

शङ्कितवृत्तिस्तु नास्ति सर्वज्ञो वक्तृत्वात् ॥३३॥

अस्यापि कथं विपक्षे[4] वृत्तिराशङ्क्यत इत्यत्राह—

सर्वज्ञत्वेन वक्तृत्वाविरोधात् ॥३४॥

अविरोधश्च ज्ञानोत्कर्षे[5] वचनानामपकर्षा[6]दर्शनादिति निरूपितप्रायम् ।

विषय है। जो प्रमेय होता है, वह अनित्य होता है; जैसे घट। यह निश्चित-विपक्षवृत्ति अनैकान्तिक हेत्वाभासका उदाहरण है ॥ ३१ ॥

इस प्रमेयत्व हेतुकी विपक्षमें वृत्ति कैसे निश्चित है, ऐसी आशङ्काके होनेपर आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—क्योंकि नित्य आकाशमें भी इस प्रमेयत्व हेतुके रहनेका निश्चय है ॥ ३२ ॥

भावार्थ—प्रमेयत्व हेतु पक्ष शब्दमें और सपक्ष घटमें रहता हुआ अनित्यके विपक्षी नित्य आकाशमें भी रहता है; क्योंकि आकाश भी निश्चित-रूपसे प्रमाणका विषय है।

अब शङ्कितविपक्षवृत्ति अनैकान्तिक हेत्वाभासका उदाहरण कहते हैं—

सूत्रार्थ—सर्वज्ञ नहीं है; क्योंकि वह वक्ता है अर्थात् बोलनेवाला है। यह शङ्कितविपक्षवृत्ति अनैकान्तिकहेत्वाभासका उदाहरण है ॥ ३३ ॥

इस वक्तृत्वहेतुका भी विपक्षमें रहना कैसे शङ्कित है, ऐसी आशङ्का होनेपर आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—क्योंकि सर्वज्ञत्वके साथ वक्तापनेका कोई विरोध नहीं है ॥ ३४ ॥

भावार्थ—किसी पुरुष-विशेषमें वक्तापना भी रह जाय और सर्वज्ञपना भी रह जाय, इन दोनों बातोंमें कोई विरोध नहीं है। इसलिए इस वक्तृत्व-हेतुको शङ्कितविपक्षवृत्ति हेत्वभास कहा गया है; क्योंकि सर्वज्ञके सद्भावरूप विपक्षमें उसके रहनेकी शङ्का है।

सर्वज्ञताके साथ वक्तापनेका अविरोध इसलिए है कि ज्ञानके उत्कर्षमें

---

१. हेतोः । २. नित्ये । ३. प्रमेयत्वस्य । ४. सर्वज्ञे । ५. यत्र ज्ञानस्य क्षण क्षण प्रत्यधिकत्वं तत्र वचनस्याप्यधिकत्वमित्यविरोध इति । ६. हानि-।

विपक्षेऽप्यविरुद्धवृत्तिरनैकान्तिकः ॥३०॥

अपिशब्दान्न केवलं पक्ष-सपक्षयोरिति द्रष्टव्यम् । स च द्विविधो विपक्षे निश्चित-वृत्तिः शङ्कितवृत्तिश्चेति । तत्राद्यं दर्शयन्नाह—

निश्चितवृत्तिरनित्यः शब्दः प्रमेयत्वाद् घटवत् ॥३१॥

सूत्रार्थ—जिसका विपक्षमे भी रहना अविरुद्ध है अर्थात् जो हेतु पक्ष-सपक्षके समान विपक्षमें भी विना किसी विरोधके रहता है, उसे अनैकान्तिक हेत्वाभास कहते हैं ॥३०॥

सूत्र-पठित अपिशब्दसे न केवल पक्ष-सपक्षमें रहनेवाला हेतु लेना, किन्तु विपक्षमें भी रहनेवाले हेतुका ग्रहण करना चाहिए। वह अनैकान्तिक हेत्वाभास दो प्रकारका है—एक विपक्षमे निश्चितवृत्तिवाला और दूसरा शङ्कितवृत्तिवाला।

भावार्थ—सन्दिग्ध साध्यवाले धर्मीको पक्ष कहते हैं। साध्यके समान धर्मवाले धर्मीको सपक्ष कहते हैं और साध्यसे विरुद्ध धर्मवाले धर्मीको विपक्ष कहते हैं। हेतुका पक्ष और सपक्षमें रहना तो गुण है, परन्तु विपक्षमें रहना दोष है। जो हेतु पक्ष-सपक्षके समान विपक्षमें भी रहे, उसे अनैकान्तिक या व्यभिचारी हेतु कहते हे। इसके दो भेद हैं—एक निश्चितविपक्षवृत्ति और दूसरा शङ्कितविपक्षवृत्ति।

इनमेंसे आचार्य पहले निश्चितविपक्षवृत्तिका स्वरूप दिखलाते हैं—

सूत्रार्थ—शब्द अनित्य है; क्योंकि वह प्रमेय है, अर्थात् प्रमाणका

---

१. एकस्मिन् अन्ते नियतो हि ऐकान्तिकः, तद्विपरीतोऽनैकान्तिकः। पक्ष-सपक्ष-विपक्षवृत्तिरनैकान्तिक इत्यर्थः। पराभ्युपगतश्च पक्षत्रयव्यापकाद्यनैकान्तिकप्रपञ्च एतल्लक्षणलक्षिताविशेषान्नातोऽर्थान्तरम्। पक्षत्रयव्यापको यथा—अनित्यः शब्दः प्रमेयत्वात्। सपक्षविपक्षैकदेशवृत्तिर्यथा—नित्यः शब्दोऽमूर्तत्वात्। पक्षसपक्षव्यापको विपक्षैकदेशवृत्तिर्यथा—गौरयं विषाणित्वात्। पक्षविपक्षव्यापकः सपक्षैकदेशवृत्तिर्यथा—अगौरयं विषाणित्वात्। पक्षत्रयैकदेशवृत्तिर्यथा—अनित्ये वाङ्मनसी अमूर्तत्वात्। पक्षसपक्षैकदेशवृत्तिर्विपक्षव्यापको यथा—द्रव्याणि दिक्कालमनांसि अमूर्तत्वात्। पक्षविपक्षैकदेशवृत्तिः सपक्षव्यापको यथा—अद्रव्याणि दिक्कालमनांसि, अमूर्तत्वात्। सपक्षविपक्षव्यापकः पक्षैकदेशवृत्तिर्यथा—पृथिव्यप्तेजोवाय्वाऽऽकाशानि अनित्यानि, अगन्धवत्त्वात्। २. पक्षसपक्षवृत्तिरनैकान्तिको न भवत्येवेत्यपिशब्देन सूचितं भवति। ३. भेदम्। ४. ज्ञेयत्वात्।

यथाऽनुष्णोऽग्निर्द्रव्यत्वादित्यादौ किञ्चित्कर्तुमशक्यत्वात् ॥३८॥

अकिञ्चित्करत्वमिति शेषः।

अयं च दोषो हेतुलक्षणविचारावसर एव, न वादकाल इति व्यक्तीकुर्वन्नाह—

लक्षण[1] एवासौ[2] दोषो व्युत्पन्नप्रयोगस्य [3]पक्षदोषेणैव दुष्टत्वात् ॥३९॥

सूत्रार्थ—जैसे अग्नि उष्ण नहीं है; क्योंकि वह द्रव्य है; इत्यादि अनुमानमें प्रयुक्त यह हेतु साध्यकी कुछ भी सिद्धि करनेके लिए शक्य नहीं है ॥३८॥

अतएव यह अकिञ्चित्करहेत्वाभास है, इतना पद सूत्रमें शेष है।

भावार्थ—अग्नि उष्ण नहीं है, यह बात प्रत्यक्षप्रमाणसे ही बाधित है; फिर भी उस प्रत्यक्षबाधित साध्यको सिद्ध करनेके लिए जो द्रव्यत्व हेतु दिया गया है, वह अग्निको उष्णता-रहित सिद्ध नहीं कर सकता है, अतः उसे अकिञ्चित्कर हेत्वाभास कहा गया है। इसी प्रकार अनुमानादि प्रमाण-बाधित साध्योंके सिद्ध करनेके लिए दिये गये सभी हेतु अकिञ्चित्कर हेत्वाभास जानना चाहिए।

यह अकिञ्चित्कर दोष हेतुके लक्षणका विचार करनेके समय ही है; वादकाल अर्थात् शास्त्रार्थके समय नहीं; यह प्रकट करते हुए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—यह अकिञ्चित्कर हेत्वाभासरूप दोष हेतुके लक्षण-व्युत्पादन कालमें ही है; वादकालमें नहीं; क्योंकि व्युत्पन्न पुरुषका प्रयोग तो पक्षके दोषसे ही दूषित हो जाता है ॥ ३९ ॥

भावार्थ—शिष्योंको शास्त्रके पठन-पठान कालमें ही अकिञ्चित्कर हेत्वाभासको दोषरूप कहा गया है; शास्त्रार्थ करनेके समय नहीं। इसका कारण यह है कि शास्त्रार्थके समय विद्वान् लोगोंका ही अधिकार होता है। सो विद्वान् लोग पहले तो ऐसा प्रयोग करते ही नहीं है। यदि कदाचित् करें भी, तो वह पक्षाभास ही कहा जायगा। अर्थात् साध्यके सिद्ध होते हुए ऐसे पक्षका प्रयोग सिद्ध पक्षाभास कहलायगा और बाधित साध्यके होनेपर बाधित पक्षाभास कहलायगा। यहाँ इतना और विशेष जानना चाहिए कि नैयायिकादि अन्य मत वालोंने प्रकरणसम और कालात्ययापदिष्ट नामक और भी हेत्वाभास कहे हैं, उनका इसी अकिञ्चित्कर हेत्वाभासमें अन्तर्भाव हो जाता है, अतः आचार्यने उन्हें पृथक् नहीं कहा।

इस प्रकार हेत्वाभासोंका वर्णन समाप्त हुआ।

---

१. लक्षणव्युत्पादनशास्त्रे। २. अकिञ्चित्करलक्षणो दोषः। ३. पक्षाभासलक्षणेनैव।

'अकिञ्चित्करस्वरूपं निरूपयति—

सिद्धे[2] प्रत्यक्षादिबाधिते च साध्ये हेतुरकिञ्चित्करः[3] ॥३५॥

तत्र सिद्धे साध्ये हेतुरकिञ्चित्कर इत्युदाहरति—

सिद्धः श्रावणः शब्दः शब्दत्वात्[4] ॥३६॥

कथमस्या[5]किञ्चित्करत्वमित्याह—

किञ्चिदकरणात् ॥३७॥

'अपरं च भेदं प्रथमस्य[7] दृष्टान्तीकरणद्वारेणोदाहरति—

वचनोंका अपकर्ष नहीं देखा जाता है, प्रत्युत प्रकर्षता ही देखी जाती है। यह बात प्रायः पहले निरूपण की जा चुकी है।

अब अकिञ्चित्कर हेत्वाभासके स्वरूपका निरूपण करते हैं—

सूत्रार्थ—साध्यके सिद्ध होनेपर और प्रत्यक्षादि प्रमाणोंसे बाधित होनेपर प्रयुक्त हेतु अकिञ्चित्कर हेत्वाभास कहलाता है ॥ ३५ ॥

भावार्थ—जब साध्य सिद्ध हो, या प्रत्यक्षादि किसी प्रमाणसे बाधित हो, तब उसकी सिद्धिके लिए जो भी हेतु दिया जाय, वह साध्यकी कुछ भी सिद्धि नहीं करता है, इसलिए उसे अकिञ्चित्कर कहते हैं।

इनमेंसे साध्यके सिद्ध होनेपर दिया गया हेतु अकिञ्चित्कर है, इसका उदाहरण देते है—

सूत्रार्थ—शब्द श्रावण है अर्थात् श्रवण इन्द्रियका विषय है; क्योंकि वह शब्द है ॥ ३६ ॥

इस शब्दत्वहेतुके अकिञ्चित्करता कैसे है, आचार्य इस प्रश्नका उत्तर देते हैं—

सूत्रार्थ—क्योंकि इस शब्दत्वहेतुने कुछ भी नहीं किया है ॥ ३७ ॥

भावार्थ—शब्दका कानसे सुना जाना रूप साध्य तो पहलेसे ही सिद्ध है, फिर भी उसे सिद्ध करनेके लिए जो शब्दत्व हेतु दिया गया है, वह व्यर्थ है; क्योंकि उससे साध्यकी कुछ भी सिद्धि नहीं होती है। अतः यह अकिञ्चित्करहेत्वाभास है।

अब साध्यका दूसरा भेद जो प्रत्यक्षादिबाधित है, उसे प्रथम भेदके दृष्टान्त करनेके द्वारा ही उदाहरण रूपसे कहते हैं—

---

१. प्रकरणसम-कालात्ययापदिष्टयोरत्रैवान्तर्भावः २. प्रमाणान्तरात्साध्ये निर्णीते। ३. न किञ्चित्करोतीत्यकिञ्चित्करः। ४. न ह्यसौ स्वसाध्यं साधयति, तस्याध्यक्षादेव सिद्धेः। ५. शब्दत्वादित्यस्य हेतोः यथा द्रव्यत्वादिति हेतुरकिञ्चित्करः, तथा सोऽपीत्यर्थः। ६. प्रत्यक्षादिबाधितं च दर्शयति। ७. साध्यस्य।

साध्यव्याप्तं साधनं दर्शनीयमिति दृष्टान्तावसरे प्रतिपादितम्, तद्विपरीतदर्शनमपि तदाभासमित्याह—

[1]विपरीतान्वयश्च यदपौरुषेयं तदमूर्त्तम् ॥४२॥

कुतोऽस्य तदाभासतेत्याह—

[2]विद्युदादिनाऽतिप्रसङ्गात् ॥४३॥

तस्याप्यमूर्ततापातेरित्यर्थः ।

व्यतिरेकोदाहरणाभासमाह—

व्यतिरेकेऽ[3]सिद्धतद्व्यतिरेकाः[4] परमाण्विन्द्रियसुखाऽऽकाशवत् ॥४४॥

साध्यसे व्याप्त साधनको दिखलाना चाहिए, यह बात अन्वयदृष्टान्तके अवसरमें प्रतिपादन की गई है, उससे विपरीत व्याप्तिको दिखलाना भी अन्वयदृष्टान्ताभास है, आचार्य यह बात कहते हैं—

सूत्रार्थ—पूर्वोक्त अनुमानमें 'जो अपौरुषेय होता है, वह अमूर्त्त होता है' इस प्रकारकी विपरीत अन्वय व्याप्तिको दिखलाना विपरीतान्वय नामका दृष्टान्ताभास है ॥४२॥

भावार्थ—साधनके सद्भावमें साध्यके सद्भावके बतलानेको अन्वयव्याप्ति कहते हैं। किन्तु यहाँ पर अपौरुषेयरूप साध्यके सद्भावमें अमूर्त्तरूप हेतुका सद्भाव बतलाया गया है, अतः इसे विपरीतान्वय नामका दृष्टान्ताभास कहा गया है।

इसे दृष्टान्ताभासपना कैसे है, आचार्य इस प्रश्नका उत्तर देते हैं—

सूत्रार्थ—क्योंकि उसमें विद्युत् आदिसे अतिप्रसङ्ग दोष आता है ॥४३॥

'जो अपौरुषेय हो, वह अमूर्त्त हो' ऐसी विपरीत अन्वयव्याप्तिके माननेपर विद्युत्के भी अमूर्त्तताकी प्राप्ति होती है, अर्थात् बिजलीको भी अमूर्त्त मानना चाहिए। पर वह अपौरुषेय होती हुई भी अमूर्त्त नहीं, किन्तु मूर्त्त है।

अब आचार्य व्यतिरेक उदाहरणभासको कहते हैं—

सूत्रार्थ—व्यतिरेक दृष्टान्ताभासमें भी तीन भेद हैं—असिद्धसाध्य व्यतिरेक, असिद्धसाधन व्यतिरेक और असिद्धोभय व्यतिरेक। इनके उदाहरण क्रमसे परमाणु, इन्द्रिय-सुख और आकाश हैं ॥४४॥

---

१. विपरीतान्वयो व्याप्तिप्रदर्शनं यस्मिन्निति यथा—योऽग्निमान् स धूमवान् इति यथा। २. विद्युद्घनकुसुमादौ ह्यपौरुषेयत्वेऽप्यमूर्त्तत्वं नास्ति। ३. असिद्धस्तेषा साध्यसाधनोभयानां व्यतिरेको येषु ते। ४. योऽपौरुषेयो न भवति सोऽमूर्त्तोऽपि न भवति, यथा परमाणुरिति।

दृष्टान्तोऽन्वयव्यतिरेकभेदाद् द्विविध इत्युक्तम् । तत्रान्वयदृष्टान्ताभासमाह—

दृष्टान्ताभासा अन्वयेऽसिद्धसाध्यसाधनोभयाः ॥४०॥

साध्यं च साधनं च उभयं च साध्यसाधनोभयानि, असिद्धानि तानि येष्विति विग्रहः ।

एतानेकस्मिन्नेवानुमाने दर्शयति—

अपौरुषेयः शब्दोऽमूर्त्तत्वादिन्द्रियसुखपरमाणुघटवत् ॥४१॥

इन्द्रियसुखमसिद्धसाध्यम्; तस्य पौरुषेयत्वात् । परमाणुरसिद्धसाधनम्; तस्य मूर्त्तत्वात् । घटश्चासिद्धोभयः; पौरुषेयत्वान्मूर्त्तत्वाच्च ।

अन्वय और व्यतिरेकके भेदसे दृष्टान्त दो प्रकारका है, यह पहले कहा जा चुका है । उनमेंसे पहले अन्वयदृष्टान्ताभासको कहते हैं—

सूत्रार्थ—अन्वयदृष्टान्ताभासके तीन भेद हैं—असिद्धसाध्य, असिद्धसाधन और असिद्धोभय । इन्हें ही क्रमशः साध्यविकल, साधनविकल, और उभयविकल कहते हैं ॥४०॥

साध्य, साधन और उभय इन तीनों पदोंका पहले द्वन्द्व समास करना । पीछे असिद्ध हैं साध्य, साधन और उभय जिनमें, ऐसा बहुव्रीहि समास करना चाहिए ।

अब आचार्य इन तीनों ही अन्वयदृष्टान्ताभासोंको एक ही अनुमानमें दिखलाते हैं—

सूत्रार्थ—शब्द अपौरुषेय है; क्योंकि वह अमूर्त्त है । जैसे इन्द्रियसुख, परमाणु और घट ॥४१॥

इस अनुमानमें इन्द्रियसुख यह दृष्टान्त असिद्धसाध्य या साध्यविकल दृष्टान्ताभास है; क्योंकि वह पौरुपेय है । अर्थात् इन्द्रिसुख दृष्टान्तमें अपौरुपेयरूप साध्यका अभाव है । परमाणु यह दृष्टान्त असिद्ध साधन या साधनविकल दृष्टान्ताभास है; क्योंकि परमाणु मूर्त्त है । अर्थात् उसमें अमूर्त्तरूप साधन नहीं पाया जाता । घट यह दृष्टान्त असिद्धोभय या उभयविकल दृष्टान्ताभास है; क्योंकि घट पौरुपेय भी है और मूर्त्त भी है । अर्थात् घट दृष्टान्तमें अपौरुपेयरूप साध्य और अमूर्त्तरूप साधन ये दोनो ही नहीं पाये जाते हैं ।

---

१. साध्यव्याप्तं साधनं यत्र प्रदर्श्यते सोऽन्वयदृष्टान्तः । तद्विपरीतोऽन्वयदृष्टान्ताभासः । २. इन्द्रियसुखे साधनत्वमस्ति, साध्यत्वं नास्ति । तस्मात्साध्यविकलोऽयं दृष्टान्तः ३. परमाणुषु साध्यत्वमस्ति साधनत्वं नास्ति, तस्मात्साधनविकलोऽयं दृष्टान्तः । ४. घटे तूभयमपि नास्ति तस्मादुभयविकलोऽयं दृष्टान्तः । ५. साध्ये असिद्धम् ।

बालव्युत्पत्त्यर्थं 'तत्त्रयोपगम इत्युक्तम्[1]। इदानीं तान्[2] प्रत्येव कियद्धीनताया प्रयोगाभासमाह—

बालप्रयोगाभासः पञ्चावयवेषु कियद्धीनता[3] ॥४६॥

तदेवोदाहरति—

अग्निमानयं देशो धूमवत्त्वात्, यदित्थं तदित्थं यथा महानस इति ॥४७॥

इत्यवयवत्रयप्रयोगे सतीत्यर्थः।

चतुरवयवप्रयोगे तदाभासत्वमाह—

भावार्थ—व्यतिरेक-व्याप्तिमें सर्वत्र साध्यके अभावमें साधनका अभाव दिखाया जाता है। यहाँ पर वह विपरीत दिखाई गई है अर्थात् साधनके अभावमें साध्यका अभाव बतलाया गया है। अतः इसे व्यतिरेकदृष्टान्ताभास कहा गया है; क्योंकि इस प्रकारकी व्याप्तिमें भी विद्युत् आदिसे अतिप्रसङ्ग दोष आता है।

बालव्युत्पत्तिके लिए उदाहरण, उपनय और निगमन इन तीन अवयवों को स्वीकार किया गया है, यह पहले कह आये है। अब उन ही बालजनोंके प्रति उनमेंसे कुछ अवयवोंके कम प्रयोग करनेपर वे प्रयोगाभास कहलाते हैं यह बात आचार्य बतलाते हैं—

सूत्रार्थ—अनुमानके प्रतिज्ञा, हेतु, उदाहरण, उपनय और निगमन इन पाँच अवयवोंमेंसे कितने ही कम अवयवोंका प्रयोग करना बाल प्रयोगाभास है ॥४६॥

भावार्थ—अल्पज्ञानी पुरुषोंको उक्त पाँच अवयवोंमेंसे तीन या चार अवयवोंके प्रयोग करनेपर प्रकृत वस्तुका यथार्थज्ञान नही होता है, अतः कम अवयवोंके प्रयोगको बालप्रयोगाभास कहते हैं।

अब आचार्य इसी बालप्रयोगाभासका उदाहरण देते है—

सूत्रार्थ—यह प्रदेश अग्निवाला है; क्योंकि धूमवाला है। जो धूमवाला होता है, वह अग्निवाला भी होता है; जैसे रसोईघर ॥४७॥

यहाँ पर अनुमानके प्रतिज्ञा, हेतु और उदाहरण इन तीन ही अवयवों का प्रयोग किया गया है, अतः इसे बालप्रयोगाभास कहा है।

अब चार अवयवोंके प्रयोग करनेपर तदाभासता बतलाते हैं—

---

१. उदाहरणोपनयनिगमनानां त्रयस्योपगमः। २. येषामव्युत्पन्नानां पञ्चावयवैः परिज्ञानं न भवति तान् प्रति। ३. यो ह्यव्युत्पन्नप्रज्ञोऽनुमानप्रयोगे पञ्चावयवे गृहीतसङ्केत, स उपनय-निगमनरहितस्य निगमनरहितस्य वाऽनुमानप्रयोगस्य तदाभासता मन्यते। सूत्रद्वयेन क्रमेण तदेव दर्शयति।

अपौरुषेयः शब्दोऽमूर्तत्वादित्यत्रैवासिद्धाः साध्यसाधनोभयव्यतिरेका [1]यत्रेति विग्रहः। तत्रासिद्धसाध्यव्यतिरेकः परमाणुस्तस्यापौरुषेयत्वात्। इन्द्रियसुखमसिद्धसाधनव्यतिरेकम्। आकाशं त्वसिद्धोभयव्यतिरेकमिति।

साध्याभावे साधनव्यावृत्तिरिति व्यतिरेकोदाहरणप्रघट्टके स्थापितम्, तत्र तद्विपरीतमपि तदाभासमित्युपदर्शयति—

विपरीतव्यतिरेकश्च[2] यन्नामूर्त्तं तन्नापौरुषेयम्[3] ॥४५॥

शब्द अपौरुषेय है; क्योंकि वह अमूर्त्त है। इस ही अनुमानमें असिद्ध है साध्य, साधन और उभयव्यतिरेक जिस दृष्टान्तमें, ऐसा विग्रह करना चाहिए। उनमें असिद्धसाध्यव्यतिरेकका दृष्टान्त परमाणु है; क्योंकि उसके अपौरुषेयपना पाया जाता है। असिद्ध साधन-व्यतिरेक या साधनविकलव्यतिरेकदृष्टान्ताभासका उदाहरण इन्द्रियसुख है; क्योंकि वह मूर्त्त नहीं है, किन्तु अमूर्त्त है। आकाश असिद्धोभयव्यतिरेक या उभयविकलव्यतिरेक दृष्टान्ताभासका उदाहरण है; क्योंकि उसमें अपौरुषेयपना और अमूर्त्तपना दोनोका ही अभाव नहीं है, प्रत्युत सद्भाव है।

भावार्थ—जो दृष्टान्त व्यतिरेक-व्याप्ति अर्थात् साध्यके अभावमें साधनका अभाव दिखाकर दिया जाता है, उसे व्यतिरेकदृष्टान्त कहते है। उस व्यतिरेकव्याप्तिमें दो वस्तुएँ होती है। एक साध्याभाव और दूसरा साधनाभाव। जिस दृष्टान्तमें साध्यका अभाव नहीं होगा वह साध्यसे, जिसमें साधनका अभाव नहीं होगा, वह साधनसे और जिसमें दोनो नहीं होंगे वह उभयसे विकल अर्थात् रहित कहा जायगा।

साध्यके अभावमें साधनकी व्यावृत्तिको व्यतिरेक-व्याप्ति कहते हैं, यह बात व्यतिरेकोदाहरणके प्रकरणमें सिद्ध की जा चुकी है। उससे विपरीत व्याप्ति भी जहाँ वतलाई जावे, वह भी व्यतिरेक दृष्टान्ताभास है, यह बात आचार्य बतलाते है—

सूत्रार्थ—पूर्वोक्त अनुमानमें 'जो अमूर्त्त नहीं है, वह अपौरुषेय नहीं है, इस प्रकारसे विपरीत व्यतिरेक-व्याप्तिको दिखाना भी व्यतिरेक दृष्टान्ताभास है ॥४५॥

---

१. दृष्टान्ते। २. यत्र धूमवान् तत्राग्निमानिति। ३. कुतोऽस्य तदाभासतेत्याह विद्युदादिनाऽतिप्रसङ्गात्।

रागद्वेषमोहाक्रान्तपुरुषवचनाज्जातमागमाभासम् ॥५१॥

उदाहरणमाह—

यथा नद्यास्तीरे मोदकराशयः सन्ति, धावध्वं माणवकाः ॥५२॥

कश्चिन्माणवकैराकुलीकृतचेतास्तत्सङ्गपरिजिहीर्षया प्रतारणवाक्येन नद्या देशं तान् प्रस्थापयतीत्याप्तोक्तेरन्यत्वादागमाभासत्वम् ।

प्रथमोदाहरणमात्रेणातुष्यन्नुदाहरणान्तरमाह—

अङ्गुल्यग्रे हस्तियूथशतमास्त इति च ॥५३॥

अत्रापि साङ्ख्यः स्वदुरागमजनितवासनाहितचेता[2] दृष्टेष्टविरुद्धं सर्वं सर्वत्र विद्यत इति मन्यमानस्तथोपदिशतीत्यनाप्तवचनत्वादिदमपि[4] तथेत्यर्थः ।

कथमनन्तरयोर्वाक्ययोस्तदाभासत्वमित्याशङ्कायामाह—

सूत्रार्थ—राग, द्वेष और मोहसे आक्रान्त (व्याप्त) पुरुषके वचनोंसे उत्पन्न हुए पदार्थके ज्ञानको आगमाभास कहते है ॥५१॥

अब आगमाभासका उदाहरण कहते हैं—

सूत्रार्थ—जैसे—बालको दौड़ो, नदीके किनारे मोदकोंकी राशियां पड़ी हुई हैं ॥५२॥

कोई पुरुष बालकोंसे व्याकुलित चित्त था उसने उनका संग छुड़ानेकी इच्छासे छलपूर्ण वाक्य कहकर उन्हें नदीके तट-प्रदेशपर भेजा। वस्तुतः नदीके किनारेपर मोदक नही थे। इसलिए यह कथन आप्त अर्थात् प्रामाणिक पुरुषके कथनसे विपरीत है, अतः यह आगमाभासका उदाहरण है।

केवल इस एक प्रथम उदाहरणसे सन्तुष्ट नहीं होते हुए आचार्य आगमाभासका दूसरा उदाहरण देते है—

सूत्रार्थ—अंगुलीके अग्रभागपर हाथियोके सैकड़ो समुदाय विद्यमान है, यह कहना भी आगमाभास है ॥५३॥

इस उदाहरणमे भी सांख्य अपने मिथ्याआगम-जनित वासनासे आक्रान्त चित्त होकर प्रत्यक्ष और अनुमानसे विरुद्ध सभी वस्तुएँ सर्वत्र विद्यमान है, ऐसा प्रमाण मानते हुए उक्त प्रकारसे उपदेश देते है' किन्तु उनका वह कथन भी अनाप्त पुरुषके वचनरूप होनेसे आगमाभास ही है।

इन ऊपर कहे गये दोनो वाक्योंके आगमाभासपना कैसे है, ऐसी आशङ्का होनेपर आचार्य उत्तर देते हैं—

---

१. अर्थज्ञानमिति यावत्। २. संस्कृतचेताः। ३. नद्यास्तीरे इत्यादिवत्। अङ्गुल्यग्र इत्यादिवाक्यवत्। ४. आगमाभासमिति।

धूमवांश्चायमिति वा ॥४८॥

अवयवविपर्यये[1]ऽपि [2]तत्त्वमाह—

तस्मादग्निमान् धूमवांश्चायम् ॥४९॥

कथमवयवविपर्यये प्रयोगाभास इत्याशंकायामाह—

स्पष्टतया [3]प्रकृतप्रतिपत्तेरयोगात् ॥५०॥

इदानीमागमाभासमाह—

सूत्रार्थ—अथवा उपनयका भी प्रयोग करना कि यह भी धूमवाला है ॥४८॥

भावार्थ—ऊपर कहे गये तीन अवयवोंके साथ उपनयका प्रयोग करना और निगमनका प्रयोग नहीं करना भी बालप्रयोगाभास है।

अवयवोंके विपरीत प्रयोग करनेपर भी प्रयोगाभासपना होता है, आचार्य यह बतलाते हैं—

सूत्रार्थ—इसलिए यह अग्निवाला है, और यह भी धूमवाला है ॥४९॥

भावार्थ—उदाहरणका प्रयोगकर उपनयका प्रयोग करना चाहिए कि 'उसीके समान यह भी धूमवाला है'। तत्पश्चात् निगमनका प्रयोग करना चाहिए कि 'इसलिए यह अग्निवाला है। परन्तु यहाँ पर पहले निगमनका प्रयोग किया गया है। और पीछे उपनयका। अतः क्रम-भङ्ग होनेसे यह बाल-प्रयोगाभास है।

अवयवके विपरीत प्रयोग करनेपर प्रयोगाभास कैसे कहा? ऐसी आशङ्का होनेपर आचार्य उत्तर देते हैं—

सूत्रार्थ—क्योंकि विपरीत अवयव-प्रयोग करनेपर स्पष्टरूपसे प्रकृत पदार्थका ज्ञान नहीं होता ॥५०॥

भावार्थ—पाँच अवयवोंमेंसे हीन प्रयोग या विपरीत प्रयोग करनेपर शिष्यादिकको प्रकृत वस्तुका यथार्थ बोध नहीं हो पाता, इसलिए उन्हें बाल-प्रयोगाभास कहा गया है।

अब आचार्य आगमाभासका स्वरूप कहते हैं—

---

१. न केवलं कियद्धीनतैव बालप्रयोगाभासः, किन्तु तद्विपर्ययश्चेति प्रदर्श्यते। २. बालप्रयोगाभासत्वम्। ३. केवलं बालव्युत्पत्त्यर्थमयं प्रयोगाभासो न पुनः व्युत्पन्न-प्रज्ञं प्रति। सर्व प्रकारेण वाक्प्रयोगे व्युत्पन्नप्रज्ञस्य केनापि प्रकारेणानुमानप्रयोगस्य ग्रहण-सम्भवात्।

अतद्विषयत्वादप्रत्यक्षविषयत्वादित्यर्थः। शेषं सुगमम्। प्रपञ्चितमेवैतत्सङ्ख्याविप्रतिपत्तिनिराकरण इति नेह पुनरुच्यते।

[1]इतरवादिप्रमाणेयत्तावधारणमपि विघटत इति लौकायतिक[2]दृष्टान्तद्वारेण [3]तन्मतेऽपि सङ्ख्याभासमिति दर्शयति—

सौगतसाङ्ख्ययौगप्राभाकरजैमिनीयानां[4]प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावैरेकैकाधिकैर्व्याप्तिवत्[5] ॥५७॥

यथा प्रत्यक्षादिभिरेकैकाधिकैर्व्याप्तिः प्रतिपत्तुं न शक्यते[6] सौगतादिभिस्तथा प्रत्यक्षेण लौकायतिकैः परबुद्ध्यादिरपीत्यर्थः।

प्रत्यक्षको ही प्रमाण मानना इसलिए संख्याभास है कि प्रत्यक्षसे परलोक आदिका निषेध और परकी बुद्धि आदिकी सिद्धि नहीं होती है; क्योंकि वे उसके विषय नहीं हैं ॥५६॥

उसके विषय नहीं हैं अर्थात् प्रत्यक्षके विषय नहीं हैं; किन्तु उससे भिन्न अनुमानादि प्रमाणोंके विषय हैं, ऐसा अर्थ जानना चाहिए। शेष सूत्रार्थ सुगम है; क्योंकि इसका पहले, संख्या-विप्रतिपत्तिके निराकरणके समय विस्तारसे निरूपण किया जा चुका है, इसलिए यहाँ पर पुनः नहीं कहते हैं।

इसी प्रकार बौद्धादि अन्य वादियोंके द्वारा मानी गई प्रमाणकी संख्याका नियम भी विघटित होता है, अतः चार्वाकके दृष्टान्त-द्वारा बौद्धादिके मतमें भी संख्याभासपना है, यह दिखलाते हैं—

सूत्रार्थ—जिस प्रकार सौगत, सांख्य, यौग, प्राभाकर और जैमिनीयोंके प्रत्यक्ष, अनुमान, आगम, उपमान, अर्थापत्ति और अभाव; इन एक-एक अधिक प्रमाणोंके द्वारा व्याप्ति विषय नहीं की जाती है ॥५७॥

जैसे सौगतादिके द्वारा माने गये एक-एक अधिक प्रत्यक्षादि प्रमाणोंसे व्याप्ति नहीं जानी जा सकती है, उसी प्रकार एक प्रत्यक्षप्रमाणसे चार्वाकोंके द्वारा अन्य मनुष्यकी बुद्धि आदिक भी नहीं जाने जा सकते हैं, यह सूत्रका अर्थ है।

भावार्थ—चार्वाक प्रमाणकी प्रत्यक्षरूप एक ही संख्या मानते हैं। बौद्ध प्रत्यक्ष और अनुमान इन दो को; सांख्य प्रत्यक्ष अनुमान और आगम इन तीन को; यौग प्रत्यक्ष अनुमान, आगम और उपमान इन चार को;

लौकायतिकस्य प्रत्यक्षतः परलोकादिनिषेधस्य परबुद्ध्यादेश्च कुतोऽसिद्धिरित्याह। १. सौगतादि। २. चार्वाकस्य। ३. सौगतमते। ४. मते। ५. व्याप्तिर्न सिद्ध्यति पूर्वोक्तप्रत्यक्षादिप्रमाणाविषयत्वात्तथा प्रकृतमपि। ६. तर्कं विना।

विसंवादात्[1] ॥ ५४ ॥

अविसंवादरूपप्रमाणलक्षणाभावान्न [2]तद्विशेषरूपमपीत्यर्थः[3]।

इदानीं संख्याभासमाह—

प्रत्यक्षमेवैकं प्रमाणमित्यादि सङ्ख्याभासम् ॥५५॥

प्रत्यक्षपरोक्षभेदाद् द्वैविध्यमुक्तम्। तद्वैपरीत्येन प्रत्यक्षमेव, प्रत्यक्षानुमाने एवेत्यवधारणं सङ्ख्याभासम्।

प्रत्यक्षमेवैकमिति कथं सङ्ख्याभासमित्याह—

लौकायतिकस्य प्रत्यक्षतः [4]परलोकादिनिषेधस्य [5]परबुद्ध्यादेश्[6]चासिद्धेरतद्विषयत्वात्[7] ॥५६॥

सूत्रार्थ—विसंवाद होनेसे उनके आगमाभासपना है॥५४॥

प्रमाणका जो अविसवादरूप लक्षण माना गया है उसके अभाव होनेसे जब उन वाक्योंमें प्रमाणपना ही नहीं है, तब उन्हें आगमसूत्र प्रमाण-विशेष कैसे माना जा सकता है

भावार्थ—जिन पुरुषोके वचनोंमें विसंवाद, विवाद, पूर्वापर विरोध या विपरीत अर्थ-प्रतिपादकपना पाया जाता है, उन्हें आगमरूपसे प्रमाण नहीं माना जा सकता। सांख्यादिके उपर्युक्त वचन इसी प्रकारके हैं, अतः वे आगमाभास हैं।

इस प्रकार प्रमाणके स्वरूपाभासोंका वर्णन हुआ।

अब प्रमाणके संख्याभासका वर्णन करते हैं—

सूत्रार्थ—प्रत्यक्ष ही एक प्रमाण है, इत्यादि कहना संख्याभास है ॥५५॥

प्रत्यक्ष और परोक्षके भेदसे प्रमाण दो प्रकारका है, यह पहले कहा जा चुका है। उससे विपरीत प्रत्यक्ष ही एक प्रमाण है, अथवा प्रत्यक्ष और अनुमान ये ही दो प्रमाण हैं, अन्य नहीं, ऐसा अवधारण (नियम या निश्चय) करना सो संख्याभास है।

प्रत्यक्ष ही एक प्रमाण है, यह कहना कैसे संख्याभास है? आचार्य इस प्रश्नका उत्तर देते हैं—

सूत्रार्थ—लौकायतिक अर्थात् नास्तिकमती चार्वाकका केवल एक

---

१. अलीकत्वात्। प्रतिपन्नार्थविचलनं हि विसंवादो विपरीतार्थोपस्थापकप्रमाणावसेयः। २. तद्विशेषोऽपीति पाठान्तरम्। नद्यास्तीरे इत्यादिवाक्यद्वयज्ञानमागमस्वभावान्न भवति, किन्तु आगमाभासमेवेति। ३. प्रमाणविशेषरूपमागमत्वमित्यर्थः। ४. आगमस्य। ५. आत्मा। ६. अनुमानस्य। ७. प्रत्यक्षाविषयत्वात्।

सौगतादीनामिति शेषः। किञ्च प्रत्यक्षैकप्रमाणवादिना[1] प्रत्यक्षाद्येकैकाधिकप्रमाणवादिभिश्च[2] स्वसंवेदनेन्द्रियप्रत्यक्षभेदोऽनुमानादिभेदश्च [3]प्रतिभासभेदेनैव वक्तव्यो गत्यन्तराभावात्। स च [4]तद्भेदो लौकायतिकं प्रति प्रत्यक्षानुमानयोरितरेषां[5] व्याप्तिज्ञानप्रत्यक्षादिप्रमाणेष्विति सर्वेषां प्रमाणसङ्ख्या विघटते। तदेव दर्शयति—

[6]प्रतिभासभेदस्य च भेदकत्वात्[7] ॥६०॥

इदानीं विषयाभास मुपदर्शयितुमाह—

विषयाभासः सामान्यं विशेषो द्वयं वा स्वतन्त्रम्[8] ॥६१॥

सूत्रमें 'सौगतादीनाम्' यह पद शेष है, उसे ऊपरसे अध्याहार किया गया है।

यहाँ विशेष यह है कि एक प्रत्यक्षप्रमाणवादी चार्वाकको, तथा प्रत्यक्षादि एक-एक अधिक प्रमाणवादी सौगतादिकको प्रत्यक्षके स्वसंवेदन और इन्द्रियप्रत्यक्षरूप भेद, तथा प्रमाणोंके अनुमानादि भेद प्रतिभासके भेदसे अर्थात् उनकी सामग्री और स्वरूपके भेदसे कहना ही पड़ते हैं; क्योंकि उनके माने विना और कोई गति नहीं है। वह प्रतिभासका भेद चार्वाकके प्रति प्रत्यक्ष और अनुमानमें, तथा सौगतादि अन्य मतवालोंके व्याप्तिज्ञान और प्रत्याक्षादि प्रमाणोंमें अनुभवगोचर है, इसलिए उन सभीकी प्रमाणसंख्या विघटित हो जाती है। आचार्य यही बात उत्तर सूत्रके द्वारा दिखलाते हैं—

सूत्रार्थ—प्रतिभासका भेद ही प्रमाणोंका भेदक होता है ॥ ६० ॥

भावार्थ—पदार्थके स्वरूपका प्रतिभास अर्थात् विभिन्न प्रतीतिरूप ज्ञान जितने प्रकारका होगा, उतने ही प्रकारके प्रमाण मानना पड़ते हैं। यही कारण है कि अनुमानकी भिन्न प्रतीतिसे चार्वाकको और तर्कज्ञानकी भिन्न प्रतीतिसे सौगतादिककी प्रमाण-संख्या विघटित हो जाती है।

इस प्रकार संख्याभासका वर्णन हुआ।

अब प्रमाणके विषयाभासको दिखलानेके लिए आचार्य उत्तर सूत्र कहते हैं—

सूत्रार्थ—केवल सामान्यको, अथवा केवल विशेषको, अथवा स्वतन्त्र दोनोंको प्रमाणका विषय मानना विषयाभास है ॥ ६१ ॥

---

१. चार्वाकेण। २. सौगतादिभिः। ३. सामग्रीस्वरूपभेदेन। ४. प्रतिभासभेदश्च। ५. सौगतादीनाम्। ६. अस्तु प्रामाण्यमनुमानस्य। किन्तु तत्प्रत्यक्ष एवान्तर्भविष्यतीत्युक्ते सत्याऽऽह। ७. ततः प्रत्यक्षेऽनुमानस्यान्तर्भावाभावः। ८. अन्योन्यनिरपेक्षम्।

अथ [1]परबुद्ध्या[2]दिप्रतिपत्तिः प्रत्यक्षेण माभूदन्यस्माद्भविष्यतीत्याशङ्क्याऽऽह—

अनुमानादेस्तद्विषयत्वे प्रमाणान्तरत्वम् ॥५८॥

तच्छब्देन परबुद्धयादिरभिधीयते। अनुमानादेः परबुद्धयादिविषयत्वे प्रत्यक्षैकप्रमाणवादो हीयत इत्यर्थः।

[3]अत्रोदाहरणमाह—

तर्कस्येव[4] [5]व्याप्तिगोचरत्वे प्रमाणान्तरत्वमप्रमाणस्याव्यवस्थापकत्वात् ॥५९॥

प्राभाकर प्रत्यक्ष, अनुमान, आगम, उपमान और अर्थापत्ति इन पाँचको तथा जैमिनीय उक्त पाँच सहित अभावको अर्थात् छहको प्रमाण मानते हैं। किन्तु इन सभीके द्वारा माने गये प्रमाणोंसे व्याप्ति अर्थात् अविनाभावका ग्रहण नहीं होता है, अतः उसे ग्रहण करनेवाले तर्कप्रमाणका मानना आवश्यक हो जाता है। और उसे प्रमाण माननेपर सभीकी प्रमाण-संख्या विघटित हो जाती है। इसलिए यह सिद्ध हुआ कि सौगतादि अन्य मतावलम्बियोंके द्वारा मानी गई प्रमाण-संख्या यथार्थ नहीं, किन्तु अयथार्थ है; अर्थात् संख्याभास है।

यहाँपर चार्वाकका कहना है कि पराई बुद्धि आदिकका ज्ञान यदि प्रत्यक्षसे नहीं होता, तो न होवे; अन्य अनुमानादिसे हो जायगा? ऐसी आशङ्कापर आचार्य कहते है—

सूत्रार्थ—अनुमानादिके पर-बुद्धि आदिकका विषयपना माननेपर अन्य प्रमाणोंके माननेका प्रसङ्ग आता है ॥ ५८ ॥

सूत्रोक्त 'तत्' शब्दसे पर-बुद्धि आदिक कहे गये हैं। अनुमानादिको पर-बुद्धि आदिका विषय करनेवाला माननेपर एक प्रत्यक्ष ही प्रमाण है यह कथन विघटित हो जाता है, यह सूत्रका समुच्चय अर्थ है।

आचार्य इसी विषयमें उदाहरण देते हैं—

